नं: २८१६-घ

श्रीमद्भगवद्गीतायाः षष्ठोऽध्यायः

षोडशटीकासहितम् एवञ्च सप्तदशसं० भाषानुवादसहितम्

पत्राणि २१८

षष्ठोध्याय

शांकर भाष्य
आनंदगिरिकृत टी.
श्रीधरी स्वामिकृत
पिशाचभाष्य
रामानुजभाष्य
अभिनवशंकरी
परमार्थप्रपा
वनमाली
उत्कर्षवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद ॥

श्रीभगवानुवाच अनाश्रितः कर्मफलं कार्यं कर्म क
रोति यः स संन्यासी च योगी च न निरग्निर्न चाक्रियः १

शाङ्करभाष्यं

अतीतानन्तराध्यायान्ते ध्यानयोगस्य सम्यग्दर्शनं प्रत्यन्तरङ्गस्य सूत्रभूताः श्लो
काः स्पर्शान् कृत्वा बहिरित्यादय उपदिष्टास्तेषां वृत्तिस्थानीयोऽयं षष्ठोऽध्याय आर
भ्यते तत्र ध्यानयोगस्य बहिरङ्गं कर्मेति यावद्ध्यानयोगारोहणसमर्थस्ताव
द्गृहस्थेनाधिकृतेन कर्तव्यं कर्मेत्यतस्तत् स्तौति अनाश्रित इति ननु कि
मर्थं ध्यानयोगारोहणसीमाकरणं यावतानुष्ठेयमेव विहितं कर्म यावज्जीवं
नारुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यत इति विशेषणादारूढस्य च शमेनैव स
म्बन्धकरणादारुरुक्षोरारूढस्य च शमः कर्म चोभयं कर्तव्यत्वेनाभिप्रेतं चेत्
स्यात्तदारुरुक्षोरारूढस्येति शमकर्मविषयभेदेन विशेषणं विभागकरणं
चानर्थकं स्यात् तत्राश्रमिणां कश्चिद्योगमारुरुक्षुर्भवत्यारूढश्च कश्चि
दन्ये नारुरुक्षवो न चारूढास्तानपेक्ष्यारुरुक्षोरारूढस्य चेति विशेषणं विभाग
करणं चोपपद्यत एवेति चेन्न तस्यैवेति वचनात् पुनर्योगग्रहणाच्च योगारू
ढस्येति य आसीत् पूर्वं योगमारुरुक्षुस्तस्यैवारूढस्य शम एव कर्तव्यः का
रणं योगफलं प्रत्युच्यत इत्यतो न यावज्जीवं कर्तव्यत्वप्राप्तिः कस्यचिदपि क
र्मणः योगविभ्रष्टवचनाच्च गृहस्थस्य चेत् कर्मिणो योगो विहितः षष्ठे
ध्याये स योगविभ्रष्टोऽपि कर्मगतिं कर्मफलं प्राप्नोतीति तस्य नाशाशङ्कानु
पपन्ना स्यादवश्यं हि कृतं कर्म काम्यं नित्यं वा मोक्षस्य नित्यत्वादनारभ्यत्वे
ऽपि स्वं फलमारभत एव नित्यस्य च कर्मणो वेदप्रमाणावबुद्धत्वात् फलेन
भवितव्यमित्यवोचामान्यथा वेदस्यानर्थक्यप्रसङ्गादिति न च कर्मणि सत्यु
भयविभ्रष्टवचनमर्थवत् कर्मिणो विभ्रंशकारणानुपपत्तेः कर्म कृतमी
श्वरे संन्यस्यतः कर्तुः कर्म फलं नारभत इति चेन्नेश्वरे संन्यासस्याधिकत
रफलहेतुत्वोपपत्तेर्मोक्षायैवेति चेत् स्वकर्मणां कृतानामीश्वरे संन्यासो मो
क्षायैव न फलान्तराय योगसहितः योगाच्च विभ्रष्ट इत्यतस्तं प्रति नाशाशङ्का
युक्तैवेति चेन्नैकाकी यतचित्तात्मा निराशीरपरिग्रहो ब्रह्मचारिव्रते स्थित इ
ति कर्मसंन्यासविधानात् न चात्र ध्यानकाले स्त्रीसहायत्वाशङ्का येनैकाकि
त्वं विधीयते न च गृहस्थस्य निराशीरपरिग्रह इत्यादिवचनमनुकूलं उभयभ्र

गी॰
टी॰
अ॰

हमस्मानुपपन्नेत्यत्र अनाश्रित इत्यनेन कर्म्मिण एव सन्न्यासित्वं योगित्वञ्चोक्तं प्र
तिषिद्धञ्च निरग्नेरक्रियस्यैव सन्न्यासित्वं योगित्वञ्चेति चेन्न ध्यानयोगं प्रति बहि
रङ्गस्य सतः कर्म्मणः फलाकांक्षा सन्न्यासस्तुतिपरत्वान्न केवलं निरग्निरक्रिय
एव सन्न्यासी योगी च किन्तर्हि कर्म्म्यपि कर्म्मफलासङ्गं सन्न्यस्य कर्म्मयोग
मनुतिष्ठन् सत्त्वशुद्ध्यर्थं सन्न्यासी योगी च भवतीति स्तूयते न चैकेन वाक्येन
कर्म्मफलासङ्गसन्न्यासस्तुतिश्चान्यार्थाश्रमप्रतिषेधश्चोपपद्यते न च प्रसिद्ध
निरग्नेरक्रियस्य परमार्थसन्न्यासिनः श्रुतिस्मृतिपुराणेतिहासयोगशास्त्रे
षु विहितं सन्न्यासित्वं योगित्वञ्च प्रतिषेधति भगवान् स्ववचनविरोधाच्च स।
र्व्वकर्म्माणि मनसा सन्न्यस्य नैव कुर्व्वन्न कारयन्नासीत मौनी सन्तुष्टो येन केनचिद
निकेतः स्थिरमतिर्विहाय कामान् यः सर्व्वान् पुमांश्चरति निःस्पृहः सर्व्वारम्भप
रित्यागीति च तत्र तत्र भगवता स्ववचनानि दर्शितानि तैर्विरुध्येत च तथा।
श्रमविप्रतिषेधस्तस्मात् मुनेर्योगमारुरुक्षोः प्रतिपन्नगार्हस्थ्यस्याग्निहोत्रादि
कर्म्मफलनिरपेक्षमनुष्ठीयमानं ध्यानयोगारोहणसाधनत्वं शुद्धिद्वारे
ण प्रतिपद्यत इति स सन्न्यासी च योगी चेति स्तूयते अनाश्रित इति अनाश्रितो
न आश्रितोऽनाश्रितः किं कर्म्मफलं कर्म्मणः फलं कर्म्मफलं यत्तदनाश्रितः
कर्म्मफलतृष्णारहित इत्यर्थः यो हि कर्म्मफले तृष्णावान् स कर्म्मफलमाश्रि
तो भवति अयन्तु तद्विपरीतोऽतोऽनाश्रितः कर्म्मफलमेवम्भूतः सन् कार्य्यं कर्त्त
व्यं नित्यं काम्यविपरीतमग्निहोत्रादिकं करोति निर्व्वर्त्तयति यः कश्चित् यई।
दृशः कर्म्मी स कर्म्मिभ्योऽन्तरेभ्यो विशिष्यत इत्येवमर्थमाह स सन्न्यासी च योगी।
चेति सन्न्यासः परित्यागः स यस्यास्ति स सन्न्यासी च योगी च योगश्चित्तसमा
धानं स यस्यास्ति स योगी चेत्येवं गुणसम्पन्नोऽयं मन्तव्यो न केवलं निरग्निरक्रि
य एव सन्न्यासी योगी चेति मन्तव्यः निर्गता अग्नयः कर्म्माङ्गभूता यस्मात् स
निरग्निरक्रियश्च अनग्निसाधना अपि अविद्यमानाः क्रियास्तपोदानादिका यस्या
सावक्रियः ननु च निरग्नेरक्रियस्यैव श्रुतिस्मृतियोगशास्त्रेषु सन्न्यासित्वं यो
गित्वञ्च प्रसिद्धं कथमिह साग्नेः सक्रियस्य सन्न्यासित्वं योगित्वञ्चाप्रसिद्धं।
मुच्यते इति नैष दोषः कयाचिद् गुणवृत्त्योभयस्य सम्पिपादयिषितत्वा
त् कथं कर्म्मफलसंकल्पसन्न्यासात् सन्न्यासित्वं योगाङ्गत्वेन च कर्म्मानु
ष्ठानात् कर्म्मफलसङ्कल्पस्य वा चित्तविक्षेपहेतोः परित्यागाद्योगित्वञ्चेति १ ॥

आनन्दगिरिटीका

ध्यानयोगप्रस्तावानन्तरं तद्योग्यताहेतुकर्म्मणः स्तुतिं भगवानुक्तवानित्याह
श्रीभगवानिति एवं मिश्राध्याययोः सङ्गतिमभिदधानो वृत्तमनूद्याध्यायान्तर
मवतारयति अतीतेति सम्यग्दर्शनप्रकरणे ध्यानयोगस्य प्रसङ्गाभावं व्युद
स्यति सम्यगिति संग्रहविवरणयोरतीतानन्तराध्याययोरुक्ते हेतुहेतुमत्त्वमि
ति भावः षष्ठाध्यायसम्बन्धमभिधायानाश्रितः कर्म्मफलमित्यादिश्लोकद्वयस्य
तात्पर्यमाह तत्रेति कर्म्मयोगस्य सन्न्यासहेतोर्मर्यादां दर्शयितुं साङ्ख्ययो
गे विचारयितुमध्यायप्रवृत्तिरस्तीति अयमर्थः सन्न्यासिना कर्तव्यं कर्म्मैवेत्येवं
प्रतिभासं व्युदस्यति गृहस्थेनेति कर्तव्यत्वे स्तुतियोग्यत्वमतःशब्दार्थः समु
च्चयवादी सीमाकरणमाक्षिपति नन्विति यावज्जीवश्रुतिवशात् ध्यानारोहण
सामर्थ्येऽस्यापि कर्म्मानुष्ठानस्य दुर्वारत्वादिति हेतुमाह यावतेति भार्यावि
योगादिप्रतिबन्धाद्यावज्जीवश्रुतिचोदितकर्म्मानुष्ठानवत् वैराग्यप्रतिबन्धा
दपि तदननुष्ठानसम्भवाद्भगवतो विशेषवचनाच्च न यावज्जीवं कर्म्मानुष्ठानप्रस
क्तिरिति परिहरति नारुरुक्षोरिति उक्तमेवार्थं व्यतिरेकद्वारेण विवृणोति आरु
रुक्षोरित्यादिना आरोढुमिच्छतीत्यारुरुक्षुरित्यत्रारोहणेच्छा विशेषणमारोह
णं कृतवानित्यत्र पुनरिच्छाविषयमन[illegible]मारोहणं विशेषणमेवं शमकर्म्मवि
षयोर्भेदेन विशेषणं मर्यादाकरणं नङ्गीकरणे विरुद्धमापद्येत तयोरेव विभा
गकरणञ्च भगवता सीमानङ्गीकारेण प्रयुक्तेत्यर्थः विशेषणविभागकरण
योरन्यथोपपत्तिमाशङ्क्य तत्रेति व्यवहारभूमिः अयमर्थः षष्ठीनिर्देशेन भवत
त्यधिकारिणां त्रैविध्यं तथापि प्रकृते विशेषणद्वैविध्यमापादनमित्याशङ्क्य तृतीयापे
क्षया तदुपपत्तिरित्याह तानपेक्ष्येति आरुरुक्षोरारूढस्य च भेदेन तस्यैवेति प्रकृ
तपरामर्शानुपपत्तिरिति निरस्यति तस्येति यद्यनारुरुक्षुं पुरुषमपेक्ष्यारुरु
क्षोरिति विशेषणं तस्यैव कर्म्मारोहणकारणमनारूढञ्च पुरुषमपेक्ष्यारूढ
स्येति विशेषणं तस्यैव शमः सन्न्यासो योगफलप्राप्तौ कारणमिति विशेषण
विभागकरणयोरुपपत्तिस्तदारुरुक्षोरारूढस्य चाभिन्नत्वात् प्रकृतपरामर्शि
नः तच्छब्दस्यानुपपत्तेर्न प्रकृतमिदं विशेषणाद्युपपादनमित्यर्थः किञ्च योग
मारुरुक्षोस्तदारोहणकारणं कर्म्मेत्युक्त्वा पुनर्योगारूढस्येति योगशब्दप्रयोगा
त् यो योगं पूर्वमारुरुक्षुरासीत्तस्यैवारूढिरिति योगमारूढस्य तत्फलप्राप्तौ क
र्म्मसन्न्यासः शमशब्दवाच्यो हेतुत्वेन कर्तव्य इति वचनादारुरुक्षोरारूढस्य च।

गी॰
टी॰
घ

2

भिन्नत्वप्रत्यभिज्ञानात्तयोर्भिन्नत्वे शङ्कितं शङ्कामित्याह पुनरिति यत्नस्या उच्यते
वज्जीवश्रुतिविरोधात् योगारोहणसीमाकरणं कर्म्मणोऽनुचितमिति तत्राहं इ
ति पूर्वोक्तरीत्या कर्म्मतत्त्यागयोर्विभागोपपत्तेः श्रुतेरन्यविषयत्वात् योगमारूरुक्ष
स्य मुमुक्षोर्जितात्मसमानस्य नित्यनैमित्तिककर्म्मस्वपि परित्यागसिद्धिरित्यर्थः।
एतस्य यावज्जीवकर्म्मकर्त्तव्यत्वं न भवतीत्याह योगेति संन्यासिनो योगभ्रष्टस्य
विनाशशङ्कावचनात् यावज्जीवकर्म्मकर्त्तव्यं प्रतिभातीत्यर्थः नन्वयोगभ्रष्टश
ब्देन गृहस्थस्यैवाभिधानात्तस्यैवास्मिन्नध्याये योगविधानाद्योगारोहणयोग्य
त्वे सत्यपि यावज्जीवकर्म्मकर्त्तव्यमिति तत्राह गृहस्थस्येति तेनापि मुमुक्षुणा
कृतस्य कर्म्मणो मोक्षातिरिक्तफलानारम्भकत्वाद्योगभ्रष्टोऽसौ छिन्नाभ्रमिव न
श्यतीति शङ्का सावकाशेत्याशङ्क्याह अवश्यपहीति अपोहतैयान्निर्दोषादेता
त् फलदायिनी कर्म्मणः स्वाभाविकी शक्तिरवराब्रह्मभावस्य वस्तुतः सिद्धत्वा
त्कर्म्मफलवत्त्वमतो मोक्षातिरिक्तस्यैव फलस्य कर्म्मारम्भकमिति कर्म्मिणो
योगभ्रष्टोऽपि कर्म्मगतिं गच्छतीति निरवकाशा शङ्केत्यर्थः ननु मुमुक्षुणा का
म्यप्रतिषिद्धयोरकरणात् कृतयोश्च नित्यनैमित्तिकयोरफलत्वात् कथं तदीय
स्य कर्म्मणो नियमेन फलारम्भकत्वं तत्राह नित्यस्य चेति चकारेण नैमित्तिकं
कर्म्मानुकृष्यते वेदप्रमाणकत्वेऽपि नित्यनैमित्तिकयोरफलत्वे दोषमाह वा
च्यं चेति कर्म्मणोऽनुष्ठितस्य फलारम्भकत्वध्रौव्यात् गृहस्थो योगभ्रष्टोऽपि कर्म्म
गतिं गच्छतीति न तस्य नाशशङ्केति शेषः इतोऽपि गृहस्थो योगभ्रष्टो शङ्कावाच्यो
न भवतीत्याह न चेति ज्ञानेकर्म्मबन्धभयं तेनाभ्रष्टयत्नश्यतीति वचनं गृहस्थ
कर्म्माणि सन्ति नार्थवद्भवितमलं तस्य कर्म्मनिष्ठस्य कर्म्मणो विभ्रंशहेतुत्वभा
वात् तत्फलस्यावश्यकत्वादित्यर्थः कृतस्य कर्म्मणो मुमुक्षुणा भगवति
समर्पणात् कर्त्तरि फलानारम्भकत्वादस्ति विभ्रंशकारणमिति शङ्कते नेत्यै। कु
ति राजाराधनबुद्ध्याधनधान्यादिसमर्पणस्यापि कफलहेतुत्वोपलम्भादीश्वरे
समर्पणं न भ्रंशकारणमिति दर्शयति तेनेत्यादिना ऐहिकफलहेतुत्वेऽपि मोक्षहे
तुत्वमिष्यतामिति शङ्कते मोक्षायेति न देवद्वारेऽयं विहरणेति स्वकर्म्मणामि
ति सहकारिसामर्थ्यात्तस्य फलान्तरे प्रवृत्त्युपायत्वासिद्धिरिति हेतुत्वस्य च यतियो
गेतिध्यानसहितस्य संन्यासस्य मोक्षोपायिकत्वे कुतो योगभ्रष्टमधिकृत्य नाशा।
ङ्केत्याशङ्क्याह योगाच्चेति सहकार्यभावे सामग्र्यभावात् फलानुपपत्तेः शङ्का

नाशाशङ्क्यार्थः ध्यानसहितमीश्वरे कर्म्म समर्पणीयमोक्षायेयमत्र प्रमाणा
भावात् गृहस्थो योगभ्रष्टशब्दवाच्यो न भवतीति दूषयति नेति गृहस्थस्य
योगभ्रष्टशब्दवाच्यत्वाभावे हेत्वन्तरमाह एकाकीति न खल्वेतानि विशेष
णानि गृहस्थसमवायीनि सम्भवन्ति तेन तस्य ध्यानयोगविध्यभावात् न ते
प्रतियोगभ्रष्टशब्दवचनमुचितमित्यर्थः एकाकिन्वचनेन गृहस्थस्यापि
ध्यानकाले स्त्रीसहायत्वाभावाभिप्रायेण भविष्यतीत्याशंक्य अग्निहोत्रा
दिवद्ध्यानस्य पत्नीसाध्यत्वाभावादयामप्रतिषेधप्रसङ्गान्मैवमित्याह न
चेति विशेषणान्तरपर्य्यालोचनयापि नायमेकाकिपाठो गृहस्थपरो
भवितुमर्हतीत्याह नचेति किन्तु गृहस्थस्यैवैकाकित्वादिविवक्षितत्वाद्ध्या
नयोगविधौ तस्य उभयभ्रष्टप्रश्नो नोपपद्यत इत्याह उभयेति नहि गृह
स्थं प्रति उभयस्मात् ज्ञानात् कर्म्मणश्च विभ्रष्टत्वमुपेत्य प्रश्नः संगच्छते न
स्य ज्ञानात् भ्रंशेपि कर्म्मणस्तदभावादनुष्ठीयमानकर्म्मभ्रंशेपि प्राग
नुष्ठितकर्म्मवशात् फलप्रतिलम्भादतो यथोक्तप्रश्नालोचनया न गृह
स्थं प्रति ध्यानविधानोपपत्तिरित्यर्थः ननु भगवता संन्यासस्य प्रतिषि
द्धत्वात् गृहस्थस्यैव योगविधानात्तस्यैव योगभ्रष्टशब्दवाच्यत्वमिति शा
ङ्क्ते अनाश्रित इत्यनेनेति भगवद्वाक्यं न प्रतिषेधपरमिति परिहरति
न ध्यानेति स्तुतिपरत्वमेव स्फोरयति न केवलमिति सत्त्वशुद्ध्यर्थमनु
तिष्ठन्निति सम्बन्धः वाक्यस्योभयपरत्वमाशंक्य वाक्यभेदप्रसङ्गान्मैव
मित्याह नचेति इतोपि भगवतः संन्यासाश्रमप्रतिषेधोभिप्रेतो न भा
तीत्याह नच प्रसिद्धमिति तस्य प्रसिद्धं संन्यासित्वं योगित्वं चेति सम्ब
न्धः प्रसिद्धत्वमेव व्याकरोति श्रुतीति इतोपि संन्यासाश्रमे भगवान्प्रति ने
षेधतीत्याह स्ववचनेति विरोधमेव साधयति सर्वकर्म्माणीत्यादिना।
अनाश्रित इत्यादिवाक्यस्य यथाश्रुतार्थत्वानुपपत्तेः स्तुतिपरत्वमुपपादि
तमुपसंहरति तस्मादिति कर्म्मफलसंन्यासित्वमत्र मुनिशब्दार्थः स्तु
तिपरं वाक्यमक्षरयोजनार्थमुदाहरति अनाश्रित इति कर्म्मफलेभिलाषो
नास्तीत्येतावता कथं तदनाश्रितत्ववाचोयुक्तिरित्याशंक्य व्यतिरेकमुखेन।
विशदयति यो हीति कार्य्यमित्यादि व्याकरोति एवम्भूतः सन्निति कथं
कर्म्मिणः संन्यासित्वं योगित्वं च कर्म्मित्वविरोधादित्याशंक्याह यईरशा

गी॰
टी॰
ष

इति स्तुतेरत्र विवक्षितत्वात्तदनुपपत्तिश्चोदनीयेति मन्वानः सन्नाह इत्येवमिति न निरग्निरित्यादेरर्थमाह न केवलमिति अग्नयो गार्हपत्याहवनीयान्वाहार्यपचनप्रभृतयः तत्र न निरग्निरेव सिद्धमक्रियत्वमग्निसाध्यत्वात्क्रियाणां तथा च न निरग्निरित्येतावतैवापेक्षितत्वसिद्धेर्नचाक्रिय इत्यनर्थकमर्थपुनरुक्तेरिति तत्राह अनग्नीति उत्तरश्लोकस्य तात्पर्यं दर्शयितुं व्यावर्णमाशङ्कां दर्शयति ननु चेति प्रसिद्धपरित्यागाप्रसिद्धिरुपादीयमाना प्रसिद्धिविरुद्धेति चोद्यं दूषयति नैष दोष इति उभयस्य सत्याग्नेः सक्रियत्वसत्त्वात्तस्य चेत्यर्थः गुणवृत्त्याभयसम्पादनं प्रश्नपूर्वकं प्रकटयति तत्कथमित्यादिना १ ॥

3

स्वामिकृतटीका

शुद्धे चित्तेऽपि ध्यानं विना संन्यासमात्रतः मुक्तिः स्यादिति षष्ठेऽस्मिन् ध्यानयोगो वितन्यते ॥ पूर्वाध्यायान्ते संक्षेपेण कथितं योगं प्रपञ्चयितुं षष्ठाध्यायारम्भः तत्र तावत्सर्वकर्माणि मनसा संन्यस्येत्यारभ्य संन्यासपूर्विकायाः ज्ञाननिष्ठायास्तात्पर्येणाभिधानात् दुःखरूपत्वाच्च कर्मणः सहसा संन्यासातिप्रसङ्गं प्राप्तं वारयितुं संन्यासादपि श्रेष्ठत्वेन कर्मयोगं स्तौति अनाश्रित इति द्वाभ्यां कर्मफलमनाश्रितः अनपेक्षमाणः अवश्यं कर्तव्यतया विहितं कर्म यः करोति स एव संन्यासी योगी च न निरग्निः अग्निसाध्येष्टाख्यकर्मत्यागी च न चाक्रियः अनग्निसाध्यपूर्ताख्यकर्मत्यागी च १ ॥

ॱसन्

पिशाचभाष्ये

अतीताध्यायान्ते योगस्य सम्यग्दर्शनं प्रति अन्तरङ्गस्य ध्यानस्य सूत्रभूताः श्लोकाः स्पर्शान्कृत्वा बहिर्बाह्यानित्यादयः उपदिष्टास्तेषां वृत्तिस्थानीयोऽयं षष्ठोऽध्यायः आरभ्यते अनाश्रितः कर्मफलमित्यादि स संन्यासी च अनाश्रितः नाश्रितः कर्मफलं तस्य यानमप्रयुञ्जान इत्यर्थः कार्यं कर्म कर्तव्यं नित्यं कर्माग्निहोत्रादि करोति यः स संन्यासी च योगी च फले संन्यासी च योगी च योगाङ्गत्वेन कर्मानुष्ठानात् न केवलं निरग्निरक्रियः नैव सिद्धो लोक इति तत्संपादयति भगवान् १ ॥

रामानुजभाष्यं

उक्तः कर्मयोगः सपरिकरः इदानीं ज्ञानयोगकर्मयोगसाध्यात्मावलोकनरूपयोगाभ्यासविधिरुच्यते तत्र कर्मयोगस्य निरपेक्षयोगसाधनत्वं द्रढयि

ते ज्ञानाकारकर्मयोगो योगशिरस्कः प्रदर्श्यते कर्मफलं स्वर्गादिकमनाश्रितः
कार्यं कर्म कर्मानुष्ठानमेव कार्यं सर्वात्मना स्मत्समर्पणपरमगुरुराराधनरू
पतया कर्मैव मम प्रयोजनं नान्यत् किंचिदिति यः कर्म करोति स संन्यासी
च ज्ञानयोगनिष्ठश्च योगी च कर्मयोगनिष्ठश्च आत्मावलोकनसाधनभूतोभ।
यनिष्ठश्च न निरग्निर्न चाक्रियः न चोदितयज्ञादिकर्मस्वप्रवृत्तः न केवलज्ञान
निष्ठः तस्य हि ज्ञाननिष्ठैव कर्मयोगनिष्ठस्य तूभयमित्यभिप्रायः ॥१॥

अभिनवगुप्तकृतटीका

ना४ एवं प्राक्तनेऽध्यायगणोन साधितोऽर्थः श्लोकद्वयेन निगम्यते कार्यं स्वज्ञात्यादि
विहितं संन्यासीति योगीति पर्यायावेतौ अनपवाह ॥१॥

परमार्थप्रपाटीका

अस्वरूपे कार्यं तया विहितं कर्म यः करोति स एव संन्यासी योगी च कर्मफलानपे
क्षत्वमेव कर्मसंन्यासः विहिताचरणमेव कर्मयोगः एतद्व्याख्यातं निषेधयति
न निरग्निर्न चाक्रिय इति अयमर्थः कश्चिद्दम्भेन करणः शाठ्यप्रतीतिमा
त्रेणाहं मुक्त इति मन्वानः अग्निहोत्रादिकं त्यजति स निरग्निः निर्गतोऽग्निर्यस्मात्स
तथा तद्वदवशीकृतान्तःकरणः करचरणचेष्टारहितः सन्मुखानेत्रेनिमील
मिथ्याचारस्तिष्ठति सोऽक्रियस्तथाविधः संन्यासी योगी वा न भवतीत्यर्थः १

वनमालीटीका

एवं गीतेवदयोगसंलेपेण रमापतिः तस्य व्याख्यानरूपोऽयं षष्ठाध्याय आरभ्य
ते। तत्र सर्वकर्मानारंभेण योगनिष्ठा वक्तव्या तत्र त्याज्यत्वेन कर्मयोगस्य
हीनत्वशंकासामान्यनिरासाय अधिकारिणो कर्मयोगं स्तौति अनाश्रित इति द्वा
भ्यां कर्मणां फलमनाश्रितोऽनपेक्षमाणः सन् कार्यं स्वस्य कर्तव्यतया शा
स्त्रेण विहितं नित्यमग्निहोत्रादिकर्म करोति यः स सकर्मापि [illegible] संन्यासी
च योगी चेति संन्यासो हि त्यागः चित्तगतविक्षेपाभावश्च योगः तौ चास्य तत्
फलत्यागात्तत्फलतृष्णारूपचित्तविक्षेपाभावाच्च कर्मफलतृष्णात्याग एवात्र
गौण्या वृत्त्या संन्यासयोगशब्दाभ्यामभिधीयते सकामानपेक्ष्य प्राशस्त्यकथ
नाय एतादृशकर्मानुष्ठानं संन्यासयोगानुरूपं भाविना वित्यर्थः अतो यद्यपि
[illegible]न निरग्निर्न [illegible] अग्निसाध्यश्रौतकर्मत्यागी न चाक्रियः अग्निनिरपेक्षश्रौतस्मा
र्तक्रियात्यागी तथापि संन्यासी योगी चेति मन्तव्यः अनाश्रित इत्यनेनैव सर्वक

गी० टी० ष

५

र्मसंन्यासिनि लक्षितेनिरग्निरितिव्यर्थं स्यादिमयग्निशब्देन सर्वाणिकर्माण्युपलक्ष्यंति रग्निरितिसंन्यासी क्रियाशब्देन चित्तवृत्तीरूपलक्ष्याक्रियइति निरुद्धचित्तवृत्तिर्यो गीचकथ्यते तेनननिरग्निःसंन्यासीमतश्चोनचाक्रियोयोगीमतश्चइतियथा संख्यमुभयमस्तितेकोदर्शनीयः एवंसतिनन्नुहृदयमप्युपपन्नमिति द्रष्टव्यम् १ ॥

ऊहमवैजयन्तीटीका

पञ्चमान्तेसूत्रभूतोयोयोगःपरिकीर्तितः तस्यार्थोविस्तरःशोकषष्ठेःस्मिंस्थि तमुच्यते १ इत्येवंज्ञानगर्भकःस्वस्वरूपदर्शनासाधारणसाधनभूतःसपरिक रःकर्मयोगःश्रोक्तःइदानींयःपञ्चमान्तेश्लोकत्रयेणोक्तोज्ञानकर्मसाध्यात्म दर्शनाभ्यासरूपःसाङ्गःसविस्तरःसपरिकरोःष्टांगयोगःसप्रोच्यतेतत्रादौ योगस्यासाधारणसाधनरूपंकर्मयोगंवक्ष्येयोगशिरस्कस्यकर्मयोगस्यज्ञा नकारत्वंपार्थसारथिर्भगवान्पार्थंप्रोवाच अनाश्रितइति यथेहकर्मजितो लोकःक्षीयतेएवमेवामुत्रपुण्यजितोलोकःक्षीयतेपरीक्ष्यलोकान् कर्मजिता न् ब्राह्मणोनिर्वेदमायादित्यादिश्रुत्युक्तमिहामुत्रचकर्मफलमनतंरोगग्रस्तमना श्रितोःनाकाङ्क्षितवान्सन् योमुमुक्षुः कार्यंश्रीपुरुषोत्तमस्यमदिनकारिणा मदुपदेशपरायणत्वरूपंममपरमपुरुषार्थभूतमेतद्व्यतिरिक्तंकिंचिदपिवस्तु तत्कमप्रयोजनंनास्तीत्येवंप्रयोजनेननिश्चयेनकरणीयंकर्मानुष्ठानंकरोति एकश्चशब्दोःवधारणार्थकोःस्ययोगव्यवच्छेदरूपाद्दितीयस्तृतीयश्चपुनरर्थ कःससंन्यासीएवज्ञानयोगनिष्ठएवचपुनःसयोगीएवकर्मयोगनिष्ठएव भवति सउभयनिष्ठएवभवतीत्यर्थः ननिरग्निःनिर्गतोःग्निहोत्रलक्षणंकर्म यस्मात्सतथापूर्वोक्तयज्ञादिकर्माप्रहृतोनकिंत्वेषुप्रहृतएवनचाक्रियःस वकेवलंज्ञानयोगनिष्ठएवभवतीतिनकिंतुकर्मयोगनिष्ठश्चेत्यर्थः १ ॥

मधुसूदनीटीका

कर्मणःफलमनाश्रितोनपेक्षमाणःफलाभिसंधिरहितःसन्कार्यंकर्तव्यत याशास्त्रेणविहितंनित्यमग्निहोत्रादिकर्मकरोतियः सकर्म्यपिसन्संन्यासी चयोगीचेतिस्तूयते संन्यासोहित्यागःचित्तगतविक्षेपाभावश्चयोगःतौचास्य विद्येतेफलत्यागात्फलतृष्णारूपचित्तविक्षेपाभावाच्च कर्मफलतृष्णात्यागएवा त्रगौण्यावृत्त्यासंन्यासयोगशब्दाभ्यामभिधीयतेसकामानपेक्ष्यप्रशंसाकथना य प्रवचनंभाविनोहिनिष्कामकर्मत्यागीनभवतिनचाष्टांगयौसंन्यासयोगौ

योगसूत्रंत्रिभिःश्लोकैः पंचमांतेयदीरितं तदिह आरभ्यतेध्यायस्तद्व्या ख्यानायविस्तरात् अत्र सर्वकर्मत्यागेन योगंवि धास्यन् तत्याज्यत्वेनहीं नत्वमाशंक्य कर्मयोगं द्वाभ्यांस्तुवन्

त्र

[४] न चाक्रियः अग्निनिरपेक्षस्मार्तक्रियात्यागी च न भवति

तस्मादयमप्ययं न निरग्निः अग्निसाध्यश्रौतकर्मत्यागी न भवति[४] तथापि संन्या
सी च योगी चेति मन्तव्यः अथवा न निरग्निर्न चाक्रियः संन्यासी योगी चेति मन्तव्यः
किं तर्हि साग्निः सक्रियश्च निष्कामकर्मानुष्ठायी संन्यासी योगी चेति मन्तव्य इति स्तूय
ते अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वा इत्येव प्रशंसालक्षणया नञ् इत्युप
पत्तिः अथवा अक्रियश्च अनेनैव सर्वकर्मसंन्यासित्वे लब्धे निरग्निरिति व्यर्थं स्यादि
त्यग्निशब्देन सर्वाणि कर्माण्युपलक्ष्य निरग्निरिति संन्यासी क्रियाशब्देन चित्तवृ
त्तीरुपलक्ष्य अक्रिय इति निरुद्धचित्तवृत्तिर्योगी च कथ्यते तेन निरग्निः संन्यासी म
न्तव्यो न चाक्रियो योगी मन्तव्य इति यथासंख्यमन्वयव्यतिरेको दर्शनीयः एवं
सति न च तद्द्वयमप्युपपन्नमिति द्रष्टव्यं १ ॥

सदानंदीटीका

षष्ठेऽध्याये ध्याये सज्जनमनोनिवेद्य मधुरिपोर्गुणान् स्मारं स्मारं भवजलधिपारंगम।
यन्तः रसंपाद्यपायं यदुपतिगिरीवेदशिरसामृतिम्र्ये यो भूयो ममहरिपदाब्जे प्रवि
शन्तु १ ज्ञानयोगः पुराशोक्तः ससंन्यासो विमुक्तिदः कर्मापि चित्तशुद्ध्यर्थं प्रोक्तं।
कृत्स्नार्थं च न परं २ चित्तशुद्धावपीदानीं विक्षेपे सति योगिनां निर्वाणशान्तिर्द्रष्टव्य सु
खं न स्यान्नंदजस्य ३ येनोपायेन तत्सिद्धिः स्यादुपायः स उच्यते स तत्रूपतया यो
गः पंचमानेयईरितः ४ स एव विस्तरेणात्र षष्ठाध्याये प्रपंच्यते तत्रादौ कर्म।
णां चित्तशुद्धिहेतुतया स्तुतिः ५ क्रियते कामसंत्यागाद्योगसंन्याससाम्यतः फ ना[४]
लाभिसंधिशून्यः सन्नित्यं कर्म करोति यः ६ श्रौतं स्मार्तं स संन्यासयोगयोः फल।
मश्नुते निरग्निरक्रियो यस्तु संन्यासस्तुर्य आश्रमः ७ न तन्निषेधो हरिणा क्रियते क
र्मणां स्तुतौ किं तु कामपरित्यागमात्रेणैवास्य कर्मिणः ८ क्रियते स्तुतिरित्येवमा
शयो गम्यते हरेः फलाभिलाषसंत्यागी विस्तारायेनतत्परः ससंन्यासी फलत्या।
गाद्योगी चित्तसमाधितः निरग्निरिति नेनोक्तः संन्यासी कर्मवर्जितः ९ अक्रिया।
श्चित्तसंरोधाद्योगी तद्विवेचने यद्यपीष्टं कर्म त्यक्तं तथापि स्तूयते नया ११ का
मनात्यागसाम्येन संन्यासीत्यादिशब्दतः १२ ॥ १ ॥

नीलकंठीटीका

षष्ठेऽध्याये ध्यानेन सूचितेन ध्यानयोगं विवरीतुमिच्छंस्तत्राधिकारहेतुत्वात्कर्मयोगं ना
वत्तो निद्वाभ्यां अनाश्रित इति यः कर्मणां फलं अनाश्रितः न अपेक्षमाणः कार्यं अ
वश्यकर्तव्यं नित्यं कर्म करोति स एवं फलसंकल्पत्यागात् संन्यासी च योगी च भव

ति न तु निरग्निर्यो विधितः श्रौतस्मार्तकर्मत्यागी स एवं संन्यासी नापि अक्रियः सा
क्रवाङ्मनःकायक्रिय एव वा योगीति १ ॥

आनन्दीटीका

अतीतानंतराध्याये हि योगधारणास्तत्फलं च प्रपंचयितं संन्यासस्तु महावा
होऽदुःखमाप्तुमयोगतः इति यदुपक्रांतं तत्र संन्यासयोगशब्दयोरविवेकना
दर्शनस्य वस्तु यौगमे कर्मसंन्यासशंकानिवारणार्थं श्रीभगवानुवाच
कर्मणः फलमनाश्रितः फलासंगं त्यक्त्वा कार्यं चोदितमवश्यकरणीयं यः
कर्म करोति स एव यत्र क्वाप्याश्रमे वर्तमानः पुरुषः संन्यासी च कर्म कुर्व
न्नेव फलत्यागात्संन्यासिशब्दवाच्यश्च भवति योगी च युक्त्या ज्ञानपूर्वक
र्मानुष्ठानाद्योगिशब्दवाच्यश्च भवति चकारद्वयमेकस्यैव कदाचिद्वा
नुष्ठानमसमुच्चयार्थं न निरग्निर्न चाक्रियः अग्नित्यागात्कर्मत्यागाच्च संन्या
सिशब्दवाच्यो न भवति १ ॥

रामकंठीटीका

आत्मज्ञानविहितकर्मसमुच्चयानुष्ठानरूपस्य सकलप्रकरणासिद्धांतस्य
प्रथमेनाध्यायेन प्रस्तावनामात्रमुपक्रांतम् द्वितीयेन ज्ञानकर्मणोः स्व
रूपमुपदर्शितम् तृतीयेन तयोर्ज्ञानकर्मणोर्भिन्नानुष्ठानविषयत्व
भ्रांतिरपाकृता चतुर्थेनैवंविधसमुच्चयानुष्ठानरूपस्य योगस्य परस्मात्
कारणात्प्रवृत्तिरुपदर्शिता कर्मणश्च नानारूपत्वं पंचमेन तयोर्ज्ञान
कर्मणोः संन्यासयोगाविति प्रदर्शितम् इदानीं तयोर्ज्ञानकर्मणोः समुच्च
येनानुष्ठानमनयोः पारिष्ठयोः किं सर्ववर्णैः सर्वाश्रमात्वापि क्रियंते उत
नियताः केचनेति संशयनिरासार्थं सर्वसाधारणमस्य प्रतिपादयितुम
ध्यायांतरेणाह श्रीभगवानुवाच कर्मफलं तस्य तस्य कर्मणो यज्ञादेः
क्रियमाणस्य फलं स्वर्गादिभोगात्मकमनाश्रितोऽनभिसंधानादनालं
बितः सन् यः पुमान् कार्यं शास्त्रकर्तव्यमिति वर्णाश्रमनियमेन वेदितं क
र्म करोति अनुतिष्ठति स संन्यासी त्यागवान् योगी च समाहित उच्यते
तेन सर्ववर्णैः सर्वाश्रमिणां मात्रेणात्मफलसमुच्चयानुष्ठानेऽधिकृता ॥

इत्युक्तम् कर्मफलानभिसंधानमात्रेण संन्यासलक्षणं तदुक्तं विहित
कर्मानुष्ठानेन च योग इति संग्रहेण सकलप्रकरणप्रतिपाद्योऽर्थः सिद्धान्ती
कृतः ततश्च यथाप्रतिपादितात्मज्ञानैकतानतान्तःकरणतया व्यति
रिक्तस्वात्मकफलनिरभिकांक्षः सन् रागादिदोषनिर्मुक्तस्वभाव
तारूप्यविकारकालात्प्रभृति प्रसक्तं कर्म योऽनुतिष्ठति स ब्राह्मणोऽस्तु क्ष
त्रियो वैश्यः शूद्रो वा ब्रह्मचारी गृहस्थो वानप्रस्थो यतिर्वा सर्व एव संन्या
सी योगी च भवति न पुनर्निरग्निरेवाक्रिय एव वा निरग्न्यक्रियशब्दाभ्यां
ब्रह्मचारी यतिश्चोपलक्ष्यते यतः केचिदनयोरेवाश्रमयोरपर्यालोचितप
रमार्थतया नैष्कर्म्याभिमानिनो मोहाद्धेतुं तं मन्यमाना ब्रह्मचारियती ए
व संन्यासिनौ योगिनौ च प्रतिजानते यो हि ब्रह्मचर्यादेव परिव्राजकध
र्ममाश्रितः सदारपरिग्रहाभावादनाहिताग्निः सन् मूलादेव परित्यक्तय
ज्ञादिक्रियो ब्रह्मचार्येकः संन्यासी च योगी चैतेषां मतः यो वाश्रमत्रया
नु^ श्रितः स्वाध्याययागदानाध्यापनयजनप्रतिग्रहादिकाः सकलाः क्रि
याः परित्यज्य निराशिषमाश्रममाश्रितः स यतिर्द्वितीयः संन्यासी यो
गी चैतेषां च मतः द्वयोरप्यनयोरेवं परे तु नाक्रियाणां त्यागे मतिमो
क्षफलभागिनौ [illegible]

[illegible] ॥ लौकिकी [illegible]रीका

एवं कर्मयोगेनापि ध्यानयोगं विना मुक्तिमावहन् ज्ञानकाष्ठाधिरोहेण
स्यादित्यतः षष्ठोऽध्याय आरभ्यते तत्र प्राक्तनेनाध्यायगणेन साधितमर्थं
श्लोकद्वयेन श्रीभगवानुवाच ॥ यः कर्मफलमनभिसंधानादनाश्रितः
कार्यमवश्यकर्तव्यं शास्त्रीयं स्वाभाविकं वा कर्म करोति स एव फलानभि
लाषेण संन्यासी स एव स्वस्वभावविहिततया योगी चोच्यते इति शेषः न
तु उक्तं ज्वलाग्नौ वै सर्वकर्माणि संत्यक्तुं न शक्यं देहधारिणा त्यजेत्कर्मफलं
यो वा स त्यागीत्यभिधीयते अग्निशब्दः शास्त्रविहितकर्मोपलक्षकः तेन
निरग्निः शास्त्रीयकर्मत्यागी संन्यासी योगी वा न मंतव्यः न चाक्रियः स्वा
भाविककर्मत्यागी उक्तरूपः संन्यासी योगी वा मंतव्यः न निरग्निरित्या
दिनायमर्थोऽभिधीयते निरग्निश्च न भवति निष्क्रियश्च न भवति अयमसं

न्यासीत्यनुत्तम [illegible]
[illegible]
[illegible] १ ॥

पंचोलीटीका

पंचमोध्याये ध्यानयोगस्य सम्यग्दर्शनप्रतिश्रुतं रंगस्य साधनस्य सू
त्रभूताः श्लोकाः स्पर्शान्कृत्वेमाद्दयउपदिष्टास्तेषां हत्तिस्थानीयोयं
षष्ठोध्यायः आरभ्यते तत्र सम्यग्दर्शनप्रतिसंन्यासान् ध्यानयोगं बहि
रंगमपि कर्म यावत् ध्यानयोगारोहणसमर्थस्तावत् गृहस्थेन अधि
कृतेन तमारोढुमिच्छताशरुषेण कर्म कर्तव्यमित्यतस्तौति अना
श्रितेति यः कर्मफलमनाश्रितः कर्मफलेतिः स्पृहः कार्यं नित्यं नैमित्ति
कं कर्म करोति च पुनः स संन्यासी च पुनः स योगी चित्तसमाधानयुक्तो
ऽतनव्यः पुनः न निरग्निः अग्निसाध्यक्रियारहितः च पुनः नाक्रियः न
स्मार्तक्रियारहितः एवं संन्यासी योगी च भवति कथं कर्मफलसंन्या
सात्संन्यासीत्वं योगांगात्वं च कर्मानुष्ठानात् कर्मफलसंकल्पस्य चि
त्तविक्षेपहेतोः परित्यागात् योगित्वं चेति १ ॥

रणवीरसमिद्धोधिनी ॥

ॐ श्रीकार्तवीर्यार्जुनायनमः अथ पूर्वैरध्यायगणेन प्रति
पादितमर्थं पुनरपि निश्चयदार्ढ्याय भगवानुवाच अनाश्रि
त इति कर्मणां स्ववर्णाश्रमोचितानां यज्ञादिव्यापाराणां फलं
ज्ञातिहिंसाजन्यं पापमनाश्रितो मनसाकलयन् कार्यं यागस्तेन
चोदनादवश्यमाचरणीयं कर्म स्ववर्णाश्रमोचितयुद्धादिलक्षणं
व्यापारं यः करोति अनुतिष्ठति स संन्यासी योगी च भवति अन्य
थाश्रितपक्षाणां पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः स्वज
नं हि कथं हत्वा सुखिनः स्याम माधवेत्यादिरूपाणां संकल्पानां सं
न्यसनात् अवयानवत्वेनावश्याचरणीयेषु कर्मसु प्रवृत्तिलक्षणा

केऽफलत्वाच्च न निरग्निरिति निरग्निरनाहिताग्निरकृतदार
परिग्रह इति यावत् पूर्वं परिग्रहस्वीकारेऽनंतरं तत्त्यागी वा त
थाहि अग्निशब्देनात्र गार्हस्थ्यं लक्ष्यते तथाच अग्नेर्गार्हस्थ्यान्नि
ष्क्रांतो निरग्निः दारादित्यागी संन्यासी न भवति संकल्पनामत्या
गात् नचाक्रिय इति क्रियाः स्वजात्युचिता व्यापारास्तद्रहितोऽ
क्रियः सच योगी न भवति कर्ममात्ररहितस्य ज्ञानमप्यस्थितेः
शरीरयात्राप्रसिद्धेः स्वकर्मणामवश्याचरणीयत्वे सिद्धे समाहि
तता लक्षणयोगासिद्धेरिति भावः अथवाच निरग्निरग्निसाध्ये
ष्टाद्यकर्मत्यागी अक्रियोऽनग्निसाध्यपूर्ताद्यकर्मत्यागी च
न संन्यासीति योगीति च किंत्वेष एतैः आचरन्नेव संन्यासी
विरुद्धसंकल्पत्यागात् योगी च तदवस्थानमनस्कत्वादि
तिभावः १॥

अथ भाष्य

ज्ञानांतरंगं समाधियोगमारुरुक्षोस्तदुपायेन विवक्षितं सन्या
समाह योगेन सह अनाश्रित इति चतुर्थाश्रमिणोऽप्यग्निः कि
याचोक्ता दैवमेवेत्यादौ अग्निर्ब्रह्मचत तज्जा क्रियान्यासाश्र
मे स्मृते इति च तस्मान्निरग्निरक्रियः सन्यासी योगी च न भव
त्येव सन्यासोऽपि योगात् भूत इत्याह १

भाषानुवाद

श्रीधरस्वामी छठयें अध्यायके आरम्भमे वर्णन करते हैं कि मनु
ष्यों को चित्तशुद्ध होनेसे भी ध्यानके विना केवल सन्यास मात्रसे मुक्ति
नहीं मिलती है इसी हेतु से श्रीभगवानछठयें अध्यायमे ध्यानयोग
विस्तार करि कहते हैं कि पञ्चम अध्यायके अन्तभागमे संक्षेप सेक
हा गया जो ध्यानयोग सोई विस्तार करने को छठयें अध्यायका आर
म्भअर्थात् सर्व कर्म्माणि मनसा सन्यस्यास्ते सुखं वशी इस ५ अध्यायके
श्लोक से सबकर्म त्याग पूर्वक ज्ञाननिष्ठा की प्रशंसा करने से और
कर्म्म अनुष्ठान क्लेशकारी है इससे हठात् कर्मत्याग की अवस्था विना
भी कर्म्म का त्याग मनुष्यों के मनमे होय उठे है सो तिसके निवारनु
के अर्थ कर्म्म छोड़ने से कर्म करना श्रेष्ठ है यह कहि कर्म्म योगकी
बड़ाई करते हुये भगवान कहते हैं कि अनाश्रित कहे कर्म्म फल
की आकाङ्क्षा रहित होय कर सब कर्म्म अवश्य ही कर्तव्यहै इस वि
चार से जो विहित कर्म्म का अनुष्ठान करै सोई सन्यासी औ सोई योगी
है नहीं तो निरग्नि कहे अग्निसाध्य यज्ञादि कर्म्म त्यागी औ अक्रिय
अर्थात् वेअग्नि के कर्म्म कुआं ताल बावड़ी खननतथा दानादि कर्म्म
त्यागी होके लोग अपनेको योगी समझैंगे किन्तु ऐसा नहीं है ता
त्पर्य यह कि फल ही का त्याग उचित कर्म्मका त्याग नहीं अर्थात्
उपर लिखे सब कर्म्म विसर्जीत्मर्थ करना ही चाहिये सोई कहा अ
नाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोतियः १॥

दोहा॥

कर्मफलआश्रयत्यागकेकार्यकर्मकरेजोय सोसंन्यासीयो
गीसोनहिनिरग्निअक्रियहोय १॥

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव। न ह्यसं-
न्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥

शाङ्करभाष्यं

गौणमुभयेनैव न मुख्यं संन्यासित्वं योगित्वं चाभिमतमित्येतमर्थं दर्शयि-
तुमाह यं संन्यासमिति यं सर्वकर्मतत्फलपरित्यागलक्षणं परमार्थसंन्यासं सं-
न्यासमिति प्राहुः श्रुतिस्मृतिविदो योगं कर्मानुष्ठानलक्षणं तं परमार्थसं-
न्यासं विद्धि जानीहि हे पाण्डव कर्मयोगस्य प्रवृत्तिलक्षणस्य तद्विपरीतेन नि-
वृत्तिलक्षणेन परमार्थसंन्यासेन कीदृशं सामान्यमङ्गीकृत्य तद्भाव उच्यत
इत्यपेक्षायामिदमुच्यते अस्ति परमार्थसंन्यासेन सादृश्यं कर्तृद्वारकं कर्म-
योगस्य यो हि परमार्थसंन्यासी संत्यक्तसर्वकर्मसाधनतया सर्वकर्मतत्
फलविषयं संकल्पं प्रवृत्तिहेतुकामकारणं संन्यस्यति अयमपि कर्मयोगी
कर्म कुर्वाण एव फलविषयं संकल्पं संन्यस्यतीत्येतमर्थं दर्शयन्नाह न हि।
यस्मादसंन्यस्तसंकल्पः संन्यस्तः परित्यक्तः फलविषयः संकल्पोऽभिसन्धिर्येन
सः संन्यस्तसंकल्पः कश्चन कश्चिदपि कर्मी योगी समाधानवान् भवति न सं-
भवतीत्यर्थः फलसंकल्पस्य चित्तविक्षेपहेतुत्वात् तस्माद्यः कश्चन योगी कर्मी
संन्यस्तफलसंकल्पो भवेत् स योगी समाधानवान् भवति न विक्षिप्तचित्तो भ-
वति चित्तविक्षेपहेतोः फलसंकल्पस्य संन्यस्तत्वात् इत्यभिप्रायः योगाङ्गत्वे-
न कर्मानुष्ठानात् कर्मफलसंकल्पस्य वा चित्तविक्षेपहेतोः परित्यागात् त्या-
गित्वेनेति संन्यासित्वं त्वभिप्रेतमुच्यते एवं परमार्थसंन्यासकर्मयोगयोः
कर्तृद्वारकं संन्याससामान्यमपेक्ष्य यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्ड-
वेति कर्मयोगस्य स्तुत्यर्थं संन्यासत्वमुक्तं ॥ २ ॥

आनन्दगिरिटीका

सम्भवति मुख्ये संन्यासित्वादौ किमिति गौणमुभयमभीष्टमित्याशंक्य मु-
ख्यस्य कर्मण्यसम्भवाद्गौणमेव स्तौतीत्यभिप्रेत्य तदिष्टमित्यभिप्रेत्याह न पुन-
रिति चित्तव्याकुलत्वहेतुकामनात्यागाच्चित्तसमाधानसिद्धेर्योगित्वं कर्मि-
णोऽपि युक्तं संन्यासित्वं तु तस्य विरुद्धमिति शङ्कमानं प्रत्युक्तेऽर्थे श्लोकमव-
तारयति इत्येतमिति परमार्थसंन्यासं प्राहुरिति सम्बन्धः इतीष्टं संन्यास-
स्य प्रामाणिकाभ्युपगतत्वादितीति शास्त्रीयो ज्ञानयोगं फलत्वेनोपरिसंन्यासमस्मा

यं संन्यासमिति तस्माद्योगमन्तरेण संन्यासो नोपपद्यते एवं कल्पसंन्या-
सं विना योगो न युज्यते तस्मात्तत्सर्वज्ञो योगसंन्यासौ न निरग्निरिति
हि नायमर्थो ध्वन्यते निरग्निश्च न भवति निष्क्रियश्च न भवति अथ संन्या-
सी त्यज्यते २ ॥

परमार्थप्रपा टीका

अथ स्माह एवं प्रकटयन्नाह यमिति भोः पाण्डव रम्यतमप्रकारेण यं संन्यासं
प्राहुः प्रकर्षेण श्रेष्ठत्वेनाहुस्तं योगं विद्धि यस्मात् कारणादसंन्यस्तसं-
कल्पः न संन्यस्ता संकल्पा येन स तथा कर्मनिष्ठो ज्ञाननिष्ठो वा न त्यक्तकर्मनि-
ष्फलः संन्यस्तफलसंकल्पः ज्ञाननिष्ठश्चासंन्यस्तचित्तविक्षेपरूपसंकल्प
एवंविधः कश्चिद्योगी न भवति अत्र भगवदभिमतः संन्यासशब्दार्थस्तु।
सम्यक्प्रकारेणासने चित्तशुद्धिद्वारा ज्ञानमुपायस्तत एव कर्मोपरमः क-
र्मसंन्यासः न तु कर्मत्यागः तदुक्तमध्यात्ममीमांसायां सम्यक्न्यासः स-
माप्तिर्विमलतरधियः कर्मणां संविदाप्तौ संन्यासोऽयं यद्वदध्वा स्वयमुपरमति
ग्रामवक्त्रं प्रवेश्य रंभानालवद्विहिडि भजति फलभरं यावदुच्चैः स तेन त्वा संप-
प्राप्त्येवास्ते नमभिलषतो ज्ञानमुपायः कर्मेति भाष्यं च सम्यक्प्रकारेण वि-
मलतरधियः शुद्धान्तःकरणस्य संविदाप्तौ ज्ञानप्राप्तौ संन्यासः कर्मणां या
समाप्तिः संपूर्णता सैव संन्यासशब्दवाच्या न तु कर्मत्यागः अत्र दृष्टान्तमाह
यद्वदिति यथा अध्वा मार्गः पथिके ग्रामवक्त्रं ग्रामद्वारं प्रविश्य स्वयमुपरम-
ति यः पथिकेनापि ग्रामद्वारप्राप्तिव्यतिरेकेण अन्तरेव मार्गो न मुच्यते किन्तु मा-
र्गः ग्रामद्वारं दर्शयित्वा स्वत एवोपरमति पुनर्दृष्टान्तान्तरमाह रंभेति रंभा
कदलीनालवद्वो उच्चैर्हिडि भजति यावत्फलभरं प्रसूते पश्चात्फलभरप्रसवा-
नन्तरं त्वामसुपरमे भजति तथैव प्राप्तमोक्षे अभिलषतो मोक्षार्थिनः पुरु-
षस्य कर्म ज्ञानमुपायः स्वयमुपरमति २ ॥

वनमाली टीका

अथ संन्यासेऽपि संन्यासपदप्रयोगनिमित्तं गुणयोगमाह यमिति यं कर्मतत्फ-
लपरित्यागं संन्यासमिति प्राहुः श्रुतयः पुत्रैषणायाश्च वित्तैषणायाश्च लोकै-
षणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीत्याद्याः योगं फलकाङ्क्षाकर्तृत्वाभिमान-
योस्त्यागेन विहितकर्मानुष्ठानात् तं संन्यासं विद्धि अत्र हेतुमाह नेदं यं
मया महेतुसादनमसहषेणायमितिन्यायादन्यवाचकशब्दोऽन्यत्र प्रयुज्यमानः साद

गी॰
टी॰
४

र्थं बोधयति गौण्या वृत्त्या सादृश्यमेवाह नहीति हि यतो संन्यस्तसंकल्पो ऽत्यक्तफलसंकल्पः कश्चिदपि योगी न भवत्यपि तु सर्वो योगी त्यक्तफलसंकल्प एव भवतीति फलत्यागसाम्यात् सारूप्यं चित्तवृत्तिनिरोधसाम्याच्च यो। गेन कर्मैव संन्यासी च योगी च भवतीत्यर्थः तदाह भगवान्पतञ्जलिः योग। श्चित्तवृत्तिनिरोध इति ॥ २ ॥

10

क्रसैवैनयनीटीका

ननु सकलकरणवृत्तिनिरोधः प्रसरणात्मके कर्मयोगे निखिलकरणवृत्तिनिरोधरूपो ज्ञानयोगो भवता कथमारोप्यते इति चेत्तत्राह यं संन्यासमिति हे पाण्डव पाण्डुनन्दनेनोत्तमकुलप्रसूतत्वात्त्वया यं प्रश्नः समुचित एवेति सूचितः यं ज्ञानयोगं संन्यासमिति श्रुतयः प्रकारेण शङ्कराद्याः केचनयोगकर्म या थात्म्यस्वरूपज्ञाः तमेव ज्ञानयोगं मोहवयोयोगकर्मयोगमेव त्वं विद्धि। जानीहि रीतिं दर्शयति हि यस्मात् असंन्यस्तसंकल्पः संकल्पः परित्यक्तः सकल्पः फलाभिलाषो भोगाद्यभिलाषश्च येन सन्त्यात्नसंन्यस्तसंकल्पोऽसंन्यस्तसं कल्पो जनः कश्चन कश्चिदपि योगी कर्मयोगी न भवति किन्तु यः संन्यस्तसंकल्पः स एव ज्ञानयोगी भवेत् स एव कर्मयोगी चापि भवेत् यदेवं वक्ष्यमाणाथाय कर्माणि नवद्वारे पुरे देही नैव कुर्वन्न कारयन् कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुरित्यायुक्तरीत्या [illegible] त्मयाथात्म्यज्ञानेन प्रकृतोपरिम्लके हिकामुष्मिकफलभोगादिसंकल्पः पुरुषो भवेत्तदैवाभयोस्ता नकर्मणोः कर्ता सम्भवे। त्नान्यथेति भावः ॥ २ ॥

मधुसूदनीटीका

अथ संन्यासेपि संन्यासशब्दप्रयोगनिमित्तमुक्तगुणयोगं दर्शयितुमाह यं स र्वकर्मतत्फलपरित्यागं संन्यासमिति प्राहुः श्रुतयः न्यास एवातिरेचयती। ति ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीत्यादयो योगं फलतृष्णाकर्तृत्वाभिमानयोः परित्यागेन विहितकर्मानुष्ठानं संन्यासं विद्धि हे पाण्डव अब्रह्मदत्ते ब्रह्मदत्तमिति प्राहुः नैव यं संन्यासमहे ब्रह्मदत्तमहणायमिति न्यायात्परशब्दः परत्र प्रयुज्यमानः सादृश्यं बोधयति गौ ण्या वृत्त्या तद्धावारोपेण वा प्रकृते तत्किं सादृश्यमिति तदाह नहीति हि यस्मा त् असंन्यस्तसंकल्पः अत्यक्तफलसंकल्पः कश्चन कश्चिदपि योगी न भवति

स्य
न
श्र

अपितु सर्वो योगी त्यक्तफलसंकल्प एव भवतीति फलत्यागसाम्यात्स्वल्प
चित्तवृत्तिनिरोधसाम्याद्गौण्या वृत्त्या कर्मैव संन्यासी च योगी च भवतीत्यर्थः
तथाहि योगः चित्तवृत्तिनिरोधः प्रमाणविपर्ययविकल्पनिद्रास्मृतयश्चित्त
वृत्तयः पंचविधाः तत्र प्रत्यक्षानुमानशाब्दोपमानार्थापत्त्यभावाख्यानि।
प्रमाणानि षडिति वैदिकाः प्रत्यक्षानुमानागमाः प्रमाणानि त्रीणीति योगाः अ
नभावत्वबहिर्भावाभ्यां संकोचविकासौ द्रष्टव्यौ अतएव तार्किकादीनां मतभेदाः
विपर्ययस्तु मिथ्याज्ञानं तस्य पंचभेदाः अविद्यास्मितारागद्वेषाभिनिवेशाः ता
एव पंच क्लेशाः शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः प्रमाभ्रमविलक्षणः
सदर्थव्यवहारः शशविषाणमसत्पुरुषस्य चैतन्यमित्यादिः अभावप्रत्यया
लंबना वृत्तिर्निद्रा च तत्सणो वृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणस्तदा
लंबना वृत्तिरेव निद्रा न तु ज्ञानाद्यभावमात्रमित्यर्थः अनुभूतविषयासंप्र
मोषः प्रत्ययः स्मृतिः पूर्वानुभवसंस्कारजं ज्ञानमित्यर्थः सर्ववृत्तिजन्यत्वादंते
कथनं लज्जादिवृत्तीनामपि एषु चैवांतर्भावो द्रष्टव्यः एतादृशी सर्वासां चित्त
वृत्तीनां निरोधो योग इति च समाधिरिति च कथ्यते फलसंकल्पस्तु रागाख्य
स्तृतीयो विपर्ययभेदस्तु निरोधमात्रमपि गौण्या वृत्त्या योग इति संन्यास इति
चोच्यते इति न विरोधः २ ॥

सदानंदीटीका

असंन्यासेपि संन्यासशब्दयोगे कारणं गुणयोगं हरिः प्राह सत्वगुणाहिता
य च १ ये कर्मतत्फलत्यागप्राज्ञः संन्याससमागमाः फलाभिलाषकर्तृत्वाभि
मानत्यागयोगतः २ योगं तं विद्धि तत्त्वात्मा साधनत्वसामान्यतः अकर्मणाक
र्णाभिसंन्यासे तेन सत्यामहे वयं ३ कर्णितस्योयमिसेवमायाज्ञो एपाप्रयुज्यते।
परशाहः परत्रैवेसादृश्यं ज्ञापनेजनैः सादृश्यं प्रकृतेप्यस्ति कामत्यागो हि
कर्मिणः नात्यक्तफलसंकल्पो योगी भवति कश्चन ५ २ ॥

नीलकंठीटीका

केन साम्येनायं संन्यासी योगी चेति स्तूयते तत्राह यमिति यो हि त्यक्त
सर्वसंकल्पः स संन्यासी तादृश एव ध्यानयोगी अनयोर्न तयोर्भेदः निःसंकल्प
त्वस्य लिंगदेतन्मोक्षलक्षणमिति मैत्रायणीयोपनिषदुक्तत्वस्य मोक्षल
क्षणस्य निःसंकल्पत्वस्योभयत्रापि तुल्यत्वात् अतो यमपि कर्मयोगी फ
लसंकल्पत्यागात् निःसंकल्पत्वसाम्यात् संन्यासी योगी च भवतीति स्तूय

तत्त्वार्थः योगाधिकारसिद्धये निष्कामकर्माण्यनुष्ठेयानीति श्लोकद्वयतात्पर्यार्थः २ ॥

आनदीटीका

एवं संन्यासिशास्त्रार्थं निरूपयित्वा योगिशास्त्रार्थमपि निरूपयति ॥ इति। श्रुत्युक्तनीत्या यं संन्यासं कर्मफलत्यागार्थमाहुः तं कर्मणोऽक्रियमाणानां त्रैफल्यागं समस्यक्त्वा यो न्यासो योजना योगं योगशास्त्रार्थं विद्धि कर्मयोगमेवोक्तनीत्या संन्यासशास्त्रार्थं जानीहीत्यर्थः अत्र हेतुमाह यस्मात् न संन्यस्तः संकल्पः फलस्पृहा येन तादृशः कश्चन योगी ज्ञानकर्मसमुच्चयानुष्ठाता भवति अयं च संयमेन यं संन्यासं जित्वा वशीकृत्य तया भूमेः कृत्स्नम् अभिजिगीषया त्यागमाह सैयोगवित्तवृत्तिनिरोधाख्यं जानीहि तं संसैन निरुद्धसंकल्पवित्तवृत्तिर्येन तादृशः कश्चन योगी योगाभ्यासी न भवतीत्यर्थः (...) २ ॥

तदेतत्केवलज्ञानवादिमतमनुपपन्न रामकंठीटीका मेवेति प्रतिपादयितुमाह ॥

एते ज्ञानमात्रवादिनः संन्यासमंज्ञयानैष्कर्म्यज्ञानरूपयमर्थं कथयंति तं योगकर्मानुष्ठानमेव तं जानीहि यस्मात् संन्यासं विना योगो लभ्यते नास्ति किंतु असंन्यासः संकल्पस्य फलाभिलाषस्यैवोपपद्यते न तु कर्मणः सर्ववर्णाश्रमेषु च कर्माविरहात् यो किल यतिब्रह्मचारिणो परिव्राजकौ कर्मत्यागेन नाभिमतौ तौ गृहस्थवानप्रस्थौ वितेकर्मत्याजतः स्वतयतिवादिसिद्धिकारणं कं विकर्मविशेषमनुतिष्ठत एव यथेष्टाचरणाद्धितयोर्विकर्मस्यैतेव पर्यवस्यति तस्मात्संकल्पमात्रसंन्यासित्वात्संन्यासित्वं सिद्धमितीति योगीयः सर्वदा सर्वथा ध्यानेनात्मतत्त्वनिरतस्य परमात्मलक्षणो ब्रह्मणि प्रवृत्तः स्पृहं प्रसन्नयतया संन्यस्तकर्मफलसंकल्पः स योगी कार्यं कर्मणि समाधिमान् भवति नान्य इति यथोक्तयोः संन्यासयोगयोरेकैकपुरुषानुष्ठानं निष्ठयोः सर्ववर्णाः सर्वाश्रमिणां समाधिकृतता अनेन श्लोकेन प्रतिपादिताः (...) २

लातिकी [illegible] टीका

संन्यासयोगशब्दावन्योन्यपर्यायौ तथा च योगमंतरेण संन्यासो नोपपद्यते एवं संकल्पसंन्यासं विना योगो न जायते तस्मात् तत्तत्संबद्धौ योगसंन्यासावित्याह ॥

ज्ञानमात्रवादिनोयमर्थंनैष्कर्म्यरूपंन्यासएवातिरोचयतीत्यादिस्मृतिरेवंद
माश्रित्यसंन्याससंज्ञयाकथयतीतियोगमुक्तप्रकाराकर्मानुष्ठानमेवतांसंन्या
संजानीहि ननुशास्त्रात्दृष्टपादस्यारोपोऽत्रचकिंसादृश्यमित्याह नहीतिन
संन्यस्तःकर्मफलयोःसंकल्पोयेनसोसंन्यस्तसंकल्पोयोगीनहिभवति
यएवसर्वदात्मनिमग्नःस्फाऽहंममयतयात्यक्तकर्मफलसंकल्पः सएवयोगी
कार्यंकर्मण्यात्मसमाधानवान् नान्यःकर्मत्यागीउक्तप्रकाराकर्माविरहात्
तस्मात्संकल्पत्यागेनचित्तविक्षेपाभावात् योगस्यापिसंन्यासत्वं तदुक्तंकु
लार्णवे उत्पन्नसहज्ञानेदत्तनज्ञानरतःप्रिये सर्वसंकल्पसंन्यस्तःसवि
द्वान्कर्मसंत्यजेत् स्वतंत्रोपायथावृत्तःपंडेत्यजतिनिःस्पृहं नतंत्रोपायत
थायोगीत्यजेत्कर्मपरिग्रहमिति ॥

पंचोलीटीका

योगानुभयंनमुख्यंसंन्यासित्वंयोगित्वंचेतिअभिप्रायंदर्शयितुमाह यं
संन्यासमितिहेपांडवश्रुतिस्मृतिविदःयंसंन्यासंसकर्मतत्फलत्यागल
क्षणंपरमार्थसंन्यासमितिप्राहुःतंयोगंकर्मानुष्ठानलक्षणंपरमार्थसं
न्यासंविद्धिहियस्मादसंन्यस्तसंकल्पःअपरित्यक्तफलसंकल्पःकश्चनयो
गीनभवति २ ॥

रसावीरसमिद्धोधिनी॥

अथसंन्यासयोगयोरैक्यंप्रतिपादयति यंसंन्यासमिति यंआ
रभ्यमाणकर्मप्रव्यावर्तकसंकल्पजातत्यागं संन्याससमिति संन्यास
पदाभिधेयंप्राहुः कथयंति पंडिताइतिशेषः हेपांडव तंयोगं
योगपदाभिधेयमपिविद्धि ननुकुतोनयोरैक्यमित्यतआह नही
ति हियतः असंन्यस्तसंकल्पः अत्यक्तान्यथाप्रतिपन्नपापमेवा
प्रयेदस्मानित्यादिरूपसंकल्पः कश्चिद्योगीसावधानोनभवत्यतः
एवचकर्मसुप्रहृतिमांश्चनभवति अयंभावः संन्यासंविनायोग

स्यान्निष्पत्तिरूपा सिद्धिः योगं विना च संन्यासस्य नैष्कर्म्यरूपा सिद्धिरित्येकस्य सिद्धौ सत्यामन्यस्यापि सिद्धिरविनाभाविनीति पर्यायावेवैताविति २ ॥

मधुभाष्य

यं संन्यासमिति काम संकल्पाद्यपरित्यागे कथम्नुपायत्वान्स्यादित्याशयः किंपर्यन्तकालं कर्म कर्त्तव्यमित्यत इत्याह २

भाषा ग्रन्थार

यह सुनि अर्जुन ने पूछा कि हे कृष्ण किस कारण से वे मनुष्य योगी औ सन्यासी नहीं है इसपर कर्म योगको सन्यास प्रतिपादन करते हुये कहते हैं कि हे पाण्डव अर्जुन सन्यास नामही को जो सब श्रुतियोने श्रेष्ठ कहा है सोई फल सन्यास रूप कर्मको भी जानो जो कहो कि कैसे जाने तो कहते हैं कि श्रुति शास्त्रमे कहे जो है तैसा योगमे भी हैं सोई उत्क श्लोकसे कहते हैं कि कर्म्म निष्ठ या। ज्ञान निष्ठजो होय परफलकी इच्छा त्याग विना योगी नहीं इससे फल कामना मे जिसका चित्त चित्तिस नही सोई योगी औ सन्यासीहै सोई कहा नह्यसन्यस्त संकल्पो योगी भवतिकश्चन २॥

दोहा

जाको जो संन्यास कहैं तिहयोग हुंपांडवजान नहिविनासंकल्पतजें कोउ योगी होत प्रमान २॥

आरुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यते योगा।
रूढस्यतस्यैवशमःकारणमुच्यते ३ ॥

शङ्करभाष्यं

ध्यानयोगस्य फलविशेषेणः कर्म्मयोगो वहिरङ्गसाधनमिति तंसन्न्यासत्वेन।
स्तुत्वाधुनाकर्म्मयोगस्य ध्यानयोगसाधनत्वंदर्शयति आरुरुक्षोरिति आरुरु
क्षोरारोढुमिच्छतः अनारूढस्य ध्यानयोगेवस्थातुमशक्तस्यैवेत्यर्थः कस्य तस्या
रुरुक्षोर्म्मुनेः कर्मफलसन्न्यासिन इत्यर्थः किमारुरुक्षोर्योगंकर्म्मकारणं सा
धनमुच्यते योगारूढस्य पुनस्तस्यैव शम उपशमः सर्वकर्मभ्यो निवृत्तिः
कारणं योगारूढत्वस्य साधनमुच्यत इत्यर्थः यावद्यावत् कर्म्मभ्य उप।
रमते तावत्तावन्निरायासस्य जितेन्द्रियस्य चित्तंसमाधीयते तथा सति स
झटिति योगारूढो भवति तथाचोक्तंव्यासेन नैतादृशं ब्राह्मणस्यास्ति वित्तं
यथैकताशमतासत्यताच शीलंस्थितिर्दण्डनिधानमार्ज्जवं ततस्ततश्चोप
रमः क्रियाभ्य इति ३ ॥

आनन्दगिरिकृतटीका

परमार्थसन्न्यासस्य कर्म्मयोगान्तर्भावे कर्म्मयोगस्यैव सदाकर्त्तव्यत्व।
मापद्येत तेनेतरस्यापि कृतत्वसिद्धेरित्याशङ्काकाण्डानुवादपूर्वकमुत्तरश्लो
कतात्पर्यमाह ध्यानयोगस्येत्यादिना मुमुक्षोर्योगमारोढुमिच्छोरि
ष्यमाणस्य योगारोहणस्य कर्म्महेतुत्वप्रदर्शितेन योगमारूढस्यापि तत्
फलशमो तदेवकारणंभविष्यति तस्यकारणत्वमशक्तित्वादित्याशं
क्याह योगारूढस्येति अनारूढस्येतस्यैवार्थंस्फुटयति ध्यानेति मुनित्वं
कर्म्मफलसन्न्यासित्वमौपचारिकमित्याह कर्म्मफलेति साधनं विनमुद्दिष्टा
तध्यानयोगसामीच्यायमिति शेषः तस्येति प्रकृतस्य कर्म्मिणो ग्रहणं ए
वकारोभिन्नक्रमः शमशब्देन सम्बध्यते कस्मान्ययोगव्यवच्छेदेन शमो
हेतुरिति तत्राह योगारूढत्वस्येति सर्वव्यापारोपरमरूपोपशमस्य योगा
रूढत्वे कारणत्वं विवृणोति यावद्यावदिति सर्वकर्मनिवृत्त्यायासाभा
वाद्वशीकृतस्येन्द्रियग्रामस्य चित्तसमाधाने योगारूढत्वं सिध्यतीत्यर्थः
सर्वकर्म्मोपरमस्य पुरुषार्थसाधनत्वे योगिनां सम्मतिमाह तथा चेति।
एकता सर्वेषु भूतेषु वर्त्तनो द्वैताभावोपलक्षितत्वमिति प्रतिपत्तिः श
मता तेष्वेवोपाधिकविशेषेष्वपि सत्सु निर्विशेषत्वधीः समता तेषामेवहि

गी॰ टी॰ ३

तव वर्तते शीलं स्वभावसम्पत्तिः स्थितिः स्थैर्यं दण्डनिपातनमहिंसनं आर्जवम
वक्रत्वं क्रियाभ्यः सर्वाभ्यः सकाशादुपरतिश्चेत्येतदुक्तं सर्वथया यादृशा
मेतादृशं नाम्महाह्मणस्य वित्तेषणस्य साधनमस्ति तस्मादेतदेवास्य निरति
शये पुरुषार्थसाधनमित्यर्थः ३ ॥

14

स्वामिकृतटीका

[illegible] आरूढस्य [illegible] इति
[illegible] करोति
[illegible] आसक्ति [illegible] कर्मविक्षेप [illegible] कल्या।
[illegible] शीलस्य सतः [illegible]

तर्हि यावज्जीवं कर्मयोग एव प्राप्त इत्याशंक्य तस्यावधिमाह आरुरुक्षोरि
ति ज्ञानयोगमारोढुं प्राप्तुमिच्छोः पुंसः तदारोहे कारणं कर्मोच्यते चित्त
शुद्धिकरत्वात् ज्ञानयोगमारूढस्य तस्यैव ध्याननिष्ठस्य शमः समाधिश्चि
त्तविक्षेपककर्मोपरमो ज्ञानपरिपाके कारणमुच्यते ३ ॥

पैशाचभाष्यं

ध्यानयोगस्य वहिरंगं कर्मेति यावद्ध्यानयोगारोहणसमर्थः स्यात्तावत् गृह
स्थेनाधिकृतेन कर्म कर्तव्यमनत्सोऽभिमतत्वात् ननु किमर्थं ध्यानयोगा
रोहणसीमाकरणं यत्तावद्विहितमेव विहितं कर्म यावज्जीवं तत्र तदारूढस्य तेन यो
गमारुरुक्षोरारोढुमिच्छोः मुनेः कर्म कारणं साध्यसाधनमुच्यते योगारू
ढस्य तस्यैव कर्मणः शमः उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगा।
रूढस्य साधनमुच्यते इत्यर्थः आरुरुक्षोर्मुनेर्योगे कर्म कारणमुच्यत इति
विशेषणादारूढस्य शममेव सम्बन्धकरणात् आरुरुक्षोरारूढस्य च शमः
कर्मणोरुभयं कर्तव्यत्वेनाभिप्रेतं चेत् तदारुरुक्षोरारूढस्य चेति विशे
^स्यात्
षणं विभागकरणं चोपपद्यत एवेति चेन्न तस्यैवेति वचनाज्ज्ञानयोगग्रहणा
च्च योगारूढस्येति च आसीत मत्पर एव मे वारूढत्वे तस्यैवारूढस्य शम एव कर्तव्यं
कारणं योगफलं प्रत्युच्यत इति श्रुतेर्न यावज्जीवं कर्तव्यत्वं प्राप्तिस्तस्यापि
कर्मिणः योगभ्रष्टादिवचनाच्च गृहस्थस्य चेत्कर्मयोगो विहितः षष्ठेऽध्याये
स योगभ्रष्टः कर्मगतिं कर्मफलं प्राप्नोतीति तस्य नाश[illegible]शंकानुपपन्ना
स्यादवर्षं कृतं कर्म काम्यं नित्यं वा मोक्षस्य निमित्तादनारभ्यत्वेन स्वफलमा
रभते एवं नित्यस्य च कर्मणो वेदप्रमाणावबुद्धत्वात् फलेन भवितव्यमित्यवो

ण

वाम अथवा आवेदयानपि कुप्रसंगादिति नच कर्मणा तत्रिउभयथ प्रहव
वनम र्थवकर्मणो विध्रेश कर्त्न पपनेः कर्मकृत मीश्वरे संन्यस्यतः
कर्ततिकर्मफलं नारभन्त इति चेत् ईश्वरे संन्यासस्याधिकारफलहेतुत्वोपप। न
चैतव नेमोक्षायैवेति कर्मणां कृतानामीश्वरे संन्यासो मोक्षायैव न फलान्तरा
य योगसहितो योगारूढश्च इति अतएव तनिनाशौभके वेति वेनूपका। शंका
कीयन विनाशमा निराशीरपरिग्रहः ब्रह्मचारिव्रते स्थित इति च गृहस्थवा
नप्रस्थयोः कर्मसंन्यासविधानात्सर्वाश्च ध्यानकाले की मद्वाया शंकायैनेका
किनेविधीयत न च गृहस्थस्य निराशीरपरिग्रह इति वचनम तुकूले वि
हाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः सर्वारंभपरित्यागी इति तत्र
गवतास्व त्रेवचनानि दर्शितानिति विरुध्येत वर्णाश्रमप्रतिषेधसत्त्वान्नयोग
ति मारुरुक्षोः गृहस्थस्याग्निहोत्रादिफलनिरपेक्षमनुष्टीयमानं ध्या। कर्म
नयोगारोहणसाधनत्वेन सत्वशुद्धिः द्वारेण प्रतिपद्यते इति संन्यासी च योगी
वेति स्तूयते ३ ॥

रामानुजभाष्यं

यस्य सर्वे समारंभाः कामसंकल्पवर्जिता इत्युक्तं हि कर्मयोगापवर्गसमाधेन यो
गेनास्य यतीनामाह योगमात्मावलोकनं प्राप्तुमिच्छोर्मुमुक्षोः कर्मयोग ए
व कारणमुच्यते तस्यैव योगारूढस्य प्रतिष्ठितयोगस्य शमः कर्मनिवृत्तिः
कारणमुच्यते यावदात्मावलोकनरूपमोक्षप्राप्तिस्तावत्कर्म कार्यमित्यर्थः ३ ॥

अभिनवगुप्तकृतटी॰

यद्यपि ह्युत्तमसिंहासने राज्यमिति शुक्लाचकेवलस्य निष्क्रियस्य संन्यासि
त्वमुपपद्यत इत्युक्तं तथापि मुनेर्ज्ञानवतः कर्मकरणीयं कारणं प्रापकं
शमः प्रशमभूमावनुपरमः कारणमत्रलक्षणम् ३ ॥

परमार्थप्रपाटीका

अथ कर्मज्ञानयोरवधिमाह आरुरुक्षोरिति । यमनियमादिसोपान
मार्गेण आरूढमूर्ध्वगतिं प्राप्तुमिच्छोः पुरुषस्य कर्मकारणमुच्यते आरोह
णावधिकर्मकर्तव्यं चित्तशोधकत्वात् शुद्धचित्तस्यैव चित्तप्रजनकत्वा
त् तथा तस्यैवारूढदशां प्राप्तस्य ध्याननिष्ठस्य ज्ञानपरिपाकार्थं शमः वि
क्षेपोपरमकारणं ३ ॥

गी
टी·
ष·

वनमालीटीका

ननु किं प्रशस्तत्वात्कर्मयोग एव यावज्जीवमनुष्ठेयस्तत्राह आरुरुक्षोरिति योगो भगवति चित्तैकाग्र्यं आरुरुक्षोरारोढुमिच्छोर्मुनेः शास्त्रविहितान्यग्निहोत्रादिकर्माणि भगवदर्पणधिया कृतानि कारणमारोहणे साधनमुच्यते अनुष्ठेयमुच्यते वेदमुखेन मया योगारूढस्य चित्तैकाग्र्यं प्राप्तस्य तस्यैव शान्तकर्मिणोऽपि। तत: शम: कर्मसंन्यास एव भगवदापरोक्ष्ये मुख्यकारणं साधनमुच्यते ३ ॥

ऊरुक्रमवैजयन्तीटीका

एवं संन्यस्तसंकल्प एव जन: कर्मयोगी भवति स एव संन्यासी चेत्तर्हि केदानीमेवंभूतोऽयं कर्मयोग: स एव तावत्साधारणसाधनं भवतीत्याह आरुरुक्षोरिति योगमात्मदर्शनरूपं ध्यानयोगाभिधमष्टाङ्गयोगं आरुरुक्षो: आरोढुमिच्छोर्मुनेरात्मस्वरूपमनन शीलस्य मुमुक्षो: कर्म कर्मयोग: कारणं निदानमुच्यते य: पूर्वमारुरुक्षुस्तस्यैवारूढस्य ध्यानस्थो: तत्करणशुद्धिर्ध्यानतिष्ठां चित्तप्रसत्तिम्प्रवर्तयति अतस्तस्यैव कारणत्वमित्यर्थ: य: पूर्वमेवारूढस्तस्यैवारूढस्य ध्याननिष्ठा प्राप्तस्य शम: कर्मोपरति: कारणं हेतुरुच्यते तस्माद्यावदात्मदर्शनं न भवेत्तावत्कर्म कुर्वित्यर्थ: ३ ॥

मधुसूदनीटीका

ननु किं प्रशस्तत्वात्कर्मयोग एव यावज्जीवमनुष्ठेय इति नेत्याह ॥ योगमन्त:करणशुद्धिरूपवैराग्यमारुरुक्षोरारोढुमिच्छोरनारूढस्य ततो मुमुक्षो: कर्मफलत्यागिन: कर्मणा सद्विहितमग्निहोत्रादिकं नित्यं भगवदर्पणबुद्ध्या कृतं कारणं योगारोहणे साधनमनुष्ठेयमुच्यते वेदमुखेन मया योगारूढस्य योगमन्त:करणशुद्धिरूपं वैराग्यं प्राप्तवतस्तस्यैव पूर्वं कर्मिणोऽपि तत: शम: सर्वकर्मसंन्यास एव कारणमनुष्ठेयतया ज्ञानपरिपाकसाधनमुच्यते ३ ॥

सदानन्दीटीका

ननु किं कर्म प्रशस्तत्वात्सर्वदानुष्ठेयमात्रेत: मैवं धीशुद्धिवैराग्यमारुरुक्षोर्हि कर्म तत् २ शुद्धिशमस्य तस्यैव तत्त्यागो ज्ञानसाधनं अधिकारविभागेन कर्मतत्त्यागयोरपि २ कार्याकार्यव्यवस्थात्रोक्ता भगवता मया ३ ३ ॥

नीलकंठीटीका

तत्र कर्मानुष्ठानस्यावधिमाह आरुरुक्षोरिति यावद्धि योगं यमनियमाद्य

ष्ठां योगोपेतमनसो लक्षं यावदारोढुमिच्छति तावत्कर्माण्यनुतिष्ठेत् तस्यआ।
रुरुक्षोर्मुने [illegible] कारणं तीव्रवैराग्योत्पादनद्वारा कर्म भवति तस्यैव यो
गारूढस्य योगाभ्यासानुष्ठानेन प्रहतस्य विक्षेपस्य सहस्य योगारोहे कर्मणा शमः
संन्यासः कारणमुच्यते नहि कर्मसव्याप्तेनोः तमविनतया योगमनुष्ठा
तुमीष्टे ३ ॥ आनंदटीका

योगं कर्मणो ज्ञानसमस्य यद्भूमिकामारुरुक्षोः वर्णाश्रमोक्तं कर्मैव कार
णं योगारूढस्य चरमनिष्ठां प्राप्तस्य शमः संकल्पविकल्पसंन्यासः
कारणं संकल्पविकल्पसंन्यासे भं तावत् शारीरिक कर्म वर्णोक्तविचोदित ३५
मपि कर्मानुवर्ततेऽप्रवततः पांवहिः संवेदनाभावे वाऽऽसेंद्रियव्यापारोपरम
वत् श्रोतस्मार्तानामपुपरम इत्यपोह्यतेतिगीतमेव अथवमनेर्मनन
शीलस्य योगमारुरुक्षोः संयमेन सर्वाजितेतरोभूमिमाक्रमितुमिच्छोः
कर्मयोगांगाष्टकस्य यमनियमादेस्सवनेकारणं साधनमुच्यते योगारू
ढस्यार्थवत्संयमेनैव कृत्वेन कारयन्निति तीयप्रकार शमः कारणमुच्यते ६
[illegible] ॥ रामकंठीटीका
किंतु तृष्णा नृयैथोक्तयोगविघ याहरुहत्वावस्थत्व संभवतीति च तत्कृतं तस्य भेदं दर्शति
पादयितुमाह॥
मुनेर्योगिनिः प्राप्तमात्रज्ञानतात्मनननिष्ठत्वादनुष्ठातुं यथोक्तं योगमा
रुरुक्षोरारोढुकामस्य ततत्रतिविक्षवांनिष्ठालिप्समानस्य कर्म वर्णाश्र
मोक्तमाश्रमक्रिया कारणं योगारोहहेतुः तस्यैव तथा विधेस्य वकारण
भूतं कर्मोज्झन्तपव पश्चं भृणवत् तशं निश्चिन्त्यादिना सर्वोपरिहृतिर्व्य
वधानं नित्याभ्यासवशात् योगारूढस्य योगे लब्धप्रतिष्ठवितत्वे सतिपर
मात्मसमापन्नस्य शमः संकल्पविकल्पतो भवत्य कारणं प्रयोजकं नि।
मित्तं किमनं भवति आगममात्रेण प्रामोपदेशास्य श्राघ्यमकल्पिकस्य यो
गिनो योगप्रतिष्ठालाभोऽस्त कस्यापि तत्याभिकारणं कर्मैवोपयतया
वर्तते तस्मिंश्च ग्रहादराभ्यांसम्यगनुष्ठितेन ज्ञाते च प्रसादकाष्ठाप्रामेत
त्कर्मोत्पजनतपवशो मः परमोपेयतया कारणं संपद्यते [illegible]।
[illegible] ॥

गी॰ यद्यपि प्रभूतमसंसिद्धासनेरा लासिकी [illegible]टीका त्रपमितिवृत्तिक्रियं स्पसंन्यासत्वप्रसिद्धं

टी॰ च॰ तथापि मुनेर्भृत्यागेनापि मननशीलस्य योगं वल्लमारोमुरुक्षयोगमारूढुमिच्छोः
तत्रावस्थानमसमर्थस्यैवारुरुक्षोरित्यर्थः कर्मनिष्कामकर्मानुष्ठानेका
रणं योगारोहहेतुरुच्यते मया तस्यैव मारुक्षयोगकालभूतकर्मोऽन्हत
एव योगारूढस्य परमात्मसमापन्नस्य शमः संकल्पविकल्परूपतोभय
यः कारणं निमित्तमुच्यते वेदादिभिर्विनमया ध्यानयोगनिष्ठस्य तस्यैव स
र्वविकल्पोपरतिः परमात्मसमापत्तेः प्रयोजकेत्यर्थः अथवा तस्यैव योगा
रूढस्य योगेमुरुक्षयोगे आरूढस्य लब्धप्रतिष्ठस्य शमः कारणं लक्षणमुच्य
ते [illegible] ३॥

पंचोलीटीका

ध्यानयोगस्य कर्मफलनिरपेक्षः कर्मयोगः संन्याससापेक्षायावहिरं
गसाधनमिति तं संन्यासत्वेन स्तुत्वाधुना ध्यानयोगसाधनत्वं कर्मणो
पदर्शयति आरुरुक्षोः इति योगमारूढुमिच्छतो मुनेः कर्मफलसं
न्यासिनः कर्मैव कारणं साधनमुच्यते पुनः तस्यैव योगारूढस्य श
मः कर्मोपशमः कारणं हेतुः ३

भगावीरससिद्धोधिनी॥

आरुरुक्षोरिति मुनेः शास्त्राचार्योपदिष्टार्थमननशीलस्य वि
रुद्धसंकल्पानां त्यागाज्जोषमास्थितस्य च योगं समत्वलक्षण
मारुरुक्षोरारोढुमिच्छोः कथमिदं समतालक्षणं योगमाप्नुया
मितीच्छतः कर्म कर्मेन्द्रियव्यापारः कारणं स्वाभिलाषसाधन
मुच्यते योगारूढस्य सर्वेषां प्राणसमतारूपयोगस्य तस्यैव त
थाविधस्यैव कर्म कुर्वत एव शमो मनोविकल्पत्यागः कारणं श
मजये साधनं कथ्यते अयमत्राभिप्रायः समतालक्षणयोगवि
शिष्टस्य स्वधर्माचरणेन चतुर्वर्गाप्तिः फलमिति सिद्धांतः तत्र च

कर्मेंद्रियव्यापारे सत्येव विद्याविनयेत्याद्यो प्रतिपादितत्व
रूपसमतालक्षणायोगसाफल्यं कथं भीष्ममहं संख्ये इ
त्यादिरूपप्रारभ्यमाणप्रव्यावक मानसिकसंकल्पत्यागे
न कर्मकौशललक्षणकर्मयोगनिष्पत्तिरिति अत एव स्र
नैरिति साहत्नोक्तिः एषचार्थो नैव किंचित्करोमीत्यत्र स्फु
टीकृतोस्माभिः ३॥

मधुभाष्य

आरुरुक्षोर्मुनेरिति योगमारुरुक्षोरूपायमूर्तिमिच्छोः
योगारूढस्य समस्योपायस्यापरोक्षज्ञानि नष्टेत्यर्थः कार
णं परमसत्त्वकारणं अपरोक्षज्ञानिनोपि समाध्यादिफल
मुक्तं तत्र सर्वोपक्रमेन समाधिरेव कारणं प्राधान्येनेत्यर्थः
तथापि यथा भोक्तव्योपरमस्तदैव सम्यगसंप्रज्ञातसमा
धिर्जायते अन्यदा भगवद्धविताद्दो स्थितिः तद्योक्तं येवा
पश्यंति भगवंतमेवमाद्विनः पर तेषामेव वचसमनुसमा
धिर्जायते न त्वन्यां भोक्तव्यकर्मण्यदीशो जपेन कथयापि
वा वर्तयंति महत्मानस्त्वडतां त्वन्यपरायणा इति ३॥

भाषा अनुवाद

तो फेरि जावत्जीवन कहे जिन्दगीभर कर्म्मयोग ही करना चहिये
जो ऐसी शंका करो तो कर्मयोग की अवधि कहते हैं कि ज्ञानयोग
मे आरूढ होने की इच्छा करने वाले पुरुष को उस राहके चढने मे
कर्म्म ही कारण रूप कहा है क्यों कि निष्काम कर्म्म चित्तशुद्धि कर
ता हैं और ज्ञानयोग आरूढ कहे ज्ञानी को शमकहे विक्षेपकारी।
कर्म्म सकल का त्यागही उचित जिसलिये त्याग ज्ञान परिपाक का
कारण रूप कहा है २

दोहा

योग अभिलाषी जो मुनि ताको हेतक सो कर्म योगारूढ होय
ताहिको समता कारण धर्म ३॥

18

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते सर्वसं।
कल्पसंन्यासी योगारूढस्तदोच्यते ४॥

शंकरभाष्यं

अथेदानीं कदा योगारूढो भवतीत्युच्यते यदेति यदा समाधीयमानचित्तो योगी हि इन्द्रियार्थेषु इन्द्रियाणामर्थाः शब्दादयस्तेष्विन्द्रियार्थेषु कर्मसु च नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुद्ध्या नानुषज्जते अनुषङ्गं कर्तव्यताबुद्धिं न करोतीत्यर्थः सर्वसंकल्पसंन्यासी सर्वान् संकल्पानिहामुत्रार्थकामहेतून् संन्यसितुं शीलमस्येति सर्वसंकल्पसंन्यासी योगारूढः प्राप्तयोग इत्येतत्तदा तस्मिन् काले योगारूढ उच्यते सर्वसंकल्पसंन्यासीति वचनात् सर्वांश्च कामान् कामांश्च सर्वाणि च कर्माणि संन्यसेदित्यर्थः संकल्पमूला हि सर्वे कामाः संकल्पमूलः कामो वै यज्ञाः संकल्पसम्भवाः काम जानामि ते मूलं संकल्पात्त्वं हि जायसे न त्वां संकल्पयिष्यामि तेन मे न भविष्यसि इत्यादिस्मृतेः सर्वकामपरित्यागे च सर्वकर्मसंन्यासः सिद्धो भवति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते इत्यादिश्रुतिभ्यो यद्यद्धि कुरुते कर्म तत्तत् कामस्य चेष्टितमित्यादिस्मृतिभ्यश्च न्यायाच्च न हि सर्वसंकल्पसंन्यासे कश्चित् स्पन्दितुमपि शक्तः तस्मात् सर्वसंकल्पसंन्यासीति वचनात् सर्वान् कामान् सर्वाणि कर्माणि च त्याजयति भगवान् ४॥

आनन्दगिरिकृतटीका

योगप्राप्तेः कारणकथनानन्तरं तत्प्राप्तिकालं दर्शयितुं श्लोकान्तरमवतारयति अथेति समाधानावस्था यदेत्युच्यते तत्र पूर्वोक्तं समाधीयमानचित्तो योगीति शब्दादिषु कर्मसु चानुषंगस्य योगारोहणप्रतिबन्धकत्वात्तदभावस्य तदुपायत्वं प्रसिद्धमिति द्योतयितुं हीत्युक्तं सर्वेषामपि संकल्पानां योगारोहणप्रतिबन्धकत्वमभिप्रेत्य सर्वसंकल्पसंन्यासीत्यत्र विवक्षितमर्थमाह सर्वानिति सर्वसंकल्पसंन्यासेऽपि सर्वेषां कामानां कर्मणां च प्रतिबन्धकत्वसम्भवे कुतो योगप्राप्तिरित्याशंक्याह सर्वेति सर्वसंकल्पपरित्यागे यथोक्तविध्यनुष्ठानमर्थसिद्धमिति मत्वा तत्राह संकल्पेति मूलोन्मूल

नैव तत्कार्यनिवृत्तिरयत्नसुलभेति भावः तत्र प्रमाणमाह संकल्पमूल इति
तत्रान्वयव्यतिरेकावभिप्रेत्योक्तमुपपादयति काम इति सर्वसंकल्पाभावे का
माभाववत् कर्माभावस्य सिद्धत्वेऽपि कर्मणां कामकार्यत्वात्तन्निवृत्तिश्च का
मपि निवृत्तिमुपन्यस्यति सर्वकामेति यद्यत्कर्म कामकार्यं तेन च श्रुति
स्मृती प्रमाणयति स यथेति स पुरुषः स्वरूपमजानन् यत्फलकामो भव
ति तत्साधनमनुष्ठेयतया बुद्धौ धारयतीति तत्क्रतुर्भवति यद्वा अनुष्ठेयत
या गृह्णाति तदेव कर्म बहिरपि करोतीति कामाधीनं कर्मेति स्मृत्यर्थः
कामजन्यं कर्मेत्यन्वयव्यतिरेकसिद्धमिति द्योतयितुं स्मृतौ हिशब्दः न्या
यमेव दर्शयति नहि सर्वसंकल्पेति न्यायावदर्शनादित्यर्थः नित्यनैमित्तिक
कर्मानुष्ठानं दूरनिरस्तमिति वक्तुमपिशब्दः श्रुतिस्मृतिन्यायसिद्धमर्थमुप
संहरति तस्मादिति ४॥

स्वामिकृतटीका

कीदृशोऽसौ योगारूढो यस्य शमः कारणमुच्यते इत्यपेक्षायामाह यदाहीति इन्द्रियभो
गेषु शब्दादिषु तत्साधनेषु च कर्मसु यदा नानुषज्जते आसक्तिं न करोति तत्र हे
तुः आसक्तिमूलभूतान्सर्वान्भोगविषयान्कर्मविषयांश्च संकल्पान्संन्य
सितुं त्यक्तुं शीलं यस्य सः तदा योगारूढ उच्यते ४॥

पिशाचभाष्यटीका

अथेदानीं कदा योगारूढो भवतीत्युच्यते यदाहीति यदा समाधानचित्तो
योगी हि यस्मादिन्द्रियार्थेषु इन्द्रियाणामर्थाः शब्दादयस्तेष्विन्द्रियार्थेषु क
र्मसु नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुद्ध्या नानुषज्जते अनु
षङ्गं कर्तव्यताबुद्धिं न करोतीत्यर्थः सकलसंकल्पसंन्यासी सर्वान्संकल्पा
न्निहामुत्रार्थकामहेतून्संन्यसितुं शीलं यस्य स सर्वसंकल्पसंन्यासी योगारू
ढः शमो योगारूढस्य तदा तस्मिन्काले उच्यते सर्वसंकल्पसंन्यासीति भ
गवद्वचनात्सर्वाणि कर्माणि च संन्यस्येत्यर्थः संकल्पमूला हि सर्वे कामाः सं
कल्पमूलाः कामा वै यज्ञाः संकल्पसंभवाः कामजानामि ते मूलं संकल्पा
त्किल जायसे न त्वां संकल्पयिष्यामि समूलो विनशिष्यसीति स्मृतेः सर्वसंक
ल्पपरित्यागे सर्वकर्मपरित्यागः सिद्धो भवति स यथाकामो भवति तत्क्रतुः
भवति तत्कर्म कुरुते इत्यादिश्रुतिभ्यः यद्यद्धि कुरुते तत्तत्कामस्य चेष्टितमि

(हाशिया: दा; योगारूढः; दि; त; यत्क्रतुर्भवति; कर्म)

निस्पृहतिष्यस्य न्यायाच्च सर्वसंकल्पसंन्यासेन हि कश्चित्संदिग्धमपि शाकः
तस्मात्सर्वसंकल्पसंन्यासवचनात् सर्वान्कामान्सर्वाणि च कर्माणि त्याजय।
ति भगवान् ४ ॥

रामानुजभाष्य

कस्य प्रतिष्ठितयोगो भवतीत्यत्राह यदाहीति यदायं कर्मयोगी आत्मैका।
नुभवस्वभावतया इंद्रियार्थेषु आत्मव्यतिरिक्तप्राकृतविषयेषु [illegible]।
तत्संबंधिषु कर्मसु च नानुषजते नृ सर्गमर्हति तदा हि सर्वसंकल्पसंन्यासी
योगारूढ इत्युच्यते तस्मादारुरुक्षोर्विषयानुभवार्हतया तदनुषंगाभ्यास
रूपः कर्मयोग एव निष्पत्तिकारणं अतो विषयानुषंगाभ्यासरूपकर्मयोग।
मेवारुरुक्षुः कुर्यादित्याह ४ ॥

अभिनवगुप्तकृतटीका

एष एवार्थः प्रकाश्यते इंद्रियार्थाविषयास्तदर्थानि च कर्माणि विषया
र्जनादीनि (अस्यां च बुद्धावशयमेवावधेयमित्याह ४ ॥

परमार्थप्रपाटीका

अथ योगारूढस्य स्वरूपमाह यदेति यदा यस्मिन्काले इंद्रियार्थेषु रूपरसा
दिषु तत्साधनकारणीभूतेषु कर्मसु चेष्टासु न सज्जते आसक्तिं न करोति अ
यनकेवलं कर्मेंद्रियनिरोधमात्रमित्याह सर्वेति सर्वे विषयभोगा निमि।
त्तीभूताः संकल्पाः सन्तु संन्यस्तुं शीलं यस्य सन्तदा तस्याप्यवस्था यो योगारूढ
इत्युच्यते नान्यः अतो विषयत्यागे मोक्षं आसक्तेश्च वेदपरस्यो लोके च्युतरागादिस्व
भावे सज्जे[illegible]दित्याह ४ ॥

वनमाली टी॰

कदा योगारूढः स्यात्तत्राह यदेति यदा चित्तसमाधानकाले इंद्रियार्थेषु श
ब्दादिषु कर्मसु च नित्यनैमित्तिककाम्यनिषिद्धेषु नानुषज्जते स्वस्य स्वभोक्तृ
त्वानुसंधानाद्दाविर्भूतस्वरूपानंदानुभवेनैव तत्प्रयोजनाभावाद्दहमेतेषां
कर्ता ममैते भोग्या इत्यभिनिवेशरूपमनुषंगं न करोति हि यतस्तस्मात्स
र्वसंकल्पसंन्यासी सर्वेषां संकल्पानामिदं मया कर्तव्यमनेनैतत्फलं भोक्तव्य
मित्येवंरूपाणां मनोवृत्तिविशेषाणां तद्विषयाणां कामानां तत्साधनानां च क
र्मणां त्यागशीलस्तदा शब्दादिषु कर्मसु चानुषंगाभावात् अतः स संकल्पस्य योगा

रोहणप्रतिबंधकस्याभावाद्योगे भगवति तैलधारावन्निश्चलामेकाग्रचित्तवृ
त्तिमारूढो योगारूढस्तदोच्यते ४ ॥

अथ मेवैजयन्तीटीका

ननु योगारूढस्य मुमुक्षोः किंलक्षणः कदा च योगारूढो भवतीत्यपेक्षायामाह ।
यदा हीति यदा यस्यामवस्थायां हि निश्चयेनेन्द्रियार्थेषु श्राव्येषु शब्दादिविषये
षु कर्मसु च न तत्त्वविषयसाधनरूपेषु नानुषज्जते आत्मदर्शनानंदेन तत्त्वीकृ
ताशेषशाब्दनविषयानुभवो मुमुक्षुरासक्तिं न करोति कीदृशः सर्वसंकल्पसं
न्यासी सर्वान् ब्रह्मरुद्रेन्द्राद्युत्तमरादीशाद्याधिपत्यजनितसुखभोगाभिलाष
रूपान्लौकिकविषयकामसंकल्पान् सम्यक् न्यासितुं परित्यक्तुं शीलं यस्य स त
था ईदृशश्च यदा भवति तदैव योगारूढः स्वस्वरूपध्याननिष्ठ उच्यते कथ्यते ४ ॥

मधुसूदनीटीका

कदा योगारूढो भवतीत्युच्यते यदा यस्मिन्चित्तसमाधानकाले इंद्रियार्थे
षु शब्दादिषु कर्मसु च नित्यनैमित्तिककाम्यलौकिकप्रतिषिद्धेषु नानुषज्जते
तेषां मिथ्यात्वदर्शनेनात्मनोऽकर्त्रभोक्तृपरमानंदाद्वयस्वरूपदर्शनेन च प्र
योजनाभाववुद्ध्याहमेतेषां कर्ता ममैते भोग्या इत्यभिनिवेशरूपमनुषंगं न
करोति हि यस्मात् तस्मात्सर्वसंकल्पसंन्यासी सर्वेषां संकल्पानामिदं मया क
र्तव्यमेतत्फलं भोक्तव्यमित्येवंरूपाणां मनोवृत्तिविशेषाणां तद्विषयाणां च
कामानां तत्साधनानां च कर्मणां त्यागशीलः तदा शब्दादिषु कर्मसु चानुषंग
स्य तद्धेतोश्च संकल्पस्य योगारोहणप्रतिबंधकस्याभावात् योगं समाधिमा
रूढो योगारूढस्तदोच्यते
४ ॥

सदानंदटीका

यस्मिंश्चित्तसमाधानकाले कर्मसु तत्फले तन्मिथ्यात्वधिया स्वात्मा कर्त्रभो
क्तृधिया न तथा १ अहं कर्तास्य भोगेन तत्फलं मे चेति रंजनां न करोति परित्य
क्तसर्वकामस्तथा मुनिः २ इहामुत्रार्थकामानां हेतूनां चापि कामतः संन्यासे
शीलमस्यासौ प्राप्तयोगस्तदोच्यते ३
४।७

नीलकंठटीका

ननुयोगपदेनसम्प्रज्ञाताख्यानिर्बीजःसमाधिरुच्यतेतन्मात्रारूढस्यकर्मणोऽन्या
गःस्वतःसिद्धत्वादविधेयत्वाशङ्काप्रकृतेयोगारूढपदस्यार्थमाह यदाहीति
इन्द्रियार्थेषुशब्दादिषुइन्द्रियगोचरेषुकर्मसुचतन्त्वाभिसाधनेषुतद्दर्शनेष्वनु[illegible]सज्ज
तेवैरागपदाक्षात्मकोनभवति नापिमनसाइदंमेभूयात् एतदर्थमहमिदंकर्म
कुर्यामितिसंकल्पयति तादृशःसर्वसंकल्पसंन्यासीयदाभवति तदायोगारू
ढउच्यते यथानीवमुमुक्षोःयेनोयत्रनीरागोव्यासंगोनरम्यकाभोजनारूढ
एवभवतितथानीत्रारूढत्वावान्सर्वत्रवीतरागस्तत्सर्वकर्मायोगारूढ
वभवतितावत्कर्मारिकर्तव्यानितनुःपरेमाज्ञानीमर्थः ४॥

श्रानन्दीटीका

योगारूढंलक्षयति॥
अविभक्तेन्द्रियानयस्य अहङ्कारादिपंचकसंयमार्थः ज्ञानकर्मसमुच्चयार्थस्य
त्यागमापव [illegible] ४

रामकंठीटीका

अतएवप्रशंसत स्पयोगारूढस्यलक्ष
एतमाह यदाहियस्यामेवावस्थायामिन्द्रियार्थेष्वविरक्तेष्वविषयेषु इन्द्रियैःस्पृश्यमा
नेष्वपिकर्मस्वनावात्साभिलिहत्वेषुयत्नतयःप्रवृत्तिषुक्रियमाणेष्वपिनानुष
ज्जते सहजानन्दत्वमिताभ्रासक्तिंभजते केवलएवनश्वपदार्थजातंस्पृश
न्नपिस्वभावव्योमप्रतिष्ठ एवभवति तदासर्वेषांसंकल्पानांफलाभिस
न्धीनांसंन्यासितात्यागितायोगारूढःयोगीकर्मसमाधावारूढोलब्धप्रति
ष्ठउच्यते [illegible]
[illegible]: ४॥

लास्तिकी [illegible]टीका

एषएवार्थःप्रकाश्यते॥
वदायस्यामवस्थायांविषयेष्विन्द्रियैःस्पृश्यमानेष्वपि तदर्थेषुकर्मसुक्रि
यमाणेष्वपिनानुषज्जतेआसक्तिंनभजतेकेवलएवनश्वभावजातंस्पृ
शन्नपिस्वभावव्योमप्रतिष्ठएवभवति अत्रहेतुगर्भितंविशेषणं सर्वेति
सर्वेषांकर्मणांफलानांचसंकल्पसंन्यासनेशीलंयस्यसतदायोगा
रूढउच्यते योगेसमाधावारूढोलब्धप्रतिष्ठ इति [illegible]
[illegible] ४॥

पंवोलीटीका

कदासोयोगारूढोभवतिकीदृशश्चेतितत्रभयमाह यदाहीति हियस्मा

गी॰
टी॰
ष

तु यदा न इंद्रियार्थेषु शब्दादिविषयेषु इन्द्रः कर्मसु नित्यनैमित्तिककाम्यनिषिद्धेषु नानुषज्जते कर्तव्यतावुद्धिं न करोति न तदा सर्वसंकल्पसंन्यासी इहामुत्रार्थकामहेतून् सर्वसंकल्पान् संन्यसितुं शीलं यस्य सः योगारूढः योगमारूढ उच्यते ४

रगावीरसमिद्धोथिनी ॥

अथ योगारूढस्वरूपमाह यदाहीति हियस्माद्धि निश्चयेन इंद्रियार्थेष्विति च्छेदः इंद्रियार्थेषु चक्षुरादिग्राह्येषु शत्रुमित्रबंध्वादिसंबंधरूपादिषु विषयेषु यानि कर्माणि अर्थात् चक्षुरादीनां स्वस्वविषयग्रहणरूपदर्शनादिव्यापारास्तेषु सत्स्वपि नायोरूपलक्षणाविशिष्टः क्षत्रियवीरः नानुषज्जते अर्थात् शत्रुमित्रबंध्वादिसंबंधिरूपादिषु विषयेषु रागभयवीभत्सामोहादिभिरसृष्टीतांतःकरणो यदा न भवति तदा योगारूढस्तूच्यते अतीनामजनद्रत्यपेक्षायां देवगर्भे विशेषणमाह सर्वेति सर्वान् संकल्पान् अयं मम शत्रुः कथं हंतव्य एवं हत्वा योगतिं प्राप्स्यामि अयं च बहुशोन वधार्हः एनं हत्वा त्वरणामपि जीवितास्थितेरित्यादिरूपान्मानसिकव्यापारान् संन्यसितुं त्यक्तुं शीलं यस्य सः ४ ॥

मधुभाष्य

योगारूढस्य लक्षणमाह यदेति सम्यगनुषंगस्य सैव भवति उक्तं च स्वतो दोषलयो हृष्टा वितरेषां प्रयत्नत इति अत एव योगारोहः प्रयत्नेन कर्तव्य इत्याह ४॥

भाषा अनुवाद

जो पूंछो कि वह ज्ञानयोग आरूढ़ पुरुष जिसको विक्षेपकारी कर्म्मका त्याग कहा गया कैसा होता है तो कहते हैं कि जब इन्द्रियों के भोग जो विषय तिनमे और भोगके साधन भूत कर्मों मे आशक्त न होय और कर्म्म संकल्प को छोड़िसकै तब उसको जोगारूढ़ कहते हैं ४

दोहा

जबनहिंइंद्रीविषयमे कर्महिमे बंधहोय सभीकल्पनात्याग
तबयोगारूढ़ कह्यो सोय ४॥

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् आत्मै
व ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ५ ॥

शंकरभाष्यं

यदैवंयोगारूढस्तदा तेनात्मानोद्धृतो भवति संसारादनर्थज्ञानादतः उद्धरे
दिति उद्धरेत् संसारसागरे निमग्नमात्मनात्मानं ततउत् ऊर्ध्वं हरेत् योगारूढ
तामापादयेदित्यर्थः नात्मानमवसादयेन्नाधोनयेत् नाधोगमयेत् आत्मैव हि
यस्मादात्मनो बन्धुर्नह्यन्यः कश्चिद्बन्धुर्यः संसारमुक्तये भवति बन्धुरपिताव
न्मोक्षं प्रतिप्रतिकूलएव स्नेहादिबन्धनायतनत्वात्तस्माद्युक्तमवधारणमा
त्मैवह्यात्मनोबन्धुरिति आत्मैवरिपुः शत्रुर्योन्योऽपकारी बाह्यः शत्रुः सोप्या
त्मप्रयुक्तएवेति युक्तमेवावधारणमात्मैवरिपुरात्मनइति ५ ॥

आनन्दगिरिकृतटीका

योगारूढस्य किंस्यादित्याशंक्याह यदैवमिति योगारोहस्य दृष्टादृष्टोपायैरव
श्यकर्तव्यतायै युक्तिहेतुत्वं तद्विपर्ययस्याधःपतनहेतुत्वंच दर्शयति अतइति
तद्धेतुमाह आत्मैवेति उद्धरणोपलाममात्मनः सूचयति संसारेति संसा
राद्धि उद्धरणं कीदृगित्याशंक्याह योगारूढतामिति योगप्राप्तावनास्थायां तन्न
कर्तव्यमित्याह नात्मानमिति योगप्राप्त्युपायश्चेन्नानुष्ठीयते तदा योगाभाव
संसारपरिहारासम्भवादात्माधोनीतः स्यादित्यर्थः ननुनात्मानं संसारे निम
ग्नं तदायोबन्धुस्तस्मादुद्धरिष्यतिनेत्याह आत्मैवहीति कुतोवधारणमन्य
स्यापिप्रसिद्धस्यबन्धोः सम्भवादतआह नहीति अन्योबन्धुः सन्नपि संसारमुक्तये
नभवतीत्येतदुपपादयति बन्धुरपीति स्नेहादीत्यादिशब्दात्तदनुसरणप्रवृत्ति
विषयत्वंगृह्यते आत्मातिरिक्तस्यापि शत्रोरपकारिणः सम्प्रसिद्धत्वादवधा
रणमनुचितमित्याशंक्याह योन्यइति ५ ॥

स्वामिकृतटीका

अतोविषयासक्तित्यागेमोक्षंतदासक्तौचबन्धंपर्यालोच्यरागादिस्वभावंत्यजे
दित्याह उद्धरेदिति आत्मनाविवेकयुक्तेनात्मानंसंसारादुद्धरेत् नत्वव
सादयेत् अधोननयेत् हियस्मादात्मैवमनः संगादुपरतमात्मनः स्वस्यबं
धुरुपकारकोरिपुरपकारकश्च ५ ॥

पिशाचभाष्यं

^स्तं संसारसागरे

^तेना

गी॰ टी॰ ध॰

यदैवं योगारूढस्तदात्मा[illegible]नोद्धृतो भवति संसारादनर्थप्रदादतो उद्धरेदिति उ
द्धरेन्निमग्नमात्मानमात्मना ततो ऊर्ध्वं हरेत् योगारूढतामापादयेदित्यर्थः।
नात्मानमवसादयेत् नाधो नयेत् आत्मैव ह्यस्मादात्मनो बन्धुः संसारमोक्ष
को भवति बन्धुरपि तावन्मोहे प्रतिकूलभावं स्नेहहेतुं बन्धनायतनत्वात् मोक्ष
मवधारणमात्मैव ह्यात्मनो बन्धुरिति आत्मैव रिपुः शत्रुः योन्यः अपकारी बा
ह्यः शत्रुः सोप्यात्मप्रयुक्त एवेति युक्तमवधारणमात्मैव रिपुरात्मन इत्युक्तं ५॥

रामानुजभाष्यं

उद्धरेदिति आत्मना मनसा विषयाननुषक्तेनात्मानमुद्धरेत् विपरीतेन म
नसा नात्मानमवसादयेत् आत्मैव मनः ह्यात्मनो बन्धुस्तदेव ह्यात्मनो रिपुः ५॥

अभिनवगुप्तकृतटीका उद्धरणं

^स्यां च बुद्धाववष्टम्भमेवादधीयामित्याह उद्धरिति॥ सम्यगर्थम्

परमार्थप्रपाटीका

^अतो विषयत्यागे मोक्ष आसक्तौ च बन्ध इत्यालोच्य रागादिस्वभावं त्यजेदित्याह +

उद्धरेदिति विवेकयुक्तेनात्मना मनसा कृत्वा आत्मानं जीवं दशापन्नं संसारात्
उद्धरेत् परं तेन अवसादयेत् नाधः पातयेत् हि यस्मात्कारणात् आत्मनो बन्धु
रुपकारकः रिपुरपकारकः आत्मैव स्वयमेव नान्यः मन एव मनुष्याणां।
कारणं बन्धमोक्षयोरित्युक्तत्वात् ५॥

वनमालीटीका

योयदैव योगारूढो भवति तदा तेनात्मनैवात्मा संसारादुद्धृत इत्याह उद्धरेदि
ति आत्मना वेदान्तश्रवणादिना वसितेन मनसात्मानं स्वजीवं संसाराम्भोनि
मग्नं उद्धरेत् विषयसङ्गपरित्यागेन योगारूढतां प्रापयेत् न तु विषयासक्त्याव
सादयेत् न संसारसमुद्रे मज्जयेत् हि यत आत्मैव मन एवात्मनो जीवस्य बन्धुः
हितकारी संसारात् मुक्तिहेतुः आत्मैव मन एवात्मनः स्वस्य जीवस्य रिपुरहि

^कारणं

तकारी मन एव मनुष्याणां[illegible] बन्धमोक्षयोः बन्धाय विषयासङ्गि मुक्त्यै
निर्विषयं मन इति स्मृतेः ५॥

ऊरुममैवैजयन्तीटीका

[illegible] एवं सर्वसेकस्य संन्यासीति यदुक्तं
तत्र मन एव कारणमित्याह उद्धरेदिति योगी आत्मना आकृतविषयासक्ति
रहितेनात्मावलोकनप्रवणेन शमदमसहस्तविवेकवता मनसा आत्मानं स्वकृ
तानादिविचित्रशुभाशुभकर्मतेन संसारार्णवनिमग्नं गर्भजन्मजरामरणादि

रूपावस्थान्तरंगतानाडितेनानन्तोभ्रममाणेकामादिषड्वर्गाभिक्रूरग्राहग्रस्तेनाति
रतिशयप्रबलातिवीर्याभिमिषोरगकवलीभूतेजीवमुद्धरेत् उद्धृदंहरेत् आ
कृतविषयंमाजयित्वापरमात्मानंप्रापयेदित्यर्थः विषयानुरागारंजितेन
धनधामदारादयाशक्तेः तमनसात्मानंस्वेनावसादयेत्संसारेणनिमज्जयेत्
हीतिनिश्चयेनात्मनः स्वस्यात्मैवमनएववंधुर्हितकारी आत्मनस्यात्मैवरिपुः
शत्रुरिममेवार्थंपाराशरीस्मृतिरपिवदति तथाहि मनएवमनुष्याणांका
रणंबंधमोक्षयोः बंधायविषयासंगिमुक्तेनिर्विषयंमनइति ५ ॥

योयदेवंयोगारूढोभवतितदा **मधुसूदनी टीका** तेनात्मनैवात्मोद्धृतोभवतिसंसारानर्थ

व्रातादतः— आत्मनाविवेकयुक्तेनमनसाआत्मानंस्वंजीवंसंसारसमुद्रेनिमग्नंततः
उद्धरेत् तमूर्ध्वंनयेत् विषयासंगपरित्यागेनयोगारूढतामापादयेदित्यर्थः
नतुविषयासंगेनात्मानमवसादयेत् संसारसमुद्रेमज्जयेत् हि यस्मात्
आत्मैवात्मनोबंधुर्हितकारीसंसारबंधान्मोचनहेतुः नान्यःकश्चिल्लौकिक
स्यबंधोरपिस्नेहानुबंधेनबंधहेतुत्वात् आत्मैवनान्यःकश्चिद्रिपुःशत्रुरहित
कारीविषयबंधनागारप्रवेशकोशकारइवात्मनः स्वस्यबाह्यस्यापिरिपो
रात्मप्रयुक्तत्वादयुक्तमवधारणमात्मैवरिपुरात्मनः इति ५ ॥

सदानंदटीका

योगारूढोपदाज्ञानतस्तदैवात्मात्मनामुना अनर्थव्रातसंसाराद्बंधनाख्यात्समु
द्धृतः १ संसारपंकनिर्मग्नमात्मानमतियत्नतः उद्धरेन्नतऊर्ध्वंनैवैराग्या
दियुतःपुमान् २ त्यागेनविषयासक्तेःसमाध्यारूढतांनयेत् अनात्मविष
याध्यस्तदेहाद्यात्ममतिंत्यजेत् ३ ब्रह्मात्मैक्यावबोधेनधीमान्शान्तिंसमाश्र
येत् संसारेस्यंतघोरेस्मिन्रागद्वेषादिसंकुले ४ स्वात्मानंयातयेन्नैववविष
यासक्तचेतसा बंधान्मोक्षकरोह्यात्माहितकारीसआत्मनः ५ नान्यःकश्चि
द्वंधुःसंसारोद्धारणेक्षमः प्रसक्तस्नेहपाशेनबंधुरप्यनर्थदः ६ आत्मै
वाहितकारित्वादात्मनःशत्रुरुच्यते विषयासक्तिबंधस्यकारागारप्रवेशना
त् ७ पुनर्जन्मपुनर्मृत्युःपुनर्भोगेषुदीनता स्वात्माज्ञानाद्यतोऽतस्तंततऊर्ध्वं
नयेत्स्वयं ८ आत्मानंतत्त्वबोधेनवैराग्यादियुतेनच ९॥५॥

नीलकंठीटीका

उद्धरेदिति एवंक्रमेणाकर्महारादिचित्तशुद्धिंसंपाद्ययोगारूढोभ्यासवैराग्यव

गी
टी॰
ष

लेन आत्मानं उद्धरेत् हियस्मात् आत्मैव आत्मनो बंधुर्न पुत्रादयः उद्धर्त्तारः तस्मात्
आत्मैव रिपुरात्मनः नान्ये शत्रवः संसारे मज्जयितृमेनेतमाश्रयार्थः ५ ॥

अत्र श्लोकं जनयति ॥ आनंद[illegible]टीका

आत्मना संयमस्थिरीकृतेन मनसात्मानं समुद्धरेत् पूर्वं स्वर्वां भूमिं जितो
नरामन्नरां आपप्य कृतिष्वारभूते कैवल्येन यदिति शेषं स्पष्टम् ५
आत्मैवात्मनो बंधुरित्यादि[illegible] ५ ॥

तदेवं विधस्य परमप्रशांतब्रह्मसमा[illegible]टीका पत्तिकारणस्य योगारूढत्वस्य नात्मव्य
तिरेकेन बाह्यं किंचित् साधनं भवितुमर्हत्यतः ॥ दुर्वारद्वैतप्रत्ययपवनपरितो भितभीषणाविकल्पकल्लोलमहत्सं
कुलापारगंभीरभवसागरे निमग्नमात्मानं स्वभावमात्मनैव यथोक्त
ज्ञानोपदेशप्रवृद्धितो त्साहेनोद्धरेत् यथोक्तयोगलक्षणातीरदेशमा
रोपयेत् न तेन विस्रस्तस्वबलतयोपेक्षितं तत्रैवावसादयेत् मज्जयेत्
यतोऽस्यार्हद्या ताद्वसादहृत् त्वयोपकारी प्रतिकूल आत्मैव नान्यः [illegible]
[illegible] ५ ॥

अस्यां बुद्धावपुरुषमेवावधे लालसिकी [illegible]टीका दि
यमित्याह — आत्मानं स्वस्वभावमात्मनैव यथोक्तोपदेशेन प्रवृत्तोत्साहेनोद्धरे
त्संसारात् न त्वेवं विस्रस्तस्वबलतयोपेक्ष्यावसादयेन्मज्जयेत् पुरु
षस्यात्मन आत्मैव स्वस्वभाव एव यतो बंधुरुपकारकः आत्मैव रिपुः
स्वस्यापकारकः नान्यः कश्चित् यदुक्तं आत्मैव यदि नात्मानमहिते
भ्यो निवारयेत् कोऽन्यो हितकरस्तस्मात्पश्चान्निवारयिष्यति इति [illegible]
[illegible] ५ ॥

पंचोलीटीका

यदैवं योगारूढो भवति तदात्मनात्मानं संसारानर्थसमूहादुद्धृतो
भवतीत्याह उद्धरेदिति आत्मना संसारसागरे निमग्नमात्मानं नतु
उद्धरेत् योगारूढतां प्रापयेत् आत्मानं नावसादयेत् हियस्मादात्मै
व आत्मनो बंधुर्हितकारी संसारमुक्तये भवति नान्यः आत्मैवात्मनः
शत्रुः रिपुः योऽपि बाह्यः शत्रुः स आत्मापराधेनैव शत्रुत्वं भजते ५ ॥

रसवीरसमिह्रोधिनी॥

अत एवांतरायभूतं रागादिस्वभावं त्यजेदित्याह्न उद्धरेदिति आ
त्मना निश्चयात्मिकया बुद्ध्या धृत्या वात्मानं मनः पुत्रादिस्नेहा
र्णवे निमग्नमुद्धरेत् स्वधर्माचरणनिश्चयरूपतीरभूमिकामा
रोहयेत् न पुनरवसादयेत् मज्जयेत् अथवात्मना यत्नेनात्मा
नं स्वशरीरं संसारार्णवनिमग्नमुद्धरेत् परसैन्यजलानि यतस्त
तो विक्षिप्य पारं प्रापयेत् परसैन्यजलानि यतस्ततो विक्षिप्य पा
रं प्रापयेत् न पुनर्निष्क्रियत्वेनाधो नयेत् परैर्नाशयेदिति यावत्
हि यतः आत्मैव बंधुर्हित इति यत्नरूप आत्मनः स्वस्य बंधुः संसारार्ण
वोद्धारकरणादुपकारी निश्चयात्मिकतया बुद्धेर्दार्ढ्यात् अत ए
व धृतेस्थविरावस्थायित्वात् स्वजात्युचितस्य यत्नस्य निरर्गलं
प्रवृत्तिसंभवात् आत्मैव बुद्ध्यादिरूपमेवात्मनः स्वस्य शत्रुः प्रति
कूलः नरकादिप्रापणदक्षत्वात् अनेन प्रमादस्वाधिष्ठानाध्यव
सायलक्षणायाः संशयात्मिकाया बुद्धेः संयोगभ्रंशात् धृतेश्च
निरालंबनतयाविरमनवस्थायित्वात् यत्नस्य च मध्य एव वि
च्छिन्नत्वात् ५॥

मधुभाष्य

उद्धरेदित्यादिना कस्य बंधुरात्मेत्यत आह ५॥

भाषा अनुवाद

देखो विषयों से इच्छा निवृत्ति होनेसे मोक्ष औ विषयोमे आशक्ति से बन्ध होता है यह विचारि रागद्वेषादि स्वभावसे रहित होना उचित सोई कहते हैं कि विवेक युक्त आपही अपने आत्माको बुद्धिके। द्वारा संसारसे उद्धार करैगा और अधोगति को न ले जायगा जिस हेतु कामना से निवृत्त जो आत्मा कहे मन सोई अपना बन्धुरूप उपकारी है और कामनामे आशक्त जो मन सो शत्रुरूप अपकारी है तो अपना शत्रु मित्र आपही है ५॥

दोहा

आपहि आपकहुं उद्धरैं नहि आपहि पीडत जोय आपहि अपनो
बंधु है आप अपनो रिपु होय ५॥

26

बन्धुरात्मात्मनस्तस्य येनैवात्मात्मनाजितः अ
नात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ६ ॥

शंकरभाष्यं

आत्मैव आत्मनो बन्धुरात्मैव रिपुरात्मन इत्युक्तं तत्र किंलक्षण आत्मा आत्म
नो बन्धुः किंलक्षणो वा आत्मात्मनो रिपुरित्युच्यते बन्धुरिति बन्धुरात्मात्मनस्त
स्य तस्यात्मनः स्व आत्मा बन्धुर्येनात्मनात्मैव जितः आत्मा कार्यकारणसंघा
तो येन जितो वशीकृतो जितेन्द्रिय इत्यर्थः अनात्मनस्तु अजितात्मनस्तु शत्रु
त्वेन शत्रुभावे वर्तेत आत्मैव शत्रुवत् यथानात्मा शत्रुरात्मनोऽपकारी त
थात्मात्मनोऽपकारे वर्तेत इत्यर्थः ६ ॥

आनन्दगिरिकृतटीका

उक्तमनूद्य प्रश्नपूर्वकं श्लोकान्तरमवतारयति आत्मैवेत्यादिना एकस्यैवात्म
नो मिथो विरुद्धं बन्धुत्वं रिपुत्वञ्च लक्षणभेदमन्तरेणायुक्तमिति चोदिते व
शीकृतसंघातस्यात्मानं प्रति बन्धुत्वमितरस्य शत्रुत्वमित्यविरोधं दर्शयति
बन्धुरित्यादिना वशीकृतसंघातस्य विक्षेपाभावादात्मनि समाधानसम्भवा
दुपपन्नमात्मानं प्रति बन्धुत्वमिति साधयति तस्येति अवशीकृतसंघातस्य
पुनर्विक्षेपोपपत्तेरात्मनि समाधानायोगादात्मानं प्रति शत्रुभावे प्रसिद्ध
शत्रुवत् आत्मैव शत्रुत्वेन वर्तेतेत्येतद्व्याकरोति अनात्मन इति दृष्टान्तं। नै
व्याचष्टे यथेति उक्तदृष्टान्तवशादवशीकृतसंघातः स्वस्याहिताचरणा
दात्मानं प्रति शत्रुरेवेति दार्ष्टान्तिकमाह तथेति ६ ॥

स्वामिकृतटीका

कथंभूतस्यात्मैव बन्धुः कथंभूतस्य चात्मैव रिपुरित्यपेक्षायामाह बन्धुरि
ति येनैवात्मनैवात्मा कार्यकारणसंघातरूपो जितो वशीकृतः तस्यात्मा।
तस्यात्मनः आत्मैव बन्धुः अनात्मनः अजितात्मनस्तु आत्मैवात्मनः शत्रुत्वे श
त्रुवत् अपकारित्वे वर्तेतेत्यर्थ ॥

पैशाचभाष्यं

तत्र किंवा युक्तलक्षण आत्मनो बन्धुः किंवा लक्षणो वा रिपुरात्मन इत्यत्रोच्य
ते बन्धुरात्मात्मनस्तस्य आत्मा तस्यात्मनो बन्धुः येनात्मैवात्मना जितः आत्मा
कार्यकारणसंघातः कार्यं शरीरं कारणानीन्द्रियाणि येन वशीकृतः जितेन्द्रिय

गी· टी· ष·

इत्यर्थः अनात्मनस्तु शत्रुभावे वर्त्तेतात्मैव शत्रुवत् यथाशत्रुरात्मनोऽपका
रीतथात्मनोपकारी अयतत्वतइत्यर्थः ६ ॥

रामानुजभाष्यं

येनपुरुषेणस्वेनैवस्वमनोविषयेभ्योजितं तन्मनस्तस्यबंधुः आत्मनः अजि
तमनसः स्वकीयमेवमनः स्वस्यशत्रुवत् शत्रुत्वेवर्त्तेत स्वनिःश्रेयसविपरी
तेवर्त्तेतेत्यर्थः यथोक्तंभगवतापराशरेणापि मनएवमनुष्याणांकारणं
बंधमोक्षयोः बंधायविषयासंगिमुक्त्यैनिर्विषयंमनइति ६ ॥

अभिनवगुप्तकृतटीका

अत्रचनात्मउपायः अपित्वात्मैवमनएवेत्यर्थः जितंहिमनोमित्रंचोरवनर
संसारोद्धरणंकरोति अजितंतुतीव्रनिरयपातनादुःखंतेकुरुते ६ ॥

परमार्थप्रपाटीका

अथात्मनोबंधुत्वंरिपुत्वंवाप्रकटयन्नाह बंधुरिति ॥ तस्यपुरुषस्यआत्मा म
नः आत्मनोजीवस्यबंधुः सुहृत् तस्यकस्य येनपुरुषेणआत्मनैवस्वेनै
वआत्मा कार्यकारणसंघातरूपोजीवोजीतः वशीकृतः अथअनात्मनः
अजितात्मनः पुरुषस्यशत्रुत्वेआत्मैवस्वयमेववर्त्ततेनान्यः ६ ॥

वनमालीटीका

आत्मनः शत्रुत्वमित्रत्वेविवृणोतिबंधुरितियेनजीवेनात्मनाधस्मात्मामनो
देहेंद्रियादिर्जितस्तस्यात्मनोजीवस्यात्मामनोबंधुः अनात्मनोनिर्जितम
नस्कस्यपुरुषस्यात्मैवमनएवशत्रुत्वेशत्रुभावेवर्त्तेतशत्रुवद्यथाशत्रुवत् ६ ॥

कृष्णमैवजयन्ती

ननुकस्यमनोबंधुःकस्यवाशत्रुःस्यादित्यपेक्षायांजितमनस्कस्याजितम
नस्कस्यमित्रंशत्रुश्चमनोभवेदित्याह बंधुरात्मेति तस्यपुरुषस्यमनुष्यस्या
त्मनआत्मामनोबंधुरुपकारीभवति कस्ययेनपुरुषेणआत्मनैवस्वेनैवा
त्मामनएवजितस्ववशेकृतः अनात्मनस्तु अजितमनसः पुरुषस्यतुआ
त्मैवमनएवशत्रुवत् शत्रुत्वेअपकारकत्वेवर्त्तेतप्रवर्त्तेत ६ ॥

मधुसूदनीटीका

इदानींकिंलक्षणआत्मनोबंधुः किंलक्षणोवात्मनोरिपुरित्युच्यते । आत्मा
कार्यकारणसंघातोयेनजितः स्ववशीकृतआत्मनैवविवेकयुक्तेनमनसैव

नतशस्त्रादिना तस्मात्मास्वरूपमात्मनोबंधुरुक्तं खलु हितभावेन स्वहितक
रणात् अनात्मनस्तु अजितात्मनस्त्वेतत् शत्रुत्वे शत्रुभावे एव वर्तेतात्मैव
शत्रुवत् बाह्यरिपुरिवोक्तं खलु यहम्यात्म स्वस्यैवानिष्टाचरणात् ६ ॥

सदानंदटीका

बंधुरात्मात्मनः कीदृक् कीदृक् शत्रुरितीर्यते कार्यकारणसंघातो येनात्मा स
वशीकृतः १ विवेकयुक्तात्मात्मा विषयासक्ति वारणात् बंधुरस्यात्मनः आ
त्मप्रहस्यात्मोत्संमुखः २ आत्मैव शत्रुवत्तु स्यान्मूढस्याप्यजितात्मनः वर्तेत
शत्रुभावेन विषयासक्तिबंधनात् ३ उक्तं खलु महत्स्याचस्वस्यैवनैवबंध
नम् तविहमात्म्यमोतोपि स्वयं सिद्ध उपस्थितः ४।६ ॥

नीलकंठीटीका

आत्मा मनः आत्मना मनसा अनात्मनः अजितचेतसः आत्मा मन एव शत्रुः ६ ॥

धनेटीका

आत्मनो बन्धुरिपुत्वं दर्शयति ६ ॥ स्पष्टमेतत्

रामकंठीटीका

कथमित्याह ॥

तस्य पुरुषस्यैव यन्नियत आत्मनः आत्मैव स्वभाव एव बंधुः सर्वापन्नि
कारकत्मजनः यदुक्तं आत्मैव यदि नात्मानमहितेभ्यो निवारयेत् ।
कोन्यो हितकरस्तस्माद् एवं वा रयिष्यतीति कस्यात्मैव बंधुः येन पुरुषेण
स आत्मा स्वभावः आत्मनैव ज्ञानाभ्यासवैराग्याभ्यासलब्धबलेन जि
तः सत्त्वमर्षगोचरापादनाद्वशीकृतः येन तस्य वा तु सा अप्रमादपरेतात्म
नोपेक्षितः स्वजितो न वशीकृतस्तस्याविधस्य तस्यायं शत्रुत्वे सर्वक्लेशा
वाचातकारिवे वर्तेते तथा चोक्तम् न तत्कुर्यादसिस्तीक्ष्णः सर्पो वा व्याघ्रवि
वोल्बणः अरिर्वा नित्यसंक्रुद्धो यदात्मा दुरधिष्ठित इति ६ ॥

कस्यात्मैव बंधुः कस्य चात्मैव लासिकी ~~[illegible]~~नीटीका वरिपुरित्यपेक्षायामाह ॥

येन पुरुषेणात्मा स्वस्वभाव आत्मनैव ज्ञानाभ्यासबलेन जितः सत्त्व
मर्षगोचरापादनाद्वशीकृतः तस्यात्मैवात्मनो बंधुः अनात्मनः प्रमा
दपरतयोपेक्षितात्मनः पुरुषस्यात्मैव शत्रुत्वे वर्तेते बाह्यशत्रुवत् तथा
चोक्तं न तत्कुर्यादसिस्तीक्ष्णः सर्पो वा व्याघ्रोविषोल्बणः अरिर्वा नित्यसं
क्रुद्धो यदात्मा दुरधिष्ठित इति ६ ॥

२८

नत्रकिंलक्षणआत्माआत्मनोबंधुःकिंलक्षणश्चआत्मात्मनोरिपुरिति
उभयंदर्शयति बंधुरिति तस्यात्मनआत्माबंधुःयेनवआत्मनाआत्मैव
देहेंद्रियसंघातःजितःवशीकृतःतपुनःअनात्मनः अजितदेहेंद्रिय
संघातस्यशत्रुवत् आत्मैवशत्रुत्वेवर्तेत ६

रणवीरसमिद्धोधिनी॥

एतदेव विवृणोति बंधुरिति तस्येत्युक्तं आत्मायत्नएव आत्मनः
स्वस्यबंधुःसर्वापत्प्रतीकारकृत्स्वजनःसमरांगणेवपारंरणे
साहाय्यकृच्च येनात्मनानिश्चयात्मिकयाबुद्ध्यात्मैवांतःकरण
मेवजितःस्ववशेस्थापितः नतुनत्वहयोस्वात्माकृतहति अना
त्मनोजितांतःकरणस्यतु आत्मैवयत्नएवोयोगएवेतियावत्
आतुरत्वेसर्वेच्छाव्याघातकारित्वेवर्तेत सेतदिवयात्मध्येयत्ना
त्यागात्पारावारमध्येएवनिमज्जनहेतुभूतत्वात् अयंभावः य
दिप्रारंभएवतरणेयत्नेनकर्यात्तदीवारेएवस्थितिःस्यात् नतुन
द्यांनिरपि कृतेतुयत्ने समरांगणमध्येतत्त्यागेनपारप्राप्तिर्हिवेत्रा
त्मामवारस्थितितोपिभ्रंशितामध्यएवचनिमज्जयपरश्चाहैरात्मा
शासितइतिमहत्सूत्रवीर्यंयःआरभ्यकर्माणिनसमापयति अतए
वाभियुक्तैरुक्तं अनारंभोमनुष्याणांप्रथमंबुद्धिलक्षणं आरब्ध
स्यांतगमनं द्वितीयंबुद्धिलक्षणमिति ६॥

मधुभाष्य

बंधुरात्मेति आत्मामनः आत्मनोजीवस्य आत्मनामनसा आत्मा
वजीवं आत्मैवमनः आत्मनाबुद्ध्याजीवेनैवका सद्बुद्ध्या विजय
ति उक्तंच मनःएवकारणंमनुष्याणांमनःएवमनुष्याणांकारणं
बंधमोक्षयोः इहुहेत्मनसाजीवंनजीवमवसादयेत् जीवस्यबंधुः

आत्मास्वमनपवनसंघातः जीवेनबुद्ध्यादिनायदामनोजितंतदा
बंधुः आत्मात्मनश्चास्य ततोजयेद्बुद्धिबलोनरस्तद्देवेनभगवता
मधुकैटभारातिनेत्यादिब्रह्मवैवर्ते अनात्मनः अजितात्मनः
पुरुषस्य अजितमनस्कस्य तदपिमनोऽनुपकारीत्यनात्मा
अत्रापिशत्रुत्वेयस्यनशत्रुत्वपदेवर्त्ततेससशत्रुत्वः तस्यात्मामन
पवनात्मशत्रुवच्छत्रुरेववर्त्तते ६॥

भाषा अनुवाद

अब आत्मा ही जो किसी मनुष्यका बन्धु औ किसीका रिपु है इस
अपेक्षा पर कहते हैं जिसने अपने आत्मासे आत्माको जीता अर्थात
विज्ञानमय आत्मा कर्तृक कार्य कारण मिलित रूप जो आत्मा स्थू
लसूक्ष्म शरीरादि वशीभूत होती है सोई विज्ञानमयजीव अपना ब
न्धु है और आत्मा कहे शरीरादि अवशीकृत जो है सोई आप अपना
शत्रु तुल है ६ ॥

दोहा ॥

आत्महि बंधु है आत्मको जिह आत्म आत्मसें जीत जीत्यो नाजि
न आत्म तिह आत्मा वर्ते तुल्य अमीत ६॥

जितात्मनः प्रशान्तस्य परमात्मा समाहितः शीतो।
ष्णसुखदुःखेषु तथा मानापमानयोः ७ ॥

शाङ्करभाष्यं

जितात्मन इति जितात्मनः कार्यकरणादिसंघात आत्मा जितो येन स जितात्मा
तस्य जितात्मनः प्रशान्तस्य परमात्मा समाहितः साक्षादात्मभावेन वर्तत इत्यर्थः
किंच शीतोष्णसुखदुःखेषु तथा मानेऽपमाने च मानापमानयोः पूजापरिभवयोः
समः स्यात् इत्यध्याहारः ७ ॥

आनन्दगिरिकृतटीका

कथं संयतकार्य्यकरणस्य बन्धुरात्मेति तत्राह जितात्मन इति जितकार्यकर
णसंघातस्य प्रकर्षेण परत्वाद्बाह्याभ्यन्तरकरणस्य परमात्मा विक्षेपेण पुनः पुन
रनभिभूयमानो निरन्तरं चित्ते प्रख्यात इत्यर्थः जितात्मानं संन्यासिनं समस्तकर्मा।
अधिकारिणं णं प्रदर्श्य योगाङ्गानि दर्शयति शीतेति समः स्यादित्यध्याहारः पूर्वार्द्धं व्याचष्टे जि
तेत्यादिना न केवलं तस्य परमात्मा साक्षादात्मभावेन वर्तते किन्तु शीतोष्णादिभि
रपि नासौ बाध्यते तत्त्वज्ञानादिसमर्पणार्ह विभजते किंचेति तेषु समः स्यादित्यन्व
यः ७ ॥

स्वामिकृतटीका ॥

जितात्मनः स्वस्मिन्बन्धुत्वं स्फुटयति जितात्मन इति जित आत्मा येन तस्य प्र
शान्तस्य रागादिरहितस्यैव परं केवलमात्मा शीतोष्णादिषु सत्स्वपि समाहि
तः स्वात्मनिष्ठो भवति नान्यस्य यद्वा तस्य हृदि परमात्मा समाहितः स्थितो भवति ७ ॥

पिशाचभाष्यं

जितात्मनः प्रशान्तस्य कार्यकारणसंघातो जितो येन स जितात्मा तस्य जितात्म
नः प्रशान्तस्य परमात्मा समाहितः साक्षादात्मभावेन वर्तत इत्यर्थः किंच शी
तोष्णसुखदुःखेषु तथा मानापमानयोः पूजापरिभवयोः समः स्यात् ७ ॥

रामानुजभाष्यं

योगारम्भयोग्यावस्थोच्यते जितात्मन इति शीतोष्णसुखदुःखेषु मानापमानयो
र्जितमनसः प्रशान्तस्य मनसि परमात्मा समाहितः सम्यगाहितः स्वरूपेणा
वस्थितः प्रत्यगात्मात्र परमात्मेत्युच्यते तस्यैव प्रकृतत्वात् तस्यापि पूर्वावस्थापेक्षया परमात्मत्वात् आत्मा परं समाहित इति वा सम्बन्धः ७ ॥

अभिनवगुप्तकृतटीका

गी॰
टी॰
ष

तत्र जितमनसः स्वदेहे प्रशान्तो निरहंकारः परेष्वात्मनि शीतोष्णादिषु वा भेद
धीः न रागद्वेषौ ज्ञानमग्नतां बुद्धिः विविधं ज्ञानं यत्र तदिति ज्ञानं प्राप्य कृतदिने
कर्म ७ ॥

31

परमार्थप्रपाटीका

अथ जितात्मनस्तस्मिन् वैपुल्यं प्रकटयति जितात्मन इति ॥ जित आत्मा मनो
येन तस्य प्रशान्तस्य रागादिरहितस्य परं केवलमात्मा शीतोष्णादिषु सत्स्वपि त
था मानापमानयोरूपस्थितयोः सतोरपि समाहितः स्वात्मनिष्ठो भवति नान्यस्य ॥
[illegible] ॥७॥

वनमालीटीका

जितात्मनो वैपुल्यमाह जितेति शीतोष्णसुखदुःखेषु चित्तविक्षेपकरेषु सत्स्व
पि तथा मानापमानयोः पूजानादरयोश्चित्तविक्षेपहेत्वोः सतोरपि तेषु सम
त्वेन जितात्मनः प्रागुक्तजितमनस्कस्य प्रशान्तस्य रागद्वेषशून्यस्य परमात्मा
परमेश्वरः समाधिविषयो भवति अतो जितात्मा प्रशान्तश्च भवेदिति भावः ७॥

उत्तमवैजयन्तीटीका

प्रागुक्तेषु सुखदुःखादिषु तथानेन प्रकारेण मानापमानयोश्च मानमादरोऽपमा
नमनादरस्तयोश्च जितात्मनः जित आत्मा मनो येन स तथा तस्याविकृतमन
सः प्रशान्तस्य रागद्वेषादिवर्जितस्य मुमुक्षोः पुरुषस्य परम अपरोक्षं यथा स्यात्तथा
आत्मा स्वस्वरूपः समाहितः सम्यगाहितः स्वस्वरूपेण स्थितः समाधिस्थो भवती
त्यर्थः यद्वा परमश्चासावात्मा च परमात्मा अपरमात्मा शब्दो जीववाचको न तु ई
श्वरपरः तस्यैव प्रकरणात्सर्वोपरगस्य समस्वन्यात्त्वेत्यर्थः ७ ॥

मधुसूदनी

जितात्मनः स्ववैपुल्यं विवृणोति । शीतोष्णसुखदुःखेषु चित्तविक्षेपकरेषु सत
स्वपि तथा मानापमानयोः पूजापरिभवयोः चित्तविक्षेपहेत्वोः सतोरपि तेषु स
मत्वेनेति वा जितात्मनः प्रागुक्तस्य जितेन्द्रियस्य प्रशान्तस्य सर्वत्र समबुद्ध्या रागद्वेषशू
न्यस्य परमात्मा स्वप्रकाशज्ञानस्वभाव आत्मा समाहितः समाधिविषयो योगारूढो
भवति परमिति वाक्छेदः जितात्मनः प्रशान्तस्यैव परं केवलमात्मा समाहितो भवति
नान्यस्य तस्माज्जितात्मा प्रशान्तश्च भवेदित्यर्थः किंच ७ ॥

सदानन्दीटीका

(margin:) वृत्यस्तां योगारूढः
यते साकाङ्क्षैव
ज्ञायाता माह द्विभिः
जितात्मन इति शीतोष्ण
सुखदुःखेषु शीतोष्णादि
[illegible]

जितात्मनः स्वबंधुत्वं विद्धाणोतिरमापतिः सत्त्वविक्षेपकेष्वेषु शीतोष्णादि
षु यस्तु तुः १ न जहाति समत्वं धीरात्मतत्त्वसमीक्षणात् जितेंद्रियस्य शांतस्य
रागद्वेषपरित्यागात् २ समाधिविषयस्तस्य स्वप्रकाशो हरिर्भवेत् नान्यस्तस्मा
प्राप्यो विस्तास्तस्माद्धीनो भवेन्मुनिः ३ संसारदुःखदृढकारणमाधिबीजं भ्रांत
र्हृदि विविधकामभयादिमूलं चित्ते नियंत्र्य मचिरात्प्रभवेति धीराय मादरमत्र
निरतः स हरिर्ममेष्टः ४ ७

नीलकंठीटीका

मनसो जये फलमाह जितात्मन इति शीतोष्णादिषु सामेषु जितात्मनः नि
र्विकारचित्तस्य आत्मा चित्तं परं उत्कर्षेण समाहितः समाधिप्राप्तो भवति अ
नः समाधिसिद्ध्यर्थं मनो जेतव्यमेवेत्यर्थः ७ ॥

आनंदीटीका

परमात्मरूपपरदेहे स्वदेहे च समा तुल्या मतिर्भवति स्मृतेश्च श्रूयतां धर्मस
र्वस्वं श्रुत्वा चैवावधारय आत्मनः प्रतिकूलानि परेषां न समाचरेत् ७ ॥

रामकंठीटीका

यथोक्तस्यात्मजयस्य फलमाह जितेति यथोक्तेन प्रकारेण वशीकृत आ
त्मा येन तस्य जितात्मनः अत एव प्रशांतस्य स्वस्वभावनिर्दोषपरमात्मस
मापत्तिवशान्निवृत्तविकल्पविक्षेपस्य परेषु व्यतिरिक्तत्वेन प्रतिपन्नेषु सर्व
देहेषु तथात्मन्यहंतया प्रतीयमाने तुल्या सामान्यसंविदेकस्वरूपग्रा
हिणी मतिर्भवति तथा शीतोष्णसुखदुःखादिषु बाह्याभ्यंतरनिमित्तेषु
प्रयुज्यमानेमाने द्वंद्वोपप्लवेषु तथा परेणां पूजायां [illegible] तथावमाने पराभवे तथैव समा
माना मतिर्भवति न तस्य [illegible] सर्वगतादेकस्यात्मभावनिर्विकारात्म
रूपात्मनोऽहंप्रतीतिर्व्यतिरिच्यते नानाविधेषु विकारकारणेषूपस्थितेष्व
पि तस्य सत्यस्यात्मन्यवसंधानं लोकवन्न विक्षिप्यत इत्यर्थः [illegible]
[illegible] ७ ॥

यथोक्तस्यात्मजयस्य फल लासिकी वनमालीटीका त्मसमा

माह - जित उक्तविधया वशीकृत आत्मा येन तस्यात एव प्रशांतस्य परमात्मापत्तिवशा
न्निवृत्तविकल्पस्य शीतोष्णसुखदुःखेषु सत्स्वपि मानापमानयोः सतोर
पि परमात्मा [illegible] समाहितः स्वात्मनिष्ठो भवति साक्षात्तादात्म्यभावेन वर्त
ते इत्यर्थः विकारहेतुषु सत्स्वपि स्वात्मन्यनुसंधानेन लोकवन्न विक्षिप्यते इति

गी.
टी.
प.

32

एवंविधस्य योगारूढस्य लक्षणमुपसंहरति ७॥

पंडोलीटीका

जितात्मनः स्वस्मिन्स्वेषु त्वं स्पृहयति जितात्मन इति शीतोष्णसुखदुः
खेषु तथा मानापमानयोः पूजाभिभवयोः समस्य जितात्मनः जित
देहेंद्रियसंघातस्य प्रशांतस्य रागादिदोषरहितस्य परमात्मा समाहि
तः स्वस्वरूपनिष्ठो भवति ७॥

रणवीरसमिद्धोयिनी॥

जितात्मन इति जितात्मनः स्वायत्तीकृतांतःकरणस्यात एव प्र
शांतस्य प्रारभ्यमाणकर्मप्रवृत्तिहेतुभूतपापमेवाश्रयेदस्मान्
कथं भीष्ममहं संख्ये इत्यादिसंकल्पप्रशमवतः एवं केवलमात्मां
तःकरणं समाहितः सावधानो भवति न विकृतिमापद्यते निश्च
यान्न प्रस्खलतीति यावत् कदाचितोष्णादिषु सत्स्वपि तत्र परम
युक्तहिमांशुदेवतासु संजातहिमकरकादिष्वप्युत्पन्नं शीतं यस्मि
न्सति जलादिद्रवद्रव्याणि घनायंते उष्णं च ग्रैष्मकालिकमाध्या
ह्निकरविकिरणसंतापः एव प्रयुक्ताभेद्यायस्वजनितमोसंप्य सु
खं प्रसूचयादिजनितानंदः दुःखं स्वकीयादिमरणजनितो विषादः
मानः स्वकीयकृतादरः अवमानः परकृततेजोवधादितलनाः ए
तद्यपीतद्रूपसुखदुःखादिरूपं दुःखेच मानः तादृशमहाघात्राप्रहाण
दिनासंजातव्यथपरहितः साधुमहावीरसाधु सत्यं त्वाष्रियोसि
पुनः प्रहरेत्येवं रूपश्रामस्वाववभासमानस्तादरः अवमानस्तानंत
रं विधीयमानो दर्पोस्य पौरुषमनंतरं महारणविषयीभूतस्त्वं नभ
विष्यसीत्येवं रूपेणादरः एष्वपि तोष्णादिषु सत्स्वपि प्रशांतस्या
विकृतांतःकरणस्य प्रहत्यंतरायभूत [illegible] कृतलक्षणसंकल्पानां
प्रशमनात्स्वनाम्नु विनयमीषरणे [illegible] वर्तमानस्येतियावत् यतो
जितात्मनः स्वायत्तीकृतांतःकरणः परमात्मा परमेश्वरः समाहितः

सम्यगासमंताद्धितोभवति तदभिलषितं संसाधयती
तिभावः ७॥

मधुभाष्य

जितात्मनः फलमाह जितात्मन इति जितात्माहि प्रशांतो
भवति न तस्य मनः प्रायो विषयेषु गच्छति तदा च परमात्मा
सम्यग्रूपाद्धितः सन्निहितो भवति अपरोक्षज्ञानी स भवती
त्यर्थः अपरोक्षज्ञानिनो लक्षणं स्पष्टयति प्रीतोसेत्यादि
ना प्रीतोस्मादिकूटस्थः ज्ञानविज्ञानतृप्तात्मा विजितेंद्रिय
इतिकूटस्थवेदेहः विज्ञानं विशेषज्ञानं अपरोक्षज्ञानं वा
तथोक्तं सामान्येयैव विज्ञेया विशेषा मनगोचराः देवादी
नां हतज्ञानं विज्ञानमितिकीर्तितं श्रवणान्मननाच्चैव यद्
ज्ञानमुपजायते तज्ज्ञानं दर्शनं विस्पो विज्ञानं शास्त्र च ब्रवीत
विज्ञानं ज्ञानसंगादे विशिष्टं दर्शनं तथेत्यादि कूटस्थो नि
विकारः कूटवत्स्थित इति व्युत्पत्तेः कूटमाकाशः कूटं
खं विदलं व्योम संधिरकाशमुच्यत इत्यभिधानात् यो
गी योगं युवन्युक्तः योगसंपूर्ण एवंभूतो योगानुष्ठाता
योगसंपूर्णउच्यत इत्यर्थः स एव च सर्वस्माद्विशिष्यते
साधुपापादिषु समबुद्धिर्जीवविनः परमात्मनः सर्वस्य
तन्निमित्तत्वस्य च सर्वत्रैकरूप्येण विद्रूपा एव हि जीवाः
विशेषस्त्वंतः करणकृतः सर्वेषां च साधुत्वादिकं सर्वमी
श्वरकृतमेव स्वतो न किंचिदपि उक्तं चैतत्सर्वं स्वतः सर्वे
पि विद्रूपाः सर्वदोषविवर्जिताः जीवास्तेषां तु ये दोषास्त ।
उपाधिकृता मताः सर्वं चेश्वरतस्तेषां न किंचित्स्वत एव
तु सम एव यतः सर्वे वेषम्यं भांति सम्भवं एवं समानजी

वास्तवविशेषो देवत्वादिषु स्वाभाविकस्तु नियमादत एव सत्ता
तनः अष्टादशोत्तथा दोषा नित्याः स्वाभाविका अपि गुणदो
षो मनुष्याणां नित्यौ स्वाभाविकौ मतौ उत्सेकमात्रं तु पाप्म
देवा एवं सदा मता इति ब्राह्मे न च साधुपापादीनां स्वरूपादि
साम्यं तत्र दोषस्मृतेः समानाविषमाः पूजा विषमाणां सम
मात्तया क्रियते येन देवोपि स्वपदाद्भ्रश्यते ऽमानिति पाद्मे
विनुबंधुवधः कर्म विपाचैव एवमो एतानि मान्य स्या
नानि गरीयो स्तुत्तरोत्तरमिति वामने उत्तमानुसारतो पूजां
समदृष्टिं च यो नरः सर्वभूतेष्वकुरुते तस्य विष्णुः प्रसीदति
वैषम्यं तु जनस्यैव ददाति नरसंचयात् पूजाया विषमार्ह
हिः समासाम्यविदः स्वसममिति ब्रह्मवैवर्ते सुहृदादिषु
प्राप्तोक्तपूजादिकृतिरन्यथा ऽनधिकापि सापि समाम
नात्तदप्याह यथा सुहृत्सु कर्त्तव्यं पित्रष्ट्रष्टमनेष्व च तथा
करोति सुहृदि समबुद्धिः स उच्यतः इति गारुडे प्रत्युपकार
निरपेक्षयोपकारकृत् सुहृत् स्नेहस्थानं निरूप्य यो रक्षां
करोति स मित्रं अरिर्वधादिकर्त्ता कर्त्तव्ये उपकारे अपका
रे य उदास्ते स उदासीनः कर्त्तव्यमुभयमपि यः करोति स
मध्यस्थः अवासितकृद्द्वेष्यः आद्यैव तत् द्वेष्य अवासित
कृत्कार्यमात्रकारी तु मध्यमः प्रियकृत्प्रियो ऽनिरूप्यापि
स्नेहस्थं यः परिरक्षति स मित्रमुपकारं तु यमनपेक्ष्योपका
रकृत् यस्ततः सुहृत्प्रोक्तः पापं तु अपि वधादिकृदि
ति समाधियोगप्रकारमाह ॥९॥

भाषा अनुवाद

जितात्म पुरुष को जो अपने आत्मामे वन्धुता है सो खुलासा करिके कहते हैं कि जिसने आत्मा जो शरीर आदि तिसको जीता अर्थात् अपने आधीन किया केवल वह प्रीति विरोध आदिसे रहित मनुष्य का मन शीत उष्ण सुख दुःख आदिमे समाहित कहे सावधान रहता है अर्थात् वही आत्मनिष्ठ है अथवा उसीका हृदय परमात्मा मे समाहित अर्थात् विक्षेप रहित निश्चल होना किसीका औरसे नहीं होसकता है ७

दोहा ॥

आत्मजितको प्रशांतको ईश्वर समताज्ञान शीतोष्ण सुख दुःख मे
तथा मान अपमान ॥७॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ८॥

शांकरभाष्यं

ज्ञानेति ज्ञानविज्ञानतृप्तात्मा ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानं विज्ञानं तु शास्त्रतो ज्ञातानां तथैव स्वानुभवकरणं ताभ्यां ज्ञानविज्ञानाभ्यां तृप्तः संजातालंप्रत्यय आत्मान्तःकरणं यस्य स ज्ञानविज्ञानतृप्तात्मा कूटस्थोऽप्रकम्प्यो भवतीत्यर्थः विजितेन्द्रियश्च य ईदृशो युक्तः समाहित इति स उच्यते कथ्यते स योगी समलोष्टाश्मकाञ्चनः लोष्टाश्मकाञ्चनानि समानि यस्य सः समलोष्टाश्मकाञ्चनः ८॥

आनन्दगिरिकृतटीका

चित्तसमाधानमेव विशिष्टफलं वेदितव्यं नहि कथंभूतः समाहितो व्यवह्रियते तत्राह ज्ञानेति परोक्षापरोक्षाभ्यां ज्ञानविज्ञानाभ्यां संजातोऽलंप्रत्ययोऽक्रियो हर्षविषादकामक्रोधादिरहितो योगी युक्तः समाहित इति व्यवहारभागी भवतीति पादत्रयव्याख्यानेन दर्शयति ज्ञानमित्यादिना स च योगी परमहंसपरिव्राजकः सर्वज्ञोपेता बुद्धिरतिशयवैराग्यभागीति कथयति स योगीति ८॥

स्वामिकृतटीका

योगारूढस्य लक्षणं श्रेष्ठ्यं चोपपाद्य उपसंहरति ज्ञानविज्ञानेति ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभवस्ताभ्यां तृप्तो निराकाङ्क्ष आत्मा चित्तं यस्य अतः कूटस्थो निर्विकारः अतो विजितानीन्द्रियाणि येन अत एव समानि लोष्टादीनि यस्य सर्वेषु पाषाणस्वर्णेषु हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते ८॥

पिशाचभाष्यं

ज्ञानविज्ञानेति ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानं विशेषतो ज्ञानं स्वानुभवकरणं ताभ्यां तृप्तात्मा कूटस्थः अप्रकम्प्यो भवतीत्यर्थः विजितेन्द्रियश्च ईदृशः युक्तः समाहितः स उच्यते समलोष्टाश्मकाञ्चनः ८

रामानुजभाष्यं

ज्ञानेति ज्ञानविज्ञानतृप्तात्मा आत्मस्वरूपविषयेण ज्ञानेन तस्य च प्रकृतिविजातीयाकारविषयेण च विज्ञानेन तृप्तमनाः कूटस्थः देवाद्यवस्थास्वनुवर्तमानः सर्वसाधारणज्ञानैकाकार आत्मनि स्थितः अत एव विजितेन्द्रियः समलोष्टाश्मकाञ्चनः प्रकृतिविविक्तस्वरूपनिष्ठतया प्राकृतवस्तुविशेषेष्वभोग्यतया

गी.
टी.
ष.

35

वान् लोष्टाश्मकाञ्चनेषु समप्रयोजनो यः कर्मयोगी स युक्त इत्युच्यते आत्मावलोकनरूपयोगाभ्यासार्हः उच्यते ८ ॥

अभिनवगुप्तकृतटीका। अथवा ८

ज्ञानमभ्रान्ता बुद्धिर्विविधं ज्ञानं यत्र तद्विज्ञानं प्राग्युक्तमुदितं कर्म ॥ ८ ॥

परमार्थप्रपा

अथ योगारूढस्य लक्षणमुपायोपसंहरति ज्ञानविज्ञानेति ॥ ज्ञानं शास्त्रगुरूपदिष्टं विज्ञानमनुभवस्ताभ्यां तृप्तो निरपेक्ष आत्मा चित्तं यस्य सः अतः कूटस्थो निर्विकारः अत एव विजितेन्द्रियः अत एव समलोष्टाश्मकाञ्चनः मृत्पिण्डपाषाणसुवर्णेषु समः हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते ८ ॥

वनमालीटीका

ज्ञानं शास्त्रीयं विज्ञानं श्रवणमनननिदिध्यासनाज्जातं भगवदपरोक्षं ताभ्यां तृप्तः संजातालंप्रत्यय आत्मा चित्तं यस्य स तथा कूटस्थो विषयसंनिधावपि विकारशून्यः अत एव विजितानि रागद्वेषपूर्वकविषयग्रहणाद्व्यावर्तितानीन्द्रियाणि येन सः अत एव हेयोपादेयधीशून्यत्वेन समानि मृत्पिण्डपाषाणकाञ्चनानि यस्य सः योगी भगवति निरुद्धचित्तः स युक्तः योगारूढ इत्युच्यते ८ ॥

कृष्णवैजयन्तीटीका

किं च ज्ञानविज्ञानतृप्तेति ज्ञानविज्ञानतृप्तात्मा ज्ञानं स्वस्वरूपविषयकं विज्ञानं प्रकृतिविजातीयाकारविषयकं ताभ्यां तृप्तः संतुष्ट आत्मा मनो यस्य स तथा यद्वा ज्ञानं शास्त्रजनितं विज्ञानमात्मस्वरूपविषयकं ताभ्यां तृप्तमनाः यद्वा ज्ञानं शास्त्रजनितचेतनाचेतनविषयकं विज्ञानं परमात्मविषयकं ताभ्यां तृप्तमनाः कूटस्थः कूटेषु प्रकृतिकार्येषु सुरनराद्याकारेषु स्वात्मैकज्ञानस्वरूपस्वभावानुभवत्वेनात्मनि तिष्ठतीति स तथा अत एव जितेन्द्रियः विशेषेण जितानि स्ववशीकृतानीन्द्रियाणि बाह्याभ्यन्तररूपाणि येन स तथा विजितेन्द्रियत्वादेव समलोष्टाश्मकाञ्चनः लोष्टं मृत्पिण्डमश्म पाषाणं काञ्चनं स्वर्णं समानि तुल्यानि लोष्टाश्मकाञ्चनानि यस्य स तथा प्रकृतिवियुक्तात्मस्वरूपानुभवानन्देनैव नन्दितेषु प्राकृतेषु लोष्टादिषु वस्तुषु पृथक् पृथक् स्वरूपदर्शनविवेकाभावात्तुल्यदृष्टिरित्यर्थः तर्हि किं बालः न यतस्स योगी कर्मयोगी कर्मयोगवान् बालस्तु विवेकपूर्वके कर्मकर्तृत्वमशक्त इत्यर्थः ईदृशो यः स युक्त आत्मावलोकनाभ्यासयोगयुक्त इत्युच्यते एवं कथ्यते ८ ॥

कृ

मधुसूदनी

किंच ज्ञानं शास्त्रोक्तानां पदार्थानामौपदेशिकं ज्ञानं विज्ञानं तदप्रामाण्यशंकानिराकरणफलेन विचारेण तथैव तेषां स्वानुभवेनापरोक्षीकरणं ताभ्यां तृप्तः संजातालंप्रत्यय आत्मा चित्तं यस्य स तथा कूटस्थो विषयसन्निधावपि विकाररहितः अत एव विजितानि रागद्वेषपूर्वकाद्विषयग्रहणाद्व्यावर्तितानींद्रियाणि येन सः अत एव हेयोपादेयबुद्धिशून्यत्वेन समानि मृत्पिंडपाषाणकांचनानि यस्य सः योगी परमहंसपरिव्राजकः परमवैराग्ययुक्तो योगारूढ इत्युच्यते [illegible] ८ ॥

सदानंदीटीका

शास्त्रोक्तानां पदार्थानां ज्ञानं स्यादौपदेशिकं असंदिग्धाविपर्यासं विज्ञानं स्वानुभूतितः १ जातालंप्रत्ययस्ताभ्यामात्मा चित्तं हि यस्य सः सन्निधानेपि भोगानां निर्विकारस्तिष्ठति धीरधीः २ व्यावर्तितानि भोगेभ्यो येन सर्वेंद्रियाणि सः हेयोपादेयधीशून्यतया यस्य समानि च ३ मृत्पाषाणसुवर्णानि वीततृष्णो निजात्मवित् ईदृशो युक्त इत्युक्तो योगारूढ इतीर्यते ४।८ ॥

नीलकंठीटीका

समाधिसिद्धेरपि किं फलमत आह ज्ञानेति ज्ञानं शास्त्रोपदेशजा बुद्धिः विज्ञानं शास्त्रार्थध्यानजः प्रमारूपोनुभवस्ताभ्यां तृप्तः संजातालंप्रत्यय आत्मा चित्तं यस्य स ज्ञानविज्ञानतृप्तात्मा यतस्तृप्तात्मातः कूटस्थः अकंप्यः संसारतापानास्कंदितो भवतीति समाधिफलं अस्य लोकप्रसिद्धं लक्षणमाह विजितेंद्रिय इति समलोष्टाश्मकांचन इति एवंविधो योगी स युक्तः प्राप्तयोग इत्युच्यते विद्वद्भिः ८ ॥

ज्ञानेश्वरीटीका

योगीष्टप्राप्तयोगः विजितेंद्रियः श्रवणादिपंचकसंयमवान् कूटस्थो मनोहंकाररहितो परतत्त्वावलंबनेन शैलशिखरवद्बोध्यपदे निश्चलेप स्थितः शास्त्रात्पदार्थावधारणं ज्ञानं शास्त्राच्च तस्य साक्षात्कारो विज्ञानं ताभ्यां तृप्तः इतरस्पृहाहीनः आत्मानः कर्माणि यस्य ईदृशः तीव्रातेन व्यः ज्ञाननेयः समलोष्टाश्मकांचनः बहिःसंविश्लिविरहेण ज्ञानोपादानोपेतात्मा ज्ञाने निर्विकारः युक्तः परब्रह्मणि योजित इत्युच्यते ॥

गी॰
टी॰ष॰

स चैवंविधो योगारूढ उच्यते इत्याह

रामकंठी टीका

ज्ञानं शास्त्रतः स्वरूपावगममात्रं विज्ञानं शास्त्रावगतस्य तत्त्वस्य साक्षात्कारः ताभ्यां तृप्तो निराकांक्ष आत्मा स्वभावो यस्य स तथा नित्यप्रबुद्धः कूटस्थः आत्मपरमार्थनित्यात्मरूपयत्नात् कूटस्थः शैलादिवन्निष्प्रकंपः यतो विजितेंद्रियः वशीकृतबाह्यांतःकरणो नत्वनत्वशः एवं लोभादिदोषरहितत्वात् समो लोष्टाश्मानौ मृत्पिंडपाषाणौ कांचनं च हेम यस्य स तथाविधो युक्तो योगारूढ उच्यते ८॥

एवंविधस्य योगारूढस्य लक्षणमुपसंहरति

लासिकी [illegible]टीका

ज्ञानं मोपदेशिकम् विज्ञानमपरोक्षानुभवः ताभ्यां तृप्तो निराकांक्ष आत्मा स्वभावो यस्य सः अतः कूटस्थो निर्विकारः यतो विजितेंद्रियः वशीकृतबाह्यांतःकरणो नत्वनत्वशः अत एव समानि हेयोपादेयबुद्धिशून्यतया लोष्टादीनि यस्य सः एवंविधो युक्तो योगारूढ इत्युच्यते [illegible] ८॥

पंचोलीटीका

योगारूढस्य लक्षणं श्लोकद्वयेनोपसंहरति ज्ञानेति ज्ञानविज्ञानतृप्तात्मा ज्ञानेनात्मविषयेण शास्त्रजनितेन विज्ञानेनात्मसाक्षात्काररूपेण ताभ्यां तृप्तः आत्मा अंतःकरणं यस्य सः कूटस्थः अप्रकंप्यः विजितेंद्रियः समलोष्टाश्मकांचनः युक्तः समाहितः सन् योगी कथ्यते ८

रणवीरसमिद्धोयिनी॥

ज्ञानेति ज्ञां निश्चयात्मिकां बुद्धिमानयति प्रापयतीति ज्ञानं बुद्ध्युत्पादकं विज्ञानं शास्त्रार्थविषयो बोधस्तेन तृप्त आत्मा बुद्धिर्यस्य स ज्ञानविज्ञानतृप्तात्मा शास्त्राचार्योपदेशो निश्चयदार्ढ्यं वा नित्यर्थः अथवा ज्ञानमर्थशास्त्रादितस्तदर्थावगममात्रं विज्ञानं शास्त्रावगतस्य तत्तदर्थजातस्य साक्षात्कारस्ताभ्यां तृप्तो निरंतराभ्यासवशान्निराकांक्ष आत्मांतःकरणं यस्येत्यर्थः विजितेंद्रियः निगृहीतबाह्यांतरीन्द्रियः कूटस्थः कूटे शैलशृंगवदनुश्रेस्पन्दमाना तिष्ठती

तिकूटस्थः स्पंदनादावाक्रस्य प्राप्तुसन्तुलं प्रस्थित इति यावत् अथ
च कूटस्थवतिष्ठतीति यो लादिवन्निष्प्रकंप इत्यर्थः एतादृशश्च
कर्मयोगी युक्त इति युक्तपार्थं वक्तव्ययोग्य उच्यते यतः समलो
ष्टाश्मकांचनः लोष्टं लोष्टवद् उपेक्ष्य उदासीनः अश्मा पाषाणस्त
यः पिंडादिवदतिकठोरस्तेन पीडाजनको दृढो दृश्यवर्गः कांच
नं सुवर्णादिवदुपादेयः स्नेहपात्रभूतः पुत्रमित्रादिवर्गः तेष्वो
पि समभावस्थतायां तुल्या आततायित्वमात्रापरस्य यथोक्तं
आततायिनमायांतं हन्यादेवाविचारयन्निति अथवा युधायमा
वे लोष्टाश्मानौ प्रसिद्धौ कांचनं च सुवर्णं एतेषु ते पाषाणपांशु
ये स्पंदनाद्यवयवो वैत्यतन्नयं समप्रदानस्यानेनाल्पमात्रयं यस्ये
ति निराग्रहेपि वीरमतिर्युक्त इति हृत्तिः प्रतिपादिता ८॥

मधुभाष्य

भाषा अनुवाद

योग आरूढ़ पुरुष के लक्षण औ प्रशंसा कहते हैं कि ज्ञान कहे ।
शास्त्र से अथवा गुरु के उपदेश से जो होय और विज्ञान जो अनुभव ।
सिद्ध अर्थात् हम सोई ब्रह्म हैं यह समस्त ज्ञान इन दोनो से जिसका
आत्मा कहे चित्त सन्तुष्ट है और जिस ने इन्द्रियगण को जीता है तथा
ढेला पत्थर सोना ये जिसको समान अर्थात् लेने छोड़नेकी बुद्धि जि
से नहीं ऐसा जो निरपेक्ष निर्विकार कूटस्थ कहे अचल के तरह नि
श्चल पुरुष सोइ युक्त योगी कहे योगारूढ़ है ८

दोहा

ज्ञान विज्ञान सें तृप्तमति कूटस्थ जितेंद्रि जान   युक्त कह्यो यो
गी सम जिह हेम मृतक पाषान ८ ॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ९॥

शांकरभाष्यं

किंच सुहृदिति सुहृदित्यादिश्लोकार्द्धमेकं पदं सुहृदिति प्रत्युपकारमनपेक्ष्यो पकर्ता मित्रं स्नेहवान् अरिः शत्रुः उदासीनो न कस्यचित् पक्षं भजते मध्यस्थो यो विरुद्धयोरुभयोर्हितैषी द्वेष्यः आत्मनोऽप्रियो बन्धुः सम्बन्धी इत्येतेषु साधुषु शास्त्रानुवर्तिष्वपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किंकर्मेत्यव्यापृतबुद्धिरित्यर्थः विशिष्यते विमुच्यत इति वा पाठान्तरं योगारूढानां सर्वेषामयमुत्तम इत्यर्थः ९॥

आनन्दगिरिकृतटीका

योगारूढस्य प्रशस्ततमत्वमभिप्रेत्य योगस्याङ्गान्तरं दर्शयति किंचेति पदच्छेदः पदार्थोक्तिरिति व्याख्यानाङ्गं सम्पादयति सुहृदितीति अरिर्नाम परेषामपकारकः प्रसत्तमप्रियो द्वेष्य इति विभागः समबुद्धिरिति व्याचष्टे कः किमिति प्रथमो हि प्रश्नो जातिगोत्रादिविषयः द्वितीयो व्यापारविषयः उक्तप्रकारेणाव्यापृतबुद्धित्वे सर्वोत्कर्षो वा सर्वोपायविमोक्षो वा सिध्यतीत्याह विशिष्यत इति पाठद्वयेपि सिद्धमर्थं संक्षिप्य कथयति योगारूढानामिति ९॥

स्वामिकृतटीका

सुहृन्मित्रादिषु समबुद्धिश्च कस्ततनोऽपि श्रेष्ठ इत्याह सुहृदिति सुहृत् स्वभावेनैव हिताशंसी मित्रं स्नेहवशेनोपकारकः अरिर्घातकः उदासीनो विवदमानयोरुभयोरप्युपेक्षकः मध्यस्थो विवदमानयोरुभयोरपि हिताशंसी द्वेष्यो द्वेषविषयः बन्धुः सम्बन्धी साधवः सदाचाराः पापा दुराचाराः एतेषु समा रागद्वेषशून्या बुद्धिर्यस्य स तु विशिष्यते ९॥

पैशाचभाष्यं

किंच श्लोकार्धमेकं पदं सुहृदिति प्रत्युपकारमनपेक्ष्य उपकर्ता मित्रं स्नेहवान् अरिः शत्रुः उदासीनो न कस्यचित् पक्षं भजते मध्यस्थो विरुद्धयोरुभयोः हितैषी। द्वेष्यः आत्मनः अप्रियो बन्धुः सम्बन्धी इत्येतेषु साधुषु शास्त्रार्थानुवर्तिषु अपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किंकर्मेत्यव्यापृतबुद्धिरित्यर्थः विशिष्यते योगारूढानां सर्वेषामुत्तम इत्यर्थः ९॥

रामानुजभाष्यं

गी०
टी०
ष०

तथाच सुहृदिति वयोविशेषानंगीकारेणहितैषिणः सुहृदः सवयसोहितैषिणो
मित्राणि अरयोनिमित्ततोनर्थकर्त्तारः उभयहेतुत्वाभावादुभयरहिताउदासीनाः
जन्मतएवोभयरहितामध्यस्थाः जन्मतएवानिष्टकर्त्तारोद्वेष्याः जन्मतएवहिते
षिणोबंधवः साधवोधर्मशीलाः पापाःपापशीलाः आत्मैकप्रयोजनतयासुहृ
न्मित्रादिभिःप्रयोजनाभावाद्विरोधाभावाच्चएतेषुसमबुद्धिर्योगाभ्यासार्हैर्विशि
ष्यते ९॥

अभिनवगुप्तकृतटीका

सुहृद्यसौतंकरणमेवयोभजेत् सुहृदयं मित्रंतमसोभ्ये अरिर्विपर्ययः उदासीनपक्ष
द्वयरहितः मध्यस्थःकेनचिद्देशेनमित्रंकेनचिदरिः द्वेषार्होद्वेषमशक्तोद्वेष्यः बं
धुः पुत्रादिसम्बन्धेनपरेषुसर्वेषुसमधीः एवंसाधुषुपापेषुच सचविशिष्यतेक
मात्कर्मसंसारात्तरति इह योगश्चबंधचरणे
रहेवममपिशरीरसंबंधेसर्गोजितःसाम्यावस्थत्वात्सास्वयंबंधकत्वजी
वन्मुक्तिर्येषांसाम्येहितप्रतिष्ठिताः सामेवब्रह्म ९॥

परमार्थप्रपा

अथसमबुद्धिमतोविशिनष्टि सुहृदिति सुहृत्स्वभावेनैवहितार्थंसौमि
त्रः स्नेहवशेनोपकारकः अरिर्घातकः उदासीनोविवदमानयोरुभयोरप्युपेक्ष
कः मध्यस्थः तयोरुभयोरपिहिताशंसीद्वेषयोग्योद्वेष्यः बंधुःएवंसाधवःस
दाचाराःपापादुराचाराःएतेषुसमारागद्वेष रहिताबुद्धिर्यस्यसविशिष्यते
विशिष्टोभवति ९॥

वनमालीटीका

सुहृत्स्वयमुपकारमनपेक्ष्यएवस्नेहसंबंधंचविनोपकर्त्ता मित्रंस्नेहेनोपकार
कःअरिःस्वकृतापकारमनपेक्ष्यस्वभावक्रौर्येणापकर्त्ताउदासीनोविवदमान
योरुभयोरप्युपेक्षकः मध्यस्थोविवदमानयोरुभयोरपिहितैषी द्वेष्यःस्वकृ
तापकारमपेक्ष्यापकर्त्ता बंधुःसंबंधेनोपकर्त्ता एतेषुसाधुषुशास्त्रोक्तकारि
षु पापेषुशास्त्रनिषिद्धकारिषुचकारादन्येषुच सर्वेष्वंतर्यामिणोदृष्ट्याजी
वानांसमत्वदृष्ट्याचसमः रागद्वेषशून्यः सविशिष्यतेसर्वतःउत्कृष्टोभवति
एतादृशसमत्वबुद्धिर्मीतेश्रेष्ठसाधनमितिमामसत्ताममनीयेतिभावः ९॥

कृष्णमवैजयन्तीटी०

किंचसुहृदितिसमलोष्टाश्मकांचनाद्यपियोगिनःसमाशायतनःसुहृदादिषु
समबुद्धिःसविशिष्यतेश्रेष्ठोभवतितत्रोपवयोविशेषाद्यनपेक्ष्यस्वभावेनैवहि।

तेष्वेव स्नेहः सुहृदः यानि केनापि स्नेहेन हितैषीणि सर्वथा मित्राणि मित्राणि ये निमि-
त्तेन नश्यैव्वेवलेः ... ये विवदमानयोर्द्वयोरनपेक्षकास्ते उदासीनाः ये विवदमा-
नयोस्तयोर्विवादापहारार्थिनस्ते मध्यस्थाः ये जन्मनैव वा निर्हेतुकं स्नेहं दधुः ये ज-
न्मनैव हितैषिणस्ते बान्धवाः ये धर्मशीलास्ते साधवः ये पापशीलास्ते पापाः स्वा-
त्मैकदर्शनप्रयोजनया सुहृदादिभिः प्रयोजनाभावाद्धिताहिताभावाच्च तेषु समबु-
द्धिरित्यर्थः ९ ॥

सुहृन्मित्रादिषु समबुद्धिस्तु **मधुसूदनीटीका** सर्वयोगश्रेष्ठत्वादाह ॥

सुहृत्प्रत्युपकारमनपेक्ष्य पूर्वस्नेहसंबंधं विनैवोपकर्ता मित्रं स्नेहेनोपकर्ता
अरिः स्वकृतापकारमनपेक्ष्य स्वभावक्रौर्येणापकर्ता उदासीनः विवदमानयो-
रुभयोरप्युपेक्षकः मध्यस्थो विवदमानयोरुभयोरपि हितैषी द्वेष्यः स्वकृ-
तापकारापेक्षयापकर्ता बंधुः संबंधेनोपकर्ता एतेषु साधुषु शास्त्रविहितकारि-
षु पापेषु शास्त्रप्रतिषिद्धकारिष्वपि चकारादन्येषु च सर्वेषु समबुद्धिः कः कीदृ-
क्कर्मेत्यव्यापृतबुद्धिः सर्वत्र रागद्वेषशून्यः विशिष्यते सर्वत उत्कृष्टो भवति मुच्य-
त इति वा पाठः ९ ॥

सदानंदी टीका

विना प्रत्युपकारेण उपकर्ता सुहृत् स्मृतः स्नेहवान्मित्रमित्युक्तमरिः स्यादप-
कारकः १ उदासीनो द्वयोः प्रेमद्वेषाद्विवदमानयोः पक्षपातविहीनत्वादुभ-
योरप्युपेक्षकः २ मध्यस्थो यो हितान्वेषी द्वयोर्विवदमानयोः स्वस्याप्रियो भ-
वेद्द्वेष्यः संबंधी बंधुरुच्यते ३ एतेषु शास्त्रविहितकर्मकारिषु साधुषु पापेषु शा-
स्त्रमर्यादासमुल्लंघ्य प्रवर्तिषु ४ चात्मेष्वपि सर्वेषु समबुद्धिर्विशिष्यते कः कि-
कर्मेति धीशून्य उत्कृष्टः समतो मम ५ ९ ॥

नीलकंठीटीका

समत्वमेव स्तौति सुहृदिति सुहृत् प्रत्युपकारमनपेक्ष्य उपकर्ता मित्रं स्नेहवा-
न् अरिः शत्रुः उदासीनः उभयत्र पक्षपातशून्यः मध्यस्थः उभयहितैषी द्वेष्य आ-
त्मनोऽप्रियः बंधुः संबंधी तेषु साधुषु पुण्यकृत्सु पापेषु पापाचारेषु कस्य किं क-
र्मेत्यनालोचयन् तेषु सर्वेषु यः समबुद्धिः स विशिष्यते ९ ॥

आनंदीटीका

[illegible] सुहृत्स्वभावतस्सुहृदयः मित्रं कारणवशात्स्ने-
हयुक्तप्रीतिः अरिः कारणवशाद्द्वेष्टा उदासीनः नारिः न मित्रं मध्यस्थः कारण-
वशान्मित्रत्वे शत्रुत्वे च संभाव्यः द्वेष्यो जातिवैरी बंधवः मातुलपितृव्यादयो ज्ञा-

तथा साधवः सदाचाराः पापा दुराचाराः एतेषु समबुद्धिर्योगारूढत्ववशात्
सामरस्यप्राप्तो मोहादिरहितान्तःकरणः विशिष्यते ब्रह्मप्राप्तिविशिष्टो भवती
त्यर्थः ॥ तदेवं मनोजयमुक्त्वा करणानां ध्यानधारणासमाधिभिर्दृढीकृतनिरोधा
त्प्राप्याया सम्प्राप्तम योगावस्थायां स्थिरपदप्राप्तये तदुपायं यमनियमा
सनादिप्रकारकं बहिरङ्गमाह ९ ॥

रामकंठीटीका

यस्य सुहृदरिप्रभृतिषु प्रीतिद्वेषहेतुषु नानाविधेष्वन्यभिन्नरूपेषु जंतु
षु समा ब्रह्मतत्त्वज्ञाननिर्विशेषैकतत्वदर्शनादेकरूपा बुद्धिः स विशिष्यते नै
ष्कर्म्ययोगिनः सकाशात्प्रकर्षं लभते स हि यद्यप्यसमाधिप्रतिपन्नत्वात्परि
हरति यच्च तदानुग्राह्यत्वात्स्वीकरुते ताभ्यां न तस्य द्वेषप्रियाभ्यां रागद्वेषौ प्रका
श्यते यस्तु सर्वसाम्यग्रामः सक्रियास्ववतीर्णानामपि समबुद्धिता ब्रह्मभूत ए
वेति विशिष्यतः स्यकं सुहृदादीनां भेदो व्याख्यायते सुहृद्यः स्वभावतः शो
भनहृदयः मित्रं मैत्रीकरणान्निःस्नेहसौहृदं अरिः शत्रुः कारणवशाद्द्वेषाद्द्वेष्य
स्तु विनापि कारणम् अप्रियः उदासीनो न मित्रं न शत्रुः मध्यस्थो यः केनापि प्र
कारेणामित्रत्वम् अमित्रत्वं वा प्राप्तुमर्हतीति बंधवो ज्ञातयः साधवः शास्त्रोदित
सदाचारनिरताः पापास्तद्विपरीताः दुराचारसंकल्पास्तेषु सर्वेषु समबुद्धः
हितमस्य कर्मयोगिनपवर्गोदय्यं यच्छत्रुभावं प्रतिपन्नेषु शास्त्रचोदितत्वा
त्साधवपादिकर्म ब्रह्मज्ञानवर्त्ति निर्विकारैकात्मनिष्ठत्वम् नत द्वेषाद्वा शास्त्रा
विहितत्वात् स्याद्यानामित्र प्रतिपत्तिः यदेव समभविष्यत् ब्रह्मतत्त्वसत्तानमर्थं
तस्योपदिश्यते सर्वाः कथं स्वेन तु संस्कारेणाप्यपास्यत तस्मात्कर्मयोगिनः
स्तु तत्तदर्थां प्रमक्रमागतां तां शास्त्रचोदितां क्रियाम् अनतिक्रमन्तं पवसर्वसा
म्यभावनाद्विवर्त्तिता [illegible] ९ ॥

लासिकी [illegible]टीका

सुहृत् स्वभावेन हिताशंसी मित्रं स्नेहवशेनोपकारकं अरिः घातकः उ
दासीनः विवदमानयोरुभयोरपि हिताशंसी द्वेष्यः द्वेषविषयः बंधुः संबं
धी साधवः सदाचाराः पापाः दुराचाराः एतेषु समा निर्विशेषैकदर्शिता
देकरूपा रागद्वेषशून्या बुद्धिर्यस्य स तु विशिष्टः यस्तु तदानुग्राह्य न स्वी
करुते तस्य द्वेषप्रियाभ्यां रागद्वेषाभ्यां के मिथ्याचारत्वमेव [illegible]
[illegible]

[illegible marginal note]

१विवदमानयोरुभयोरपु पेक्षकः मध्यस्थः

ग

[illegible] ९ ॥

पंचोलीटीका

सुहृन्मित्रादिषु समबुद्धिस्ततोऽपि श्रेष्ठमाह सुहृन्मित्रेति सुहृन्मि-
त्रार्युदासीनमध्यस्थद्वेष्यबंधुषु सुहृदिति प्रत्युपकारमनपेक्ष्योपकर्ता
शत्रुः मित्रं स्नेहवत् अरिः उदासीनो न कस्यचित् पक्षं भजते मध्यस्थो यो विरु-
द्धयोरुभयोर्हितैषी द्वेष्य आत्मनोऽप्रियः बंधुः संबंधी एतेषु साधुषु
च शास्त्रानुयायिषु अपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु सम-
बुद्धिस्तेषां जातिचरित्रादिकं स्वरूपं अविचारयन् सममेव ब्रह्मैव प-
श्यन् विशिष्यते श्रेष्ठो भवति ९ ॥

रणवीरसमिद्धोधिनी ॥

उक्तमेवार्थं स्फुटयति सुहृदिति सुहृत्स्वभावत एव परोपकारनिरत-
योऽहिताशंसी च मित्रं मैत्रीकरणानिह्नसौहृदमत एव स्नेहवशा-
न्नोपकारकं अरिः कारणवशाद्द्वेष्टा उदासीनो विवदमानयोरु-
भयोरप्युपेक्षकोऽत एव न मित्रं न शत्रुः मध्यस्थो विवदमानयोर-
पि हिताशंसी अत एव केनापि प्रकारेणायो मित्रत्वं वा अप्रियत्वमर्ह-
ति द्वेष्यो विनापि कारणमप्रियः बंधवो ज्ञातयः साधवः शास्त्रोदि-
तसदाचारनिरताः पापास्तद्विपरीता दुराचारसंकल्पाः तेषु सर्वे-
ष्वाततायिषु [illegible] समाधानस्योक्तत्वान्न्यायव्यवहारादिकमप्यहत्वा-
पि निर्विकारबुद्धिर्यस्य सः न तु नः पापो मित्रत्वं प्रतिपद्यमानः पा-
स्त्राविहितत्वेन तादृशप्रतिपत्तेरन्याय्यत्वादिति भावः स च वि-
शिष्यते सर्वस्माज्जनवर्गादिति शेषः ९ ॥

मधुभाष्य

९ ॥ ॥

भाषा अनुवाद

और शत्रु मित्र आदि मे जो समदर्शी मनुष्य सो योगी से भी अधि
कहै यह कहते हैं किसहृद कहे स्वभाव ही से हित कारी औ मि
त्र जो स्नेह वशते उपकारी औ अरि कहे घातक जो शत्रु औ उदासीन
अर्थात् उपकार अपकार दोनो से अलग निरपेक्ष जो औ मध्यस्थ कहे
पक्षपात विना दोनो और हित कारी औ द्वेष्य अर्थात् निःप्रयोजन श
त्रु जो अकारण क्रोधी औ बन्धु जिनसे कछु सम्बन्ध है औ साधु कहे सु
शील सुन्दर आचरण जिनका है तथा पाप जो दुराचारी इन सब के
विषे जिसकी बुद्धि समान कहे प्रीति विरोध रहित है सो विशिष्ट क
हे योगीसे अधिकहै ९ ॥

दोहा ॥

सुहृद मित्र उदासी अरि मध्यम बंधु लेख साधु असाधु के वि
षें सम मति कसो विशेष ९ ॥

योगी युञ्जीत सततमात्मानं रहसि स्थितः एकाकी
यतचित्तात्मा निराशीरपरिग्रहः १० ॥

शांकरभाष्यं

अत एवमुत्तमफलप्राप्तये योगीति योगी ध्यायी युञ्जीत समादध्यात् सततं
सर्वदात्मानमन्तःकरणं रहस्येकान्ते योगी गिरिगुहादौ स्थितः सन्नेकाकी अस
हायो रहसि स्थित एकाकी चेति विशेषणात् संन्यासं कृत्वेत्यर्थः यतचित्तात्मा
चित्तमन्तःकरणमात्मा देहश्च संयतौ यस्य स यतचित्तात्मा निराशीर्वीततृष्णः
परिग्रहश्च परिग्रहरहित इत्यर्थः संन्यासित्वेऽपि सति त्यक्तसर्वपरिग्रहः सन्
युञ्जीतेत्यर्थः १० ॥

आनन्दगिरिकृतटीका

यथोक्तविशेषणवतो योगारूढस्य तस्य योगानुष्ठाने प्रयतितव्यमित्युक्ताभि
धानानन्तरं प्रधानमभिदधाति अत एवमिति आदरनैरन्तर्यदीर्घकालत्वं वि
शेषणत्रयं योगस्य सूचयति सततमिति तस्यैव प्रत्यगात्मत्वमुपन्यस्यति रहसीत्या
दिना सर्वदेत्यादरदीर्घकालयोरुपलक्षणं प्रत्यगात्मानं भावनयेति अन्तःकरण
मिति गिरिगुहादावित्यादिशब्देन योगप्रतिबन्धकदुर्जनादिविधुरो देशो गृह्य
ते विशेषणद्वयस्य तात्पर्यमाह रहसीति योगं युञ्जानस्य संन्यासिनो विशे
षणान्तराणि दर्शयति यतेति सति संन्यासित्वे किमिति परिग्रहग्रहणमा
शंकनक्तेरित्याशंक्य कौपीनाच्छादनादिष्वपि शक्तिनिरासार्थमिदमाह संन्यासि
त्वेपीति १० ॥

स्वामिकृतटीका

एवं योगारूढस्य लक्षणमुक्त्वेदानीं तस्य सांगं योगं विधत्ते योगीत्यादिना स योगी
परमो मत इत्यन्तेन ग्रन्थेन योगी योगारूढ आत्मानं मनो युञ्जीत समाहितं कुर्यात्
सततं निरन्तरं रहसि एकान्ते स्थितः सन् एकाकी संगशून्यः यतं संयतं चित्तमा
त्मा देहश्च यस्य निराशीर्निराकांक्षः परिग्रहशून्यश्च १० ॥ [margin: अपरिग्रहः]

पैशाचभाष्यं

अत एवाप्युक्तफलप्राप्तये योगी [illegible]ध्यायी युञ्जीत समादध्यात् सततमात्मानमन्तः
करणं रहसि स्थितः एकान्ते गिरिगुहादौ स्थितस्सन् एकाकी असहायः एकाकी
ति विशेषणात् संन्यासं कृत्वेत्यर्थः यतचित्तात्मा निराशीर्वितृष्णः अपरिग्रहश्च [margin: यतं चित्तमन्तःकरण मात्मा देहश्च संयतौ यस्य स यतचित्तात्मा]
परिग्रहरहितः संन्यासित्वेऽपि त्यक्तसर्वपरिग्रहस्सन् युञ्जीतेत्यर्थः १०

रामानुजभाष्यं

गी.
टी
ध.

योगीउक्तप्रकारकर्मनिष्ठः सततमहरहर्योगकाले आत्मानं युञ्जीत युक्तं कुर्वी
त स्वदर्शननिष्ठं कुर्वीतेत्यर्थः रहसि जनवर्जिते गिरिगुहादौ देशे स्थितः एकाकी
तत्रापि न सद्वितीयः यतचित्तात्मा यतचित्तमनस्कः निराशीः आत्माभ्या
सातिरिक्ते कृत्स्नवस्तुनि निरपेक्षः अपरिग्रहः तद्व्यतिरिक्ते कस्मिंश्चिदपि ममेति
नारहितः ॥१०॥

अभिनवगुप्तकृतटीका

ननु जितात्मन इत्युक्तं तत्कथं तज्जयं इत्याशंक्याहतदेवः कश्चिदुपायः का परमार्थप्रश यसमद्वारकः चित्तसंयम उपदिश्यते
आत्मानं वचित्तं च युञ्जीत समाधीं कुर्यात
सततमिति न परिमितकालं यतो हि नि
दिवसं सत्त्वेन युज्यते नान्यथा ॥१०॥

एवं योगारूढलक्षणं निरूप्य इदानीं योगी युञ्जीतेत्यादिना स योगी परमो
मत इत्यन्तेन सप्तविंशतिभिः श्लोकैः सांगमभ्यासयोगं निरूपयति योगीति
योगशास्त्रे तावद्योगत्रयमुपदिष्टं तत्र प्राणापानयोर्योगो मनःपवनयोर्योगो जीवब्र
ह्मणोर्योगश्च एतत्क्रमेण योगत्रयेऽप्यस्मिन्कुर्यात् आत्मानं मनः सततं युञ्जीत स
माहितं कुर्यात् अथ चित्तलोभकाभावसामग्रीमनुवदंति रहसि एकांते ए
काकी संगशून्यः यतं नियमितं आत्मा शरीरं येन निराशीर्निराकांक्षः अपरि
ग्रहः परिग्रहशून्यः ॥१०॥

वनमालीटीका

योगारूढस्य लक्षणं फलं चोक्त्वा तत्सांगयोगं विधत्ते योगीत्यादिना स योगी पर
मो मत इत्यंतेन योगी योगारूढः आत्मानं चित्तं सततं निरंतरम् युञ्जीत क्षिप्त
मूढविक्षिप्तभूमित्रयपरित्यागेनैकाग्रनिरोधभूमिभ्यां परमात्मनि देवे भगवति स
माहितं कुर्यात् क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः पंच योगभा
ष्ये प्रसिद्धास्तत्र क्षिप्तं रजसा विषयेषु प्रवृत्तिमत् मूढं तमसा निद्रादिवृत्तिमत्।
क्षिप्ताद्विशिष्टं विक्षिप्तं सत्त्वाधिक्येन समस्तं यदपि चित्तं रजोमात्रयोगेन रहितम
त् एकस्मिन्नेव विषये ध्येये निवातस्थदीपवत् स्थितमेकाग्रं संप्रज्ञातसमाधि
धामं निरुद्धं निरुद्धसकलवृत्तिकं संस्कारमात्रशेषमसंप्रज्ञातसमाधिधाम।
इत्यर्थः रहसि गिरिगुहादौ योगप्रतिबंधकदुर्जनादिवर्जिते देशे स्थितः एका
की एकः सर्वेषु गृहपरिजनः चित्तमंतःकरणमात्मा देहश्च संयतौ योगविरोधि
व्यापारशून्यौ यस्य सः निराशीर्वैराग्यदार्ढ्येन विगततृष्णः अत एवापरिग्रहः
शास्त्राभ्यनुज्ञातेनापि योगविरोधिपरिग्रहेण शून्यः ॥१०॥

विषयान्नि

परि

क्रमवैजयन्तीटीका

अथैवंभूतस्य योगिनः सांगं योगसाधनप्रकारमाह योगीत्यारभ्याध्यायसमाप्तेः स
र्वे श्लोकेन अन्वयेन योगी युञ्जीतेति योगी उक्तकर्मयोगनिष्ठः सततमहरहर्योगा
नुष्ठानसमये आत्मानं मनः युञ्जीत समाधियुक्तं कुर्यात् किं कुर्वन् रहसि ज।

३

नवर्जिते शून्ये च देशे स्थितः सन् तत्राप्येकाकी द्वितीयरहितः तत्रा
पि यतचित्तात्मा नो चित्तं देहो येन स तथा प्राणायामादिना चित्तस्य यम
नियमासनप्रत्याहारादिना देहस्य च संकोचे यत्नवानित्यर्थः यतो निरा
शीः विषयवैराग्यातिशयत्वेन तत्रानिःस्पृहः यद्वा आत्मावलोकनैक
कामतयैतदन्याहृतविषयाशारहितइत्यर्थः अतएवापरिग्रहः आत्म
व्यतिरिक्तस्य वस्तुनः संग्रहशून्यः १० ॥

मधुसूदनी टीका

एवं योगारूढस्य लक्षणं फलं चोक्त्वा तस्य सांगं योगं विधत्ते योगीत्यादिभिः
स योगी परमो मत इत्यंतैस्त्रयोविंशत्या श्लोकैः तत्रैवं उत्तमफलप्राप्तये॥
योगी योगारूढः आत्मानं चित्तं सततं निरंतरं युंजीत क्षिप्तमूढविक्षिप्तभू
मिपरित्यागेनैकाग्रनिरोधभूमिभ्यां समाहितं कुर्यात् रहसि गिरिगुहादौ
योगप्रतिबंधकदुर्जनादिवर्जिते देशे स्थितः एकाकी त्यक्तसर्वपरिग्र
हपरिवर्जनः संन्यासी चित्तमंतःकरणमात्मा देहश्च संयतो योगप्रतिबं
धकव्यापारशून्यो यस्य स यतचित्तात्मा यतो निराशीः वैराग्यदार्ढ्येन विग
ततृष्णः अतएवापरिग्रहः शास्त्राभ्यनुज्ञातेनापि योगप्रतिबंधकेन प
रिग्रहेण शून्यः १० ॥

सदानंदी टी॰

अतउत्कृष्टतासिद्धयेयुंजीत तव्यमितीर्यते श्रुत्वा वेदांतवाक्येभ्यो मत्वा सदु
पपत्तिभिः १ आत्मतत्वं ततस्तस्मिन्निदिध्यासनतत्परः चित्तं समाहितं कु
र्यान्नित्यमेकांतदेशगः २ त्यक्त्वा विक्षेपकारित्वात्समस्तं ममतास्पदं सं
यतो चित्तदेहो च येन सोत्यंतनिश्चलः ३ परवैराग्यदार्ढ्येन निराशी वी
तस्पृहः चित्तविक्षेपकत्यागी योगी त्यक्तपरिग्रहः ४ १० ॥

नीलकंठी टी॰ ॥

योगीति योगी योगाभ्यासपरः रहसि एकांते स्थितः सन् आत्मानं बुद्धिं यु
जीत समादध्यात् सततमिति निरंतरमुक्तं निराशीर्योगसिद्धेरन्यदप्यार्थ
यानः तदेकनिष्ठ इति यावत् न सत्कारउक्तः एकाकी असहायः संन्या॰
सीत्यर्थः यतो स्थिरीकृतो चित्तं मनः आत्मा सेंद्रियं शरीरं येन स यतचि
त्तात्मा तथा अपरिग्रहः एकाकित्वेपि कथा उत्सवादिवक्तुपरिग्रहशू
न्यः १० ॥

आनंदी टीका ॥

तदेवं मनोबुद्ध्यहंकाराणां ध्यानधारणसमाधिभिर्हृतिनिरोधात्प्राप्यायां
सम्यक्परमयोगावस्थायां स्थिरपदप्राप्तये सदुपायं यमनियमासनादिप्र॰

कारकंबहिरंगमाह यतंनिरुद्धवृत्तिचित्तंयस्यैदृगात्मायस्यसआत्मनि
समाहितचित्तइत्यर्थःनिराशीःशब्दादिविषयस्पृहाशून्यअतएवापरिग्र
हः ममेदमित्यभिमानरहितः १० ॥

रामकंठी टी॰

अथयथोक्तसाम्यानतिक्रमसमाहितस्य चित्तवृत्तिनिरोधलक्षणम
पियोगमितरक्रियावदहोरात्रमध्येव्यवस्थितापितोभ्यासकालविशि
ष्टेतिकर्तव्यतान्वितमपिकर्मयोगिनःश्लोकषट्केनाभ्यनुजानन्नाह
क्रमेणैतद्व्याख्यायते योगीप्रबंधप्रतिपादितप्रतिपादयिष्यमाणस्व
रूपेणप्रसक्ततयाख्यातेयोगांतरविलक्षणपरिकर्मणासर्वकालदेशा
विरोधिनासमाधिविशेषनिरपेक्षेणसमस्तान्तर्बहिष्करणप्राणवृत्ति
ष्वपिनिरुद्धप्रसरेणकर्मयोगेनयोगवान् शास्त्रविहितत्वात् आत्मान
मंतःकरणंजीवात्मानंवासततंप्रत्यहव्यवस्थापितनियतकालान
तिक्रमेणरहस्येकाग्र्यबाधकरहितेदेशेस्थितएकाकीकेवलः।
तथायतचित्तात्मा यतंनिगृहीतंचित्तंमनोयेनतादृशआत्मादेह
श्चयस्यसतथाविधः सन्परमात्मनिसमाधीतचित्तवृत्तिनिरोधल
क्षणमपियोगमनुतिष्ठेदित्यर्थः किंतुनिराशीराशिषःफलाशंस
नोनिष्क्रांतःमोक्षलक्षणेपिफलेप्रार्थनोद्देश्यरहितस्तथापरिग्रहः
सर्वत्रममत्वाभिमानरहितः तथामच्चित्तत्वादिवक्ष्यमाणधर्मयुक्तोयु
जीतेत्यनेनकर्मयोगसमाधानाप्रमत्तेनायंयोगोभ्यसनीयइत्युक्तम् १०

लासिकी टी॰

अथकर्मयोगिनश्चित्तवृत्तिनिरोधलक्षणंध्यानयोगमारुरुक्षोरितर
क्रियावदहोरात्रमध्यव्यवस्थिताभ्यासकालविशिष्टेतिकर्तव्यान्वितम
पियोगीत्यादिना सयोगीपरमोमतइत्यंतेनग्रंथेनोपदिशति योगीउ
क्तविधयानित्यसमाहितः आत्मानंसततं प्रत्यहंव्यवस्थापितनिय
तकालानतिक्रमेणयुंजीतसमाहितंकुर्यात् प्रत्यवमर्शात्कीदृशः
रहसिएकाग्र्यबाधकरहितेएकांतेदेशेस्थितः एकाकीअसहायः
तथायतचित्तात्मायतंनिगृहीतंचित्तंमनआत्माशरीरंचयेनसः नि
राशीर्निराकांक्षोपरिग्रहोममताशून्यःमच्चित्तत्वादिवक्ष्यमाणधर्मयु
क्तोयुंजीतेत्यनेनकर्मयोगसमाधानाप्रमत्तेनायंयोगोभ्यसनीयइत्यु
क्तम् एकाकीत्वादिषुसत्स्वेतद्युज्यतेनान्यथा १० ॥

पंचोली टी॰

एवं योगारूढस्य लक्षणं श्रेष्ठ्यमुक्त्वा तस्य सर्वोत्तमफलप्राप्तये सांख्ययोगं विधत्ते योगी युंजीत इत्यारभ्य स योगी परमो मत इत्यंतेन ग्रंथेनाह योगीति एकाकी असहायः संयतो अंतःकरणबुद्धी यस्य स यतचित्तात्मा निराशीः विगततृष्णो योगी ध्यानवान् अपरिग्रहः रहसि गिरिगुहादौ स्थितः आत्मानं अंतःकरणं युंजीत समाधियुक्तं कुर्यात् १०॥

रणवीरसमिद्धियिनी॥

योगीति योगी कर्मयोगी रहसि रहस्ये गुरूपदिष्टे यन्त्रविद्यामार्गे स्थितः कृतस्थितिः एकाकी असहायीरत्वेन सहायानपेक्षो यतचित्तात्मा निरुद्धीतमनोर्थीन्द्रियः निराशीः पुत्रादिविषयजीविताशारहितः सिद्ध्यसिद्ध्योः समश्च अपरिग्रहः अः केष्वेव निषेधे चेत्येकान्तरेकोपादकारणे वै विस्मरितिश्रुतेश्च अः विष्णुः परमेश्वरः स एव परिग्रहो यस्य सः परमेश्वरमेव शरणीकृत्य प्रवृत्त इति यावत् स्त्रीपुत्रादिपरिवारं परित्यज्य युद्धभूमिमागत इति वा अत एव वीरसोऽकेकाकी केवल एवानेकवीरप्रतिभटत्वे स्थितः सततं सर्वकालेष्वेषु ज्ञात एव नित्यत्वप्रतिपादितास्वनेकविधास्ववस्थासु आत्मानं बुद्धिं युंजीत समाहितं कुर्वीत अथवा आत्मानं वृषभं तदुपलक्षितानि दशाधिकमेंद्रियाणि युंजीताश्वयादिना संयोजयेदिति १०॥

मधुभाष्य

योगी युंजीतेत्यादिना युंजीत समाधियोगयुक्तं कुर्यात् आत्मानं मनः योगं समाधियोगं युंज्यात् निर्वाणपरमां शरीरत्यागोत्तरकालीनां अनशनादिनिषेधोऽप्यात्मकस्य उक्तं हि निरुपानम यन्मामवेक्षणं तदादिवर्जनं कृत्वा निमीलिताक्षस्त्वेकाकी ध्याय

स्यसिष्यतीति नारदीये युक्ताहारविहारस्य सोपायाहारादेर्यावता
अभावभावो भवति तावदाहारादेरित्यर्थः आत्मनि भगवति आ
त्मनः भगवद्विषयंयोगं आत्मना मनसा आत्मनि देहे आत्मानं
भगवंतं पश्यन्तुष्यतो भगवद्रूपात् दुःखसंयोगो येन वियुज्यते
स दुःखसंयोगवियोगः न केवलमुत्पन्नं दुःखं नाशयति अनुत्पत्ति
मेव निवारयतीति दर्शयति स योगस्त्वाहेन निश्चयेन योक्तव्यः
योक्तव्य एव बुभूषुणेत्यर्थः सर्वान्सर्वविषयान् अशेषतः एक
विषयोपि कामः स्वल्पः कश्चित्कोपि न कर्त्तव्य इत्यर्थः मन
सैव विनियंतुं शक्यं तेनानेत्येव साहः दुर्हुः कारणं हि मनो निग्रहे
आत्मस्मरणे च यतो यतो यत्र यत्र यतो यतो यावतीत्यादिना ध
योगात् आत्मन्येव वशं नयेत् आत्मविषय एव वशीकुर्यादि
त्यर्थः एवंविक्तश्लोकोक्तं प्रपंचयति १०॥

न्नाक्षिप्यतीति नारदीये युक्ताहारविहारस्य सोपायाहारादेर्यावता
श्रमाद्यभावो भवति तावदाहारादेरित्यर्थः आत्मनि भगवति आ
त्मनः भगवद्विषयं योगं आत्मना मनसा आत्मनि देहे आत्मानं
भगवंतं पश्यन् तुष्यति भगवद्रूपात् दुःखसंयोगो येन वियुज्यते
स दुःखसंयोगवियोगः न केवलमुत्पन्नदुःखं नाशयति उत्पत्ति
मेव निवारयतीति दर्शयति स योगः शास्त्रेण निश्चयेन योक्तव्यः
योक्तव्य एव बुभूषुणेत्यर्थः सर्वान्सर्वविषयान् अशेषतः एक
विषयोपि कामः स्वल्पः कश्चित्कोपि न कर्तव्य इत्यर्थः मन
सैव विनियंतं स्यात्तेनानेत्येव प्राह बुद्धेः कारणत्वं मनोनिग्रहे
आत्मस्मरणेव यतो यतो यत्र यत्र यतो यतो यावतीत्यादिना प्र
योगात् आत्मन्येव वशं नयेत् आत्मविषय एव वशीकुर्यादि
त्यर्थः पूर्वोक्तश्लोकोक्तं प्रपंचयति १०॥

भाषाअनुवाद

योगी के लक्षण कहिकर अब उसका अङ्गरूप जो योग सो इस। श्लोक से लेकर इसी अध्याय के स योगी पंमोमतः इस ३२ श्लोक तक कहते हैं कि योग आरूढ पुरुष सङ्ग रहित होय जिस के अन्तःकरण औ शरीर वशीभूत हैं सो निराकांक्ष सर्व परिग्रह रहित एकान्त मे अकेला सावधान बैठि कर अपने आत्माकरि मनको निरन्तर भगवत के भजन मे युक्त करे १०

दोहा

योगीयुक्त हूं आत्मको सदा एकांत स्थितहोय एकाकी जित
इंद्रिजो अरहस अरूडंबी सोय १०॥

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं ११॥

शांकरभाष्यं

अथेदानीं योगं युञ्जतः आसनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः
प्राप्तयोगस्य लक्षणं तत्फलादि चेत्यत आरभ्यते तत्रासनमेव तावत् प्रथमम् उच्य
ते शुचाविति शुचौ शुद्धे विविक्ते स्वभावतः संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थि
रमचलमात्मनः आसनं नात्युच्छ्रितं नातीवोच्छ्रितं नाप्यतिनीचं तच्च चैलाजिन
कुशोत्तरं चैलमजिनं कुशा इत्येते उत्तरे यस्मिन्नासने तदासनं चैलाजिनकुशोत्तरं
पाठक्रमात् विपरीतोऽत्र क्रमश्चैलादीनां ११॥

आनन्दगिरिकृतटीका

योगं योगाङ्गानि चोपदिशतो ग्रन्थसन्दर्भस्य तात्पर्यमाह अथेति योगस्वरूपकथ
नानन्तर्यमथशब्दार्थः विहारादीनामित्यादिशब्देन यथोक्तासना
दिगतावान्तरभेदग्रहणं तत्फलादि चेत्यादिशब्देन योगफलं सम्यक्ज्ञानं च तत्फ
लं कैवल्यं ततो भ्रष्टस्यात्मनः कावस्थेत्यादि गृह्यते एवं समुदायतात्पर्ये दर्शिते
किमासीनः शयानस्तिष्ठन् गच्छन् कुर्वन् वा युञ्जीतेत्यपेक्षायामनन्तरश्लोकतात्प
र्यमाह तत्रेति निर्धारणे सप्तमी प्रथमं योगानुष्ठानस्य प्रधानमासीनः सम्भवा
दिति मायादिति यावत् विविक्तत्वं द्वेधा विभजते स्वभावत इति आसनस्य स्थैर्ये न
प्रविश्य योगमनुतिष्ठतः समाधानायोगात् योगासिद्धिरित्यभिसन्धाय वि
शिनष्टि अचलमिति आस्यतेऽस्मिन्निति व्युत्पत्तिमनुसृत्याह आसनमिति आत्म
न इति परकीयासनव्युदासार्थं पतनभयपरिहारार्थं नात्युच्छ्रितमुक्तं नाप्यतिनीच
मिति भूतलपाषाणादिसंश्लेषवातातपाग्निसाम्याद्यादिसम्भावितदेशनिरासार्थं चै
लं वस्त्रमजिनं चर्म पशूनां तच्च मृगस्य कुशा दर्भास्ते चोत्तरे यस्मिन्नुपरिष्टादास्य
तथा चोक्तं प्रथमं चैलं ततोऽजिनं ततश्च कुशा इति प्रतिपन्नक्रमं स्वाभाविकं क्र
ममतिक्रम्यादौ कुशास्ततोऽजिनं ततश्चैलमिति क्रमं विवक्षित्वाह विपरीतोऽत्रे
ति ११॥

स्वामिकृतटीका

आसननियमं दर्शयन्नाह द्वाभ्यां शुद्धे स्थाने आत्मनः स्वस्यासनं स्थापयित्वा कीदृशं स्थि
रमचलं नात्युच्छ्रितं नवातिनीचं चैलं वस्त्रमजिनं व्याघ्रादिचर्म चैलाजिने कुशेभ्य उ
त्तरे यस्मिन् कुशानामुपरि चर्म तदुपरि वस्त्रमास्तीर्येत्यर्थः ११

पैशाचभाष्यं

अथेदानीं योगं युंजानस्याहारादीनां योगसाधनत्वेन नियमो वक्तव्यः आसनयोगस्य लक्षणं फलं चेत्यादि वक्तव्यमिमेन तदारभ्यते तत्रासनमेव तावदमुष्यमनुध्यते शुचाविति शुचौ विविक्ते स्वभावतः संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थिरमचलमात्मनः आत्मसमानं नात्युच्छ्रितं नातिनीचं तच्च चैलाजिनकुशोत्तरं चैलमजिनं कुशाश्चोत्तराः यस्मिन्नासने तदासनं चैलाजिनकुशोत्तरं विपरीतक्रमः ॥११॥

रामानुजभाष्यं

शुचौ देशे अशुचिभिः पुरुषैरपरिगृहीतेऽशुचिवस्तुभिरस्पृष्टे च पवित्रभूते देशे दार्वादिनिर्मितं नात्युच्छ्रितं नातिनीचं कुशाजिनचैलोत्तरमासनं प्रतिष्ठाप्य तस्मिन्मनःप्रसादकरे समाश्रय उपविश्याव्याकुलमेकाग्रमनः कृत्वा ॥११॥

अभिनवगुप्तकृतटीका उपक्रमं ॥ आसनस्थैर्यात्कालस्थैर्यं चित्त...

परमार्थप्रपा टी.

अथासननियमं दर्शयति +

+ शुचौ देश इति द्वाभ्यां । शुचौ पवित्रे तीर्थादिसन्निहिते देशे शीतलतरुच्छायायां च प्रवाहमनोरमे प्रदेशे आत्मनः स्वस्य स्थिरमचलं मृत्तिकोत्कीर्णकाष्ठपट्टवत्स्थूलं यथा भवति तथा आसनं प्रतिष्ठाप्य किंभूतं नात्युच्छ्रितं नात्युच्चं कदापि पतनसंभवात् तथा नातिनीचं भूसंघट्टनेन गात्रोपद्रवात् अतो मध्यस्थमित्यर्थः अथासनस्वभावमाह चैलेति चैलं वस्त्रं अजिनं व्याघ्रादिचर्म चैलाजिने कुशेभ्य उत्तरे उपरि स्थिते यस्मिन् कुशानामुपरि चर्म तदुपरि वस्त्रमित्यर्थः ॥११॥

वनमालीटीका

तत्रासननियममाह शुचाविति द्वाभ्यां शुचौ स्वभावतः संस्कारतो वा शुद्धे गंगातटगुहादेशे समे स्थाने प्रतिष्ठाप्य स्थिरं निश्चलं नात्युच्छ्रितं नात्युच्चं नाप्यतिनीचं चैलाजिनकुशोत्तरं चैलं मृदुवस्त्रं अजिनं मृदुव्याघ्रादिचर्म ते कुशेभ्य उत्तरे उपरितने यस्मिन् तत् आसने स्मिन्नित्यासने कुशोपरि अजिने तदुपरि चैलमित्यर्थः आत्मन इति परासनव्यावृत्त्यर्थं ॥११॥

कृष्णवैजयन्तीटी.

किंच आसनविधिमाह द्वाभ्याम् शुचौ देश इति शुचौ स्वतः शुद्धे गंगायमुनादितटे गोवर्द्धनादिगिरिगह्वरादौ वा देशे मधुवनपुष्करप्रयागगयोध्यादौ आत्मनः स्वस्य तेन स्वाभिमते देशे स्वाभिमतमासनं कुर्यान्नेतरेच्छया तद्योगस्य प्रतिकूलत्वं स्यादिति सूचितम् आसनमुपवेशनं प्रतिष्ठाप्य संस्थाप्य कीदृशं स्थिरं निरुपद्रव

स्वात्स्वस्थानादनुस्थानेरंशाहृस्थिकमर्पादिविघ्नभयाव्याकुलमित्यर्थः पुनःकी
दृशेनात्युच्छ्रितमत्यन्तनादिमयात्रात्युच्चं नातिनीचमधः शीतोष्णादिगुणसंबाद
भयात्रातिनिम्नम् चैलाजिनकुशोत्तरं चैलं चैतत्स्यूत्रवस्त्रमजिनंमृदुमृगव्या
घ्रादिचर्मकुशोदर्भः कुशाश्च अजिनंच चैलं चतेऽग्रत्नाद्युत्तरमितिसूत्रेण चैलस्यपू
र्वनिपातोऽभ्यर्हितत्वेऽप्यनेनकुशादजिनस्य पूर्वनिपात इति चैलाजिनकुशाउ
त्तरे यस्मिंस्तत् यद्वाअजिनस्योत्तरं यस्मात्सोऽजिनोत्तरः सचासौकुशश्चेतिमध्यम
पदलोपीसमासः अजिनकुशाउत्तरमजिनकुशोत्तरं चैलमजिनकुशोत्तरं य
स्मिंस्तत् यद्वाकुशश्चाजिनंचाजिनकुशौअभ्यर्हितत्वादजिनस्य पूर्वनिपातः अ
जिनकुशाभ्यामुत्तरमजिनकुशोत्तरं चैलमजिनकुशोत्तरं यस्मिंस्तत् यद्वा अ
जिनंच चैलंच चैलाजिने स्वातंत्र्यात्चैलस्यपूर्वनिपातः कुशाउत्तरेकुशोत्तरे चै
लाजिनेकुशोत्तरे यस्मिंस्तत् कुशोपरिअजिनंतदुपरिचैलमित्यर्थः ११ ॥

मधुसूदनीटी०

तत्रासननियमंदर्शयन्नाहद्वाभ्यां ॥ शुचौस्वभावतः संस्कारतोवाशुद्धेजनसमुदा
यरहिते निर्भये गंगातटगुहादौदेशे समेस्थाने प्रतिष्ठाप्य स्थिरंनिश्चलंनात्युच्छ्रि
तंनात्युच्चंनाप्यतिनीचं चैलाजिनकुशोत्तरं चैलंमृदुवस्त्रं अजिनंमृगव्याघ्रादिच
र्मतेकुशेभ्यउत्तरेउपरितनेयस्मिन् तदात्मनेस्मिन्नित्यासनं कुशमयबृस्युपरि
मृदुचर्मतदुपरिमृदुवस्त्ररूपमित्यर्थः तथाचाह भगवान्पतंजलिः स्थिरसु
खमासनमिति आत्मनइति परासनव्यावृत्त्यर्थं परस्यापिपरेच्छानियमाभावेन योग
विक्षेपकरत्वात् ११ ॥

सदानंदीटीका

आसनाहारनियमानाहद्वाभ्यांजगद्गुरुः स्वभावतः संस्कारादाशुद्धदेशे स्थिरंबु
धः १ प्रतिष्ठाप्यासनंस्वस्यनात्युच्चंनातिनीचकं कौशांसमीसमास्तीर्यमृदुचर्म
कुशोपरि २ चर्मोपरिमृदुसूक्ष्मंवस्त्रमास्तीर्ययोगिराट् १ ॥

नीलकंठीटीका

योगं युंजीतेत्युक्तं तत्कथमित्याकांक्षायां तदंगान्यासनादीन्याह शुचौदेशइत्यादि
ना शुचौस्वभावतः संस्कारतोवाशुद्धेदेशे स्थाने प्रतिष्ठाप्य स्वस्यातेन कृत्वा स्थिरंनि
श्चलं आत्मनस्विन्नित्यासनंस्थंडिलं निश्चलमित्यनेनमृन्मयमेवस्थंडिलंनतुकाष्ठम
यंपीठं आसनमितिपरासनव्यावृत्त्यर्थं नात्युच्छ्रितंनात्युच्चंनातिनीचंचैलाजिनकु
शाः उत्तरे उपर्युपरियस्यतच्चैलाजिनकुशोत्तरं अजिनादुपरिचैलंकुशेभ्यउपरिअ

जिनेस्थंडिलस्योपरिकुशास्तरणस्यर्थः ११॥

आनन्दी टीका [illegible] ११ स्पष्टार्थम्

रामकंठी टीका

अस्येदानीं परिकर्माभिधीयते किं कृत्वा युंज्यात् आत्मनः शुचौ देशे यत्पाद्युपेतयाशुद्धसवित्परिसरगिरिगुहादौ गृहस्योपेतया संपलिप्तविविक्तसदनादौ विशुद्धे स्थाने आसनं समाधिविष्टरं प्रतिष्ठाप्य स्थितिं प्रापय्य कीदृशं स्थिरं निश्चलं तथा स्ववत्वार्थं स्व न्यायनिम्नत्वातिशयरहितं तथा चैलं वस्त्रमजिनं मृगादिचर्म कुशाद्दर्भाः तदुत्तरं तथानेनैव गृहस्यस्य चैलाजिनोत्तरम् ११॥

लासिकी टीका

अस्येदानीं परिकर्माभिधीय [illegible] ते किं कृत्वा युंज्यादित्याह ॥
स्वभावतः संस्कारतो वा शुद्धे स्थाने आत्मन आसनमास्यते स्मिन्निति आसनं प्रतिष्ठाप्य स्थापयित्वा कीदृशं स्ववार्थं नात्युच्छ्रितं न चातिनीचम् स्थिरं निश्चलं तथा चैलाजिनकुशोभ्यः उत्तरेयाजनत् कुशामयहत्स्यपरि मृदुपर्म तदुपरि मृदुवस्त्रमास्तीर्यं तत्पर्थः स्थिरमिति नौकादिव्यावृत्त्यर्थं तदुक्तं स्थिरं सुखमासनमिति [illegible] ११॥

पंचोलीटीका

अथेदानीं योगं युंजानस्याशनाहारविहारादीनां योगसाधनत्वेन नियमेनकथ्यो आसननियमं तावत्प्रथममाह शुचौ देशे इति द्वाभ्यां आत्मनः आसनं नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं पूर्वं कुशास्तेषामुपरि कृष्णाजिनं तस्योपरि वस्त्रं एवं विधं स्थिरमात्मासनं प्रतिष्ठाप्य ११॥

रामानुजप्रकाशिनी॥

शुचौ देशे इति अशुचिभिः पुरुषैरनधिष्ठिते दारुमयादिके विषये आत्मनः स्व

स्थिरमासनं आत्मनस्मिन्निति शुच्यत्यारण्यादिकं प्रतिष्ठाप्य प्रतिष्ठितं
कृत्वा तत्रैवासने उपविश्य मनश्चैकाग्रं आरभ्यमाणकार्यैकवि
षयं कृत्वा यतचित्तेंद्रियक्रियः यता नियमिता चित्तस्येंद्रियाणां
च क्रियाः संशयस्वैद्यादयोदर्शनादयश्च व्यापारा येन तादृशो यो
गी योगं युंज्यते संधीयते यत्तश्चीति योगः समाधिस्तं युंज्यात् अनुवि
संदधीत किमर्थं आत्मविशुद्धये आत्मनः स्वस्य विशुद्धिः परकृत
वैरनिर्यातनं तदर्थं अथवा विशुद्धिरनेकजन्मार्जितपापप्रोञ्छ
नं तदर्थं शुद्धेनैव तत्क्रियानिर्धूतकल्मषमोक्षायकल्पते इति हि
प्रसिद्धं अथवा आरभ्यनिवृत्तेः संजायमानायप्रयोनरकादि
लक्षणमलापसारणार्थमिति कथंभूतमासनं स्थिरं चलादि व
र्जितमथ कंगोरवरायष्ट्यादिगुणयुक्तमिति यावत् तथा
नात्युच्छ्रितं नातिनीचं अत्युच्छ्रयस्य उत्पतनहेतुत्वात् अतिनीचस्य स
र्वैः खोदनीयत्वात् उच्छ्रायावनत्याति प्रायरहिते किंरूपयोवि
तो ˜ प्रमाणं तथा चैलाजिनकुशोत्तरं चैलं क्षौमादिवस्त्रं अजि
नं हीप्यादीनां चर्म कुशादर्भाः चैलाजिने कुशेभ्य उत्तरे यस्मिन्
कुशोपरि चर्मणा तदुपरि वस्त्रेण वास्तीर्णमित्यर्थः पविर
तया कुशादीनामास्तरणे प्रयोग इति बोध्यं यद्वा चैलं कंब
ला घंवस्त्रं अजिनं हीप्याघ्रचर्म कुशाः लोदपाला कासत्र उत्तरं त
तया हृतमिति यावत् कांबलद्वैप्यादयोविख्याः प्रसिद्धाः कुशा
हृतं वा चपरे उणरोदनाउर्भेघनाव्यंजकमिति ११ ॥

मधुभाष्य

भाषा अनुवाद

उसी योगका आसन औ नियम आदि दिखावते हुये दो श्लोकसे कहते हैं कि पवित्र स्थानमे अपने आसन पर बैठनेके अनन्तर योग अभ्यास करे आसन कैसा चहिये कि जो अचल और बहुत ऊंचा न अति नीचा होय और चैल कहे वस्त्र अजिन व्याघ्रचर्म अर्थात् नीचे कुशा तब चर्म ऊपर वस्त्र ऐसा आसनकरै ११ ॥

दोहा

स्वच्छ स्थानमे आसन अपनो स्थिर कर लेहिं नाऊंचें ना नीच अ-
ति चैल अजिन कुशा जेहिं ११

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः उपविश्या
सने युञ्ज्याद्योगमात्मविशुद्धये १२ ॥

शांकरभाष्यं

प्रतिष्ठाप्य किं तत्रेति तत्र तस्मिन्नासने उपविश्य योगं युञ्ज्यात् कथं सर्वविषये
भ्य उपसंहृत्यैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः चित्तंच इन्द्रियाणिच चित्तेन्द्रि
याणि तेषां क्रिया संयता यस्य स यतचित्तेन्द्रियक्रियः स किमर्थं योगं युञ्ज्यादित्या
हात्मविशुद्धये अन्तःकरणस्य शुद्ध्यर्थमित्येतत् १२ ॥

आनन्दगिरिकृतटीका

यथोक्तमासने समास्थाय किं कर्तव्यमिति प्रश्नपूर्वकं कर्तव्यं तन्निर्दिशति प्रतिष्ठा
प्येति योगं युञ्जानस्येति कर्तव्यताकलापं दर्शयति कथमिति सर्वेभ्यो विषयेभ्यः
सकाशात् प्रत्याहृत्य मनसो यदेकस्मिन्नेव ध्येये विषये समाधाने चित्तस्येन्द्रि
याणां च बाह्यक्रियाणां संयमनं तदुभयं कृत्वा योगमनुतिष्ठेदित्याह सर्वेति आ
सने यथोक्ते स्थित्वा यथोक्तया रीत्या योगानुष्ठानस्य प्रश्नपूर्वकं फलमाह स कि
मर्थमित्यादिना १२ ॥

स्वामिकृतटीका

तत्रेति तत्र तस्मिन्नासने उपविश्यैकाग्रं विक्षेपरहितं मनः कृत्वा योगं युञ्ज्यादभ्य
सेत् यता उपरताश्चित्तस्येन्द्रियाणां च क्रिया यस्य आत्मनो मनसो विशुद्धये उपशान्तये १२ ॥

पैशाचभाष्यं

प्रतिष्ठाप्य किं तत्रैकाग्रमिति चैलाजिनकुशोत्तरे तत्र तस्मिन्नासने उपविश्य यो
गं युञ्ज्यात् कथं सर्वविषयेभ्य उपसंहृत्य एकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः
स किमर्थं योगं युञ्ज्यादित्यत आह आत्मविशुद्धये अन्तःकरणस्य विशुद्ध्यर्थमित्ये
तत् १२ ॥

रामानुजभाष्यं

सर्वात्मनोपसंहृतचित्तेन्द्रियक्रियः आत्मशुद्धये बन्धविमुक्तये योगं नियुञ्ज्यात्
आत्मावलोकनं कुर्वीत १२ ॥

अभिनवगुप्तकृतटी· उपक्रमं १२ चित्तक्रियाः संकल्पात्मानः अन्यास्त्विन्द्रियक्रियाः
यता; नियमंनीता; १२

परमार्थप्रपा टी·

तत्र तस्मिन्नासने उप विश्यैकाग्रं विक्षेपरहितं मनः कृत्वा योगं युञ्ज्यात् ।
किंभूतः यताश्चित्तेन्द्रियक्रिया येन स तथा आत्मनो मनःशुद्धये उपशान्तये १२ ॥

गी.
टी.
ष.

51

वनमालाटीका

ततः किं तत्राह तत्रेति तस्मिन्नासने तु उपविश्यैव न तु शयानस्तिष्ठन्वा आसीनः संभवादिति सूत्रात् यताः संयताश्चित्तस्येंद्रियाणां च क्रिया वृत्तयो येन स तथा योगं भगवति समाधिं युंजीताभ्यसेत् आत्मनश्चित्तस्य लयविक्षेपशून्यत्वेन निस्तरंगता या स्थिरत्वेन चेष्टरसालाकारयोग्यत्वाय इत्यनेन त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति श्रुतेः किं कृत्वाभ्यसेत्तत्राह एकाग्रं राजसतामसमिश्रभूमित्रयपरित्यागेनैकविषयकधारावाहिकानेकवृत्तिशक्तिसमृद्धिकसत्त्वं मनः कृत्वा भगवदाकारमनोवृत्तिप्रवाहं निदिध्यासनाख्यं योगमभ्यसेदित्यर्थः १२॥

कृष्णमैवेजयन्तीटीका

उपविश्य

किंच तत्रेति तस्मिन्मनःप्रसादकरे आसने समाश्रय उपनिविश्य पसनेनोद्विग्नत्व याने तिष्ठति सूत्रकारोऽप्येवमेवाह आसीनः संभवादिति एकाग्रं मनः कृत्वा आत्मविषयेभ्यः स्वरूपस्य मनः कृत्वा आत्मविशुद्धये आत्मनः स्वस्वरूपस्य प्रकृतिसंसर्गदोषेणामलिनत्वात् तस्य विशुद्धिर्नहि विकृतानामस्य यदात्मनोऽन्तःकरणस्य विशुद्धये विषयवासनानिवृत्तये अन्तःकरणस्य [illegible] निशाय निर्मलत्वेनातिसूक्ष्मत्वेन वार्हं अवलोकनार्हत्वसंपादनायेत्यर्थः दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति श्रवणात् यतचित्तेन्द्रियक्रियः यता नियमिता चित्तेन्द्रियाणां सर्वासां करणानां क्रिया व्यापारा येन स तथा नियमिताखिलेन्द्रियव्यापारो योगी योगमात्मदर्शनरूपं समाधिं युंज्यात्कुर्यात् १२॥

मधुसूदनीटीका

एवमासने प्रतिष्ठाप्य किं कुर्यादिति तत्राह ॥ तत्र तस्मिन्नासने उपविश्यैव न तु शयानस्तिष्ठन्वा आसीनस्यैव ध्यानसंभवादिति न्यायात् यताः संयता उपरताश्चित्तस्येन्द्रियाणां च क्रिया वृत्तयो येन स यतचित्तेन्द्रियक्रियः सन् योगं समाधिं युंजीताभ्यसेत् किमर्थमात्मविशुद्धये आत्मनोऽन्तःकरणस्य सर्वविक्षेपशून्यत्वेनातिसूक्ष्मतया ब्रह्मसाक्षात्कारयोग्यत्वायेत्येतत् दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति श्रुतेः किं कृत्वा योगमभ्यसेदिति तत्राह एकाग्रं राजसतामसव्युत्थानाख्यप्रागुक्तभूमिकात्रयपरित्यागेनैकविषयकधारावाहिकानेकवृत्तिशक्तिवाउद्रिक्तसत्त्वगुणकं मनः कृत्वा एकभूमिकेन प्रयत्नेन संपाद्य एकाग्रतानाविहत्यं योगं संप्रज्ञातसमाधिमभ्यसेत् स च ब्रह्माकारमनोवृत्तिप्रवाह एव निदिध्यासनाख्यः तदुक्तं ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं विना संप्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षतः इति एतदेवाभिप्रेत्य ध्यानाभ्यासप्रकर्षं दर्शयन् भगवान् योगी युंजीत स

ततं युंज्याद्योगमात्मविशुद्धये भुक्त्वासीनमनयरशमादिवज्ज्रक्त्वः १२॥

सदानंदीटीका

उपविश्यासने तस्मिन्मनः संयम्य सर्वतः। कृत्वैकाग्रं सचित्तानामिंद्रियाणां। वहन्तयः १ सम्यग्भूपरेताप्यस्य समाधिं समभ्यसेत् निर्विलेपनयाब्रह्मसा। त्मात्कारैकसिद्धये २ नगायानेतगातिष्ठन्नुपविश्यैतिशाह्वतः ३ १२॥ स॰

नीलकंठटीका

प्रतिष्ठाप्य किं कुर्यादित्यत आह तत्रेति तत्रासने पद्मस्वस्तिकाद्यन्यतमेनासनेनोपविश्य यताः निगृहीताः चित्तस्य क्रियाः विषयाणां स्मरणानि इंद्रियक्रियाश्च तेषां ग्रहणानि येन सोऽयं यतचित्तेंद्रियक्रियः अत एव मनः बाह्याभ्यंतर। विषयानुपरक्तं तथा एकं ध्येयमेव मन्यकं अध्येयस्य स्फुरतिनास्मत् तदेकाग्रं नं कृत्वं तथानेन तरैनवब्रह्मैकारवृत्तिप्रवाहं कृत्वा आत्मविशुद्धये चित्तशुद्धयर्थं योगं हस्तिप्रवाहस्यापि निरोधं युंज्यात् अनुतिष्ठेत् चित्तस्थैर्यसंपादनेन १२॥

आनंदटीका

तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः आसनजयाद्द्वंद्वानां शीतोष्णादीनामनभिघात इति तत्रासने उपविश्य स्वस्तिकपद्मादिकं शारीरमासनं बद्ध्वा यता निरुद्धा चित्तस्य क्रिया संकल्पविकल्पौ इंद्रियाणां क्रिया श्रवणादिकं वचनादानादिकं येन ईदृशः आत्मनो देहेंद्रियादिसंघातात् गतस्य जीवस्य विशुद्धये समरसतापादनाय योगमष्टांगं युंजीत समादधीत [illegible] १२॥

रामकंठीटीका

यस्मादेः ऊशोत्तरमेवं तत्र स्थिरसुखे आसने उपविश्य एकाग्रं ध्येयत्वेन परिगृहीतैकवस्तुनिष्ठं मनश्चित्तं कृत्वा तथा यतचित्तेंद्रियक्रियः यताः निरुद्धा बहिःप्रसराः चित्तेंद्रियाणां मनसो ज्ञानानां च क्रियाः संकल्पविकल्पशब्दादिग्रहणरूपाणि कर्माणि येन तथाविधः सन् योगं चित्तवृत्तिनिरोधात्मकं युंज्यात् समादधीत किमर्थम् आत्मविशुद्धये आत्मनोऽतःकरणस्य बाह्योपरागलक्षणमलक्षालनाय सेत्वन्नस्यवादेह्यायहंप्रत्ययरूपकलंकपरिमार्जनाय॥ लास्मिकी ...टीका १२॥

एवंसति – तत्र तस्मिन्नासने उपविश्य नतु प्रयानः तिष्ठन्वा आसीनः संभवादिति न्याया

त् यतचित्तेंद्रियक्रियः संयतः यताउपरता निगृहीता चित्तक्रियाः संकल्पा
त्मान इंद्रियक्रियाश्च येन स मनो मननात्मकं अंतःकरणमेकाग्रं ध्येयवस्तु
निष्ठं कृत्वा योगं समाधिरूपं युंज्यादभ्यसेत् किमर्थमात्मविशुद्धये कै
वल्याय देहादिभावत्यज्यत्वायेत्यर्थः [illegible]
[illegible] १२॥

पंचोलीटीका

तत्रासनेऽपविश्य यतचित्तेंद्रियक्रियः यताचित्तेंद्रियाणां क्रिया व्यापा
रो येन सः एकाग्रं सर्वविषयेभ्यः उपसंहृत्य मनः आत्मपरं कृत्वांतः
करणशुद्ध्यर्थं योगं कुर्यात् अभ्यसेत् १२॥

रणवीरसमिद्धायिनी॥

स्पष्टार्थः १२॥

मधुभाष्य

१२॥

भाषा अनुवाद

और जिसका चित्त औ इन्द्रिय निष्क्रिय कहे व्यापार रहित हैं सो मन की शान्ति कहे शुद्धि के अर्थ उक्त आसन पर बैठने के बाद मन को एकाग्र विक्षेप रहित करके योग अभ्यास करै १२

दोहा

तामे मन एकाग्र सें जित चित इंद्रि जोय बैठे आसन योग कौं
साधे मन शुद्धि कोय ॥१२॥

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् १३॥

शाङ्करभाष्यं

वाह्यमासनमुक्तं अधुना शरीरस्य धारणं कथमित्युच्यते सममिति समं कायशिरोग्रीवं कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं तत्समं धारयन् अचलंच समं धारयतश्चलनं संभवमतो विशिनष्टि अचलमिति स्थिरः स्थिरो भूत्वेत्यर्थः स्वनासिकाग्रं संप्रेक्ष्य सम्यक् प्रेक्षणं दर्शनं कृत्वेवेति इवशब्दो लुप्तो द्रष्टव्यो नहि स्वनासिकाग्रसंप्रेक्षणमिह विधित्सितं किं तर्हि चक्षुषोर्दृष्टिसंनिपातः स चान्तःकरणसमाधानापेक्षो विवक्षितः स्वनासिकाग्रसंप्रेक्षणमेव चेद्विवक्षितं मनस्तत्रैव समाधीयेत नात्मनि आत्मनि हि मनसः समाधानं वक्ष्यत्यात्मसंस्थं मनः कृत्वेति तस्मादिवशब्दलोपेनाक्ष्णोर्दृष्टिसंनिपात एव संप्रेक्ष्येत्युच्यते दिशश्चानवलोकयन् दिशांचावलोकनम कुर्वन्नित्येवमन्तरा कुर्वन्नित्येतत् १३॥

आनन्दगिरिकृतटीका

उक्तमनूद्यानन्तरश्लोकस्यापेक्षितमर्थमाह बाह्येति समत्वमृजुत्वं कायः शरीरमध्यं अचलमिति विशेषणमवतार्य तस्य तात्पर्यमाह समस्येति कार्यकरणयोर्विषयपारवश्यप्रयुक्तमचलत्वं स्थैर्यं किमितीवशब्दलोपोत्र कल्प्यते स्वनासिकाग्रसंप्रेक्षणमेव योगाङ्गत्वेनात्र विधित्सितं किं न स्यादित्याशंक्याह नहीति तर्हि किमत्र विवक्षितमिति प्रश्नपूर्वकमाह किं तर्हीति दृष्टिसंनिपातो दृष्टेश्चक्षुषोरूपादिविषयग्रहणनिराहित्यं कथं भावनायासेन सिध्यति तत्राह सचेति समाधानस्य अपेक्षेणात्र विवक्षितत्वाद्दृष्टेर्हि निर्विषयत्वेन तदङ्गप्रसंगात्तस्या विषयेभ्यो व्यावृत्तमान्तरेव संनिपातो विवक्षितो भवतीत्यर्थः तथापि कथं स्वनासिकाग्रसंप्रेक्षणमत्र प्रतमविवक्षितमित्याशंक्याह स्वनासिकेति तत्रैव मनःसमाधाने का हानिरित्याशंक्य वाक्यशेषविरोधान्मैवमित्याह आत्मनि हीति किं तर्हि संप्रेक्ष्येत्यादौ विवक्षितमित्याशंक्याह तस्मादितीति अक्ष्णोर्नेत्रयोर्या दृष्टिस्तस्या वाह्याद्विषयाद्व्यावृत्तस्यान्तरेव संनिपातनमत्र स्वकीयं नासिकाग्रं नासिकान्तं संप्रेक्ष्येति विवक्षितमित्यर्थः तत्रैवोत्तरमपि विशेषणमनुकूलमित्याह दिशश्चेति अनवलोकयन्नासीतेत्युत्तरत्र सम्बन्धः अन्तरा दिशामवलोकनमपि योगप्रतिबन्धकमिति तन्निषेधः १३॥

स्वामिकृतटीका

गी.
टी.
ष.

५४

चित्तैकाग्र्योपयोगिनीं देहादिधारणं दर्शयन्नाह द्वाभ्यां सममिति काय इति देहमध्यभागो विवक्षितः कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धान्तपर्यन्तं सममवक्रमचलं निश्चलं धारयन् स्थिरो दृढप्रयत्नो भूत्वा स्वीयं नासाग्रं संप्रेक्ष्यार्धनिमीलितनेत्र इत्यर्थः १३ ॥

पिशाचभाष्यं

बाह्यमासनमुक्त्वा अधुना शरीरधारणमुच्यते समं कायशिरोग्रीवमिति कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं कायशिरोग्रीवं तत्समं धारयन् अचलं समं धारयतो पि चलनं भवतीत्यतो विशिनष्ट्यचलमिति स्थिरः स्थिरो भूत्वेत्यर्थः संप्रेक्ष्य सम्यक्प्रेक्षणं दर्शनं कृत्वेव इवशब्दो लुप्तो द्रष्टव्यः स्वनासिकाग्रसंप्रेक्षणमिह न विधीयते किं तर्हि चक्षुषोर्दृष्टिसन्निपातः स चान्तःकरणसमाधानापेक्षो विवक्षितः संप्रेक्षणमेव चेद्विवक्षितं तर्हि मनस्तत्रैव समाधीयेत नात्मनि इह मनःसमाधाने किं तत्र वक्ष्यति आत्मसंस्थं मनः कृत्वेति तस्मादिवशब्दलोपेनाक्ष्णोर्दृष्टिसन्निपात एव संप्रेक्ष्येत्युच्यते स्वं दिशश्चानवलोकयन् स्वयं दिशां नावलोकनं कुर्वन्नित्येतत् १३ ॥

रामानुजभाष्यं

सममिति कायशिरोग्रीवं सममचलं समाश्रयतया स्थिरं धारयन् दिशश्चानवलोकयन् स्वनासिकाग्रप्रेक्ष्य १३ ॥

अभिनवगुप्तकृतटीका

उपक्रमे १३ ॥ धारयन्प्रयत्नेन नासिकाग्रस्थापनेन दिशामनवलोकनम् १३

परमार्थप्रपाटीका

अथ चित्तैकाग्र्योपयोगिनीं देहधारणमाह सममिति द्वाभ्यां कायं देहमध्यं शिरश्च ग्रीवा चेति समाहारः कायशिरोग्रीवं समवक्रं यथा भवति तथा धारयन् धारणं कुर्वन्नासीतेत्युत्तरेणान्वयः अयमर्थः योगशास्त्रप्रकारेण स्वेनोपवेशेन गुदलिङ्गान्तरे स्थिताधारचक्रान्मूलबन्धादिकं पद्मपसिद्धौ आधिव्याधिमनोवेगोपशमे सति कायग्रीवाशिरसां समत्वं स्थाणुत्वं वज्रत्वं अचलत्वं च भवति एवं देहधारणप्रकारं धारणमाह दिशश्चेति दिशः समन्ततः अनवलोकयन् पश्यन्नहि देहदृढ। स्थिरवशिष्टानामपि निषेधयति स्वनासिकाग्रं संप्रेक्ष्य अनेन चित्तैकाग्र्योपलक्षणम् इति [illegible] १३ ॥

वनमालीटीका

बाह्यमासनमुक्त्वाधुना तत्र कथं शरीरधारणमित्युच्यते कायः शरीरमध्यं शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्द्धान्तपर्यन्तं समं वक्रम् अचलमकंपं धारयन् स्थिरः दृढप्रयत्नो भूत्वा स्वीयं नासिकाग्रं संप्रेक्ष्यावलयविक्षेपराहि।

स्यानुविषयाप्रवृत्तिरनिमीलितनेत्रश्चेत्यर्थः दिशश्चानवलोकयन् अंतरां
तरादिशांचावलोकनमकुर्वन् योगविरोधित्वात्तस्य एवंभूतः सन्नासीनेत्युत्त
रेणान्वयः १३॥

हनुमवैजयन्तीटीका

नन्वासने केन प्रकारेणोपविशेदित्यपेक्षायामुपविष्टस्य शरीरधारणप्रकारमा
ह सममिति कायशिरोग्रीवं कायश्च शिरश्च ग्रीवा चैषां समाहारः कायशिरोग्री
वं प्राण्यंगत्वात्समाहारो न दोषावहः समं वक्ररहितम् अचलं कंपरहितं का
यशिरोग्रीवं धारयन् धारणां कुर्वन् सन् स्थिरः सन् विघ्नादिनाऽव्याकुलः सन् स्वं
स्वकीयं नासिकाग्रं संप्रेक्ष्य संदर्शयन् मनोलयविक्षेपशान्तये नासाग्रप्रवद्दृ
ष्टिं कृत्वेत्यर्थः च पुनः दिशः पूर्वादीः अनवलोकयन्नितस्ततोऽसमीक्ष्यन्सन्ना
सीतेत्युत्तरेणान्वयः १३॥

मधुसूदनीटीका

तदर्थं बाह्यमासनमुक्त्वाधुना तत्र कथं शरीरधारणमित्युच्यते॥ कायः शरीरम
ध्यं स च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धान्तपर्यंतं समं अवक्रं
अचलमकंपं धारयन्नेकतत्त्वाभ्यासेन विक्षेपसहभाविनः गात्रमेजयत्वाभावं संपा
दयन् स्थिरः दृढप्रयत्नो भूत्वा किंच स्वं स्वीयं नासिकाग्रं संप्रेक्ष्यैव लयविक्षेप
राहित्याय विषयप्रवृत्तिरहितोऽर्द्धनिमीलितनेत्रश्चेत्यर्थः दिशश्चानवलोकयन्
अंतरांतरा दिशांचावलोनमकुर्वन् योगप्रतिबंधकत्वात्तस्य एवंभूतः सन्नासी
नेत्युत्तरेणसंबंधः १३॥

सदानंदीटीका

सुखासनं योगसिद्धे देहधारणमुच्यते समं कृत्वा शिरोग्रीवां कायं मध्यं स्मृति
म्सले मूलाधारात्समारभ्य मूर्द्धान्तं धारयन् स्थिरं सदृढप्रयत्नो भूत्वा निष्कंपो यो
गतत्परः ३ लयविक्षेपशांत्यर्थं नासिकाग्रमवेक्ष्य च कृत्वैव दर्शनं सम्यगिव
शांतस्य लोपनात् नासासंप्रेक्षणं चात्र विवक्षितमितीरितः दिग्वीक्षणमकुर्वं
श्च योगस्य प्रतिबंधकम् ४ एवंभूतः सन्नासीतेत्युत्तरेणान्वयो मनः ५ १३॥

नीलकंठीटीका

आसन उपविश्य युक्तं न कथमित्यत आह सममिति कायः शरीरमध्यं शिरः ग्री
वा च कायशिरोग्रीवं समं मूलाधारमारभ्य मूर्धान्तमवक्रं अचलं निष्कंपं धारयन् स्थि

गी॰ टी॰ ष॰

रःभूत्वा संप्रेक्ष्य नासिकाग्रं स्वमिति नासिकाग्रावेक्षणं न विधीयते किंतु निमी
लिते लये अर्धोन्मीलने विक्षेपभयमतो दिशोपि स्वादि विक्षेपक विषयदर्शन भया
दनवलोकयन् अर्धोन्मीलितनेत्र आसीनेति उत्तरेणान्वयः ॥ १३ ॥

आनंदीटीका

बह्यासनस्य चित्तैकाग्र्यसाधनाय

देहस्थानमाह — कायः कंठादयं शरीरं च शिरश्च ग्रीवा च समम् अनुधारयन् एवमासनवन्
मुक्तो [illegible]

रामकंठीटीका

एवं चित्तसमाधानमभिधाय तत्साधनभूतं कायसंस्थानमाह का
यः कंठादयः शरीरं शिरो मूर्धा ग्रीवा कंधरा कायशिरोग्रीवं तत्समम
वक्रमृजु धारयन् बिभ्रत् तथा ह्यपोऽप्यचलो निष्प्रकंपो गमेजयत्वा
दि चित्तविक्षेपकारणरहितः स्थितस्तथा स्वं नासिकाग्रं घ्राणाग्रं तत्
संपश्यन् अनपेक्षंश्च दिशः काष्ठा अनवलोकयन् अप्रेक्षमाणः दि
ग्दृष्टिविक्षेपपरिहारार्थं नासिकाग्रसंदर्शनमुक्तम् न तु तल्लक्ष्य
तव्यमित्यभिप्रायः १३ ॥

आसनस्थैर्यात्कायस्थैर्यं चित्तस्थै लासिकी

धनपतीटीका

र्थमित्यत आसनस्थैर्याय चित्तैकाग्र्या

पयोगिदेहसंस्थानमाह — इतस्ततो दिशोऽप्रेक्षमाणः स्वं नासिकाग्रं संप्रेक्ष्य अर्धनिमीलितनेत्र इत्य
र्थः दिग्दृष्टिविक्षेपपरिहारार्थं नासिकाग्रावलोकने न तु तदेव लक्ष्यमित्य
र्थः तथा कायो देहमध्यभागो विवक्षितः कायश्च शिरश्च ग्रीवा च कायशि
रोग्रीवं मूलाधारादारभ्य मूर्धांतपर्यंतं समं निश्चलं तथा नात्युन्नतं नाति
नम्रं यथा भवति तथा धारयन् आसने उपविष्टः तदुक्तं प्रयत्नशैथिल्या
नंत्यसमापत्तिभ्यामिति कीदृशमचलं चित्तविक्षेपकारणाङ्गमेजयत्वा
दिरहितं एवं स्थिरो भूत्वा एवंविधं संस्थानं तु क्षणमपि नातिक्रमन् यो
गं युंज्यादिति सर्वैराम्नातं यः [illegible]
[illegible] १४ ॥

पंचोलीटीका

चित्तैकाग्र्योपाययोगिनां देहादिधारणं दर्शयति सममिति द्वा।
भ्यां कायशिरोग्रीवं कायः शिरो ग्रीवा च येन ग्रथितं सममवक्रमचलं।
क्रियारहितं धारयन् स्थिरो भूत्वा दिशश्चानवलोकयन् नासिकाग्र
मेव संप्रेक्ष्य १३ ॥

रणवीरसमिद्धोधिनी ॥

कथंभूतः सन् संदधीतेत्याह समिति कायो देहमध्यभागः
स च शिरश्च ग्रीवा च कायशिरोग्रीवं समं वक्रतारहितं सरलमिति
यावत् अचलं पर्वतन्निश्चलं धारयन् स्थिरो दृढप्रयत्नो भूत्वा स्वं
नासिकाग्रं संप्रेक्ष्येत्यनेनार्धनिमीलितनेत्रता व्यज्यते ह्रस्य
लक्ष्यपाते हि प्रमाप्रच्युत्यर्थं नेत्रार्धनिमीलनं विधायेत्यर्थः अ
थवा नसंतकौटिल्येना सामान्येन कौटिल्यवच्छाद्यवदंत्यस्यामिति
नासापुटभूमिः यद्वा आसनमासाग्रतोऽस्य ह्दलक्षत्यप्रत्ययः न
विद्यते श्वासाश्वसनं विश्रमो यत्रेति नासापुटभूमिरेव नसमा
सः नासैव नासिकास्वार्थे संज्ञायां वा कः यद्वा आसनमासिका
पर्यायार्थेत्वभू न विद्यते श्वासिका यत्रेति नासिकापुटभूमिरे
व तस्या अग्रं मूर्धानं स्वं स्वात्मानं च स्वकीयं नासाग्रादिकं च संप्रे
क्ष्य सम्यक्समादृत्यादित्येन प्रेक्ष्य दिशश्चानवलोकयन् योगं धा
रादिकं युंजीत संदधीतेति प्राक्तनेनान्वयः दिशामनवलोक
नं च सावधानचित्तताव्यंजकं यद्वा नाम्रसिकाग्रमिति छेदः ना
पौरुषलक्षणविशिष्टः कर्मयोगी स्वमसिकाग्रं असिधाराग्रं ज
हत्स्वार्थः एवादिकमपि लक्षयति तथा च सामान्यहत्याप्रवृत्त
अलक्ष्यीभूतं प्रतिपक्षं संप्रेक्ष्येत्यर्थः १३ ॥

ਸਧੁਸਾਖ

੫ ॥

भाषा अनुवाद

अवचित्तकी एकाग्रता के उपयोगी जो देह धारणादि सो दो श्लोक मे
कहते हैं कि काय कहे शरीर का मध्यभाग औ शिर ग्रीवा अर्थात्
मूल आधार से ले मस्तक पर्यन्त शरीर अति यत्न से सीधी राखि ।
के औ निश्चल करके धारणा के बाद अपनी नासिका के अग्रभाग मे अ
ई उन्मीलन पूर्वक दोनो दृष्टी लगाय समाहित सावधान होय और दि
शों मे दृष्टि न देय १२ ॥

दोहा

सूधे देह शिर ग्रीवको धार अचल स्थिर होय देषत नासा अग्र
निज दिशाहिं न देषें सोय १३॥

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चित्तो युक्त आसीत मत्परः १४ ॥

शांकरभाष्यं

किंच प्रशान्तेति प्रशान्तात्मा प्रकर्षेण शान्त आत्मान्तःकरणं यस्य सोयं प्रशान्तात्मा विगतभीर्विगतभयः ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणो व्रतं ब्रह्मचारिव्रतं ब्रह्मचर्यं गुरुशुश्रूषभिक्षान्नभुक्त्यादि तस्मिन् स्थितस्तदनुष्ठाता भवेदित्यर्थः किंच मनः संयम्य मनसो वृत्तीरुपसंहृत्येत्येतत् मच्चित्तो मयि परमेश्वरे चित्तं यस्य सोयं मच्चित्तो युक्तः समाहितः सन्नासीतोपविशेत् मत्परोऽहं परो यस्य सोयं मत्परो भवति कश्चित् रागी स्त्रीचित्तो न तु स्त्रियमेव परत्वेन गृह्णाति किं तर्हि राजानं महादेवं वा अयं तु मच्चित्तो मत्परश्च १४ ॥

आनंदगिरिकृतटीका

योगं युंजानस्य विशेषणान्तराणि दर्शयति किंचेति अन्तःकरणस्य प्रशान्तिः रागद्वेषादिदोषराहित्यं तस्याश्च प्रकर्षो रागादिहेतोरपि निवृत्तिः विगतभयत्वं सर्वकर्मपरित्यागे शास्त्रीयनिश्चयवशान्निःसंदिग्धबुद्धित्वं भिक्षान्नभुक्त्यादीत्यादि शब्देन त्रिषवणस्नानशौचाचमनादि गृह्यते विशेषणान्तरमाह किंचेति उपसंहृत्य योगनिष्ठो भवेदिति शेषः मनोवृत्त्युपसंहारे ध्यानमपि न सिध्येत्तस्य तद्वृत्तिरूपत्वादित्याशंक्याह मच्चित्त इति विषयान्तरविषयमनोवृत्त्युपसंहारेण मय्येव तन्नियमनान्न ध्यानानुपपत्तिरित्यर्थः मच्चित्तत्वेनैव मत्परत्वसिद्धत्वात् मत्पर इति पृथक् विशेषणमनर्थकमित्याशंक्याह भवतीति अन्तःकरणशुद्धिर्योगस्यावान्तरफलं १४ ॥

स्वामिकृतटीका

इतस्ततो दिशश्चानवलोकयन्नित्यासीनेत्यनेनान्वयः प्रशान्तेति प्रशान्त आत्मा चित्तं यस्य विगता भीर्भयं यस्य ब्रह्मचारिव्रते ब्रह्मचर्ये स्थितः सन् मनः संयम्य प्रत्याहृत्य मय्येव चित्तं यस्य अहमेव परः पुरुषार्थो यस्य सः मत्परः एवं युक्तो भूत्वा आसीत तिष्ठेत १४

पैशाचभाष्यं

प्रशान्तात्मा विगतभीः विगतभयः ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणो व्रते ब्रह्मचर्ये गुरुशुश्रूषणभिक्षाभुक्त्यादि तस्मिन् स्थितस्तदनुष्ठाता भवेदित्यर्थः किंच मन

गी॰
टी॰
६

58

संयम्य मनसो वृत्तिरुपसंहृत्य मच्चित्तो मयि परमेश्वरे चित्तं यस्य सो ऽयं मच्चित्तः यु
क्तः समाहितः सन् आसीत उपविशेत् मत्परः कश्चिद्रागी स्त्रीचित्तो ऽपि न स्त्रियमेव
परत्वेन गृह्णाति किं तर्हि राजानं महादेवं वा अयं तु मच्चित्तो मत्परश्च १४ ॥

रामानुजभाष्यं

प्रशान्तात्मा अत्यन्तनिर्वृत्तमनाः विगतभीः ब्रह्मचर्यव्रते स्थितः मनः संयम्य मच्चित्तो यु
क्तः अवहितात्मा मत्पर आसीत मामेव चिन्तयन्नासीत १४ ॥

[illegible] ग्रीयते

अभिनवगुप्तकृतटीका उपक्रमं १४ मत्परमतयायुक्त आसीत् मत्परः
१४

परमार्थप्रपा टीका

अथ मनोधारणमाह +

+ प्रशान्तात्मेति प्रशान्तो निःसंकल्प आत्मा चित्तं यस्य विगतभीः निरस्तभयः नि
र्जने एकाकिना कथं स्थातव्यमिति भयशून्यः यद्वा विगतभीः स्त्र्युपलक्षणं स्त्री
धीर्भीरिति मतेन सर्वमनःप्रवेति श्रुतेर्मनोधर्मैरहितः अथावसरमाह ब्रह्मचा
रिणो यद्व्रतेन स्थितः समासग्रहणात्सर्वमेवत्यर्थः अथैवं विधमहाकार्यैश्र
र्हत्स्याश्रयमन्तरेकेण विक्षेपशमः कथं स्यादित्याह मच्चित्त इति मयि चित्तं
यस्य निरंतरं मत्स्मरणवान् न हि तावदेवमलं प्रयोजनमित्याह मत्पर इति अह
मेव परं प्राप्यं यस्य स मत्परस्तथा तदुक्तं मत्कुलागमे सुखासने समासीन
स्तत्वाभ्यासं समाचरेत् सदाभ्यासेन तत्कुर्यात् परतत्त्वप्रकाशने १ आसनं प्रा
णसंरोधः प्रत्याहारोऽथ धारणा ध्यानं समाधिरेतानि योगांगानि वरानने ए
कान्ते विजने रम्ये गुहायां वा पर्वतमस्तके रहिते मशकैर्दंशैर्देवायतनके ऽपि वा २
सिद्धक्षेत्रे महातीर्थे ध्यानसिद्धिः प्रजायते तत्र सिद्धासनं बध्वा ऋजुकायं तु का
रयेत् ॥ ऊर्ध्वं मेढ्राद्धो नाभेः कंदो योनिरिव स्थितः तत्र नाड्यः समुत्पन्नाः सहस्रा
णि द्विसप्ततिः ५ कुंतिरपि शानपद्मो हिता नाम नाड्यो द्वासप्ततिः सहस्राणि
हृदयात्पुरीततमभिप्रतिष्ठन्त इति श्रुतेः पुरीततमिति हृदयाकाशे नाडी
भिर्निर्मितं स्थानं शेषं स्पष्टं ॥ तथा प्रधाना [illegible] प्राणवाहि
न्यो भूयस्तत्र दश स्मृताः इडा च पिंगला चैव तथा चैव पयस्विनी ९ अलंबुका कु
हूश्चैव शंखिनी दशमी तथा एतन्नाडीमयं चक्रं नित्यं वायुप्रवाहिकाः ७ इडा च पि
ङ्गला चैव सुषुम्णा प्राणवाहिकाः इडा वामे स्थिता भागे पिंगला दक्षिणे स्थिता ८
सुषुम्णा मध्यदेशे तु प्राणमार्गास्त्रयो मताः पूरयेद्वामनाड्या च रेचयेद्दक्षिणेन
तः ९ तथैव पूरयेद्भूयः पूरयेत्कुंभयेत्ततः एवमभ्यासयोगेन नाडीशुद्धिः प्रजा।

यते ९ षडंगे योगाणामभ्यस्तयोगैः पानमभ्यसेत् श्रीगुरुपदयोगमध्ये चिंतये
त्परमेश्वरं ११ सर्वभूतेन गतं देवं विरूपं भावयेत्सदा प्रणवं तारकं ब्रह्मनि
सं ध्यायंति योगिनः १२ तत्त्वानेन त्वणात्मि हिर्जीयते नात्र संशयः प्रणवा
भ्यासतो योगो मयान सोव शानते १३ योगमानेते योनिस्थानकमंघ्रिमूल
घटितं कृत्वा दृढं विन्यसेन्मेढ्रे पादमथैकमेव नियतं कृत्वा सममे विग्रहं स्था
णुः संयमितेंद्रियो ऽचलदृशा पश्येद्भ्रुवोरंतरं चैतन्मोक्षकपाटभेदजन
कं सिद्धासनं प्रोच्यते १ वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा द
क्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढं अंगुष्ठौ हृदये निधाय चिबु
कं नासाग्रमालोकयेदेतद्व्याधिविकारनाशनमिदं पद्मासनं प्रोच्यते २ आधा
रं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकं योनिस्थानं द्वयोर्मध्ये कामरूपं निगद्यते ३
अपानप्राणयोरैक्यं क्षयो मूत्रपुरीषयोः युवा भवति वृद्धोपि सततं मूलबंधना
त् ४ पार्ष्णिभागेन संपीड्य योनिमाकुंचयेद्गुदं अपानमूर्ध्वमाकृष्य मूलबंधो
निगद्यते ५ उदरपश्चिमे भागे नाभेरूर्ध्वं निगद्यते उड्डियाणोऽयं बंधः कं
ठः क्षोभनाशनः बध्नाति हि शिरोजालमधोयाति नभोजलं ततो जालंधरं
बंधं कंठसंकोचलक्षणः ७ जालंधरकृते बंधे कंठसंकोचलक्षणे न पीयूषं
पतत्यग्नौ न च वायुः प्रकुप्यति ८ कपालकुहरे जिह्वा प्रविष्टा विपरीतगा
भ्रुवोरंतर्गता दृष्टिर्मुद्रा भवति खेचरी ९ मुक्तासनं समाकृष्य समकायशि
रोधरः नासाग्रदृष्टिरेकांते जपेदोंकारमव्ययं १० भूर्भुवः स्वरिमे लोकाः
सोमसूर्याग्निदेवताः यस्य मात्रासु तिष्ठंति तत्परं ज्योतिरोमिति ११ आस
नेन रुजं हंति प्राणायामेन पातकं विकारं मानसं योगी प्रत्याहारेण सेव
ति १२ धारणाभिर्मनोधैर्यं ध्यानेनैश्चत्वमद्भुतं समाधौ मोक्षमाप्नोति त्यक्त्वा
कर्म शुभाशुभं १३ प्राणायामद्विषट्केन प्रत्याहारः प्रकीर्तितः प्रत्याहार
द्विषट्केन धारणा जायते शुभा १४ धारणा द्वादश ध्यानं प्रोक्तं ध्यानविशा
रदैः ध्यानद्वादशकेनैव समाधिरभिधीयते [illegible] ॥

वनमालीटीका

प्रकर्षेण शांतो रागादिदोषरहित आत्मा मनो यस्य स शास्त्रीयनिश्चयप्रा
प्त्या विगतभीः सर्वकर्मत्यागपूर्वकत्वात्पुत्रकलत्रशोकाच्च यस्य सः ब्रह्मचारिव्र
ते स्थितः ब्रह्मचर्यं गुरुशुश्रूषाभिक्षाभोजनादौ स्थितः सन् मनः संयम्य

गी॰
टी॰
म॰

59

विषयाकारवृत्तिशून्यं कृत्वा मयि परमेशे तेन गुणालये सकलवेदान्तप्रतिपाद्ये न्तर्यामिणि सर्वेश्वरे शरणागतवत्सले विषयान्तरं विहाय चित्तं यस्य सः पुत्रादौ प्रियान्तरे चिन्तनीये विद्यमाने लौकिकवच्चित्तवृत्तिः स्यात्तत्राह मत्परः अहमेव परमानन्दरूपत्वान्मत्परः पुरुषार्थो यस्य सः तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयो ऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मेति श्रुतेः कश्चिन्त्रीचित्तो न तु स्त्रियमाराध्यत्वेन मत्परो भवति किं तु राजदेवादिकं कश्चिद्राजादिकमाराध्यत्वेन न तु मत्परः निशं तद्वदेते न तु स्त्रियमाराध्यत्वेन मां परत्वेन हृदि निशं तेन यथा ग्रहवत् प्रवाहेन मदेकचित्तस्येति भावः १४

कुसमवैजयन्ती

किंच प्रशान्तात्मेति प्रशान्तात्मा प्रकर्षेण शान्तो विषयेभ्यः स्तिमित आत्मा मनो यस्य स तथा स्ववशीभूतमना विगतभीः विगता भीर्भयं यस्मात्स तथा निहत जन्ममरणादिभयशून्यः ब्रह्मचारिव्रते ब्रह्म परब्रह्मस्वरूपं वा मायां वा वेदं वा चरितुं ज्ञातुं शीलं येषां तेन तथा तेषां व्रतेन मदमादिसाधनेन तस्मिन् स्थितः सावधानतया वस्थितः मच्चित्तः हृदि भूजवत्तर्भुजादिरूपे मयि चित्तं यस्य स तथा मत्परः मय्येवैकस्मिन्परः आत्मास्मीयभरमासो यस्य स तथा मनः संयम्य वाह्यविषयाद्धृत्तिप्रवृत्तिरूपशश्वत्तत्त्वस्तु योगी आसीत् एवंभूतः सन्तिष्ठेदित्यर्थः १४ ॥

किंच

मधुसूदनी

निदाननिवृत्तिरूपेण प्रकर्षेण शान्तः रागादिदोषरहित आत्मान्तःकरणं यस्य सः प्रशान्तात्मा शास्त्रीयनिश्चयदार्ढ्याद्विगतभीः सर्वकर्मपरित्यागे युक्तत्वायुक्तत्वशंका यस्य स विगतभीः ब्रह्मचारिव्रते ब्रह्मचर्यगुरुशुश्रूषाभिक्षान्नभोजनादौ स्थितः सन् मनः संयम्य विषयाकारवृत्तिशून्यं कृत्वा मयि परमेश्वरे सगुणे निर्गुणे वा चित्तं यस्य स मच्चित्तो मद्विषयकधारावाहिकचित्तवृत्तिमान् पुत्रादिः प्रियस्तदेव चिन्तनीयमिति लौकिकः मेवं स्यादत आह मत्परः अहमेव परमानन्दत्वान्मत्परः पुरुषार्थः प्रियो यस्य स तथा तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयो ऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मेति श्रुतेः एवं विषयाकारसर्ववृत्तिनिरोधेन भगवदेकाकारचित्तवृत्तियुक्तः संप्रज्ञातसमाधिमानासीतोपविशेद्यथाशक्ति न तु स्वेच्छया व्युत्तिष्ठेदित्यर्थः भवति कश्चिद्रागी स्त्रीचि

ज्ञो न तु स्त्रियमेव परत्वेनाराध्यत्वेन गृह्णाति किं तर्हि राजानं वा देवं वा अयं तु।
मच्चित्तो मत्परश्च सर्वाराध्यत्वेन मामेव मन्यत इति भाष्यकृतां व्याख्यातो व्या
ख्यातत्वेपि मे नात्र भाष्यकारेण तत्स्पष्टा शङ्कायाः किं तर्हि देवैकतत्परो रहे।
पितत्स्पष्टा [illegible]॥

सदानंदीटीका

रागादिदोषशून्यत्वात्क्षोभानाध्यासवर्जितः शुभाशुभफलसंदेहः कर्मसा
गे भयंस्त्यक्ते १ नत्कर्मोतिर्भयो भक्ता यदा सर्वभयोज्झितः ब्रह्मचर्ये विनावि
नेहर्षितं स्त्रीतल्पादिभिः २ निश्चलेन प्रतीतिश्चा हृद्यं वर्यं मतस्मरेत् नारा।
यणपरो भक्तिं विना ब्रह्माहयेमतः ३ तत्त्वमं निश्चले स्थाने भक्तिः कार्या न
तो हरे पतत्कृदिति यायाह ब्रह्मचारीति माधवः ४ गुरुशुश्रूषणाभि
ता ब्रह्मचर्यमथापरं यथहृते भवेद्ब्रह्मचारिणास्तत्र वस्थितः ५ मनोनि
विषयेभ्यो वा सदैव मयीश्वरे प्रसक्तेन मयसमर्पितं यमसस मन्मनाः।
अहमेव परानंदरूपत्वेन परःप्रियः सर्वस्माज्जीवपर्यंतः पुरुषार्थः समत्परः
एवं चित्तनिरोधेन ब्रह्माकाराकृतावदा चित्तवृत्तिः समासीनत युक्तिहेतवये
ततः ॥१४

नीलकंठीटीका

एवमासने उपविष्टेन यत्कर्तव्यं तदाह प्रशान्तात्मेति योगयुक्तो योगी
ब्रह्मचारिव्रते ब्रह्मचर्यो स्थितः संमासीमत्परः मच्चित्तो मयि परमेश्वरे चित्तं य स्परे
स्य एवंभूतो मय्येव मनः संयम्य मत्पर आसीत स प्रशान्तात्मा विगत
भीर्भवतीति योजना भवतीति किं कश्चिदात्मनोन्यमीश्वरं मत्वा तच्चित्तस्तमेवारा
ध्यत्वेनाभिगतः तथैव च मनसः संयमं करोति तत्तु सत्त्वं परत्वमेव परमपुरु
षार्थतयाराध्यत्वेन मन्यते किं तन्न्यो मामप्यदेवफलं कामयते अयं तु मच्चित्तो
मय्येव मनः संयम्य मत्परो मामेव सर्वान्तरेश्वरमात्मगाहर्यं कामयत इति यतो म
त्परोऽतः एव प्रशान्तात्मा प्रकर्षेण बाह्याभ्यंतरविषयत्यागेन समाधिमत्वा
त्वादृग्रागेन च शांत उपरतः आत्मा चित्तं यस्य सो स्मितामात्रावशेषो विगत
भीर्भवति इयमेवावस्था सत्त्वपुरुषान्यताख्यातिरिति ब्रह्मसाक्षात्कार इति
च विकल्पते सर्वध्यानस्थानसिद्धयां पुरुषः परमपुरुषार्थभाग्भवति १४

आनंदीटीका

यमनियमादिसेवामाह ॥

गी·
टी·ब·

युक्तोयोगमभ्यसितुमर्हतः प्रशांतोहिंसादिभ्यो निवृत्तआत्मांत
करणंयस्योहिंसासत्यास्तेयानांयमानांग्रहणात्तथाप्रशांतोनिर्म-
लआत्मायस्येतिशौचसंतोषयोर्ग्रहणं विगतभीर्द्वंद्वसहनात्तपसोग्रह
णं ब्रह्मचारिव्रतेस्थितइत्यपंचमस्ययमस्य ब्रह्मचर्यस्यस्वाध्यायाख्यस्यच
नियमस्यग्रहणंमनःसंयम्यविषयग्रहणान्निवर्त्येत्यपरिग्रहस्ययमस्यो
क्तिः मच्चित्तोमयिपरमेश्वरेप्रणिहितचेताः अहमेवपरः प्राप्योयस्येदृ
शः आसीतेतीश्वरप्रणिधानम् तथाच योगसूत्रं अहिंसासत्यास्तेयब्र
ह्मचर्यापरिग्रहायमाःशौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनिय
माइति १४ ॥

सा॰

रामकंठी टीका

इत्थंविहितसमस्तसमाधिपरिकरस्यपरमात्मसमापत्ति
लक्षणमेवाभ्यासमिहेतंविशेषणंप्रतिपादयितुमाह प्रशांतात्माप्रशांतः
संदेहादिविकल्पक्षोभरहितआत्मांतःकरणंयस्यसतथासर्वमात्मैवेनाव
गम्यसर्वतस्त्वराचराद्भूताद्विगतभीः निहतसाध्वसः तथाब्रह्मचारिव्रतेस्थि
तःब्रह्मचारिणःकामसंकल्पवर्जनव्रतंतस्मिन्स्थितइति सर्वार्थेविषयसार्थे
च्छारहितत्वमनेनविशेषणेनोक्तम् इत्थंमनःसंयम्यसर्वतश्चित्तंनिगृह्यमय्येव
परमात्मन्येकस्मिंस्तत्वेचित्तंसंवेदनंयस्यसतथाविधोयुक्तःसमाहितःसंस्तन्मयतया

विधायोगादनन्यविषयम
नाआसीततिष्ठेत् १४ ॥

लासिकी वनमाली टीका

एवंबद्धपरिकरस्यसमाध्युपयोगीनिविशेषणान्याह ॥
प्रशांतोरागादिकलंकशून्यआत्माअंतःकरणंयस्यसः अतएवविग
तभीर्निर्भयः ब्रह्मचारिव्रतेब्रह्मचर्यादौस्थितः ब्रह्मचारिव्रतग्रहणेन
यमादयोगृह्यंते तदुक्तं अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाइति
शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाइति मच्चित्तोम-
यिभगवत्यात्मनिभृत्यानेचित्तंयस्यसकर्मयोगी मत्परोमांपरमेश्वरंभ
क्त्यासमाश्रितः मनोमननात्मकमंतःकरणंसंयम्यसमस्तवृत्तिशून्य
तयानिरुध्ययुक्तः एतदवस्थआसीततिष्ठेत् एवंध्यानयोगात्फ
लमाह १४ ॥

60

पंचोलीटीका

प्रशांतात्मेति प्रशांतात्माशांतचित्तः ब्रह्मचारिव्रते ब्रह्मचर्यगुरुशु
श्रूषाभिक्षाभोजनादिके स्थितः तदानुष्ठाता भवेत् किंच मनसो व्या
पारेनियतेमत् परायणः युक्तः समाधियुक्तः सन् उपविशेत् १४

रणवीरसमिद्धोधिनी ॥

प्रशांतात्मेति प्रशांतोऽहंसंकल्पेभ्यः प्रतिनिवृत्त आत्मा चित्तं य
स्य अत एव विगतभीः परेभ्यः सकाशात् असंजातसाध्वसः ब्रह्म
चारिव्रते ब्रह्मणा धनुर्वेदेन चरंति व्यवहरंति जीवंति वा तच्छी
ला ब्रह्मचारिणः क्षत्रियप्रवरास्तेषां व्रते युद्धादिकाचारे स्थितः
अथ च युद्धकाले विस्मृतसख्यादिविषयत्वेन प्रथमाश्रमस्थः म
नोंतःकरणं संयम्य स्ववशीविधाय मयि परमेश्वरे चित्तं चेतो य
स्य परमेश्वरो मे साध्यसिद्धिं करोत्विति परमेश्वरसमर्पितस्वं
कार्यभरसिद्धिरिति यावत् युक्तः कर्मसु सहजः कर्मयोगी आ
सीत रणाङ्गे स्थितिं कुर्यात् कथंभूतो मत्परः अहमेव परः उत्पा
लनहरणयोरिति धातनुसारात् पालयिता हरयिता बलाधा
यकश्रेयस्येति १४ ॥

मधुभाष्य

१४ ॥

भाषा अनुवाद

जिस का चित्त प्रशान्त और जो निर्भय औ ब्रह्मचर्य्य व्रतमे स्थित होके अपने मन को सब तरफसे खैंच मेरे मे लगाया है और जिसको मैंही परमपुरुषार्थ रूप कहे रहे हैं ऐसा मत्परायण पुरुष उक्तमत योगमे समाहित रहता है १४

दोहा

शांति चित निर्भय सदा ब्रह्मचर्य व्रतस्थित मनहिं रोकें युक्त होय मोमन परमो चित १४॥

युञ्जन्नेवं सदात्मानं योगी नियतमानसः शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति १५ ॥

शाङ्करभाष्यं

अथेदानीं योगफलमुच्यते युञ्जन्निति युञ्जन् समाधानं कुर्वन्नेवं यथोक्तेन विधानेन सदा योगी नियतमानसः नियतं संयतं मनो यस्य सोयं नियतमानसः स शान्तिमुपरतिं निर्वाणपरमां निर्वाणं मोक्षस्तत्परमा निष्ठा यस्याः शान्तेः सा निर्वाणपरमा तां निर्वाणपरमां मत्संस्थां मदधीनतामधिगच्छति प्राप्नोति १५ ॥

आनन्दगिरिकृतटीका

संप्रति परमफलकथनपरत्वेनानन्तरश्लोकमादत्ते अथेति योगस्वरूपं तदङ्गमासनमपि तत्कर्तृविशेषणमित्यस्यार्थस्य प्रकथनानन्तरमित्यथशब्दार्थः आत्मानं युञ्जन्निति सम्बन्धः आत्मशब्दो मनोविषयः यथोक्तो विधिरासनादिः उक्तविशेषणत्रयद्योतनार्थं सदेत्युक्तं योगी ध्यायी सन्न्यासीत्यर्थः मनःसंयमस्य योगे प्रत्यसाधारणत्वं दर्शयति नियतेति शान्तिशब्दितोपरतेः सर्वसंसारनिवृत्तिपर्यवसायित्वं मत्वा विशिनष्टि निर्वाणेति यथोक्तायाः मुक्तेर्ब्रह्मस्वरूपावस्थानादनर्थान्तरत्वमाह मत्संस्थामिति मदधीनां मदात्मिकामित्यर्थः १५ ॥

स्वामिकृतटीका

ततो योगाभ्यासफलमाह युञ्जन्निति एवमुक्तेन प्रकारेण सदात्मानं मनो युञ्जन् समाहितं कुर्वन् नियतं निरुद्धं मानसं चित्तं यस्य सः शान्तिं संसारोपरमं प्राप्नोति कथंभूतां निर्वाणं परमं प्राप्यं यस्यां तां मत्संस्थां मद्रूपेणावस्थितिं १५ ॥

पैशाचभाष्यं

अथेदानीं योगफलमुच्यते युञ्जन्नेवमिति युञ्जन्मनस्समाधानं कुर्वन्नेवं यथोक्तेन प्रकारेण योगी नियतमानसः नियतं संयतं मानसं यस्य सः शान्तिमुपरतिं निर्वाणपरमां निर्वाणं मोक्षः परमा निष्ठा यस्याः शान्तेस्तां निर्वाणपरमां मत्संस्थां मदधीनामधिगच्छति प्राप्नोति १५

रामानुजभाष्यं

गी॰ टी॰ ष॰

एवं मयि परस्मिन्ब्रह्मणि पुरुषोत्तमे मनसः सुभाश्रयीभूते सदात्मानं मनो युंजन्नियतमानसो निश्चलमानसः मत्स्पर्शपवित्रीकृतमानसत्वान्निश्चलमानसः मत्संस्थां निर्वाणपरमां शांतिमधिगच्छति निर्वाणकाष्ठारूपां मत्संस्थां मयि समस्थितां शांतिमधिगच्छति १५

यतः शांतिर्जायते यस्यां संस्थायां यं यं तत्काष्ठामत्प्राप्तिः योगो स्ति अभिनवगुप्तकृतटीका स्पष्टार्थं १५ एवमात्मानं युंजतस्समाद

परमार्थप्रपाटीका २५

+अथयोगाभ्यासफलमाह

63

+युंजन्निति एवमुक्तप्रकारेण योगी अभ्यासरत आत्मानं मनः युंजन्समाहितं कुर्वन् नियतं स्वाधीनं मानसं यस्य तथाविधः सन् शांतिं संसारोपरमं अधिगच्छति किंभूतां निर्वाणपरमं शममत्संस्थानं यस्या मयि संस्था स्थितिर्यस्याः मदाकारेण संस्थानमित्यर्थः स्मृतिरपि ते तिरी। एके युंजानः प्रथमं मनस्तत्त्वायसविनाधिपरति भाष्यं प्रथममारम्भे मनो युंजानः स्वाधीनं कुर्वाणः अनेन तरत्त्वायात्मशमयेधियः तुरी युंजानः पुरुषः सविता सर्वस्य प्रसविता स्वयमात्मैव भवति १५

वनमालीटीका

ततः किं स्यादत आह युंजन्निति एवमुक्तप्रकारेणात्मानं मनो युंजन्नभ्यासवैराग्याभ्यां समाहितं कुर्वन् योगी सदा योगाभ्यासातिशयेन नियतं निरुद्धं मानसं मनो येन सः निर्वाणा लिंगदेहनाशानंतरमाप्तव्यरकालिकीं शांतिं विदेहमुक्तिमधिगच्छति न केवलां जीवन्मुक्तिमेव मत्संस्थां मत्साम्यरूपामित्यर्थः १५।

कृष्णवैजयन्तीटीका

एवंभूतस्य योगिनः फलमाह युंजन्नेवमिति एवमुक्तप्रकारेणमपि। सर्वेश्वरे परमपुरुषे सदा प्रतिष्ठितं आत्मानं मनो युंजन् नयन् समन् नियतमानसः विनियतं यत् चञ्चलं मानसं चित्तं यस्य सः तथा मदंघ्रिस्पर्शे तया शान्तविषयान्तरत्तभिन्नविनतरमर्थः योगी योगवान् निर्वाणपरमां निर्वाणस्य मोक्षस्य परमां काष्ठारूपां मत्संस्थां मध्यीनां यदा मत्संस्थां गच्छति मयि संस्था स्थितिर्यस्यास्तां मत्संस्थां मत्स्वरूपसाम्यस्थितिमित्यर्थः शान्तिं सुखमधिगच्छति लभते तमेव विदित्वातिमृत्युमेतीति श्रुतेः १५॥

मधुसूदनीटीका

एवं संप्रज्ञातसमाधिनाभ्यासीनस्य किं स्यादित्युच्यते एवं देहोत्थानादिषु

वौक्तनियमेनात्मानं मनो युंजन् वैराग्याभ्यासाभ्यां समाहितं कुर्वन् तयो
र्गीमत्ताभ्यामपरोक्षाभ्यासातिशयेन नियतेन निरुद्धमानसमनो येन निय
न्ता निरुद्धमानसा हि निरूपाविकाराशयेन नित्यनियतमानसः मतङ्गा।
तिं सर्वं हस्तप्रशस्तिरूपोपशान्तवाहितो निर्वाणपरमो तत्र साक्षात्कारोऽस्मि
हारेण सकार्यः विद्यानिहितनिरूपमुक्तिपर्यवसायिनी मनसो मनस्वरूपप्र
मान्तरूपो निष्ठामधिगच्छति ततः सांसारिकाणि सर्वाणि ग्रन्थान्यविषय
समाधिफलमधिगच्छति तेषामपवर्गोपयोगिसमाध्युपसर्गत्वात् न
ग्राह्यतत्त्वसमाधिफलात् आह भगवान् पतञ्जलिः ते समाधावुपस
र्गा व्युत्थाने सिद्धय इति स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्र
सङ्गादिति सूत्रान्तरोक्तेः तथा वोद्दालको देवैराकामन्त्रितोऽपि तत्संगमा
दरं स्मयं गर्वं चाकृत्वा देवानवगत्याय पुनरनिष्टप्रसङ्गनिवारणाय निर्वि।
कल्पकमेव समाधिमकरोदिति वसिष्ठेनोपाख्यायते सम्प्रज्ञातस्वभेदैर्यः स
माधिस्सूत्रितः पतञ्जलिना वितर्कविचारानन्दास्मितानुगमात्सम्प्रज्ञातः
सम्यक् संशयविपर्ययानध्यवसायरहितत्वेन प्रज्ञायते प्रकर्षेण विशेष
रूपेण ज्ञायते भाव्यस्य रूपं ज्ञायते भाव्यस्वरूपं येन स सम्प्रज्ञातः समाधिः।
भावनाविशेषः भावना हि भाव्यस्य विषयान्तरपरिहारेण चेतसि पुनः पु
नर्निवेशनं भाव्यं च द्विविधं ग्राह्यं ग्रहीतृभेदात् ग्राह्यमपि हि द्विविधं स्थू
लसूक्ष्मभेदात् तदुक्तं क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु
तत्स्थतदञ्जनता समापत्तिः क्षीणा राजसतामसवृत्तयो यस्य तस्य चि
त्तस्य ग्रहीतृग्रहणग्राह्येषु आत्मेन्द्रियविषयेषु तत्स्थता तदेकाग्रता त
दञ्जनता तन्मयता न्यग्भूते चित्ते भाव्यमानस्यैवोत्कर्षस्तथा तथा
विधा समापत्तिस्तद्रूपः परिणामो भवति यथाभिजातस्य निर्मलस्य स्फटि
कमणेस्तत्तद्रूपाश्रयवशात्तत्तद्रूपापत्तिरेवं निर्मलस्य चित्तस्य तत्तद्भावना।
पवस्तूपरागात्तत्तद्रूपापत्तिः समापत्तिः समाधिरिति पर्यायः यद्यपि।
ग्रहीतृग्रहणग्राह्येति क्रमेणोक्तं तथापि भूमिकाक्रमवशाद्ग्राह्यग्रहणग्र
हीतृष्विति बोद्धव्यं यतः प्रथमं ग्राह्यनिष्ठ एव समाधिर्भवति ततो ग्रह
णनिष्ठः ततोऽस्मिता इति ग्रहीत्रादिक्रमोऽप्येवमाख्यास्यते तत्र यदा स्थू
लं महाभूतेन्द्रियात्मकं षोडशविकाररूपं विषयमादाय पूर्वापरानुसंधा
नेन शब्दार्थोल्लेखेन च भावना क्रियते तदा सवितर्कः आस्मिन्नेवालंबने

[Margin notes: विघ्नत्वात्; ह; ह; ग्रही; समाधिः]

गी॰
टी॰
प॰

64

पूर्वापरानुसंधानशब्दार्थोल्लेखशून्यत्वेन यदा भावना प्रवर्त्तते तदा निर्वित
र्कः एतावुभावप्यत्र वितर्कशब्देनोक्तौ तन्मात्रांतःकरणलक्षणं सूक्ष्मं विष
यमालंब्य तस्य देशकालधर्मावच्छेदेन यदा भावना प्रवर्त्तते तदा सविचारः
अस्मिन्नेवालंबने देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वेन यदा भाव
ना प्रवर्त्तते तदा निर्विचारः एतावुभावप्यत्र विचारशब्देनोक्तौ न याव भाष्ये वि
तर्कश्चित्तस्य स्थूल आलंबने आभोगः सूक्ष्मो विचार इति इयं ग्राह्यसमापत्तिरि
ति व्यपदिश्यते यदा रजस्तमोलेशानुविद्धमंतःकरणसत्त्वं भाव्यते तदा गुण
भावाच्चितिशक्तेः सुखप्रकाशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात्सानंदः
समाधिर्भवति अस्मिन्नेव समाधौ ये बद्धधृतयस्तत्त्वांतरं प्रधानपुरुषरूपं न।
पश्यंति ते विगतदेहाहंकारत्वात् विदेहशब्देनोच्यंते इयं ग्रहणसमापत्तिः त
तः परं रजस्तमोलेशानभिभूतं शुद्धं सत्त्वमालंबनीकृत्य या भावना प्रवर्त्तते
तस्यां ग्राह्यस्य सत्त्वस्य न्यग्भावाच्चितिशक्तेरुद्रेकात्सत्तामात्रावशेषत्वेन स।
माधिः सास्मित इत्युच्यते न चाहंकारास्मितयोरभेदः शंकनीयः यतो यत्रांतः
करणमहमित्युल्लेखेन विषयान्वेदयते सोऽहंकारः यत्रांतर्मुखतया प्रतिलो
मपरिणामेन प्रकृति लीने चेतसि सत्तामात्रमवभाति सा स्मिन्नेव समाधौ स्मिता
ये कृतपरितोषास्ते परं पुरुषमपश्यंतश्चेतसः प्रकृतौ लीनत्वात्प्रकृतिल
या इत्युच्यंते सेयं ग्रहीतृसमापत्तिरस्मितामात्ररूपग्रहीतृनिष्ठत्वात् ये तु प
रं पुरुषं विविच्य भावनायां प्रवर्त्तंते तेषामपि केवलपुरुषविषयविवेकख्याति
ग्रहीतृसमापत्तिरपि न सास्मिता समाधिर्विवेकेनास्मितायास्त्यागात् तत्र ग्र
हीतृ भानपूर्वकमेव ग्रहणभानेन तत्पूर्वकं सूक्ष्मग्राह्यभानेन तत्पूर्वकं च स्थू।
लग्राह्यभानमिति स्थूलविषयो हि विधोपि वितर्कश्चतुष्टयानुगतः द्वितीयो वितर्क
विकलश्चितयानुगतः तृतीयो वितर्कविचाराभ्यां विकलो द्वितीयानुगतः चतुर्थो
वितर्कविचारानंदैर्विकलोऽस्मितामात्र इति चतुरवस्थोऽयं संप्रज्ञात इति एवं सवि
तर्कः सविचारः सानंदः सास्मितश्च समाधिरंतर्धानादिसिद्धिहेतुतया मुक्ति।
हेतुसमाधिविरोधित्वाद्धेय एव मुमुक्षुभिः गृहीतृग्रहणयोरपि चित्तवृत्ति वि।
षयतादशायां ग्राह्यकोटौ निवेशात् हेयोपादेयविभागकथनाय ग्राह्यसमापत्ति
रेव विहिता सूत्रकारेण चतुर्विधा हि ग्राह्यसमापत्तिः स्थूलग्राह्यगोचरा द्विवि।
धा सवितर्का निर्वितर्का च सूक्ष्मग्राह्यगोचरापि द्विविधा सविचारा निर्विचारा च
तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का शब्दार्थज्ञानविकल्पसंभिन्ना स्थू।

लार्थावभासरूपा सवितर्का समापत्तिः स्थूलगोचरा सविकल्पकवृत्तिरि।
त्यर्थः स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का तस्मिन्ने
व स्थूलालंबने शब्दार्थस्मृतिप्रविलये प्रत्युदितस्फुटग्राह्याकारप्रतिभा
सितया न्यग्भूतज्ञानांशत्वेन स्वरूपशून्येव निर्वितर्का समापत्तिः स्थूलगो
चरा निर्विकल्पकवृत्तिरित्यर्थः एतयैव सविचारा निर्विचारा च सूक्ष्मविष
या व्याख्याता सूक्ष्मस्तन्मात्रादिर्विषयो यस्याः सा सूक्ष्मविषया समापत्तिर्द्वि
विधा सविचारा निर्विचारा च सविकल्पकनिर्विकल्पकभेदेन एतयैव स
वितर्कया निर्वितर्कया च स्थूलविषयया समापत्त्या व्याख्याता शब्दार्थ
ज्ञानविकल्पसहितत्वेन देशकालधर्माद्यवच्छिन्नः सूक्ष्मोऽर्थः प्रतिभाति।
यस्यां सा सविचारा शब्दार्थज्ञानविकल्परहितत्वेन देशकालधर्माद्यन
वच्छिन्नत्वेन च धर्मिमात्रतया सूक्ष्मोऽर्थः प्रतिभाति यस्यां सा निर्विचारा
सविचारनिर्विचारयोः सूक्ष्मविषयत्वविशेषणात् सवितर्कनिर्वितर्क
योः स्थूलविषयत्वमर्थाद्व्याख्यातं सूक्ष्मविषयत्वं चालिङ्गपर्यवसानं स।
विचाराया निर्विचारायाश्च समापत्तेर्यत्सूक्ष्मविषयत्वमुक्तं तदलिङ्गप
र्यन्तं द्रष्टव्यं तेन सानन्दसास्मितयोर्ग्रहीतृग्रहणसमापत्त्योरपि ग्राह्यस।
मापत्तावेवान्तर्भाव इत्यर्थः तथा हि पार्थिवस्याणोर्गन्धतन्मात्रं सूक्ष्मो वि
षयः आप्यस्य रसतन्मात्रं तैजसस्य रूपतन्मात्रं वायवीयस्य स्पर्शत
न्मात्रं नभसः शब्दतन्मात्रं तेषामहंकारः तस्य लिङ्गमात्रं महत्तत्त्वं तस्या
प्यलिङ्गं प्रधानं सूक्ष्मो विषयः सप्तानामपि प्रकृतीनां प्रधान एव सूक्ष्म
ताविश्रान्तेस्तत्पर्यन्तमेव सूक्ष्मविषयत्वमुक्तं यद्यपि प्रधानादपि पुरुषः
सूक्ष्मोऽस्ति तथाप्यन्वयिकारणत्वाभावात्तस्य सर्वान्वयिकारणे प्रधान ए
व निरतिशयं सौक्ष्म्यं व्याख्यातं पुरुषस्तु निमित्तकारणं सदपि नान्वयिका
रणत्वेन सूक्ष्मतामर्हति अन्वयिकारणत्वाविवक्षायां तु पुरुषोऽपि सू
क्ष्मो भवत्येवेति द्रष्टव्यं ता एव सबीजः समाधिः ताश्चतस्रः समापत्तयो
ग्राह्येण बीजेन सह वर्तन्त इति सबीजः समाधिर्वितर्कविचारानन्दास्मि
तानुगमात्संप्रज्ञात इति शब्दिताः स्थूलेऽर्थे सवितर्को निर्वितर्कः सूक्ष्मेऽर्थे
सविचारो निर्विचार इति अन्तिमस्य फलमाह निर्विचारवैशारद्येऽध्या
त्मप्रसादः स्थूलविषयत्वेन सोऽपि सवितर्के शब्दार्थज्ञानविकल्पसंकीर्णम

गी॰
टी॰
ष॰

65

पेध्यतद्रहितस्य निर्विकल्पकरूपस्य निर्वितर्कस्य शाखान्ते ततः सूक्ष्मवि
षयस्य सविकल्पकप्रतिभासरूपस्य सविचारस्य ततोऽपि सूक्ष्मविषयस्य
निर्विकल्पकप्रतिभासरूपस्य निर्विचारस्य प्राप्यमानत्वे पूर्वपूर्वत्यागेनेति ।
विचाराधिक्यान्निर्विचारफलत्वेनैव फलत्वं निर्विचारस्यात्र प्रकृष्टाभ्यासव
लाद्वैशारद्ये रजस्तमोऽनभिभूतसत्त्वोद्रेके सम्यग्ध्यानप्रसादः क्लेशवासना
रहितस्य चित्तस्य भूतार्थविषयः क्रमाननुरोधी स्फुटः प्रज्ञालोकः शुद्धो भवति
तथा च भाष्यं प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान् भूमिष्ठानिव ।
शैलस्थः सर्वान्प्राज्ञोऽनुपश्यतीति ऋतंभरा तत्र प्रज्ञा तस्मिन्प्रज्ञाप्र
सादे सति समाहितचित्तस्य योगिनो या प्रज्ञा जायते सा ऋतंभरा ऋतं सत्य
मेव बिभर्ति न तत्र विपर्यासगन्धोऽप्यस्तीति योगिकेव यं समाख्या सा चोत्त
मो योगः तथा च भाष्यं आगमेनानुमानेन ध्यानाभ्यासरसेन च त्रिधा प्रक
ल्पयन्प्रज्ञां लभते योगमुत्तममिति श्रुतानुमानप्रज्ञाभ्यामन्यवि
षया विशेषार्थत्वात् श्रुतमागमविज्ञानं तत्सामान्यविषयमेव न हि वि
शेषेण सह कस्यचित् शब्दस्य संगतिर्ग्रहीतुं शक्यते तस्मात्तथानुमा ।
न विषयो न विशेषः कश्चिदस्ति न चास्य सूक्ष्मव्यवहितविप्रकृष्टस्य वस्तुनो
कि लोकप्रत्यक्षेण ग्रहणमस्ति किं तु समाधिप्रज्ञानिर्ग्राह्य एव स विशेषो भव
ति भूतसूक्ष्मगतो वा पुरुषगतो वा तस्मान्निर्विचारवैशारद्यसमुद्भवा
यां श्रुतानुमानविलक्षणायां सूक्ष्मव्यवहितविप्रकृष्टसर्ववि शेषविष ।
या या [illegible] ऋतंभरायामेव प्रज्ञायां योगिनां प्रयत्न । प्रयत्नश्चा[illegible] ये
ऽयमर्थः तद्वृत्तिमनुरू[illegible] वृत्तिमात्रव्युत्थानसंस्काराणामेकाग्रता
यामपि सवितर्कनिर्वितर्कसविचारज्ञानानां संस्काराणां च सद्भावात्तेषामस्य
मानस्य चित्तस्य कथं निर्विचारवैशारद्यपूर्वकाध्यात्मप्रसादलभ्या ऋतं ।
भरा प्रज्ञा प्रतिष्ठिता स्यादत उक्तं तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी तया
ऋतंभरया प्रज्ञया जनितो यः संस्कारः स तत्त्वविषयया प्रज्ञया जनितत्वे
न बलवत्त्वाद्व्युत्थानजान्समाधिजोऽपि संस्कारान् अतत्त्वविषयप्र
ज्ञाजनितत्वेन दुर्बलान्प्रतिनिबध्नाति स्वकार्यकरणाक्षमान्करोति नाशयती
ति वा तेषां संस्काराणामभिभवात्तत्प्रभवाः प्रत्यया न भवन्ति [illegible] ।
[illegible] निरुद्धे ततः समाधिरुपतिष्ठते ततः समाधिजा प्रज्ञा ततः प्रज्ञा

कृताः संस्कारा इति नवोनवः संस्कारातिशयो वर्धते ततश्चप्रज्ञा ततश्चसं
स्कारा इति ननु भवत्वस्मात्संस्काराणामतत्त्वविषयप्रज्ञाजनितानान्त
त्त्वमात्रविषयसंप्रज्ञातसमाधिप्रज्ञाप्रभवैः संस्कारैः प्रतिबन्धः तेषान्तुसं
स्काराणां प्रतिबन्धकाभावादेकाग्रभूमावेव सबीजः समाधिः स्यात् न
तु निर्बीजो निरोधभूमावित्याह तस्यापि निरोधे सर्वनिरोधान्निर्बी
जः समाधिः तस्य संप्रज्ञातस्य समाधेरेकाग्रभूमिजस्य प्रविशाद्वात्ति
मसृद्धवित्तिमानामपि निरोधे योगिप्रयत्नविशेषेण विलये सति सर्वनि
रोधात्समाधेः समाधिजस्य संस्कारस्यापि निरोधान्निर्बीजो निरालंबनोः।
ने संप्रज्ञातसमाधिर्भवति सवसोपायाः प्राकृस्त्रितो विरामप्रत्ययाभ्यास
माइ पूर्वः संस्कारशेषोन्य इति विरम्यतेनेनेति विरामो वितर्कविचारानन्दास्मि
तादिरूपचिन्तात्यागः तस्य प्रत्ययः कारणं परं वैराग्यमिति यावत् विरामश्चा
सौप्रत्ययः चित्तवृत्तिविशेष इति वा तस्याभ्यासः पौनःपुन्येन चेतसि नि
वेशनं तदेव पूर्वं कारणं यस्य स तथा संस्कारमात्रविशेषः सर्वथा निवृत्ति
कोन्यः पूर्वोक्तात् सबीजाद्विलक्षणो निर्बीजोः संप्रज्ञातसमाधिरित्यर्थः
संप्रज्ञातस्य हि समाधेर्द्वावुपायावुक्तावभ्यासो वैराग्यं च तत्र सालम्बनत्वा
दभ्यासस्य तन्निरालम्बनसमाधिहेतुत्वं घटत इति निरालम्बनं परं वैराग्य
मेव हेतुत्वेनोच्यते अभ्यासस्तु संप्रज्ञातसमाधिद्वारा प्रणाल्योपयुज्यते
तदुक्तं त्रयमन्तरङ्गं पूर्वेभ्यः धारणाध्यानसमाधिरूपं साधनत्रयं यमनि
यमासनप्राणायामप्रत्याहाररूपसाधनपञ्चकापेक्षया सबीजस्य समाधे
रन्तरङ्गं साधनं साधनकोटौ च समाधिशब्देनाभ्यासरूपो वोच्यते मुख्यस्य
समाधेः साध्यत्वात् तदपि बहिरङ्गं निर्बीजस्य निर्बीजस्य तु समाधेस्तदपि
त्रयं बहिरङ्गं परम्परयोपकारि तस्य तु परं वैराग्यमेवान्तरङ्गमित्यर्थः अय
मपि द्विविधो भवप्रत्यय उपायप्रत्ययश्च भवप्रत्ययो विदेहप्रकृतिलयानां
विदेहानां सानन्दानां प्रकृतिलयानां च सास्मितानां देवानां प्राग्व्याख्याता
नां जन्मविशेषादौषधिविशेषात्मन्त्रविशेषात्तपोविशेषाद्वायं समाधिः
स भवप्रत्ययः भवः संसारः आत्मानात्मविवेकाभावरूपः प्रत्ययः कारणं
यस्य स तथा जन्ममात्रहेतुको वा पक्षिणामाकाशगमनवत् ततः सं
१२ सारहेतुत्वात् मुमुक्षुभिर्हेय इत्यर्थः श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक

देवा।

गी.
टी.
ब.

66

सूत्रेषां जन्मौषधिमंत्रतपःसिद्धिव्यतिरिक्तानामात्मानात्मविवेकदर्शि
नां तु यः समाधिः सम्प्रज्ञातादिरूपः श्रद्धादयः पूर्वे उपाया यस्य स तथा उपा
यप्रत्यय इत्यर्थः तेषु श्रद्धा योगविषये चेतसः प्रसादः सा हि जननीव योगि
नं पाति ततः श्रद्दधानस्य विवेकार्थिनो वीर्यमुत्साह उपजायते समुपजा
तवीर्यस्य पाश्चात्त्यासु भूमिषु स्मृतिरुत्पद्यते तत्स्मरणाच्च चित्तमनाकु
लं सत् समाधीयते समाधिरैकाग्र्यं तासमाहितचित्तस्य प्रज्ञाभाव्यगोच
रा विवेकेन जायते तदभ्यासात्पराच्च वैराग्याद्भवत्यसंप्रज्ञातः समाधिर्मुमु
क्षूणामित्यर्थः प्रतिक्षणपरिणामिनो हि भावा ऋते चितिशक्तेरिति न्याये
न तस्यामपि सर्ववृत्तिनिरोधावस्थायां चित्तपरिणामप्रवाहः तज्जन्यसंस्का
रप्रवाहश्च भवत्येव संस्कारशेषमुक्तं तस्य च संस्कारस्य प्रयोजनमुक्तं
ततः प्रशान्तवाहिता संस्कारादिति प्रशान्तवाहिता नामाहुतिकस्य चित्तस्य
निरिंधनाग्निवत्प्रतिलोमपरिणामेनोपशमः यथा समिदाज्याद्याहुतिप्र
क्षेपे वह्निरुत्तरोत्तरवृद्ध्या प्रज्वलति समिदादिक्षये तु प्रथमक्षणे किंचिच्छा
म्यति उत्तरोत्तरक्षणेषु त्वधिकमधिकं शाम्यतीति क्रमेण शान्तिर्वर्धते तथा
निरुद्धचित्तस्योत्तरोत्तराधिकः प्रशमः प्रवहति तत्र च पूर्वप्रशमजनितः
संस्कार एवोत्तरोत्तरप्रशमस्य कारणं तत्र च निरिंधनाग्निवच्चित्तं क्रमेणो
पशाम्यद्व्युत्थानसमाधिनिरोधसंस्कारैः सह स्वस्यां प्रकृतौ लीयते तदा च
समाधिपरिपाकप्रभवेन विवेकख्यातिरूपेण सम्यग्दर्शनेनाविद्यायां निवृत्ता

ह२

यां तद्धेतुकदृश्यसंयोगाभावाद्दृशेरपि च विपाक्यामपि निवृत्तायां स्वरूपप्रति
ष्ठः पुरुषः शुद्धः केवलो मुक्त इत्युच्यते तदुक्तं तदा द्रष्टुः स्वरूपेऽवस्थानमिति त
दा सर्ववृत्तिनिरोधे वृत्तिदशायां तु चित्तपरिणामिचैतन्यरूपेण तस्य सर्व
दा शुद्धस्याप्यनादिना दृश्यसंयोगेनाविवेकेनान्तःकरणतादात्म्याध्यासाद
न्तःकरणवृत्तिसारूप्यं शान्तघोरमूढः भोक्तापि भोक्तेव दुःखी भवतीत्युक्तं वृ
त्तिसारूप्यमितरत्र इतरत्र वृत्तिप्रादुर्भावे पतदेव विहृते द्रष्टृरूपापरक्तं वि
वेकसर्वार्थं चित्तमेव द्रष्टृरूपापरक्तं विषयि विषयनिर्भासं चेतनाचेतनस्वरूपाप

चैतना

न्नं विषयात्मकमप्यविषयात्मकमिवाचेतनमपि चेतनमिव स्फटिकमणिक
ल्पं सर्वार्थमित्युच्यते तदनेन चित्तसारूप्येण भ्रान्ताः केचित्तदेव चेतनमित्याहुः
तदसंख्येयवासनाभिः चित्तमपि परार्थं संहत्यकारित्वात् यस्य भोगापवर्गा

र्थं तनस्यपरवपरः चेतनो संहतः पुरुषो न तत्त्वदादिवत् संहत्यकारि चि
त्ते च तन्नमित्यर्थः एवं विशेषदर्शिन आत्मभावभावनानिवृत्तिः एवं यो
न्तःकरणपुरुषयोर्विशेषदर्शी तस्यान्तःकरणे प्राग्विवेकवशादा
त्मभावभावना सीनस्या निवर्तते भेददर्शनेन स्वरूपभ्रमानुपपत्तेः तत्पुरु
षयोर्विशेषदर्शने च भगवद्दर्शितं निष्कामकर्मसाध्यं तल्लिङ्गं च योगभा
ष्ये दर्शितं यथा प्रावृषि तृणाङ्कुरस्योद्भेदेन तद्बीजसत्तानुमीयते तथा मोक्ष
मार्गश्रवणेन सिद्धान्तरुचिवशात् यस्य लोमहर्षाश्रुपातौ दृश्येते तत्राप्यस्ति
विशेषदर्शनबीजमपवर्गभागीयं कर्माभिनिर्वर्तितमित्यनुमीयते यस्य
त्वादर्शनं कर्मबीजं नास्ति तस्य मोक्षमार्गश्रवणे पूर्वपक्षरुचिः किंपुरुषविभेव
ररुचिश्च सिद्धान्तपक्षे तस्य कोऽहमासं कथमहमासमित्यादिरात्मभा
वभावना स्वाभाविकी प्रवर्तते सा तु विशेषदर्शिनो निवर्तत इति एवं सति
किं स्यादित्यत आह तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तं निम्नं जलप्रवा
हणयोग्यो नीचदेशः प्राग्भारस्त्वपरस्तादुच्चप्रदेशः चित्तं च सर्वदा प्रवर्त
मानं हि प्रवाहेण प्रवहज्जलतुल्यं तदात्मानात्मविवेकरूपविमार्गवा
हि विषयभोगपर्यन्तमस्यासीदधुना त्वात्मानात्मविवेकमार्गवाहि कैवल्य
पर्यन्तं संपद्यत इति अस्मिंश्च विवेकवाहिनि चित्ते येऽन्तरायाः तेषां चैव नि
वर्तनोपायमाह तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः हानमेषां
क्लेशवदुक्तं तस्मिन् विवेकवाहिनि चित्ते छिद्रेष्वन्तरालेषु प्रत्ययान्तराणि
व्युत्थानरूपाण्यहं ममेत्येवंरूपाणि व्युत्थानानुभवजेभ्यः क्षीयमाणेभ्योऽपि
प्रादुर्भवन्ति एषां च संस्काराणां क्लेशानामिव हानमुक्तं यथा क्लेशा अविद्या
दयो ज्ञानाग्निदग्धबीजभावा न पुनः चित्तभूमौ प्ररोहं प्राप्नुवन्ति तथा ज्ञाना
ग्निदग्धबीजभावाः संस्काराः प्रत्ययान्तराणि न प्ररोढुमर्हन्तीति ज्ञानाग्नि
संस्कारास्तु यावच्चित्तमनुशेरत इति एवं च प्रत्ययान्तरानुदयेन विवेकवा
हिनि चित्ते स्थिरीभूते सति प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्याते
र्धर्ममेघः समाधिः प्रसंख्याने सत्त्वपुरुषान्यताख्यातिः प्रज्ञानमत्तान
मितियावत् तत्र बुद्धेः सन्निकृष्टे परिणामे कृतसंयमस्य सर्वेषां गुणपरि
णामानां स्वामिवदाक्रमणं सर्वाधिष्ठातृत्वं तेषामेव च शान्तोदिताव्यपदे
श्यधर्मित्वेन स्थितानां यथावद्विवेकज्ञानं सर्वज्ञातृत्वं च विशोकानामसि
द्धिः फलं तदेतदर्थ्यं च कैवल्यमुक्तं सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वे

भावादपि साक्षात्त्वं सर्वत्रात्त्वं च न तद्वैराग्यादपि दोषबीजक्षये कैवल्यमिति।
तत्राभ्यासेनैतदुच्यते तस्मिन्नभ्यासे ख्याते समाध्युत्कर्षादस्य फलमलिप्सोः प्रस
योनराणामनुस्ये सर्वप्रकारविवेकख्यातेः परिपोषाद्धर्ममेघः समाधिर्भ
वति। इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्। अयं तु परमो धर्मो यद्यो
गेनात्मदर्शनमिति स्मृतेः धर्मं प्रमकृष्णस्येकात्मसाक्षात्कारं मेहति सिंच
तीति धर्ममेघः ततस्तत्साक्षात्कारादेतद्विमर्शः ततः क्लेशकर्मनिवृत्तिः
ततो धर्ममेघात्समाधेर्धर्मादक्लेशानां पंचविधानामविद्यास्मितारागद्वे
षाभिनिवेशानां कर्मणां च कृष्णशुक्लकृष्णाकृष्णाशुक्लभेदेन त्रिविधानामवि
द्यामूलानामविद्याक्षये बीजतया दाहोमंतकी निवृत्तिः कैवल्यमवधिका
रणानिवृत्त्या कार्यनिवृत्तेरात्यंतिका उचितत्वादित्यर्थः एवं स्थितेऽत्र युंजन्नेवं स
दात्मानमित्यनेन संप्रज्ञातः समाधिरेकाग्रभूमावुक्तः नियतमानस इ
त्यनेन च तत्फलभूतोऽसंप्रज्ञातसमाधिर्निरोधभूमावुक्तः शांतिमिति
निरोधसमाधिजन्यसंस्कारफलभूता प्रशांतवाहिता निर्वाणपरमामिति
धर्ममेघस्य समाधेस्तत्त्वज्ञानद्वारा कैवल्यहेतुत्वं मत्संस्थामित्यनेनोप
निषदभिमतं कैवल्यं दर्शितं यस्मादेवं महाफलो योगस्तस्मात्तं महता।
प्रयत्नेन संपादयेदित्यभिप्रायः ॥ १५ ॥

सदानंदीटीका

एवं सर्वोक्तरीत्या हि योगाभ्यासपरो मुनिः वैराग्याभ्यासयोगेन मनः।
कुर्वन्समाहितं अभ्यासातिशयेनैव निरुद्धं येन मानसं वृत्तिरूपाविका
राद्वा निरुद्धं येन मानसः सन् सत्परां शांतिं निर्वाणपरमां तथा तत्त्ववो
धस्वरूपां मच्छरीरेणाकृतानमानतस्तु कार्यमपवाध्याशुमुक्तिपर्यवसायि
नी मत्स्वरूपपराकाष्ठारूपां तिष्ठाम समाप्नोति ॥ १५ ॥

नीलकंठीटीका

अस्याः फलमाह युंजन्निति एवमनेन प्रकारेण सदा निरंतरं दीर्घकालं च
आत्मानं मनो युंजन्समादधानो योगी नियतं ख्यातिफलादपि निगृहीतं
मानसं येन स नियतमानसः शांतिं परमवैराग्यबलात् ख्यातिमपि निरु
ध्य निर्विकल्पं पदं निर्वाणं मोक्षस्तदेव परमा निष्ठा यस्याः शांतेस्तां मत्संस्थाम
मय्येव संस्थापकीभावेनावस्थानं समाप्तिर्वा यस्यास्तां अधिगच्छति प्राप्नोति

ख्यातिफलं च सत्त्वपुरुषान्यतादर्शिनं प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेक।
ख्यातेर्धर्ममेघः समाधिरिति तमेव पुरुषख्यातेर्गुणवैतृष्ण्यमिति स
त्त्वपुरुषान्यताख्यातिर्मज्ज्ञानसर्वज्ञातृत्वं सर्वभावाधिष्ठातृत्वं चेति सूत्र
येण प्रसंख्यानेप्याने अकुसीदस्य वाणिज्ये रव फलानि लिप्सोः सर्वथा वि
वेकख्यातिरेव भवति तस्मात्फले धर्ममेघः समाधिः स च प्रागेव व्या
ख्यातः तत्तु वैराग्यं परं परसंख्यानं पुरुषख्यातेः फलं तस्य त्वतृष्णा गुणेषु
दृष्टादृष्टविषयेषु वैतृष्ण्यं एतस्यैव द्वितीयान्तरीयकं फलं कैवल्यमि
ति योगा वदन्ति तृतीयस्य तु कं फलं सार्वज्ञ्यादिकं तत्र अभिधेयमुच्यते
कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति सर्वस्य वशी सर्वस्ये
शानः सर्वस्याधिपतिरित्यादिकं ॥२५॥

ज्ञानेरीटीका

एवमष्टांगयोगमेव तेन तस्य सम्यक्त्वं तत्त्वमध्ये मध्ये विच्छिद्य आत्मा
नेष्ठं जनं समाधिस्थं कुर्वन् [illegible] ॥

रामकेवरीटीका

[illegible] ॥ [illegible] समाधिपरि
[illegible]
[illegible] प्रशान्तात्मा [illegible]
[illegible]
[illegible]
[illegible] इति [illegible]
[illegible]
[illegible]
[illegible] एवमतद्विशेषणाः
विशिष्टः सदा मत्परमात्मानमन्तःकरणं युंजन् समाराधयन् सन् मत्कः
मामेवात्मत्वेन समाश्रितो तथा नन्यमनसो नास्मिं विषयान्तरे नयस्य
मानसं मामेव मत्कौमुक्तमापत्तिमेव च समाधिफलेन प्रतिपन्नः मत्
मत्संस्थां मयि वर्तमानं शान्तिं स्वाभाविकसर्वविकाररहितत्वलक्षणां प्र
शममधिगच्छति स्वीकुरुते कीदृशीं शान्तिं निर्वाणपरमां निर्वाणशरीर

गी
टी ८

68

शवनात्मन्यात्मप्रत्ययादिलोभूविरतिरूपानिर्वृतिः परमं प्रकृष्टफल
तयास्थितेयस्यां सा तयोक्तानाम् [illegible]
[illegible]
[illegible] माह ॥

एवंध्यानयोगाभ्यासफलमाह ॥ लासिकी [illegible]टीका

योगी उक्तोपपन्न्या नित्यं समाहितः कर्मयोगी नियतमानसः निय
तेन प्रत्याहृत्यात्मनि निरुद्धं प्रत्यगात्मनि येन युंजन्नेवं सन् शांतिं सर्व
विकल्पोपशमं प्राप्नोति ननु सुषुप्तमोहादावपि विकल्पोपरतिरस्ती
त्यत आह मत्संस्थां मद्रूपेणावस्थितया सम्यक् स्थितां एवंविधायाः शा
तेः फलमाह निर्वाणपरमां निर्वाणं मोक्षः परमं प्राप्यं पर्यंतकाष्ठा
यस्यास्तां [illegible] १४ ॥ ॥

पंडोलीटीका

अथेदानीं योगफलमुच्यते युंजन्नेवमिति योगी ध्यानवान् नियत
मानसः संयतमनाः सदात्मानं एवं पूर्वोक्तप्रकारेण युंजन् समाधिं
कुर्वन् निर्वाणपरमां मोक्षफलां शांतिं निर्वृतिं मत्संस्थां मदधीनां स
धिगच्छति प्राप्नोति १५

रत्नावीरसमिद्धोधिनी ॥

युंजन्नेवमिति योगी कर्मयोगी एवं पूर्वोक्तप्रकारेण सदा स
र्वास्ववस्थासु आत्मानं चित्तं युंजन् समाहितं कुर्वन् नियतमा
नसो निगृहीतचित्तः मत्संस्थां मम सर्वेश्वरस्य संस्थां मर्यादां म
या प्रवर्तितां मुमुक्षुचर्यामधिगच्छति सर्वप्रकारैर्जानाति प्र
वर्तयति च कथंभूतां मत्संस्थां शांतिं वैदिकामुष्मिकसकल
साधनभूतां वास्तवपरिणामां तथा निर्वाणपरमां चतुर्वर्गेषु का
निर्वाणमनिराकुथाश्चनेपरः ब्राह्मवृत्तात्मीनातिदिनस्तीति नि
र्वाणपरमां तां निराकुथरिगृहातसंपादिकामित्यर्थः १५ ॥

भाषा अनुवाद

अब योगाभ्यास करने का फल कहते हैं कि पूर्वोक्त प्रकार से स
दा आत्मा मे मन को युक्त करते नियत कहे निरुद्ध है मानस।
अर्थात् चित्त जिस का सोई शान्ति कहे संसार निवृत्ति को प्राप्त हो
ताहै वह शान्ति किसरूप है सो कहते है कि जिस से परम नि
र्वाण प्राप्त होय है सोई शान्ति और मत्संस्था कहे मेरे रूपमे।
अवस्थिति सो भी उसको मिले है १५

दोहा

जोडत यहविध चित्तको योगी सदा मनरोक निर्वाणशांतिकों
परमको सो पदलहैं विनशोक १५॥

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः
न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन १६

शांकरभाष्यं

इदानीं योगिन आहारादिनियम उच्यते नात्यश्नतः अत्यश्नत
आत्मसंमितमन्नपरिमाणमतीत्याश्नतः अत्यश्नतो न योगोऽस्ति न च ए
कान्तमनश्नतो योगोऽस्ति यदु ह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिन
स्ति तद्यत् कनीयो न तदवतीति श्रुतेः तस्मात् योगी नात्मसंमिता
दन्नादधिकं न्यूनं वाश्नीयात् अथवा योगिनो योगशास्त्रे परिपठितादन्नपरि
माणादतिमात्रमश्नतो योगो नास्ति उक्तं हि अर्द्धमशनस्य सव्यंजनस्य तृतीयमुदक
स्य तु वायोः संचरणार्थं तु चतुर्थमवशेषयेदित्यादिपरिमाणं तथा।
न चाति स्वप्नशीलस्य योगो भवति नैव चातिमात्रं जाग्रतो योगो भवति
चार्जुन १६ ॥

आनन्दगिरिकृतटीका

आहारादीत्यादिशब्देन विहारजागरितादि चोच्यते आत्मसंमितमन्न
परिमाणमष्टग्रासादि आहारनियमे शतपथश्रुतिं प्रमाणयति य
दिति तदन्नं भुज्यमानं यद्रक्षति प्रसिद्धा भुजमानं दिनमवसन्नशान
योग्यतामापाद्यानुष्ठानद्वारेण भोक्तारं रक्षति न पुनस्तदन्नमस्यानर्थो
य भवतीत्यर्थः यत्पुनरात्मसंमितात् भूयोऽधिकतरं शास्त्रमतिक्रम्य भु
ज्यते तदात्मानं हिनस्ति भोक्तुरनर्थाय भवति यच्चान्नं कनीयोऽल्पतरं
शास्त्रनिश्चयाभावाद्यते तदन्नमनुष्ठानयोग्यतापादनद्वारा न रक्षितं तमत
तस्मादनधिकमनल्पं चान्नं योगमारुरुक्षुणा भोक्तव्यमित्यर्थः श्रुतिसिद्ध
मर्थं निगमयति तस्मादिति नेयमेवास्य व्याख्यानान्तरमाह अथवेति किं
तदन्नपरिमाणं योगशास्त्रोक्तं यदधिकं न्यूनं वाभिव्यवहरतो योगा
नुपपत्तिरित्याशंक्याह उक्तं हीति अर्धसव्यंजनेनान्नं तृतीयमुदकेन तु वा
योः संचरणार्थाय चतुर्थमवशेषयेदिति वाक्यमादिशब्दार्थः यथा ना
त्यन्तमश्नतोऽनश्नतश्च योगो न संभवति तथा अत्यन्तं स्वपतो जाग्रतश्च न
योगः संभवतीत्याह न चेति १६ ॥

स्वामिकृतटीका

गी.
टी.
ष.

योगाभ्यासनिष्ठस्याहारादिनियममाह नात्यश्नतस्त्विति अत्यन्तमधिकं भुञ्जा
नस्य एकान्तमत्यन्तमभुञ्जानस्यापि योगः समाधिर्न भवति तथातिनिद्राशील
स्यातिजाग्रतश्च योगो नैवास्ति १६॥ परिमाणमत्यश्नतः अत्यश्नतो न योगोस्ति न चै
कान्तमनश्नतो योगोस्ति यदुक्तं आत्मसंमितमन्नं तदवति न तु हिनस्ति यद्भूयो हिनस्ति तत्...

पिशाचभाष्यं

योगिनः आहारे नियम उच्यते नात्यश्नतः आत्मसं[illegible]मितमन्नं [illegible] कनीयो
[illegible] न तदवतीति श्रुतेस्तस्माद्योगी नात्मसं
मितादधिकं न्यूनं वाश्नीयात् अथवा योगिनो योगशास्त्रपरिमिताद
न्नपरिमाणादतिमात्रमश्नतो योगो नास्तीत्युक्तं अर्धं सव्यञ्जनस्य
तृतीयमुदकस्य तु वायोः संचारणार्थं तु चतुर्थमवशेषयेदिति परि
माणं तथा न चातिस्वप्नशीलस्य योगो भवति नैव चार्जुन १६॥ नैवातिमात्रं जाग्रतो योगो भव

रामानुजभाष्यं

एवमात्मयोगमारभमाणस्य मनोनैर्मल्यहेतुभूतां मनसो भगवति।
शुभाश्रये स्थितिमभिधाय अन्यदपि योगोपकरणमाह नात्यश्नतस्त्विति
अत्यशनानशने योगविरोधिनी अतिविहारा[illegible]हारौ च तथा स्वाप्या।
स्तानायासौ १६॥

अभिनवगुप्तकृतटीका स्पष्टार्थम्

आत्मानं च विविक्तं च चेतसीकार्यीकुर्यात् सततमिति [illegible] कालेय
कादित्वादिदं [illegible] अन्यथा [illegible] काल [illegible]
[illegible] विना [illegible] आत्मानः अथ [illegible] नियता नियम
[illegible] नासिकाग्रं [illegible] लोकनं [illegible] दिशामनवलोकनं
[illegible] एवमात्मानं युञ्जतः समाहितान्तः शान्तिं
[illegible] योगी [illegible] १६॥

परमार्थप्रपाटीका

अथाभ्यासनिष्ठस्याहारादिनियममाह। नात्यश्नतस्त्विति द्वाभ्यां अ
तिअत्येनतस्यातिजेमतिनस्य तथा एकान्तमत्यन्तमनश्नत उपोषितस्य
तथा अतिस्वप्नशीलस्य निद्रालसस्य अथवातिजाग्रतश्च योगो दुःखहा
दुःखोपशमायन भवति १६॥

वनमालीटीका

एवमभ्यासनिष्ठस्याहारादिनियममाह नात्येति द्वाभ्यां यदुक्तं मनी

र्यति शरीरस्य च कार्यं तां संपादयति तदात्मसंमितमन्नं तदतिक्रम्य लो
भेनाधिकमश्नतो न योगोऽस्ति अजीर्णदोषेण व्याधिपीडनात् नचैकांतम
नश्नतस्त्वाहारस्य योगोऽस्ति निराहारादल्पाहाराद्वा देहपोषणाभावेन
देहस्य कार्याक्षमत्वात् यदुक्तं वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति य
द्भूयो हिनस्ति तद्यत्कनीयो न तदवतीति श्रुतेः अतो योगी नात्मसंमितात्
न्नादधिकं न्यूनं वाश्नीयादित्यर्थः यद्वा पूरयेदशनेनार्धं तृतीयमुदकेन तु
वायोः संचरणार्थं तु चतुर्थमवशेषयेदित्यादियोगशास्त्रोक्तपरिमाणाद
धिकं न्यूनं वाश्नतो योगो न संपद्यत इत्यर्थः तथातिनिद्राशीलस्यातिजा
ग्रतश्च योगो नैवास्ति एकस्मिन्शाखायामाहारातिक्रमस्सर्वथार्थः यथोक्तं
मार्कंडेये नाध्मातः क्षुधितः श्रांतो न च व्याकुलचेतनः युंजीत योगं रा
जेंद्र योगी सिद्ध्यर्थमात्मनः नातिशीते न चैवोष्णे न द्वंद्वे नानिलान्वि
ते कालेष्वेतेषु युंजीत न योगं ध्यानतत्परः इति १६॥

कृष्णमवैजयन्तीटीका

एवं योगाभ्यासे रतस्य योगिनो भोजनादिनियमप्रकारमाह द्वाभ्या
म् नात्यश्नतस्त्विति तुनिश्चयेन एवकारस्य नास्तीति क्रियापदेन सर्वत्र समन्
वयः हेतुत्वेन अत्यश्नतः अतिशयभोजनं कुर्वतो योगिनो योगस्तु न एका
न्तं केवलमश्नतो भोजनमकुर्वतस्तस्य भोजनयोगस्तु न अतिनिद्राशी
लस्यातिशयशयनस्वभावस्य पुरुषस्य योगस्तु न जाग्रतो अतिशयजाग
रणशीलस्य जनस्य योगो नास्त्येव १६॥

मधुसूदनीटीका

एवं योगाभ्यासनिष्ठस्याहारादिनियममाह द्वाभ्यां॥

यदुक्तं तज्जीर्यति शरीरस्य च कार्यक्षमतां संपादयति तदात्मसंमित
मन्नं तदतिक्रम्य लोभेनाधिकमश्नतो न योगोऽस्ति अजीर्णदोषेण व्याधिपी
डितत्वात् नचैकांतमनश्नतो योगोऽस्ति अनाहारादल्पाहाराद्वा रसपोष
णाभावेन शरीरस्य कार्याक्षमत्वात् यदुक्तं वा आत्मसंमितमन्नं तदवति न श्रा
त्र हिनस्ति यद्भूयो हिनस्ति तत् यत्कनीयो न तदवतीति शतपथश्रुतेः
तस्माद्योगी नात्मसंमितादन्नादधिकं न्यूनं वाश्नीयादित्यर्थः अथवा पूर
येदशनेनार्धं तृतीयमुदकेन तु वायोः संचरणार्थं तु चतुर्थमवशेषयेदि
त्यादियोगशास्त्रोक्तपरिमाणादधिकं न्यूनं वाश्नतो योगो न संपद्यत इत्यर्थः

गी. टी. घ.

तथातिनिद्राशीलस्यातिजाग्रतश्चयोगो नैवास्तिहे अर्जुनसावधानेर्भवेत्यभि
प्रायः एकः चकारउक्ताहारातिक्रमसमुच्चयार्थः अपरोवातुक्तदोषसमुच्च
यार्थः यथाहमार्कंडेयपुराणे नाध्मातः क्षुधितः श्रांतो नचव्याकुलचेतनः युंजी
तयोगंराजेंद्रयोगीसिद्ध्यर्थमात्मनः नातिशीते नचैवोष्णे नद्वंद्वे नानिलान्
१७ विते कालेते युंजीत नयोगंध्यानतत्परः इत्यादि [illegible]
[illegible] ॥

७२

सदानंदीटीका

योगाभ्यासैकनिष्ठस्याहाराहारादिसंयमं मुक्तेस्तजीर्यतिस्वस्यपरत्वं दे
हधारणं १ तदानसंमितंतेयंनदतिक्रम्यलोभतः अधिकंवाश्नतोना
स्तियोगोजीर्णादिदोषतः २ अपेल्याहारतोनास्तिनात्यनाहारतःसव अ
थवायोगशास्त्रोक्तमाहारंनैवलेययेत् ३ स्वयेदशनेनार्द्धंतृतीयमुदके
नत वायोःसंचरणार्थंतचतुर्थमवशेषयेत् ४ निद्रयाक्रांतचित्तस्ययोगा
भ्यासोनसंभवेत् ततोनात्यतिनिद्रालोर्योगोनात्यतिजाग्रतः ५ १६ ॥

नीलकंठीटीका

एवंयोगाभ्यासनिष्ठस्याहारादिनियममाहद्वाभ्यां नात्यश्नतइति एको
तेत्यतिशयेन अतिजाग्रतस्तथाप्यतिशब्दोयोज्यः १६ ॥

आनंदीटीका [illegible] १६ सहार्थम्

+इत्यमस्योगस्यकर्मसमाधिलक्षण रामकंठीटीका महायोगांतरवर्तिनोयथोक्ताद्वैतात्म्यज्ञान

निष्ठतयात्वेष्यतया अनुष्ठानस्यान्यदपिप रिकर्मश्रतिपादयितुमाह ॥+

+एषयथोक्तोयोगएवंविधस्यानुष्ठातुर्नैवास्तिनैवसंभवति कीदृशस्यात
र्थमश्नतः सोहितपर्यंतं भुंजानस्य तथैकांतमत्यंतमनश्नतोपिनास्ति त
थातिस्वप्नशीलस्यनित्यंनिद्रारतस्यतथासदैवजाग्रतउन्निद्रस्यापिनास्ति
अत्यशनाद्धिकाययोरत्वसूलाभिष्यंदादयोदोषाःविघ्नमकर्मयसंपाद
यंति अत्यंतानशनाच्चधातुक्षयादयःशक्तिह्रासमाचहंति अतिस्वप्नादा
लस्यादयउद्योगभंगमत्यंतनिद्राप्रहारादजीर्णादयोदोषाःमनसादिकमापा
दयंति १६ ॥

लक्ष्मी[illegible]टीका

अथध्यानयोगनिष्ठस्याहारादिनियम
माह– अत्यश्नतः सोहित्यपर्याप्तादात्मसंमितादन्नादधिकं भुंजानस्य तथैकांत
मत्यर्थमभुंजानस्यापियथोक्तयोगःसमाधिर्नास्ति तथातिस्वप्नशीलस्य

नित्यंनिद्रारतस्य तथैवजाग्रत उन्निद्रस्यापिनभवति [illegible] १६॥

पंचोलीटीका

इदानींयोगिनःआहारादिनियममुच्यते नात्यश्नतस्ति तुपुनःअत्यश्न
तःआत्मीयादाहारादधिकंभुंजानस्ययोगोनास्तितथाअतिशयेनअशील
स्ययोनास्तितथा अतिस्वप्नशीलस्ययोगोनास्तिजाग्रतस्यैवअनेनयो
गोसमाप्तिर्नास्तिकथंभूतस्ययोगोभवतीत्युच्यते १६

रसवीरसानिष्ठदीपनी॥

कर्मकौशललक्षणयोगाभ्यासरतस्याहारादिनियममाह नात्य
श्नतस्त्विति द्वाभ्यां अत्यश्नतस्तृप्तिपर्यंतंभुंजानस्ययोगःकर्मसु
प्रवृत्तिलक्षणः कर्मयोगोमनःसावधानतालक्षणश्चनास्तिन
संभवति अत्यशनाद्धिकायगौरवसत्त्वाभिष्यंदादयो दोषास्तित
मकर्मण्यंसंपादयंति तथैकांतमनश्नतोपिनास्ति अत्यंता
नशनाद्धिधातुक्षयादयः शक्तिहानिमावहंति तथातिस्वप्नशी
लस्यनित्यंनिद्रारतस्यापिनास्ति अतिस्वप्नाद्यालस्यादयश्चयोग
भंगंसंपादयंति तथासदैवजाग्रतउन्निद्रस्यापिनभवति अत्यं
तनिद्रापहाराद्धिअजीर्णादयोदोषमनस्यादिकमापादयंति १६॥

मधुभाष्य

१६॥

भाषा अनुवाद

योगाभ्यासी को आहार शयन आदिका नियम कहते हैं कि हे अर्जुन अत्यन्त अधिक आहारी और अत्यन्त निराहारी इन दोनो को भी योग जो समाधि सो नहीं होसकती है और अतिनिद्रा करने वाला तथा निद्रात्यागी इन को भी समाधि नहीं होती है १९

दोहा

योग नहि अतिभक्षसें अतिअभक्षसें नाहि नहि अतिनिद्रा उक्तसें जाग्रत अर्जुन याहि १६॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

शाङ्करभाष्य

कथं पुनर्योगो भवतीत्युच्यते युक्तेति युक्ताहारविहारस्य युक्तचेष्टस्य आह्रियत इत्याहारोऽन्नं विहरणं विहारः पादक्रमस्तौ युक्तौ नियतपरिमाणौ यस्य स युक्ताहारविहारस्य युक्तचेष्टस्य तथा युक्ता नियता चेष्टा यस्य कर्म्मसु तथा युक्तस्वप्नावबोधस्य युक्तौ स्वप्नश्चावबोधश्च तौ नियतकालौ यस्य तस्य युक्ताहारविहारस्य कर्म्मसु युक्तस्वप्नावबोधस्य योगिनो योगो भवति दुःखहा दुःखानि सर्वाणि हन्तीति दुःखहा सर्वसंसारदुःखक्षयकृद् योगो भवतीत्यर्थः ॥ १७ ॥

आनन्दगिरिकृतटीका

आहारविहारादिनियमविरहिणो योगव्यतिरेकमुक्त्वा तद्विधिमवतारयति । योगाङ्गं आचष्टे कथं पुनरित्यादिना युक्तस्य नियतत्वमर्द्धमशनस्येत्यादि विहारस्य नियतत्वं योजनान्न परं गच्छेदित्यादि कर्मसु चेष्टाया नियतत्वं वाङ्नियमादि रात्रौ प्रथमतो दशघटिकापरिमिते काले जागरणं मध्यतः स्वपनं पुनरपि दशघटिकापरिमिते जागरणमिति स्वप्नावबोधयोर्नियतकालत्वमेवं प्रयतमानस्य योगिनो भवति योगस्य फलमाह दुःखहेति सर्वाणि आध्यात्मिकादिभेदभिन्नानीत्यर्थः [illegible] यथोक्तयोगमन्तरेणापि स्वभावतो दुःखनिवृत्तिरस्तीति विशिनष्टि सर्वेति विशुद्धविज्ञानद्वारेति शेषः ॥ १७ ॥

स्वामिकृतटीका

तदेवं भूतस्य योगो भवतीत्याह युक्ताहारेति युक्तो नियत आहारो विहारश्च गतिर्यस्य कर्मसु कार्येषु युक्ता नियता चेष्टा यस्य युक्तौ नियतौ स्वप्नावबोधौ निद्राजागरौ यस्य तस्य दुःखनिवर्तको योगः सिध्यति ॥ १७ ॥

पिशाचभाष्यं

कथं पुनर्योगो भवतीत्युच्यते युक्ताहारविहारस्य आह्रियत इत्याहारोऽन्नं विहरणं विहारः पादक्रमस्तौ युक्तौ नियतपरिमाणौ आहारविहारौ

आ

गी॰
टी॰
स॰

75

^तथा

यस्य तथा नियता चेष्टा यस्य कर्मसु युक्तं स्वप्नावबोधं यस्य योगिनः योगो भवति दुःखहा सर्वसंसारदुःखक्षयकृद्योगो भवतीत्यर्थः १७॥

रामानुजभाष्यं

मिताहारविहारस्य मितायासस्य मितस्वप्नावबोधस्य सकलदुःखहाबंधनाशनो योगः संपन्नो भवति १७॥

अभिनवगुप्तकृतटीका ^नास्ति १७

परमार्थप्रपाटीका

^आहारेषु आह्रियमाणेषु विषयेषु विहारः उपयोगाय प्रवृत्तिः तस्या युक्तत्वं नात्यन्तासक्तिर्नात्यन्तपरिवर्जनं एवं सर्वत्र स्वप्नेऽपि जागरने इत्यादिष्वेषु प्रमाणत्वाद्धेद्व तु एवमत्रापि॥

किंतु युक्तेति युक्तः तिमितः आहारो भोजनं यस्य विहारश्चेष्टा येन तथा कर्मसु कार्येषु तथा युक्ता निद्रावबोधस्य पुरुषस्य योगो दुःखहा दुःखनिवृत्तिसिद्धिदो भवति १७॥

वनमालीटीका

युक्तो नियतपरिमाणो आहारविहारो यस्य अशनादि जपोपनिषत्पाठनादिषु कर्मसु युक्ता नियतकालाचेष्टा यस्य युक्तो नियतकालौ स्वप्नौ निद्रावबोधो जागरश्च यस्य तस्य योगो भवति साधनपाटवान् समाधिर्भवति नान्यस्य योगफलमाह दुःखहेति संसाररूपदुःखोच्छेदकरमर्थः १७

ऊसमवैजयन्तीटीका

किंच युक्ताहारेति युक्ताहारविहारस्य आहारश्च विहारश्चाहारविहारौ युक्तौ मितौ आहारविहारौ यस्य तस्य खलु भोजनं चगमनादिकस्येत्यर्थः युक्तचेष्टस्य कर्मसु क्रियमाणेषु नित्यनैमित्तिकादिव्यापारेषु युक्ता मिता चेष्टा वागादीन्द्रियव्यापारो यस्य तस्य तथा तस्य नियमसूपह्नचेषु तस्य कर्मेन्द्रियव्यापारस्येत्यर्थः युक्तस्वप्नावबोधस्य युक्तौ स्वप्नावबोधौ शयनजागरौ यस्य तस्य तथा तस्य ^तस्य शयनजागरस्येत्यर्थः ईदृशस्य योगिनो योगो दुःखहा दुःखानि आध्यात्मिकादीनि जन्ममरणादीनि वा हन्तीति तथा सः प्रकृतिसंसर्गजनितानाखिल[illegible]दुःखनाशको योगो भवतीत्यर्थः १७॥

मधुसूदनीटीका

एवमाहारादिनियमविरहिणो योगव्यतिरेकमुक्त्वा तन्नियमवतो योगान्वयमाह — आह्रियत इत्याहारो अन्नं विहरणं विहारः पादक्रमः तौ युक्तौ नियतपरिमाणौ यस्य तथा अन्येष्वपि अशनाजपोपनिषत्पाठादिषु कर्मसु युक्ता नियतकाला चेष्टा यस्य तथा स्वप्नो निद्रा अवबोधो जागरणं तौ युक्तौ नियत

अर्धमशनस्य सव्यंजनस्य
तृतीयमुदकस्य तु

कालो यस्य तस्य योगो भवति साधनपाटवात्समाधिः सिध्यति नान्य
स्य एवं प्रयत्नविशेषेण संपादितो योगः किंफल इत्यत आह दुःखहेति
सर्वसंसारदुःखकारणाविद्यातन्मूलनहेतुब्रह्मविद्यासाधकत्वात्समूल
सर्वदुःखनिवृत्तिहेतुरित्यर्थः वायोश्चरणार्थं तु चतुर्थमवशेषयेदिमां दिशा
युक्तो विहारस्य नियतत्वं योजनान्न परं गच्छेदित्यादि कर्मसु चेष्टाया निय
तत्वं वागादिचापलपरित्यागः रात्रेर्विभागत्रयं कृत्वा प्रथमान्त्ययोर्जाग
रणं मध्ये स्वपनमिति स्वप्नावबोधयोर्नियतकालत्वं एवमन्योऽपि योगशा
स्त्रोक्तनियमाद्रष्टव्याः [illegible] ॥

सदानंदीटीका

अत्रं विहरणं यस्य नियतेन परिमाणेन तथा परिमिता चेष्टा निद्रा जा
गरणे मिते १ सर्वदुःखलयहेतुस्तस्य योगोऽस्ति सम्मतेः अभियुक्तैस्त
थैवोक्तं योगिनां योगसिद्धये २ आहारार्थं कर्म कुर्यादनिंद्यं कुर्यादाहा
रं प्राणसंधारणार्थं प्राणाः संधार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन
भूयो न दुःखं ३ रजन्यामध्यमौ यामौ कुर्यान्निद्रां न चान्यदा विना प्रयोजनं
चेष्टां न कुर्याद्धस्तपादयोः ४ इत्याचेष्टा इत्याकर्म भवेत्कर्मेदृष्टिर्योऽदृष्टा
हितं मध्यं मितं यस्य भोजनं प्राणधारकं ५ गुरुसेवा गुरोर्यस्य कर्मणेप
चोक्तिसंक्रमः मिता निद्रा मिता वाणी यस्य भागवतस्य च ६ योगस्तस्य
सकार्यस्याज्ञानस्य स्याद्धिनाकृतः ॥ १७ ॥

नीलकंठीटीका

युक्ताः परिमिताः आहारादयो यस्य स तथा ॥ १७ ॥

आनंदीटीका १७ स्पष्टार्थम्

रामकंवीटीका

अतो युक्ताहारविहारस्य युक्तो हितमात्रकालावच्छिन्नतादृपयन्नाहारो भो
जनं विहारः संक्रमणादिर्यस्य तादृशस्य तथा कर्मसु चेष्टा इष्टाविषये युक्ता
परिच्छिन्ना वितृष्णा गीतानवसादित्वपर्यवसायिनी चेष्टा मनःकायव्यापारो
यस्य तस्य तादृशस्य तथा युक्तो यथाकालभावितास्वापोऽवबोधो निद्रा
जागरौ यस्य तस्य तादृशस्य योगिनः पद्यो योगो दुःखहा भवति अभ्यस्यमानः

गी॰ टी॰ ब॰

क्लेशंहंतिसुखेनसंपाद्यतेइत्यर्थः विकारास्तानियमोवक्ष्यंतेसः संक्षेपतं मन्यास्तुपर्वसु[illegible]योजयंति ॥ १७ ॥

लालितकी [illegible]टीका

तर्हिकथंभूतस्ययोगोभवतीत्याह — युक्तोहितमात्रःकलावछिन्नत्वाउपपन्नआहारोभोजनंविहारश्चंक्रमणादिर्यस्य तथाकार्येषुकर्मसुयुक्ताविततशरीरानवस्तारिनीचेष्टायस्य तथायथाकालभावित्वात्स्वप्नोनिद्राजागरोयस्य ईदृशस्ययोगिनःप्रयोगोदुःखहाभवति अभ्यस्यमानःक्लेशंहंतिसुखेनसंपद्यतेइत्यर्थः आहारादिसमाधिसिद्धिर्यथास्यात्तथायोगिनास्वयंपरीक्षितव्यंनात्र दृष्टेयोगवहिष्कोविशेषणानियमोतियंत्रितस्यतःसमाधेनोक्तंसर्वत्रयुक्तम् तथाचश्रुतिः यदुहात्मसमितमन्नंतदवतितन्नहिनस्ति यद्भूयोहिनास्तितद्यत्कनीयोननतदवतीति १७ ॥

पंचोलीटीका

युक्तेति युक्ताहारविहारस्यआक्रियतइत्याहारोऽन्नंतन्नियतंयुक्तंमत्स्यत्स्तीयोभागः पानीयस्यचतुर्थोवायुसंचरणस्यपदंचतुर्भागःउदरपूरयेत्योगिनानियताहारणादचंक्रमणंचतदपिनियतंकर्मसुकार्येषुनियतचेष्टस्यसकलसंसारदुःखक्षयकृत्योगोभवति १७ ॥

रामवीरमनिश्चेयिनी॥

अन्नो युक्ताहारविहारस्य युक्तोनियतआहारेभोजनेविहारेवृत्तिर्यस्य युक्तत्वंच नात्यंतासक्तिर्नात्यंतपरिवर्जनंच तथाकर्मसुकार्येषु युक्तानियतैवचेष्टायस्य तथायुक्तोयथाकालभावित्वान्न्याय्योस्वप्नावबोधौयस्य रात्रौस्वप्नोदिवाजागरणंचेति नियमः तादृशस्यचकर्मयोगिनोयोगोदुःखहाभवति दुःखंक्लेशंहंतीति क्लेशनिवर्तकःसंपद्यते १७ ॥

मधुभाष्य

१७ ॥

भाषा अनुवाद

तो फेरि कैसे पुरुष को समाधि हो सकती है इस अपेक्षा पर कहते हैं कि नियत हुए आहार औ विहार है जिसका तथा कर्मो मे परिमित चेष्टा करे व्यापार हैं जिसका और यथा उचित हैं सोवना जागना जिसका उसी को योग करे समाधि होती हैं और दुख हर करती हैं १७

दोहा

युक्ताहार व्यवहारसें युक्तकर्म करें जोय युक्तशयन जागरण
करें योग दुखहा होय १७॥

यदा विनियतं चित्तमात्मन्येवावतिष्ठते निःस्पृ-
हः सर्वकामेभ्यो युक्त इत्युच्यते तदा १८॥

शाङ्करभाष्यं

अथाधुना कदा युक्तो भवतीत्युच्यते यदेति यदा विनियतं चित्तं वि-
शेषेण नियतं संयतमेकाग्रतामापन्नं चित्तं हित्वा बाह्यचिन्तामात्मन्येव
केवलेऽवतिष्ठते स्वात्मनि स्थितिं लभत इत्यर्थः निःस्पृहः सर्वकामेभ्यो
निर्गता दृष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य योगिनः स युक्तः समाहि-
त इत्युच्यते तदा तस्मिन् काले १८॥

आनन्दगिरिकृतटीका

सफलस्य साङ्गस्य योगस्योक्तत्वानन्तरं यदाशीत्यादावुक्तकालानुवादेन
युक्तं लक्षयितुमनन्तरश्लोकप्रवृत्तिं दर्शयति अथाधुनेति विशेषेण सं-
यतत्वमेव स्फोटयति एकाग्रतामिति आत्मन्येवेत्येवकारार्थं कथयति।
हित्वेति केवलत्वमद्वितीयत्वं तस्यात्मस्थितिं विवृणोति स्वात्मनीति
चित्तस्य हि कल्पितस्यात्मैव तत्त्वं तस्य तत्त्वतः सर्वतो निवारितमपि ध्या-
ने निमग्नं तिष्ठतीति भावः तस्यामवस्थायां सर्वेभ्यो विषयेभ्यो व्यावृत्त-
तृष्णो युक्तो व्यवह्रियत इत्याह निःस्पृह इति १८॥

स्वामिकृतटीका

कदा निष्पन्नयोगः पुरुषो भवतीत्यपेक्षायामाह यदेति नियतं संयतं चि-
त्तं यस्यात्मन्येव यदा निश्चलं तिष्ठति तदा प्राप्तयोग इत्युच्यते १८॥

पैशाचभाष्यं

अथाधुना कदा युक्तो भवतीत्यत्रोच्यते यदेति यदा विनियतं चित्तं विशे-
षेण नियतं संयतं एकाग्रतामापन्नं चित्तं हित्वा बाह्यमात्मन्येव केवलेऽ-
वतिष्ठते स्वात्मनि स्थितिं लभत इत्यर्थः निःस्पृहः सर्वकामेभ्यो निर्गता स्पृहा दृ-
ष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य योगिनः स युक्तः समाहित इत्युच्यते
तदा १८॥

रामानुजभाष्यं

यदेति यदा अप्रयोजनविषयं चित्तमात्मन्येव विनियतं विशेषेण नि-
यतं निरतिशयप्रयोजनतयात्मन्येवावस्थितं निश्चलमवतिष्ठति ततः स-
र्वकामेभ्यो निःस्पृहः सन् युक्त इत्युच्यते योगार्ह इत्युच्यते १८॥

78

अभिनवगुप्तकृतटीका स्फुटार्था अस्यैव योगिनश्चित्तम् आत्मन्येव नियतम् नान्यत्किंचिदपि स्पृहयति ॥१८॥

परमार्थप्रपाटीका

अथ निष्पन्नयोगस्य परीक्षामाह यदेति विनियतं निरुद्धं चित्तम् आत्मन्ये
व निश्चलं तिष्ठति यदा च सर्वकामेभ्यो निःस्पृहो भवति तदा युक्तो निष्पन्न
योग इत्युच्यते १८ ॥

वनमालीटीका

योगसंसिद्धिकालमाह यदेति यदा यस्मिन् काले वैराग्याभ्यासाभ्यां विनिय
तं निरुद्धं विगतरजस्तमस्कं चित्तं विषयान्तरादयत्नादेव व्याहृतम् आत्मन्ये
व परमानंदघने सर्वेश्वरे मय्येवावतिष्ठते तदा तस्मिन् काले स युक्तः समा
हित इत्युच्यते कोयंः सर्वकामेभ्यो निस्पृहः निर्गत दोषदर्शनेन सर्वेभ्यो
दृष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य सः १८

कृसमवैजयन्तीटीका

ननु सिद्धयोगो योगी कदा भवेदित्यपेक्षायामाह यदा विनियतमिति य
दा यस्यामवस्थायां योगाभ्यासं कुर्वतो योगिनो विनियतं निश्चलं सच्चित्तं
मनो निरतिशयात्मैकप्रयोजनतया आत्मन्येव स्वस्वरूपे एवावतिष्ठते स्थि
रं भवति तदा तस्यामवस्थायां सर्वकामेभ्यः सकलप्राकृतभोगकामेभ्यो
निस्पृहः सन् निर्गता स्पृहा वांछा यस्मात् एवंभूतः सन् योगी युक्तः सिद्धयो
ग इत्युच्यते इत्येवं कथ्यते १८

मधुसूदनीटीका

एवमेकाग्रभूमौ संप्रज्ञातसमाधिमभिधाय निरोधभूमावसंप्रज्ञातं समाधिं वक्तुमुपक्रमते – यदा यस्मिन् काले परवैराग्यवशाद्विनियतं विशेषेण नियतं सर्ववृत्तिशून्य
तामापादितं चित्तं विगतरजस्तमस्कमन्तःकरणसत्त्वं स्वच्छत्वात् सर्वविष
याकारग्रहणसमर्थमपि सर्वतो निरुद्धवृत्तिकतया आत्मन्येव प्रत्यक्चितिम्र
नात्मानुपरक्ते वृत्तिराहित्येऽपि स्वतः सिद्धस्यात्माकारस्य वारयितुमशक
त्वाच्चित्तेनैवाधामात्मन्यनन्ते स्वदैवतिष्ठते निश्चलं भवति तदा तस्मिन् सर्ववृ
त्तिनिरोधकाले युक्तः समाहित इत्युच्यते कः यः सर्वकामेभ्यो निस्पृहः नि
र्गता दोषदर्शनेन सर्वेभ्यो दृष्टादृष्टविषयेभ्यः कामेभ्यः स्पृहा तृष्णा यस्ये
ति परवैराग्यमसंप्रज्ञातसमाधेरन्तरंगं साधनमुक्तं तथा च व्याख्यातं भा
कं [illegible]

सदानंदीटीका

यस्मिन्काले विशेषेण स्वकल्पनाविभ्रमलं मनः प्रतीच्येव निरुद्धत्वान्नि
यमेनावतिष्ठते १ दृष्टादृष्टास्तेभ्यश्च कामेभ्यो दोषदर्शनात् तस्मा
द्विनिर्गतो यस्य परवैराग्ययोगतः २ तदा समाहितो योगी सिद्धइत्यु
च्यते बुधैः ३१८ ॥

नीलकंठीटीका

निर्वाणपरमां शांतिं प्राप्तस्य लक्षणमाह यदेत्यादिभिः षड्भिः विनि
यतं विशेषेण एकाग्रतां भूमिं प्राप्य निरुद्धं आत्मनि प्रत्यगात्मन्येवावति
ष्ठते तत्र अस्मितादिरूपेण उद्दिश्यते तदा योगी सर्वेभ्यः जाग्रत्स्वप्नबीजस
माधिरूपस्थितेभ्यः लब्धापि पंचमी सार्वात्म्यप्राप्यैव तां न प्राप्य तेषु
निस्पृहो भवति तदा युक्तो निर्विकल्प इत्युच्यते १८ ॥

आनन्दीटीका

योगस्य परिपाककालमाह तदा तस्मिन्काले युक्तो योगसिद्धिं प्राप्त
इत्युच्यते [illegible] १८

एवमाहारविहारनियमयुक्तस्य सिद्धि रामकंठीटीका लक्षणं योगस्याह ॥

यदास्य योगिनः समाध्यभ्यासकाष्ठां प्राप्तस्य चित्तं विनियतं निगृहीतं
सत्संप्रज्ञातसमाधिभूमिकाः वितर्कविचारानंदास्मितानुगताः अति
क्रान्तं सत्स्थूलसूक्ष्मेषु ध्येयेषु लब्धसंयमत्वात्तानतिक्रम्य एकस्मिन्ध्ये
ये आत्मन्येव स्वभावस्यैवावतिष्ठते अवस्थितिं प्रतिष्ठां संयमं लभते तदा
तस्यां दशायां आत्मैकारामत्वात्सर्वेभ्यो व्यतिरिक्तेभ्यो भोगेभ्यः स्पृहारा
हितो निरभिकांक्षः सन् असौ युक्तः सम्यक्निर्बीजसमाधिं विलक्ष्यते त
स्यात्मध्याननिष्ठस्य योगिचित्तस्यैव योगशब्दवाच्यस्योपमामाह १८ ॥ तमा

लासिकी [illegible]टीका

अथ सिद्धयोगस्य लक्षण
माह — यदास्य योगिनश्चित्तं विनियतं विशेषेण निरुद्धं सदात्मन्येव प्रतीच्येवा
वतिष्ठते प्रतिष्ठां लभते तदासौ युक्तः प्राप्तसमाधिरित्युच्यते कीदृशो
सुव्यानेन निःस्पृहः सर्वकामेभ्य इति [illegible]
[illegible] १८ ॥

पंचोलीटीका

अथ युक्तः कदा भवतीत्युच्यते यदेति यदा विनियतं विशेषेण सं
यतं चित्तं बाह्यचिंतां हित्वा आत्मन्येव केवले यदा वतिष्ठते स्थिरं भवति।
किंच सर्वकामेभ्यः ऐहिकामुष्मिकभोगेभ्यो निःस्पृहः विगततृष्णो भ
वति तदा युक्तः समाहितचित्त इत्युच्यते १८

रामवीरसमिद्धोधिनी॥

यदेति यदा यस्मिन्काले सर्वकामेभ्यः सर्वेभ्यो दृष्टसंकल्पे
भ्यः कामएष क्रोधएषइत्यादिना पूर्वं प्रतिपादितेभ्यो विनि
यतं प्राप्त्या वर्तितं चित्तमात्मन्येव यत्नएवावतिष्ठते निश्चलं
भवति तदा निःस्पृहः शत्रुमित्रादिस्पृहारहितः केवलं स्वध
र्माचरणे एवावहितो युक्त इत्युच्यते योगारूढ इति कथ्य
ते प्रागसममता रूपयोग इतियावत् १८॥

मधुभाष्य

१८॥

भाषा अनुवाद

कौन समयमे योग सम्पन्न अर्थात् समाधि सिद्ध होगा सो क
हते हैं कि जब पुरुषका चित्त एकाग्र करके अच्छीतरह सब ओ
र से सककर अर्थात् वास करके बाहर के सकल विषयों को छो
ड़ि कर केवल आत्मामे निश्चल रूप से लगै अर्थात् अपने आ
त्मा मे स्थिति करै और सब मनोरथ की इच्छा न रहे अर्थात् दे
खी सुनी जो संसारिक विषय तिन की कामना मे स्पृहा करके
तृष्णा न उठे तब वह योगसिद्ध करके युक्त समाहित कहा जा
ताहै सोई कहा कि यदा विनियतं चित्तमात्मन्येवावतिष्ठते इ
ति १८ ॥

दोहा

जबहि निवर्तें चित्तजो आत्मामे स्थित होय निरकांक्षतसभ
कामसें युक्त कहावें सोय १८ ॥

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता योगिनो यतचित्तस्य युञ्जतो योगमात्मनः १९ ॥

शांकरभाष्यं

योगिनः समाहितं यच्चित्तं तस्योपमोच्यते यथेति यथा दीपः प्रदीपो निवातस्थो निवाते वातवर्जिते स्थाने नेङ्गते नेङ्गति न चलति सा उपमा उपमीयतेऽनयेत्युपमा योगज्ञैश्चित्तप्रचारदर्शिभिः स्मृता चिन्तिता योगिनो यतचित्तस्य संयतान्तःकरणस्य युञ्जतो योगमनुतिष्ठत आत्मनः समाधिमनुतिष्ठत इत्यर्थः १९

आनन्दगिरिकृतटीका

उपमा योगिनश्चित्तस्थैर्यस्योदाहरणमित्यर्थः उपमाशब्दस्य प्रदीपा विषयत्वसिद्ध्यर्थं करणव्युत्पत्तिं दर्शयति उपमीयत इति योगिनो य योक्तविशेषणमेव तच्चित्तस्थैर्यस्येति शेषः १९

स्वामिकृतटीका

आत्मैकाकारतयावस्थितचित्तस्योपमानमाह यथेति वातशून्ये देशे स्थितो दीपो यथा नेङ्गते न विचलति सा उपमा दृष्टान्तः कस्यात्मविषयं योगमभ्यस्यतो योगिनो यतं नियतं चित्तं यस्य तस्य निष्कंपतया प्रकाशकतया चाञ्चलं निश्चितेन तिष्ठत इत्यर्थः १९ ॥

पैशाचभाष्यं

योगिनः समाहितस्योपमोच्यते यथा दीपो निवातस्थो निवाते वातवर्जिते देशे स्थितः नेङ्गते न चलति सोपमा उपमीयतेऽनयेत्युपमा स्मृता। योगज्ञैश्चित्तप्रकारदर्शिभिः चिंतिता योगिनो यतचित्तस्य संयतान्तःकरणस्य युञ्जतो योगं समाधिमनुतिष्ठत इत्यर्थः १९

रामानुजभाष्यटी०

यथेति निवातस्थो दीपो यथा नेङ्गते न चलति अचलः सप्रभस्तिष्ठति यतचित्तस्य निवृत्तसकलेतरमनोवृत्तेर्योगिनः आत्मनि योगं युञ्जत आ। त्मस्वरूपस्य सोपमा निवातस्थतया निश्चलप्रभदीपवन्निवृत्तसकलेतरमनोवृत्तितया निश्चलज्ञानप्रभः आत्मा भासत इत्यर्थः १९

अभिनवगुप्तकृतटीका

आहारेषादिच्यमाणोऽपि विषयेषु विहार उपयोगाय यस्य युक्तिः तस्यावध
यथा दीपो न चलति एवं योगी चलनमस्य विषयादीनामर्जनादयः प्रयासाः १९

कतं नाम नामक्रियासंतपरिवर्जनं एवं सर्वत्र सप्तविधिं नायनस्माया।
मुनेः प्रमाणान्तारेण एवमन्यत्रापि अस्य च योगिनश्चित्तं आत्मन्येव नि।
यतमनानाः किंचिदपि स्पृहयते १९ ॥

परमार्थप्रपाटीका

अथात्माकारतया स्थितस्य चित्तस्योपमानमाह यथेति वातशून्येन स्था
नेन निवातेन तत्र स्थितो दीपो यथा नेङ्गते न चलति तत्र सा पदार्थमात्रं स्पष्टतया
प्रकाशयति सकृतैव सा उपमा दृष्टान्तः स्मृतः कस्य आत्मनो योगं युञ्जतो।
ऽभ्यस्यतो योगिनो विक्षेपशून्यचित्तस्य १९

वनमालीटीका

भगवत्येकाग्रस्य कृतसंतस्य चित्तस्योपमानमाह यथेति दीपचल
नहेतुना वातेन रहिते देशे स्थितो दीपो यथा नेङ्गते न चलति सोपमा स्मृ।
ता स दृष्टान्तः स्थितिनो योगस्त्वैः कस्य उपमा योगिनः भगवति संप्रज्ञा
तसमाधिमतः यतचित्तस्य नैवासंप्रज्ञातसमाधिमतः संप्रज्ञातस
माधौ भगवद्गुणादिविषयकचित्तवृत्तयो जायन्ते असंप्रज्ञातसमाधौ चा
न्तःकरणवृत्तिमात्रस्योपरामो भगवत् प्रसादात् स्वरूपाकारा वृत्तिका विद्या
याः शबलेनाविर्भूतस्वरूपभूतज्ञानेन भगवन्तं स्वस्वरूपानन्दं चानुभव
ति स्वरूपज्ञानस्याविर्भूतस्य तद्विषयकत्वस्याभावात् असंप्रज्ञातसमा
धौ वासांतरज्ञानसाधनस्याभावेन जन्यज्ञानासंभवात् अन्तःकरणवृ।
संप्रज्ञ त्तेरंगीकारे संप्रज्ञातात् तयोर्भेदस्योक्तिमात्रत्वापत्तेः असंप्रज्ञातसमा ना
धावाविर्भूत[illegible]ज्ञानानंगीकारे तस्य प्रस्तरवत्त्वापत्त्या नरर्थस्य प्र
यत्नानापत्तेः कीदृशस्येत्यत्र दृशसमाधिमतमाह आत्मनः परमात्मनः
परमात्मनो योगं युञ्जतः विषयान्तरतो वैराग्येण चित्तवृत्तीर्भगवत्यभ
गवदेकाकाराः कुर्वतः १९

ज्ञसमेवेजयन्तीटी·

निष्पन्नयोगस्य योगिनस्तद्दृष्टान्तस्थितिप्रकारमाह यथा दीप इति
यथा शाह्योऽत्र सादृश्ये यथा वह्निर्वातस्य निर्गतो वातो वायुर्यस्मात्स नि
वातो देशविशेषस्तस्मिन्स्थितः इष्टनीतिमन यथा दीपः प्रदीपः नेङ्गते न चल।
ति आत्मनः स्वस्वरूपस्य योगं ध्यानं युञ्जतः नुतिष्ठतो यतचित्तस्य निवृत्त
निखिलचित्तवृत्तेर्योगिनो निष्पन्नयोगस्य सदीपउपमा उपमानं स्मृता चिं।
न्तितो योगोपमाभिज्ञैरिति शेषः सोऽयमत्र स्तोविलोपेव माहृद्गुणाक्षिति

स्वात्मसंधिः यथावायुशून्यगृहान्तर्वर्तीसप्रभःप्रदीपोविक्षेपाद्दिस्पृ।
मनतयानचलतितथाचित्तवृत्तिनिरोधेनशाकृतशब्दादिविषयविक्षे
पहेतुभूतेनिवृत्तत्वादात्मदर्शनैकप्रयोजनत्वाच्चयोगीनचलतीत्यर्थः ॥ १९

समाधौनिर्हेतिकस्यचित्तस्योप

मधुसूदनीटीका

मानमाह – दीपचलनहेतुनावातेनरहितेदेशेस्थितोदीपोयथाचलनहेत्वभावा
न्नेङ्गतेनचलति सोपमास्मृता सदृष्टान्तःचिंतितोयोगज्ञैः कस्ययोगि।
नएकाग्रभूमौसंप्रज्ञातसमाधिमतोभ्यासपाटवाद्यतचित्तस्यनिरुद्ध
सर्वचित्तवृत्तेरसंप्रज्ञातसमाधिरूपंयोगंनिरोधभूमौयुंजतोऽनुति
ष्ठतोयम्मात्मनःकरणेनतस्यनिश्चलतयासत्त्वोद्रेकेणप्रकाशकतयाच।
निश्चलोदीपोदृष्टान्तइत्यर्थः आत्मनोयोगेफलनरशतिव्याख्यानेदार्ष्टान्ति
कालाभः सर्वावस्थस्यापिचित्तस्यसर्वदात्माकारतयाऽत्मपदवैयर्थ्यं
नहियोगेनात्माकारताचित्तस्यसंपाद्यते किंतुस्वतएवात्माकारस्य
सतोऽनात्माकारतानिवर्त्यतइति तस्माद्दार्ष्टान्तिकइतिपादत्रय
मेवात्मपदं यतचित्तस्यइतिवाभावप्रधानोनिर्देशःकर्मधारयोवाय
तस्यचित्तस्येत्यर्थः [illegible]
[illegible]ते १९

सदानंदटीका

समाहितधियःप्रत्यगात्मनिनिश्चलस्यैव योगिनोभगवानाहेथप।
मानेबोधनायतुः वातेनरहितेदेशेस्थितोदीपोयथाचलः समाःहित
धियःसोयंदृष्टान्तश्चिन्तितोबुधैः २ निरोधभूमौसततंसमाधिमनु।
तिष्ठतः सत्त्वोद्रेकेणचचित्तप्रकाशकतयाचले ३ निश्चलोदीपए
तस्यदृष्टान्तोहरिणोदितः ४ १९

नीलकंठीटीका

एकाग्रतावस्थायांयोगिचित्तस्योपमामाह यथेति नेंगतेनचल
तिहत् यतेचतच्चित्तेवयतचित्तेतस्य एकाग्रताभ्यासेचित्तेनिवा
तस्थदीपवन्नचलतीत्यर्थः आत्मनोयोगंसमाधिंयुंजतोऽनुतिष्ठतः १९

आनंदटीका

इत्थंभूतस्यस्वरूपमुपमयाह ॥

आत्मनिसंयमजयात्सुकृतेःश्रयस्भावनार्थ्यैयोगंयुंजतःयोगिनस्तो

पमा स्मृता येनेपमाप्रकारेण निवातस्थो दीपो नेंगते १९ ॥

रामकंठीटीका

आत्मनि निरुद्धे ध्येये योगं समाधिं युंजानस्य योगिनः सर्वतः प्रत्याहृतत्वात् यतं निगृहीतं चित्तं येन तादृशस्य सोपमा तदुपमानं तत्वज्ञैः स्मृतम् यथा दीपः प्रयत्नकोतिहृतवातदेशे स्थितः सन्नेंगते न प्रकम्पते तथैवात्मलंबने समाधौ स्थितं योगिचित्तं न प्रकंपते अस्य मेयवाक्यमध्याहार्यं अनेन दीपोपमानेन तु प्रत्यासन्नप्रबलविपक्षत्वाद्यत्नसंरक्षणीयत्वं योगिचित्तस्य प्रतिपादितं [illegible] ॥

लासिकी[illegible]टीका

अथ निरुद्धसर्वचित्तवृत्तिकस्यात्मनि समाहितस्य योगिन उपमानमाह — अथ वातशून्ये देशे स्थितो दीपो नेङ्गते न कंपते आत्मनो योगं समाधिमभ्यस्यतो यतचित्तस्योपरतचित्तस्य योगिनः सोपमा दृष्टांत उक्ता तत्वज्ञैः तद्वद्योगी निश्चलः स्वप्रकाशश्च तिष्ठतीत्यर्थः १९ ॥

पंचोलीटीका

योगिनः आत्मालोकायतत्वावस्थितस्य उपमानमाह यथा दीप इति यथा दीपो निवातस्थः नेंगते न चलति आत्मनः मनसो योगं समाधानं कुर्वतो यतचित्तस्य संयतमनसः योगिनो ध्यानवतः सा उपमा योगज्ञैः कथिता १९ ॥

[illegible] ॥

[illegible] निवाते वातशून्ये प्रदेशे तिष्ठतीति निवातस्थो दीपः प्रदीपो यथा नेंगते न कंपते सा योगिन उपमा स्मृता कर्मयोग्यपि दीपवन्न प्रकंपते इत्यर्थः कथंभूतस्य योगिनो यतचित्तस्य संकल्पांतरेभ्यो निवर्तितचेतसः तथात्मनः स्वस्वरूपे पंचमीयं आत्मानं बुद्धिसंस्थाव्ययोगं ध्यानादीनां युंजतः प्रयुंजानस्य अयमभिप्रायः यथा निवातस्थस्य दीपस्यैकाकारतयावस्थितस्य निष्प्रकंपतया प्रकाशमभावेन स्वकार्यस्य प्रका

प्रानस्यावयवंसिद्धिः एवंयतवित्तत्वेन शुद्धिपूर्वंप्राणादिकं
यन्नुषसंदधानस्यकर्मयोगिनः संकल्पांतरैरचात्मतया
लब्धएवसमाहितस्यावयवंजयोभवतीति १९ ॥

मधुभाष्य

१९ ॥

भाषा अनुवाद

आत्माकायाकारितरूप अवस्थित चित्त कहे आत्मरूपता को प्राप्त
तो चित्त तिसका दृष्टान्त कहते हैं कि जैसे निर्वात स्थान मे दीपशि
खा हलचल नहीं होती सोई उपमा कहे दृष्टान्त जानो यह कि।
सका दृष्टान्त है जो एको तो कहते हैं कि आत्मविषयक योगाभ्या
सी योगी पुरुष जिसका चित्त वशीभूत है उसीका चित्त निर्वात स्था
न स्थित दीपशिखा के समान आत्मामे स्थिर हैं यहां चित्त शब्द का
अर्थ अन्तः करण है सो अन्तःकरण वृत्ति भेद से चारि प्रकार
का है संकल्पात्मक कहे संकल्प रूपअन्तः करणकी वृत्ति कहे।
स्वभावको मन कहते हैं और निश्चयात्मक अन्तःकरण की वृत्ति
को बुद्धि कहते और अनुसन्धान कहे किसी वस्तुके जानने केलि
ये तद्रूप हो रहना अनुसन्धानात्मक अन्तःकरण वृत्ति को
चित्त कहते हैं और अभिमान युक्त अन्तःकरण अहंकार कहा जा।
ताहै १९॥

दोहा

ज्यौं दीपक निर्वातस्थित कंप न उपमा सोय योगी की जित
चित्तकी योगहि बुद्धि धरैं जोय १९॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया। यत्र चैवा-
त्मनात्मानं पश्यन्नात्मनि तुष्यति २० ॥

शाङ्करभाष्यं

एवं योगाभ्यासबलादेकाग्रीभूतं निवातप्रदीपकल्पं सत् यत्रेति यत्र य-
स्मिन्काले उपरमते चित्तं उपरतिं गच्छति निरुद्धं सर्वतो निवारितप्रचा-
रं योगसेवया योगानुष्ठानेन यत्र चैव यस्मिंश्च काले आत्मना समाधिप-
रिशुद्धेनान्तःकरणेन आत्मानं परं चैतन्यं सर्वतो ज्योतिःस्वरूपं पश्यन्नुपल-
भमानः स्वे एवात्मनि तुष्यति तुष्टिं भजते २० ॥

आनन्दगिरिकृतटीका

द्विविधः समाधिः संप्रज्ञातोऽसंप्रज्ञातश्च ध्येयैकाकारमनोवृत्तिभेदेन क-
ल्पितज्ञायमानः संप्रज्ञातः समाधिः तमपि पृथग्ज्ञायमाना सैव म-
नोवृत्तिरसंप्रज्ञातः समाधिस्तत्र सामान्येन समाधिलक्षणमभिधायासंप्र-
ज्ञातस्य समाधेरधुना लक्षणं विवक्षन्नाह एवमिति काले समाध्युपल-
क्षिते एवकारस्तुष्यतीत्यनेन सम्बध्यते यकारस्य सम्बन्धमाह यस्मिंश्चेति
कालस्य पूर्ववत् कर्मकारकत्वेन निर्दिष्टमात्मानं तत्पदार्थत्वेन व्याच-
ष्टे परमिति आत्मनीत्यस्य त्वंपदार्थविषयत्वमाह स्वे एवेति परमात्मा-
नं प्रतीच्येव तदभेदेनापरोक्षीकुर्वन्तुष्टिं दृश्याभावात्तुष्यत्येवेत्यर्थः तस्मि-
न् काले योगसिद्धिर्भवतीति शेषः २० ॥

स्वामिकृतटीका

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव इत्यादौ कर्मैव योगशब्देनोक्तं।
नात्यश्नतस्तु योगोऽस्तीत्यादौ समाधिर्योगशब्देनोक्तः तत्र मुख्यो योगः।
क इत्यपेक्षायां समाधिमेव स्वरूपतः फलतश्च लक्षयन् स एव मुख्यो यो-
ग इत्याह यत्रोपरमते इति सार्धैस्त्रिभिः यत्र यस्मिन्नवस्थाविशेषे योगाभ्या-
सेन निरुद्धं चित्तमुपरतं भवतीति योगस्य स्वरूपलक्षणमुक्तं तथा यत्पा-
तञ्जलसूत्रं योगश्चित्तवृत्तिनिरोध इति इष्टप्राप्तिलक्षणेन फलेन तमेव
लक्षयति यत्र यस्मिन्नवस्थाविशेषे आत्मना विशुद्धेन मनसात्मानमे-
व पश्यति न तु देहादिरूपं आत्मन्येव तुष्यति न तु विषयेषु यत्रेत्यादीनां यच्छब्दानां
तं योगसंज्ञितं विद्यादिति चतुर्थेनान्वयः २० ॥

पिशाचभाष्यं

गी॰ टी॰ ष॰

एवं योगाभ्यासबलादेकाग्रीभूतं निवातस्थदीपवत् यस्मिन्काले उपरतं चित्त म् उपरतिं गच्छति निरुद्धं सर्वतो निवारितप्रचारं योगसेवया योगानुष्ठाने न यत्र चैव यस्मिंश्च काले आत्मनात्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन् उप लभमानः स्व एवात्मनि तुष्यति तुष्टिं भजते २०॥

रामानुजभाष्यं

योगसेवया हेतुना सन्निरुद्धं चित्तं यत्र योगे उपरमते अतिशयितसुखमि दमेवेति रमते यत्र च योगे आत्मना मनसा आत्मानं पश्यन् अन्यनिरपेक्षमात्म न्येव तुष्यति २०॥

अभिनवगुप्तकृतटीका

यथा दीपो न चलति एवं योगी चलति न सम्यग्विषयादीनामर्जनात् यतः यया सा। इदानीं तस्य स्वस्वभावस्य ब्रह्मणो बहुतरविशेषणाहारेण स्वरूपं नि रूप्यते तीर्थान्तरकल्पितेभ्यो रूपेभ्यो व्यतिरेकः २०॥ यत्र मनो निरुद्धमुपरमते सत्यमेवेति

परमार्थप्रपाटीका

अथ निष्पन्नयोगस्वरूपमाह यत्रेत्यादिचतुर्भिः यत्र यस्यामवस्थायां। योगसेवया निरन्तराभ्यासेन निरुद्धं विक्षेपरहितं सत् उपरमते उपरमं विष येभ्यो व्याहृतिं प्राप्नोति यत्र च आत्मनैव शुद्धान्तःकरणेन आत्मानं पश्यन् तानन्दस्यानुभवन् आत्मन्येव स्वस्वरूपे तुष्यति स्वस्वरूपतया तिष्ठति । [illegible] तं वि। द्यादिति चतुर्थेनान्वयः २०॥

वनमालीटीका

एवं सामान्येन योगमुक्त्वा विस्तरेण निरोधसमाधिं विवरीतुमारभते यत्रेति यत्र योगसेवया योगाभ्यासपाटवेन योगपरिपाके जाते सति। चित्तं निरुद्धं एकविषयकवृत्तिप्रवाहरूपामेकाग्रतां त्यक्त्वा निरिंधनाग्नि वदुपशाम्यति हि तिकं सत् उपरमते एवं च चित्तोपरमावस्थायां आत्मना भगवत्प्रसादादविभिन्नस्वरूपत्वेन आत्मानं स्वप्रभुं भगवन्तं च पश्यन् आत्मन्या विभिन्नस्वरूपानन्दे स्वस्मिन् भगवति वा तुष्यति तं सर्वचित्तवृत्तिनिरोधरू पं योगं विद्यादिति परेणान्वयः यत्र योगसेवया चित्तं निरुद्धं सर्ववृत्तिनि रोधरूपेण परिणतं भवति यत्र च यस्मिंश्च परिणामे सति आत्मनो ऽन्तःक रणेनात्मानं प्रत्यक्चैतन्यं परमात्माभिन्नं सच्चिदानन्दमनन्तमद्वितीयं।

तितयाविर्नं य्यो

ध्यन् वेदांतप्रमाणजन्यया वृत्त्या साक्षात्कुर्वन् नात्मन्येव तिष्ठतीति
तदसत् प्रमाणेन विना चित्तरत्तेरसंभवात् वृत्तिरूपं चित्तपरिणाम
चित्तावस्थाने मानाभावात् किंचिद्विषयक वृत्तिरूप एव हि चित्तस्य प
रिणामः असंप्रज्ञातसमाधौ वृत्त्यात्मकत्वेन ज्ञानरूपक्रियाभावेनांतः
करणे मानाभावाच्च जीवपरेशयोरभेदस्य स्वरूपभिन्नस्य समाधौ भाने
संप्रज्ञातत्वहानिरभेदस्य स्वरूपात्मकत्वेन स्वरूपस्य तत्त्वमते ज्ञानाद्यधि
ष्ठानतया सत्त्वादिसाक्षितया सदाभानात्साधनवैयर्थ्यात् एकस्मिन्नवि
विशेषे सच्चिदानंदमद्वितीयमित्यादिपदानां वैयर्थ्यात् सत्त्वादीनां
ब्रह्मभिन्नानां भाने अद्वैतहानेः वेदांतजन्यवृत्तेरसंप्रज्ञातसमाधावभा
वेन वेदांतेषु केवलत्वाच्च अहमिति ज्ञानेनैव तन्मात्रस्य भानात् तदपि
कस्य वेदांतजन्यवृत्त्यावच्छ्यभानाद्वेदांतश्रवणादेरपि वैयर्थ्याच्च तवा
विशिष्टमेव चेतनं पुमर्त्तभासनेन शुद्धमिति वाच्यं विशिष्टभाने विशे
षाभानस्यावश्यकत्वात् न हि दंडिनि भाने पुरुषो न भासते योगश्चित्तवृ
त्तिनिरोधः स च द्विविधः संप्रज्ञातोऽसंप्रज्ञातश्चेति संप्रज्ञाते ध्येयाका
राभिन्नवृत्तिरसंप्रज्ञाते त्वभावः स च चित्तस्यावस्थाविशेष एव अ
भावस्याधिकरणात्मकत्वात् ननु यत्किंचिद्वृत्तिनिरोधः सदैवास्ति वृ
त्तिसामान्याभावाश्चासंप्रज्ञातसमाधौ नास्तीति योगश्चित्तवृत्तिनिरोधः
इति लक्षणमसंभवीति चेन्न यदा द्रष्टुः स्वरूपेऽवस्थानमित्यग्रिमसूत्रसा
हित्येन तत्सूत्रस्य लक्षणबोधकत्वात् द्रष्टुः स्वरूपावस्थितिहेतुश्चित्तवृ
त्तिनिरोधो हि लक्षणं तात्कालिको निरोधस्तु न तद्धेतुः संप्रज्ञात
निरोधश्चासंप्रज्ञातदशायामेव स्वरूपावस्थानहेतुः तदुक्तं स निरोधेन
संप्रज्ञातः समाधिः तस्य लक्षणं विधिनिषेधश्च सूत्रे योगश्चित्तवृत्तिनिरो
धः सर्वशब्दाग्रहणात् संप्रज्ञातोऽपि योग इत्याख्यायते तन्निरोधितक्ले
शमस्तदुःखनिवृत्त्यर्थेनात्पर्यं सत्यमेव हि पुरुषार्थं न तु दुःखाभावस्तस्या
त्मनाशेऽपि संभवेन वेदांताभिमतात्मनाशोऽपि मोक्षः स्यात् रसो वै सः रसं
ह्येवायं लब्ध्वानंदी भवति आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चन सोऽश्नुते स
र्वान् कामान् सह ब्रह्मणा विपश्चितेत्यादिश्रुत्या सर्वस्य योगश्च कालानाम
मृतत्वमश्नुते सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियमित्यादिभग

वद्युक्तं च स्मृत्वैवेत्येव पुरुषार्थत्वसिद्धेः। ननु दुःखादिविषयकसाक्षिरू
पज्ञानस्य नित्यत्वेन नाशासंभवेनानुभवनाशं विना संस्कारानुत्पत्तेः का
लांतरेऽतीतदुःखादिस्मरणानुपपत्तिरिति चेन्न ज्ञानतद्विषययोः संबंधना
शस्यैव संस्कारजनकत्वात्। संबंधनाशश्चान्यतरसंबंधिनाशात् क्वचित् २६
संबंधिनोः सतोरपि संबंधविघटकसंनिधानात् दुःखादीनां साक्षिवि
षयाणां नाशात् संस्कारोत्पत्तिः स्मरणोत्पत्तिश्च यत्र संस्कारस्मरणोत्पत्ति
स्तत्र स्वाश्रयाश्रयत्वसंबंधेन ज्ञानतद्विषयसंबंधस्य नाशः स ज्ञानतद्विषयसं
बंधनाशस्तदाश्रयो ज्ञाने तद्विषये च न तदाश्रयोऽन्तःकरणे तदेव संस्कारस्य
स्याधिकरणे सुषुप्तौ स्वरूपसुखमेव गृह्यते न तु वृत्त्या यद्यपि नित्यं ज्ञानस
पि स्वरूपभूतं नित्यं तथापि विषयताख्यसंबंधप्रयोजकस्य नाडीविशे
षस्य भगवन्मूर्तिविशेषसंबंधस्य जाग्रद्दशावभावात्संभवति विषयता
ख्यसंबंधनाशः ततश्च संस्कारः तेनांतःकरणनिष्ठेन साक्षिणा कथंत
त्र संस्कारोत्पत्तिरनुभवसंस्कारयोः समानाधिकरणत्वनियमादिति वा
च्यं ग्राह्यपरिमाणस्य साक्षिणोऽन्तःकरणनिष्ठत्वसंभवात् साक्षिणोऽ
न्तःकरणे स्वामित्वादिकमेव वा विलक्षणः फलबलकल्प्यसंबंधः न
च गृहीतेव तद्गृहीते मनस्मादिक्रमात् सुषुप्तावंतःकरणलयादेकः
२४ मेकस्य विकल्पादिरूपांतःकरणहमीनालययोः। न च सुषुप्तावंतःकरण
सत्त्वे जन्यज्ञानापत्तिः जन्यज्ञानमात्रप्रयोजकत्वगात्मसंबंधाभावात् त्व
चेन्द्रियाणां आत्मनो नाडीस्थभगवन्मूर्तेः प्रवेशात् एतेनात्मनात्मसंपरि
ष्वक्तो न बाह्यं वेद नांतरमिति श्रुतेः बाह्यस्य सविकल्पादिना ज्ञाततद्दुःखा
दिकं न च स्मात च न वेदेत्यर्थः सुषुप्त्यवस्थादौ नाडीदशाविषयतानियामकसंबं
धाभावात् न स्वप्रकाशः स्वप्ने तु दुःखसंस्कारसहकृतेन मनसा केषांचि
त्पदार्थानां केषांचित् साक्षिणा प्रकाशः जागरे च साक्षिणा केषांचित्
केषांचित् प्रमाणांतरैः प्रकाशः समाधौ स्वप्नज्ञाने मानसमेव ज्ञानं स्वप्ने
प्रज्ञाने च स्वरूपावरकाविद्यावारणनाशोऽस्तु योगसमाधिभ्नेन स्वरूपभूत
ज्ञानेन स्वस्वरूपानंदस्य परमेश्वरस्य च विषयीकरणं ततः ज्ञानस्य च स्वात्मा
मास्वस्वरूपस्य स्वस्वरूपविषयकत्वात् सुषुप्तावपि भगवन्मूर्तिविशे
षसंबंधो विषयतानियामकः सुक्तो वेदांतजन्यभगवदपरोक्षज्ञानस्याग्र

भावं धर्मो विषयतानियामकः २० ॥

कृस्नमवैजयन्ती

ननु नान्यस्तत्र रम्यादेयो योगो भवतां शोकस्तस्य किन्नाम स्वरूपं किं वा फ
लेत्यादि अपेक्षायामाह यत्रोपरमत इति योगसेवया
योगाभ्यासरूपेण हेतुना निरुद्धं निगृहीतवृत्तिकं मनश्चित्तं मनो यत्र यस्मिन्यो
गे उपरमते शान्तं भवति विषयेभ्यो निवर्तते शान्तस्वरूपं प्राप्य यत्रैव समये अनेन समाधिः
यत्र चैव च पुनः यत्र चैव यस्मिन्नेव काले मनसा विषयवासनाशून्येन मनसा आत्मा
नं स्वस्वरूपं पश्यन्नवलोकयन्सन् मनसैवानुद्रष्टव्यः इत्यपि तेन युतः
पातुं येत्यादि श्रुतेः आत्मन्येव स्वस्वरूपं पश्यन् तुष्यति अस्मादन्यत्र शरीरादौ
परं मुक्तः सत्त्वमेव भवति अस्मिन्निरवधिकानन्दजलधौ मग्नः सततमेव स्वा
दिष्ट एव संतुष्टो भवतीत्यर्थः २० ॥

एवं सामान्येन समाधिमुक्त्वा मधुसूदनीटीका निरोधसमाधिं विस्तरेण विवरीतुमा
रभते — यत्र यस्मिन् परिणामविशेषे योगसेवया योगाभ्यासपाटवेन जाते सति
चित्ते निरुद्धं एकविषयकवृत्तिप्रवाहरूपामेकाग्रतामपहाय निरिन्धना
ग्निवदुपशाम्यति निर्वृत्तिकतया सर्ववृत्तिनिरोधरूपेण परिणतं भवति य
त्र यस्मिंश्च परिणामे सति आत्मना रजस्तमोऽनभिभूतशुद्धसत्त्वमात्रे
णान्तःकरणेनात्मानं प्रत्यक्चैतन्यं परमात्माभिन्नं सच्चिदानन्दघनमनं
तमद्वितीयं वेदान्तप्रमाणजया साक्षात्कुर्वन् आत्मन्येव
परमानन्दघने तुष्यति न देहेन्द्रियसंघाते न वा तद्भोग्ये यत्र परमात्मद
र्शने सति तुष्टिहेतुभावात् तुष्यतीति यत्तत्र मनःकरणपरिणामसर्व
वृत्तिनिरोधरूपो योगविधारिति परेणान्वयः पूर्वकालश्चित्तस्य
ध्यानं समाधिनाके न्वयात् [illegible] २० ॥

सदानंदीटीका

एवं सामान्यतो योगं प्रोक्तेदानीं विशेषतः समाधिविस्तरेणाह भगवा
न्योगिनो गतिः १ परिणामविशेषे हि यस्मिन् अभ्यासपाटवात् जाते चित्ते
निरुद्धं सत्क्वाते निस्नेहदीपवत् २ यस्मिंश्च परिणामे समस्तात्मानं दं चिद्
रूपं वेदान्तमानसंजातहृत्पापरूपं पश्चिदात्मनि ३ तुष्यत्यात्मसत्त्वोदयतो
घटे नो रमादनः आनन्दः परमात्माभेदसंसर्गवर्जितः ४ स एव स्व
स्वरूपेणाव्यज्यते पुण्यकर्मभिः यावद्यावत्तमोऽपेति धर्मसमाहते

गी. तावत्तावद्धियः स्वास्थ्यं तावत्तावत्स्वोन्नतिः ६ २० ॥

टी.

नीलकंठटीका

घ. यत्रेति एवं चित्तमेकाग्रीभूतं सत् योगसेवया निरुद्धं यत्र यस्यामवस्थायामुपरमते विलीनं भवति यत्र चात्मना चित्तेन आत्मानं निर्विकल्पं पश्यन् आत्मनि तुष्यति न बाह्यार्थेन तुष्टिं भजते २० ॥

८७

आनंदीटीका

योगसेवया निरुद्धं चेतो यत्रोपरमते आत्मप्राप्त्यं विश्रांतं सत् ततः परं जेतव्याभावात् प्रयत्नं त्यजति यत्र च परस्य कारणस्याभावादात्मनैव करणेन परस्य क्रियया सिद्धं तत्तमस्य कर्मणोऽप्यभावादात्मानं पश्यन् दृष्टिक्रियया प्राप्यं कुर्वन् एवं परस्या भूमिकाया अभावादात्मन्येव विश्रामभूमौ तुष्यति विश्राम्यति तं योगसंज्ञितं विद्यादिति परेणान्वयः एतेन कर्तृकरणकर्माधिकरणानामेकात्म्यं दर्शितम् २० ॥

अथास्य परस्य योगस्य लक्षणमा-

रामकंठटीका

ह- तं योगसंज्ञितं समाध्याख्यमर्थं विद्याज्जानीयात् कं तं यत्र यस्मिन्निरुद्धं निरुद्धबहिःप्रचारतया नियमितं चित्तं योगसेवनायोगस्य समाधेः प्राप्त्यर्थमभ्यासेवनादाश्रयणादुपलब्धपरमोपेयत्वात्तत्रैव विश्रांतं सत् योगांतरविषयं प्रयत्नमुत्सृजति न स्वैर्वैयोगस्य निरुद्धत्वात् अत एव तस्यामवस्थायां योगी यत्रात्मनैवात्मानं पश्यन् स्वसंवेदनेन स्वरूपमनुभवन् आत्मनि स्वभाव एवाधिकरणभूते तुष्यति परां प्रीतिं प्रतिपद्यते तं योगं विद्यादिति संबंधः तदानीं हि निरुद्धसकलबाह्योपरागं चित्तमात्मसमापन्नं स्फुटसंवेदनलक्षणानंदमेत्य नावतिष्ठते २० ॥

अथ समाधिरूपस्य मुख्ययोगस्य लक्षणमाह

लासिकी टीका

यत्र यस्मिन्नवस्थाविशेषे योगस्य प्रत्यवमर्शात्मसमाधानस्य सेवयाभ्यासेन निरुद्धं निरुद्धबहिःप्रचारतया सर्वतो नियमितं सच्चित्तं नभसि शिलागलितजलबिंदुवत् स्वयमेवोपरमते निरुद्धव्यापारं भवति विकल्पात्मकं स्वस्वरूपं जहातीत्यर्थः तदानीं हि चित्तं विकल्परूपतां विहायात्मस्वरूपं संपद्यते अत एव यत्र चात्मनैव स्वसंवेदनेनैव स्वस्वभावं पश्यन् साक्षात्कुर्वन्नात्मन्येव स्वस्वरूप एव तुष्यति प्रीतिं भजते तं योगसंज्ञितं विद्यादिति चतुर्थेनान्वयः [आत्मन्येव तोषमाह] २० ॥

पंचोलीटीका

एवं योगाभ्यासबलादेकाग्रीभूतनिवातप्रदीपकल्पचित्तादिद्रूपं नि
रूपयन् आत्मनोवस्थाविशेषं स्वयोगस्वरूपेण निरूपयति यत्रोपरम
ते सार्द्धैस्त्रिभिः यत्र यदा चित्तं योगसेवया योगाङ्गानुष्ठानेन निरुद्धं सर्वतो
निवारितव्यापारं उपरमते उपरतिं गच्छति च पुनः यत्र आत्मना समाधि
परिशुद्धेनान्तःकरणेन आत्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन् स्विन्
आत्मनि तुष्टिं भजते २०॥

रहस्यार्थसमिद्धोधिनी

अथ योगलक्षणमाह सार्द्धैस्त्रिभिः तं ध्यानादिसंस्थानावस्था
विशेषं योगसंज्ञितं विद्या जानीयादिति वृत्तार्थेन सहान्वयः
तं कमित्यपेक्षायामाह यत्र यस्मिन् ध्यानादिसंस्थानावस्थाविशे
षे योगसेवया योगस्य विघ्नाविनयेत्यादौ प्रतिपादितस्वरू
पस्य सम्यगासेवया निरंतराभ्यासेन निरुद्धं संक
ल्पान्तरेभ्यः प्रत्यावर्तमानमभ्यस्यमानतो विनिकर्मण्येव स्थापितं
उपरमते अनुचितकर्मान्तरप्रयत्नमुत्सृजते यत्र च आत्म
नैव निश्चयात्मिकया बुद्ध्यैवात्मनि यतत्वे विषये आत्मानं धृ
तिमेव साधनं प्रपन्नविचारयन् अयं कर्मयोगी तुष्यति
संतोषमेति २०॥

मधुभाष्य

२०॥

पंचोलीटीका

एवंयोगाभ्यासबलादेकाग्रीभूतनिवातप्रदीपकल्पचित्तादिद्रूपंनि
रूपयन् आत्मनोवस्थाविशेषंसर्वयोगस्वरूपंनिरूपयति यत्रोपरम
तेत्यार्द्धैस्त्रिभिः यत्रयदाचित्तंयोगसेवयायोगानुष्ठानेननिरुद्धंसर्वतो
निवारितव्यापारंउपरमतेउपरतिंगच्छतिचपुनः यत्रआत्मनासमाधि
परिशुद्धेनांतःकरणेनआत्मानंपरंचैतन्यंज्योतिःस्वरूपंपश्यन्तस्मिन्
आत्मनितुष्टिंभजते २०॥

रसवीरसमसिद्धोयिनी

अथयोगतत्त्वलक्षणमाह सार्धैस्त्रिभिः तंप्राणादिसंयमनावस्था
विशेषंयोगसंज्ञितं विद्याज्जानीयादितिवृत्तार्थेनसहान्वयः
तंकमित्यपेक्षायामाह यत्रयस्मिन्प्राणादिसंयमनावस्थाविशे
षे योगसेवया योगस्यविद्याविनयेत्यादौ प्रतिपादितस्वरू
पस्यक्रमतोमेसस्यसेवया निरंतराभ्यासेननिरुद्धंसंक
ल्पांतरेभ्यः प्रत्यावर्तमानंराध्यमानंचित्तमंतःकरणमेवस्थापितं
उपरमते अनुचिंतकर्मांतरप्रयत्नमुत्सृजते यत्रच आत्म
नेवनिश्चयात्मिकयाबुद्ध्यावात्मनियतत्वेविषये आत्मानंपु
तिमेव साधनंयप्रयत्नविचारयन् अयंकर्मयोगीतुष्यति
संतोषमेति २०॥

मधुभाष्य

२०॥

भाषा अनुवाद

यत्सन्न्यासमिति शब्द योगं तद्विद्धि पाण्डव इसी अध्यायके इस दू
सरे श्लोक से योगही को कर्म कहा है और नात्यश्नतस्तु योगोस्ति
इस सोलहें श्लोकसे योग शब्दसे समाधि कहा तो इनमे मुख्य यो
ग किसको कहैं इस अपेक्षामे फल औ स्वरूप तथा लक्षण क्रम
से समाधि ही मुख्य हैं यह साढ़े तीनि श्लोक से कहते हैं कि।
जिस अवस्था मे योगाभ्यास से निरुद्ध कहे एकाग्रचित्त होता है औ
र जिस अवस्था मे आप अपने स्वरूप को देखते हुये सन्तुष्ट हो
ता है ऐसी जो समाधि कहे चित्तवृत्ति की एकाग्रता सोई योग है
सोई पातञ्जलसूत्र मे कहा कि योगश्चित्तवृत्तिनिरोधः २०॥

दोहा

जब दिढ बाढें चित्त जो योगभ्यास तिंहरोक जहां आत्मसें आत्म
लखें आत्मतुष्ट कहें लोक॥ २०॥

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियं वेत्ति यत्र नचैवायं स्थितश्चलति तत्वतः २१॥

शाङ्करभाष्यं

किञ्च सुखमिति सुखमात्यन्तिकमत्यन्तमेव भवतीत्यात्यन्तिकं अनन्तमित्यर्थः यत्तद्बुद्धिग्राह्यं बुद्ध्यैवेन्द्रियनिरपेक्षतया गृह्यत इति बुद्धिग्राह्यं (मिन्द्रिय) मतीन्द्रियं गोचरातीतमविषयजनितमित्यर्थः वेत्ति तदीदृशं सुखमनुभवति यत्र यस्मिन् काले नचएवायं विद्वानात्मस्वरूपे स्थितस्तस्मान्नैव चलति तत्वतः तत्वस्वरूपान्न प्रच्यवत इत्यर्थः २१॥

आनन्दगिरिकृतटीका

योगसिद्धिकाले प्रकारान्तरेण प्रकटयति किंचेति बुद्धिग्राह्यः स्वात्मभवविषयः इन्द्रियनिरपेक्षत्वात्तद्भवगम्यत्वोक्तेरतीन्द्रियमिति पुनरुक्तमिमाशंक्याह अविषयेति पदच्छेदः न चैवायं इत्यादि अपेक्षितसमरणं आत्मस्वरूप इति तस्मात्तत्वत इति सम्बन्धः नैवेत्येवकारस्यैवव्योक्तिः चकारः समुच्चया सम्बन्धनीयः यत्रेति पूर्ववत् सम्बन्धः २१॥

स्वामिकृतटीका

आत्मन्येव तोषहेतुमाह सुखमिति यत्र यस्मिन्नवस्थाविशेषे यत्तत्किमपि निरतिशयमात्यंतिकं सुखं वेत्ति (नितं) ननु तदा विषयेन्द्रियसंबंधाभावात्कुतः सुखं स्यात्तत्राह अतीन्द्रियं विषयेन्द्रियसंबंधातीतं केवलं बुद्ध्यैवात्माकारतया ग्राह्यमतएव यत्र स्थितः सन् तत्वतः आत्मतत्वान्नैव चलति २१

पैशाचभाष्यं

किंच सुखमात्यंतिकमत्यंतमेव भवतीत्यात्यंतिकं अनंतमित्यर्थः यत्तद्बुद्ध्यैवेन्द्रियनिरपेक्षतया गृह्यत इति बुद्धिग्राह्यमतीन्द्रियमिन्द्रियगोचरातीतमविषयजनितमित्यर्थः वेत्तितादृशं सुखमनुभवति यस्मिन्काले नैवायं विद्वानात्मस्वरूपे स्थितस्तस्माच्चलति तत्वतः तत्वस्वरूपात्प्रच्यवत इ(त्र)त्यर्थः २२॥

रामानुजभाष्यं

सुखमिति यत्तदतीन्द्रियमात्मबुद्ध्यैकग्राह्यमात्यंतिकं सुखं यत्र योगे वेत्ति अनुभवति यत्र योगे स्थितः सुखातिरेकेण तत्वतस्तद्भावान्न चलति २१

गी॰
टी॰
ब॰

अभिनवगुप्तकृतटी॰ आत्यन्तिकंविषयकृतकालुष्याभावात्सुखं यत्तवेत्ति २१

अपरोलाभोयतस्तदारभ्यत्राहीनोवसतियोगलब्धप्रयोगः अयत्नसुखवी
निवर्तनेवेतिवक्तव्यभावोपमितस्वार्थः २२ ॥

90

परमार्थप्रपाटीका

अथात्मसुखस्यविषयसुखातिरिक्तत्वमुत्कृष्टत्वंचदर्शयति सुखमि
ति अयंयोगीयदात्यन्तिकंसर्वोत्कृष्टंसुखंवेत्ति अनुभवतिनतुइन्द्रियग्राह्यं
केवलंबुद्ध्यैवात्माकारतयाग्राह्यमनुभवनीयं ननुविषयेन्द्रियजंसुखंवदि
त्याह अतीन्द्रियमितिविषयेन्द्रियसंबंधातीतं यथासुषुप्तौ तथाचातीन्द्रि
यपदेनविषयसुखाद्वैलक्षण्यंदर्शितं आत्यन्तिकमितिपदेनोत्कृष्टत्वंदर्शि
तमित्यर्थः अयपुनरुत्कर्षमेवव्यनक्तियत्रेति यत्रयस्मिन्सुखेनतत्त्वतो
निश्चयेनस्थितः स्थिरीभूतः सन्नैवचलति सुखान्तरेष्वापेक्षतेपरमानं
देवानंदानामंतर्भावात् नत्वक्रमथ्यात्ममीमांसायां जायमानमंतरा
त्माविषयसुखकृतेः नैकयत्नाविधास्यत् आत्यन्तवैद्रियोद्भवोऽपिगतम
पिसुखंविस्मरत्यातिलिद्दा विश्रामायात्मरूपेलतितत्त्वमलभतेनवाती।
द्रियंहित्वैसौख्येसर्वोत्तमंस्यात्परिणतिविरमात् इन्द्रियोःस्यात्सुखलाभेति २१

वनमालीटीका

आत्मसेवनोपदेहेतमाह सुखमितियत्रयस्मिन्नवस्थाविशेषे आत्यन्तिकं
परिपूर्णंसुखंयत् ननुइन्द्रियग्राह्यंभगवत्सारादाविर्भूतसुरूपतानेनैव
ग्राह्यंसुखंयोगीवेत्तिअतीन्द्रियमिन्द्रियजन्यत्वानाविषयं आत्मसुखरूपस्य
मनसामहदाग्रहेपिप्रमाणेनैतस्याविर्भूतसुरूपतानेनैवग्राह्यत्वात् अयं
तादृशसुखानुभविनायत्रावस्थायांस्थितस्तत्त्वतआत्मसुरूपात् प्रणीतेन
दर्पणान्नचलतिनेयोगसंज्ञितंविद्यादितिपरेणान्वयः यद्यपितत्सुखं
सत्त्वमावपिभासते तथापिसुषुप्तावावरणस्यताङ्गीविशेषस्यभगवन्
मूर्तिमात्रियेनकिंचिद्विशेषस्यमात्रेणकिंचिदेवसुखंस्फुरतितत्स्वरू
पभूतत्वानस्याविर्भावेऽविनाशेवसुखंभासेत २१ ॥

कृष्णमवैजयन्ती

किंचसुखमितियत्तदितिप्रसिद्धेयत्रयस्मिन्समाधियोगेआत्यन्तिकंनि
त्यंबुद्धिग्राह्यंबुद्ध्यात्माकारस्याग्रासंग्रहणयोग्यमतीन्द्रियंवासेन्द्रियवि
षयरहितंसुखमयंयोगीवेत्त्यनुभवति यत्रैवचपुनरयंस्थितःसन्ततत्त्वतः

स्वस्वरूपान्नैव चलति बाह्यविषयं नैव गच्छति २१ ॥
आत्मन्येव तोषे हेतुमाह ॥

मधुसूदनीटीका

यत्र यस्मिन्नवस्थाविशेषे आत्यंतिकमनंतं निरतिशयं ब्रह्मसुखरूपं अ-
तीन्द्रियं विषयेन्द्रियसंयोगानभिव्यंग्यं बुद्धिग्राह्यं रजस्तमोमल-
रहितया सत्त्वमात्रवाहिन्या ग्राह्यं सुखं यो वेत्ति अनुभवति यत्र च स्थि-
तोयं विद्वान् न तत्त्वत आत्मस्वरूपान्नैव चलति तं योगसंज्ञितं विद्यादिति प-
रेणान्वयः समानः आत्यंतिकमिति ब्रह्मसुखस्वरूपकथनं अती-
न्द्रियमिति विषयसुखव्यावृत्तिः तस्य विषयेन्द्रियसंयोगसापेक्षत्वा-
त् बुद्धिग्राह्यमिति सुषुप्तसुखव्यावृत्तिः सुषुप्तौ बुद्धेर्लीनत्वात् समाधौ
निर्वृत्तिकायास्तस्याः सत्त्वात् तदुक्तं गौडपादैः लीयते तु सुषुप्तौ तन्नि-
गृहीतं न लीयते इति तथा च श्रूयते समाधिनिर्धूतमलस्य चेतसो निवे-
शितस्यात्मनि यत्सुखं भवेत् न शक्यते वर्णयितुं गिरा तदा स्वयं तदंतः-
करणेन गृह्यत इति अंतःकरणेन निरुद्धसर्ववृत्तिकेनेत्यर्थः सुख-
सुखास्वादनं गौडाचार्यैः तत्र प्रतिषिद्धं नास्वादयेत्सुखं तत्र निःसंगः
प्रज्ञया भवेदिति महदिदं समाधौ सुखमनुभवामीति सविकल्पकवृ-
त्तिरूपमत्रास्वास्वादः तेन तु व्याख्यानरूपत्वेन समाधिविरोधित्वाद्योगी
नेच्छेत् अतएव नादरेण प्रज्ञया सह संगं परित्यजेन्निरुंध्यादित्य-
र्थः निर्वृत्तिकेन तु चित्तेन सुखस्वरूपानुभवस्तैः प्रतिपादितः स्वस्थं
शांतं सनिर्वाणमकथ्यं सुखमुत्तममिति स्पष्टं चैतदुपरिष्टात्करिष्य-
ते २१

सदानंदटीका

यत्रावस्थाविशेषे चित्तेनानंतरूपं सुखं विषयेन्द्रियसंयोगानभि-
व्यंग्यं धियाश्रया १ सत्त्वमात्रप्रवाहिन्या ग्राह्यं वानुभवत्ययं यत्रायं च
स्थितो विद्वानात्मतत्त्वस्वरूपतः २ नैव प्रच्यवते तं च विद्यादित्यन्वयोग्र-
ना ३ २१ ॥

नीलकंठीटीका

किंच सुखमिति आत्यंतिकं अनंतं यत्सुखं तत्केवलं बुद्धिग्राह्यं मोक्ष-
सुखवत् अतीन्द्रियं इन्द्रियागोचरं यत्र सुखे स्थितोयं न वेत्ति वेद्याभा-
वान्न किंचिदनुभवति नापि तत्त्वतश्चलति बुद्धिनाशान्न्यायमकाले च

गी॰
टी॰
५

91

लनीवेत्तिभात्तिपरंतत्त्वतोनचलति तथाचश्रुतिर्ध्यायतीवलेला
यतीवेतीवशाहमशंज्ञानाध्यानादेरतात्त्विकत्वंदर्शयति बुद्धेर्ध्यायमा
ध्यायतीवेतिलेलायमानेलेलायतीवेतिश्रुत्यर्थः यहातत्त्वतएवयत्रायंन
वैववेत्तिकिमपितेनव्युत्थानंभवति यत्रेत्यादिभिर्वाक्यैः २१॥

आनंदीटीका

यत्रायंयोगीआत्यंतिकंसुखंदुःखासंमिश्रम् अतींद्रियमिंद्रियसुखा
दतिशायितेबुद्धिग्राह्यंवेत्तिअयंयोगीयत्रयोगेस्थितः नैवच्यवति
नाधःपततितंयोगसंज्ञितंविद्यात् २१॥

रामकंठीटीका

तथायत्रात्यंतिकमनंतंनिरुपमंस्वरूपानुभवचमत्कारमयंसुखंसह
जआनंदोभिव्यज्यते कीदृशंसुखमतींद्रियंश्रोत्रादीनिंद्रियाणींद्रिया
ण्यतीतमतिक्रांतम् अतएवबुद्धिग्राह्यंतात्कालिकयाबुद्धिलक्षणा
यात्मनःस्वरूपैकव्याख्यसंवेद्यम् अयंयोगीवेत्तिजानातितंयोगंविद्या
त् तथायत्रस्थितोयस्मिंल्लब्धविश्रांतिरयंयोगीतत्त्वतःपरमात्मरूपात्
परमार्थान्नच्यवतेनविभज्यते २१॥

आत्मन्येवतोषमाह॥ लासिकी[illegible]टीका

यत्रावस्थाविशेषेयंयोगीअतींद्रियमिंद्रियैरग्राह्यंबुद्धिग्राह्यंतात्कालि
कयावेद्यस्वरूपयात्मशक्त्यासंवेद्यमात्यंतिकमनंतंयत्तत्किमप्यनिर्वाच्यं ना
सुखमानंदंवेत्ति आत्मतयोपलभते तथाचश्रुतिः समाधिनिर्धूतमल
स्यचेतसोनिवेशितस्यात्मनियत्सुखंभवेत् नशक्यतेवर्णयितुंगिरात
दास्वयंतदंतःकरणेनगृह्यते तत्रके बिंदुमात्रंत्वेश्ययात्मसमीरणमंत्योः
स्वेतमः योभवेत्परमानंदःकेनासावुपमीयतेइति तथायत्रस्थितःक
रावित्रलब्धविश्रांतिःसन्नयंयोगीतत्त्वतःपरमार्थतत्त्वान्नैवचलतिनच्या
वते अत्यानंदेपिविपरीतभावमेनंभजतेइत्यर्थः अतींद्रियमितिविष
यसुखव्यावृत्तिः नसोंद्रियसंयोगजन्यत्वात् [illegible] २१॥ ॥

पंचोलेटीका

आत्मसेवतोषहेतुमाह सुखमिति यत्तत्रात्यंतिकं निरवधि अतीं
द्रियमिंद्रियव्यापारातीतं बुद्धिग्राह्यं केवलया इंद्रियनिरपेक्षतया बु
द्ध्यैव ग्राह्यं न दीदृशं सुखं यस्मिन्काले वेत्ति तदात्मस्वरूपे स्थितः अयं।
तत्वतः परमार्थस्वरूपान्न चलति २१॥

रसाचीरसमिह्रोधिनी॥

संतोषहेतुमाह सुखमिति यत्र यस्यामवस्थायां विषे
षयात्यंतिकं सुखं निरतिशयं प्रमोदः ननु इंद्रियासंबंधे
व तत्काल आह्लादनमन्येव यदीतं संचेतयितं शक्यं अतींद्रि
यमप्रत्यक्षमिंद्रियैरनुभवितुमशक्यमिति यावत् अयं क
र्मयोगी वेत्ति जानाति यत्र चायं स्थितः कृतदृढाभ्यासोऽयं यो
गी तत्त्वतः स्वनिष्ठायान्न चलति न प्रच्यवते अथवा तत्त्व
तो निज स्वरूपात्मत्वान्न चलति प्रत्युत समायको न भवतीति
२१॥

मधुभाष्य

२१॥

भाषा अनुवाद

आत्मसन्तोष का हेत कहते हैं कि जिस अवस्था विशेष मे योगी जब कोई निरतिशय करे अनन्त निज सुख रूप का अनुभव करते हैं जो कहो कि उस अवस्था मे तो विषय सम्बन्ध का अभाव है तो सुख का सम्भव कैसे होय तिसपर कहते हैं कि विषय इन्द्रिय सम्बन्ध से रहित जो केवल आत्माकाररूपबुद्धि से ग्रहण के योग्य है इसी से उसमे स्थित होय योगी आत्मस्वरूप से विचलित नहीं होत हैं २१॥

दोहा

अति सुख जामे बुद्धि सें ग्राह्य सो इंद्री नाहि जानत योगी तत्व सें चलें स्थित जा माहि २१॥

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते २२॥

शाङ्करभाष्यं

किंच यं लब्ध्वेति यं लब्ध्वा यमात्मलाभं लब्ध्वा प्राप्य च अपरमन्यल्लाभान्तरं ततोऽधिकमस्तीति न मन्यते न चिन्तयति किंच यस्मिन्नात्मतत्त्वे स्थितो दुःखेन शस्त्रनिपातादिलक्षणेन गुरुणा महतापि न विचाल्यते २२॥

आनन्दगिरिकृतटीका

प्रकारान्तरेण प्रकृतं योगं विशिनष्टि किंचेति आत्मलाभादपरं विद्यते इति स्मरता व्याचष्टे यमात्मलाभमिति लाभान्तरं पुरुषार्थभूतं ततस्तस्मादात्मलाभादिति यावत् तं विद्यादित्युत्तरत्र सम्बन्धः यस्मिन् इत्याद्यवतारयति किंचेति अपरिपक्वयोगो यथा दर्शितेन। दुःखेन प्रच्याव्यते नैवं विचाल्यते यस्मिन् स्थितो योगी तं योगं विद्यादिति पूर्ववत् २२॥

स्वामिकृतटीका यतो

अचलत्वमेवोपपादयति यमिति यमात्मसुखरूपं लाभं लब्ध्वा ततोऽधिकमपरं लाभं न मन्यते तस्यैव निरतिशयसुखत्वात् यस्मिन्स्थितो ऽपि महता शीतोष्णादिदुःखेन न विचाल्यते नाभिभूयते एतेनानिष्टनिवृ। त्तिफलेन अपि योगस्य लक्षणमुक्तं द्रष्टव्यमिति भावः २२॥

पैशाचभाष्यं

किंच यमिति यमात्मानं लब्ध्वा प्राप्यापरं लाभं न मन्यते लाभान्तरं न मन्यते न चिन्तयति किंच यस्मिन्नात्मैकत्वे स्थितो दुःखेन शस्त्रपातादिलक्षणेन गुरुणापि गरीयसापि न विचाल्यते २२॥

रामानुजभाष्यं

यमिति यं योगं लब्ध्वा तत्सुखमेव काङ्क्षमाणो नापरं लाभं मन्यते यस्मिंश्च योगे स्थितो विरतोऽपि गुणवत्पुत्रवियोगादिना गुरुणापि दुःखेन न विचाल्यते २२॥

अभिनवगुप्तकृतटी·

अपरो लाभो धनदारपुत्रादीनां च सन्नियोगलब्ध्यप्रयोगः अप्रमत्तस्व धीर्निवर्तते चेति वक्तव्यस्वभावो यस्मिन्नर्थः २२॥ विचाल्यते विरोधेन न चाल्यते अपि तु संस्कारमात्रेणैवास्य प्रथमदशामात्रमेव चलनम् २२

गी·
टी·
ष·

९५

अथैतदेव प्रकटयति यदिति यतस्तं लब्ध्वा ततः सकाशादपरं लाभ
मप्यधिकं न मन्यते तस्यैव निरतिशयत्वात् यथा सुषुप्तिसुखप्राप्तः क
श्चिज्जनो वायव्यं प्रबोधितोपि कुप्यति तादृशस्य प्रबोधनेपि श्रमवाचश्र
वणात् श्रुतिरपि तस्मादायतं न बोधयेत् दुर्भिषज्यं ह्यस्य भवतीति ।
भाष्यं यस्मात्सुषुप्तो निरतिशयं सुखं भवति तस्मात्कारणादायतं
विलस्तहस्तपादं तिष्ठितं पुरुषं न बोधयेत् जागरेन प्रापयेत् इयतः
प्रसुप्तजागरं प्रापितस्य दुर्भिषज्यमप्रतीकारं दुःखं भवति किंच यस्मि
न्सुखे स्थितः स्थिरीभूतः सन् गुरुणा महतापि रोगशोकादिदुःखेन
न विचाल्यते स्वावस्थानं प्राप्यते २२॥

वनमालीटी·

उक्तमेवोपपादयति यमिति यं चित्तस्य निरुद्धतिकतयाल[?]ब्ध्वा।
वस्थाविशेषं पूर्णानन्दविषयकजीवस्वरूपभूतज्ञानाविर्भावकस्येश्वरप्र
सादस्य जीवे संबंधसंपादकं लब्ध्वा प्राप्य निरन्तराभ्यासेन संपाद्यापरं
लाभं ततोधिकं न मन्यते कृतं कृत्यं प्राप्तं प्रापणीयमात्मलाभान्न परं वि
द्यत इति स्मृतेः एवं विषयभोगवासनया समाधेर्विचालनेनात्मलीसु
काणीतवातमशकाद्युपद्रवनिवारणार्थमपि तत्रास्तीमाह यस्मि
न् हरिप्रसादाविर्भूतस्वरूपानन्दमये चित्तावस्थाविशेषे स्थितो योगी गु
रुणा महता शस्त्रपातादिनिमित्तेन महता दुःखेन न विचाल्यते २२॥

उत्तमश्लोकजयन्तीटी·

किंच यमिति यं योगं लब्ध्वा प्राप्य ततोधिकमतिशयमपरमं लाभं
प्राप्यविषयं न मन्यते न जानाति यस्मिन्योगे स्थितस्तत्र योगी गुरुणा
पि महता पुत्रदारादिमरणरूपेणादिदुःखेन कष्टेन न विचाल्यते शो
कमोहादिना विविधैः सन् योगी योगं न त्यजतीत्यर्थः २२॥

यत्र नैवायं स्थितश्चलति तत्त्वत मधुसूदनीटी· इत्युक्तमुपपादयति ॥

यं च निरतिशयात्मसुखव्यंजकं निरुद्धतिकचित्तावस्थाविशेषं ल
ब्ध्वा सततनाभ्यासपरिपाकेन संपाद्यापरं लाभं ततोधिकं न मन्यते ।
कृतं कृत्यं प्राप्तं प्रापणीयमात्मलाभान्न परं विद्यत इति स्मृतेः एवं वि
षयभोगवासनया समाधेर्विचलनेनात्मसुकाशीतवातमशका
द्युपद्रवनिवारणार्थमपि तत्रास्तीमाह यस्मिन्परमात्मसुखमये नि

८५

हेन्द्रिकविनावस्थाविशेषेस्थितोयोगीगुरुणामहताशस्त्रनिपातादि
निमित्तेनमहतादुःखेननविचाल्यतेकिमुतल्पेनेत्यर्थः २२ ॥

सदानन्दीटी॰

यमभ्यासातिशयाल्लब्ध्वालाभंविदद्वयं ततोनैवापरंलाभमधि
कंमन्यतेबुधः कृतकृत्यतयाप्राप्तप्राप्तव्यतयाच परमात्मसु
खेयस्मिन्स्थितोदुःखेननोमुनिः २ महताशस्त्रपातादिहेतुकेना
पिचाल्यते ३ २२ ॥

नीलकंठीटीका

दुःखेनशस्त्रपातादिलक्षणेन गुरुणामहता २२

ज्ञानेदीटीका

गुरुणापिप्रबलेनापिआध्यात्मिकादिदुःखेननविचाल्यते तदुक्तं कल्प
स्तवायवोवान्तुयांतुवैकतमर्णवाः तपंतुद्वादशादित्यानास्तिनिर्मनसः
क्षतिः २२

रामकंठीटीका

तथायंयोगमासाद्यततोधिकंतस्मादुत्कृष्टमपरमन्यंलाभमिष्टप्रा
प्तिंयोगीनमन्यतेनबुध्यते अतएवप्रागुक्तंयत्रस्थितस्तत्त्वतोनच्यवेत
इति अतएवयस्मिंस्थितःसंतृप्तोनिवृत्तेतरव्यापृतिःसन्योगीगुरुणापि
प्रबलेनापिकेनचिन्मानसेनशारीरेणवादुःखेननविचाल्यते २२ ॥

लासिकी [illegible]टीका

किंच-यंयोगंलब्ध्वासाद्य ततोधिकमुत्कृष्टमन्यंलाभमिष्टप्राप्तिंनमन्यते अ
न्यत्रसुखबुद्धिर्निवर्तत इतिवस्तुस्वभावोयं यस्मिंश्चयोगोस्थितोविश्रांतो
महतापिशीतोष्णादिदुःखेनायंयोगीनविचाल्यतेनभ्रंश्याप्यतेकिमुत
स्वल्पेन २२ ॥ [illegible] २२ ॥

पंचोलीटीका

अवलम्बनमेवोपपादयति यमिति यत्पुनःयंआत्मलाभंलब्ध्वापरं
लाभांतरंततोऽधिकमस्तीतिनमन्यतेयस्मिन् आत्मतत्त्वेस्थितःगु
रुणामहतापिदुःखेनशस्त्रपातादिलक्षणेननविचाल्यते २२

यमिति यंलब्ध्वा गुर्वादेः सकाशात्प्राप्य ततोधिकमपरंला
भंनमन्यते अयंकर्मयोगीतिशेषः यस्मिंश्चकृतस्थितिः गुरु
णापिदुःखेन नविचाल्यते २२॥

मधुभाष्य

२२॥

भाषाअनुवाद

इसीका अवलम्ब प्रतिपादन करते हैं कि आत्म आनन्द सुख जो आत्मस्वरूप लाभ लक्षित करके पायकरि और लाभ फेरि उस से अधिक नहीं गनते और जिस मे स्थित होय बड़ेबड़े पीन उस आदि दुख से भी दुखी नहीं होते अर्थात् बड़ेदुख भी उसका कुछ नहीं कर सकते हैं २२

दोहा

पाय जाहिको लाभको अधिक और नहिमान जामेस्थित
होय दुखसें गुरुसें चले न ज्ञान २२॥

तंविद्याद्दुःखसंयोगवियोगंयोगसंज्ञितं सनि
श्चयेनयोक्तव्यो योगोऽनिर्विण्णचेतसः २३॥

शाङ्करभाष्यं

यत्रोपरमते इत्याद्यारभ्य यावद्भिर्विशेषणैर्विशिष्ट आत्मावस्थाविशे
षो योग उक्तः तमिति तं विद्यात् विजानीयात् दुःखसंयोगवियोगं दुः
खैः संयोगो दुःखसंयोगस्तेन वियोगो दुःखसंयोगवियोगस्तं दुःख
संयोगवियोगं योग इत्येव संज्ञितं विपरीतलक्षणेन विद्यात् विजानी
यादित्यर्थः योगफलमुपसंहृत्य पुनरन्वयारम्भेण योगस्य कर्तव्य
तोच्यते निश्चयानिर्वेदयोर्योगस्य साधनविधानार्थं स यथोक्तफलो
योगो निश्चयेनाध्यवसायेन योक्तव्योऽनिर्विण्णचेतसा न निर्विण्णं अ
निर्विण्णं तच्चेतस्तेन निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः २३॥

आनन्दगिरिकृतटीका

तंविद्यादित्यायपेक्षितं समयन्तव्वतारयति यत्रेति तमित्यात्मावस्था
विशेषं परामृशति दुःखसंयोगस्य वियोगो वियोगसंज्ञितो युज्य
ते स कथं योगसंज्ञितः स्यादित्याशंक्याह विपरीतेति इयं हि यो
गावस्था समस्तोऽतनिखिलदुःखभेदेति दुःखसंयोगाभावो यो
गसंज्ञामर्हतीत्यर्थः उपसंहृतयोगफले किमिति पुनर्योगस्य क
र्तव्यतोच्यते तत्राह योगफलमिति प्रकारान्तरेण योगस्य कर्तव्यतो
पदेशारम्भोऽन्वारम्भः योगे प्रवृत्तानन्तरक्षणे तदुक्तां संसिद्धिमलभ
मानः संशयानो विवर्तेतेति तन्निहत्यर्थं पुनः कर्तव्योपदेशोऽन्यथानि
ति मत्वाह निश्चयेति तयोः साधनत्वविधानमेवान्तरयोजनया साधय
ति स यथेति इह जन्मनि जन्मान्तरे वा सेत्स्यतीत्यध्यवसायेन।
योक्तव्यः कर्तव्यः २३॥

स्वामिकृतटीका

यदेवंभूतोऽवस्थाविशेषस्तमाह तमित्यर्धेन दुःखशब्देन दुःखमिश्रिता
द्वैषयिकं सुखमपि गृह्यते दुःखसंयोगेन संस्पर्शमात्रेणापि वियोगो य
स्मिन्तमवस्थाविशेषं योगसंज्ञितं योगशब्दवाच्यं जानीयात् परमा
त्मनो हि क्षेत्रज्ञस्य योजनं योगः यद्वा दुःखसंयोगेन वियोगमपवर्गमूरकान्तर

गी॰
टी॰
ष॰

97

शाह्ववद्धिरुह्यलक्षणायायोगरुच्यते कर्मभिश्चयोगशब्दः नतुपातञ्जलादौपचा
रिकएवेतिभावः यस्मादेवंमहाफलोयोगः तस्मात्सएवयत्नतोभ्यसनीयः
इत्याह सनिश्चयेनेतिसार्धेन सयोगोनिश्चयेन शास्त्राचार्योपदेशजनितेन
नयोक्तव्योभ्यसनीयः यद्यपिशीघ्रंनसिध्यति तथापिद्रुतिविरसवति
वेदरहितेनचेतसायोक्तव्यः दुःखबुद्ध्याप्रयत्नशैथिल्यंनिर्वेदः २३॥

पिशाचभाष्यं

यत्रोपरमतइत्यारभ्ययावद्भिर्विशेषणैःविशिष्टआत्मा[illegible]
अवस्थाविशेषोयोगशब्दकः तंविद्यात्दुःखसंयोगवियोगं दुःखेनसंयोगो
दुःखसंयोगस्तेनवियोगोदुःखसंयोगवियोगः इत्येवंसंज्ञितंविपरीतं
विद्यादित्यर्थः योगफलमुपसंहृत्यपुनःस्वरूपेणाह¹ कर्तव्यतोच्यते नि
श्चयानिर्वेदयोःसाधनत्वविधानार्थंसयथोक्तफलोयोगःनिश्चयेनाध्य
वसायेनयोक्तव्यः अनिर्विण्णचेतसानिर्विण्ण[illegible]तच्चेतस्तेननिर्वेद
रहितेनचित्तेनेत्यर्थः २३॥

¹या ²योगस्य

मनोनिर्विण्णं

रामानुजभाष्यं

तमिति तंदुःखसंयोगवियोगमप्रत्यनीकाकारंयोगशब्दाभिधेयंज्ञा
नंतंविद्यात् सएवंभूतोयोगःइत्यारंभदशायांनिश्चयेनानिर्विण्णचेतसा
साहृष्टचेतसायोक्तव्यः २३॥

अभिनवगुप्तकृतटी॰

निर्वाणमनेनविशेषणेनतत्त्वाक्रान्तेःप्रथितसंस्कारमात्रेणोपात्तयग्रस्थमनसः
मात्मैवचलनंकरुणादिवशात्तत्स्पृष्टतया २३॥ विनष्टोवत्ताह्किंमयाप्रतिपत्तव्यमित्या
दिदुःखसंयोगस्यवियोगेयतः सचनिश्चयेनास्तिक्यजनितया श्रद्धयासर्वथायोक्तव्योभ्यसनीयः २३

परमार्थप्रपाटी॰

एवंभूतोयोगःअवस्थाविशेषःसएवयोगशब्दव्यपदेश्यइत्याह तंविद्यादि
ति तंयोगसंज्ञितंविद्यात् योगोह्यपरमात्मनोरुत्पत्तियोजने यथासु
षुप्तौपरमात्मनात्मनासंपरिष्वक्तो श्रुतिरपि एवमेवायंशारीरआत्मा
प्राज्ञेनात्मनासंपरिष्वक्तोनबाह्यंकिंचनवेदनान्तरमिति भाष्यं एव
मेवसुषुप्तिवत्शारीरःशरीरावच्छिन्नंपरमात्मनासेनजीवेनपरिष्वक्तो
आलिंगितएकी[illegible]भावमापन्नोबाह्यमान्तरंवाकिंचिन्नवेदनमानाति अथ
किंभूतंयोगं दुःखसंयोगवियोगं दुःखेनसहसंयोगोयस्यसदुःखसं
योगोविषयालम्बस्तस्यवियोगोयस्मिन् एतेनविषयसुखमपिदुःखमेवेति

तर्भूतमितिसूचितं अथयोगविनिर्वाहार्थमाहसेति एवंसयो
गःनिश्चयेननियमेनयोक्तव्यःअभ्यसनीयः अथयथयथ्याभ्यासेनशी
घ्रसिद्धिर्भवतितथापिदुःखेनमत्वानेमाह अनिर्विण्णचेतसेति न
निर्वेदप्राप्तंचेतोयस्यतेनअनुद्विग्नांतःकरणेनेत्यर्थः २३ ॥

वनमालीटीका

यत्रोपरमतइत्यारभ्यषड्भिर्विशेषैरविद्यावरणनिवर्तकप्रणो
नेदंजीवब्रह्मणाविर्भावहेतनभगवत्प्रसादसंपादकविनावस्थाविशेष
उक्तस्तेचित्तवृत्तिनिरोधंदुःखसंयोगस्यजीवदुःखसंबंधस्यवियोगं
सर्वदुःखविरोधिनंदुःखवियोगमेवयोगसंज्ञयोगसंज्ञितंवियो
गशब्दार्हमपिविरोधिलक्षणयायोगशब्दवाच्यंविद्याज्ञानीयान्
एतादृशोयोगोनिश्चयानिर्वेदयोःसाधनत्वंविनीयादृश्यनिश्चयोक्त
फलोयोगोनिश्चयेनशास्त्राचार्यवचनतात्पर्यविषयोध्यःसम्यवे
सम्यक्परमार्थेनयोक्तव्योभ्यसनीयः अनिर्विण्णचेतसापत्नावतापिका
लेनयोगोनसिद्धः किमतःपरंकष्टमेतस्मादुग्रातोनिर्वेदलक्षणेनचे
तसा इहजन्मनिजन्मांतरेवासेत्स्यति किंत्वरयेत्येवंविधप्रतीकेनमन
सेत्यर्थः २३ ॥

रसमवैजयन्ती

किंच तंविद्यादितिदुःखसंयोगवियोगंदुःखशब्देनदुःखयिकंसुख
मपिगृह्यतेतस्यदुःखपरिणामत्वात्दुःखसंयोगस्यवियोगः ध्वंसा
भावोयस्मिंस्तंयोगसंज्ञितंकेनयोगशब्दवाच्यंतानयोगंतंविद्यातज्जानी
यात्सएवंभूतोयोगः आरंभदशायांनिर्विण्णचेतसानिर्विण्णाकृतवि
षयेत्यागात्मकंवैराग्ययुक्तंचेतोयस्यसतथातेन यद्वा अनिर्विण्णचे
तसायोगाभ्यासदशायांसुमादिवाजसादपिनिर्विण्णविरागयुक्तंचे
तोयस्यतेनयोगिनानिश्चयेनायंयोगोममानुष्ठानेनसेत्स्यत्येवेतिनिश्चय
सायेनयोक्तव्योनुष्ठेयः २३ ॥

आरंभदशायां

मधुसूदनीटीका

यत्रोपरमतेइत्यारभ्यषड्भिर्विशेषणैर्योनिर्विकल्पकःपरमात्माभि
व्यंजकः चित्तावस्थाविशेषउक्तः तंचित्तवृत्तिनिरोधंचित्तवृत्तिमयम
दुःखविरोधिनंदुःखवियोगमेवसंतंयोगसंज्ञितंवियोगशब्दार्हमर्ह

गी.
टी.
घ.

९८

मपि विशेषितलक्षणो योगशब्दवाच्यो विद्यात् जानीयात् तं तं योगशा
स्त्रानुरोधात्मकं चित्तवैयग्र्यप्रतिपक्षेणेत्यर्थः तथा च भगवान् पतञ्जलिरसू
त्रयत् योगश्चित्तवृत्तिनिरोध इति योगो भवति दुःखहेति यत् प्रागुक्तं
तदेतदुपसंहृतं एवंभूते योगे निश्चयानिर्वेदयोः साधनत्वविधानाय
इदमग्र योऽनुक्तफलो योगो निश्चयेन शास्त्राचार्यवचनतात्पर्यविषयोऽर्थः
सत्यमेवेत्यध्यवसायेन योक्तव्यो अभ्यसनीयः अनिर्विण्णचेतसा एताव
तापि कालेन योगो न सिद्धः किमतः परं कष्टमित्यनुतापो निर्वेदः तद्रहि
तेन चेतसा इह जन्मनि जन्मान्तरे वा सेत्स्यति किं त्वरयेत्येवं धैर्ययुक्तेन
मनसेत्यर्थः तदेतदनिर्वेदोपादानं गौडपादैरुक्तं उत्सेक उदधेर्यद्वत् कुशाग्रेणै
कबिन्दुना मनसो निग्रहस्तद्वद्भवेदपरिखेदतः इति उत्सेक उत्सेचनं
शोषणाध्यवसायेन जलोद्धरणमिति यावत् अत्र सम्प्रदायविद आ
ख्यायिकामाचक्षते कस्यचित् किल पक्षिणोऽण्डानि तीरस्थानि तरंगवे

५३

गेन समुद्रोऽपजहार स च समुद्रं शोषयिष्याम्येवेति प्रवृत्तः स्वमुखाग्रेणै
कैकं जलबिन्दुमुपरि प्रक्षिपति तदा च बहुभिः पक्षिभिर्बन्धुवर्गैर्वार्यमा
णोऽपि नैवोपरराम यदृच्छया च तत्रागतेन नारदेन निवारितोऽप्यस्मिन् ज
न्मनि जन्मान्तरे वा येन केनाप्युपायेन समुद्रं शोषयिष्याम्येवेति प्रति
जज्ञे ततश्च दैवानुकूल्यात् कृपालुर्नारदो गरुडं तत्सहायाय प्रेष
यामास समुद्रस्त्वज्ज्ञातिद्रोहेण त्वामवमन्यत इति वचनेन ततो गरु
त्पक्षवातेन शुष्यन् समुद्रो भीतः तान्यण्डानि तस्मै पक्षिणे प्रददाविति
एवमखेदेन मनोनिरोधे परमधर्मे प्रवर्तमानं योगिनमीश्वरोऽनुगृह्णाति।
ततस्तत्पक्षिण इव तस्याभिमतं सिध्यतीति भावः [illegible]
[illegible]: २३ ॥

सरलटीका

यसो परमात्मने चित्तमिल्नारूप विशेषयोगः चित्तावस्थाविशेषोयउक्त।
त्यो चित्तसंयम १ सर्वदुःखविरोधिता दुःखयोगसंबन्धको जानीया ३
दुःखसंयोगवियोगसंज्ञमपनि २ विपरीतलक्षणले योगशब्दाभिधेय
के शास्त्राचार्यगिराभावविषयोऽर्थः सनिश्चयः धियेनि श्रुतरादेशो योगं
कार्यतयोदितः सत्यमेवेति निश्चित भयो भवेत्स्मिन्नाभवान्तरे सफला निर्वेदम
सेत धैर्ययुक्तेन चेतसा ४ योगोस्य अभ्यसनीयो यस्योक्तं सांप्रदायिकैः ३

स्मेकउदयेर्यद्दृक्शास्त्रेणैकविंशता ९ मनसो निग्रहस्तद्वेदपरि
वेदनः १२१ ॥

नीलकंठीटीका

तमिति यत्रोपरमते चित्तमित्यादिनोक्तलक्षणं तं दुःखसंयोगस्या।
पेतः करणसंबंधस्य वियोगमेव सन्तं विरुद्धलक्षणया योगसंज्ञितं।
विद्यात् योगफलमुपसंहृत्य पुनर्निश्चयानिर्वेदयोः साधनत्वं विधा।
तुं सर्वकेतमेव शातक्रतोपि पथ्यं वेदितव्यमिति यावेतु विधत्ते सइत्या
दिना स योगः निश्चयेन अध्यवसायेनानिर्विण्णनिर्वेदरहितेन चेतो
पस्यतेन योक्तव्योऽभ्यसनीयः यदा शांतो दांत उपरतस्तितिक्षुः समा
हितो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतिविहितं श्रवणानंतरं दृष्टश्रवावि।
त्वपदेश्येन शमादिषट्कसमवक्रमतो विधीयते तत्र निश्चयेनेति गुरु
वेदवाक्यादौ फलावश्यंभावनिश्चयलक्षणा श्रद्धा तन्निश्चयपदेन गृह्य
ते तथानिर्विण्णचेतसेति वैराग्येणेहामुत्रविरक्तत्वलक्षणाति तितिक्षावि
धीयते इति ध्येयं २३ ॥

स्वामीटीका

दुःखेदुःखहेतुभूतः सौसो योगः प्रकृत्यपरमहाभूतादिप्रकृतयेतैः प्रकृति
विकारैस्तैस्तैः संबंधः तस्य वियोगं विश्लेषणं तं सर्वक्लेशकद्वयोक्तविशेषण
विशिष्टं योगसंज्ञितं तं मत्प्रोक्तयोगसंज्ञं जानीयात् अनिर्विण्णचेतसाऽवि
ग्नमनसा सदभ्यासपरेण सोऽयं योगः परमनिःश्रेयससंप्राप्तिहेतुर्यवशादनि
श्चयेन योक्तव्यः अभ्यासे वाक्यार्थः परिणाममतानुसंस्कारदुःखैर्गुण
वृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः सर्वस्य योगानुविद्धेः चेतना
चेतनसाधनाधीनः सुखानुपानादिसुखानुभवः त्यागिसंगजः कर्माश
यः द्वेष्टि दुःखसाधनानि मुह्यति चेति द्वेषमोहकृतोपि कर्माशयः नानु
पहत्य भूतान्युपभोगः संभवतीति हिंसाकृतोप्यस्ति शारीरः कर्माशयः
विषयसुखं चाविद्येत्युक्तम् याभोगेष्विंद्रियाणां तृप्तेरुपशांतिस्तत्सु
खम् यालौल्यादनुपशांतिस्तद्दुःखम् नचेंद्रियाणां भोगाभ्यासेन वैतृ
ष्ण्यं कर्तुं शक्यं कुतो भोगाभ्यासमनुविवर्द्धन्ते रागाः कौशलानि चेंद्रिया
णामित्यनुपायः सुखस्य भोगाभ्यास इत्येवं परिणामदुःखता सुखाव

पं

गी॰
टी॰ ६

११

ध्यायामपि योगिनं क्लिश्नाति सर्वस्य द्वेषानुविद्धश्चेतनाचेतनसाधनाधी
नस्तापानुभव इति द्वेषजः कर्माशयः सुखसाधनानि प्रार्थयमानः काये
न वाचा मनसा च परिस्पन्दते ततः परमनुगृह्णात्युपहन्ति चेति परानुग्र-
हपीडाभ्यां धर्माधर्मावुपचिनोति स कर्माशयो लोभान्मोहाच्च भवतीति ता
पदुःखता सुखानुभावात्सुखसंस्काराशयः दुःखानुभवादपि दुःखसं
स्काराशय इत्येवं कर्मभ्यो विपाकेऽनुभूयमाने सुखे दुःखे वा पुनः कर्माश
यप्रचय इति संस्कारदुःखता तथा प्रकाशप्रवृत्तिस्थितिरूपा बुद्धिगुणाः
परस्परानुग्रहतन्त्राः भूत्वा शान्तं घोरं मूढं वा प्रत्ययं त्रिगुणमेवारभन्ते
रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते सामान्यानि त्वतिश
यैः सह प्रवर्तन्ते एवमेते गुणा इतरेतराश्रयेणोपार्जितसुखदुःखमोह-
प्रत्यया इति सर्वे सर्वरूपा भवन्तीति गुणवृत्तिविरोधदुःखता इत्यतो दुः-
खमेव सर्वं विवेकिन इति तदस्य महतो दुःखसमुदायस्य प्रभवबीज
मविद्या तस्याश्च सम्यग्दर्शनमभावहेतुरिति तद्दुःखबहुलः संसारो
हेयः प्रधानपुरुषयोः संयोगो हेयहेतुः संसारस्यात्यन्तिकी निवृत्तिर्हा
नम् हानोपायः सम्यग्दर्शनम् इत्यादियोगानुशासनोपदेशात्पुरुषप्र
धानयोर्यः संयोगः संसारहेतुः तस्य वियोगं संयमेन तत्तद्भूमिजयक्र
मात् विज्ञेयगणं सर्वेभ्यः प्रकृतिविकारेभ्यः प्रधानपर्यन्तेभ्यः पृथग्भावं
योगसंज्ञितमाह दुःखसिद्धान्तितं चात्र बुद्धिपुरुषसंयोगाभावे स्वात्यन्तिको
दुःखोपरम इति २३ ॥

रामकंठीटीका

ततो दुःखस्याप्यनेनं योगसंज्ञितमर्थं विद्यात् कीदृशं दुःखसंयोगवि
योगं दुःखं विषयेन्द्रियप्रवृत्तिजनितो रजसः क्लेशस्तेन संयोगः सो-
स्यादिष्टानां संबंधस्तस्माद्वियोगो विरहः संक्लेश्यवस्तुप्रार्थीनाजन्मना दुः-
खेन संबंधाभाव एवं वियोग इत्यर्थः स एवं लक्षणो योगः परः समाधि
र्निरुद्धतानेरलाभत्वानामहाफलहेतुः निश्चयेन निःसंदेहत्वेनानिर-
विण्णचेतसा बुद्धिमनसा योक्तव्यः समाधातव्यः अलब्धभूमिकस्य
हि योगिनः प्रथमं संदेहः आरुरुक्षतत्त्वाभ्यासदशायां क्लेशाः संभाव्य
ते इति निश्चयेनं निर्विण्णचेतसा योक्तव्य इत्युक्तम्

[illegible] २१ ॥

यएवंभूतोवस्थाविशेष लासिकी [illegible]टीका लमाहार्थेन ॥

तमुक्तविशेषणमर्थं योगसंज्ञितं योगशब्दवाच्यं विद्याज्जानीयात् कीदृशं
दुःखेन त्रिविधेन राजसेन क्लेशेन संयोगः संसारदशायां संबंधस्तस्य वियो
गो विरहो यस्मात्तम् वियोग एव योग इति विरोधलक्षणया परमात्मनात्मन
स्संयोजनं योग इति योगशब्दस्याभिधाव्यापारः यत एवं वियोगमहाफलो
यं योगः ततः स योगः परः समाधिर्निश्चयेन शास्त्राचार्योपदेशजनितेन यो
र्द्धव्योभ्यसनीयः केनानिर्विण्णचेतसा गुरुणेन यद्यपि शीघ्रं नासिद्ध्यति त
थाप्यनिर्विण्णमनुद्विग्नमपि यथा मोह दुर्जनतरं अथवा दुःखबहुलं संसारं प्रति
निर्विण्णं विरक्तं चेतो यस्य तेन [illegible]
[illegible] २३ ॥

पंचोलीटीका

एवं योगस्वरूपमुक्त्वा तस्य महाफलदर्शनेनावश्यकर्त्तव्यत्वमभ्यसनी
यत्वं चाह तं विद्यादिति तं योगसंज्ञितं दुःखसंयोगवियोगमकलदुःखाभा
वरूपं विद्यात् स यथोक्तफलयोगः निश्चयेन निश्चय एवमनिर्विण्णचेतसात्मग्ला
निरहितेन चेतसा सोयमेन योक्तव्यः दुःखशब्देन दुःखमिश्रितं त्वाहेमप्यैके
स्वखमपि गृह्यते दुःखस्य संयोगेन स्पर्शमात्रेणापि वियोगो यस्मिंस्तमव
स्थाविशेषं योगसंज्ञितं योगशब्दवाच्यं जानीयात् परमात्मनात्मनस्संयो
जनं संयोगः यद्वा दुःखसंयोगेन वियोग एव मुख्यो कानरशब्दवाच्यस्तेन ल
ण योगस्तावत्कर्माणि योगशब्दस्तदुपायत्वादौपचारिकः चेति भावः २२

गणवीरसमिद्धोधिनी ॥

तं योगसंज्ञितं विद्यादित्यन्वयः कीदृशं तं दुःखसंयोगो विरहो
येन तं सर्वदुःखेभ्यो विमोचकमित्यर्थः प्राणादिसंधानादिना दृ
तेषु प्रत्युत्पन्नजनितदुःखस्य हानिरत्वरं भाविनीति भावार्थः अ
तस्य समाप्तफलत्वान्तो योगो निश्चयेन योक्तव्य उपेयः स्वोचितकर्म॰

प्रवृत्तेनत्वाश्रियप्रवरेरमेतियोषः कथंभूतेननिर्विलवेजसा नि
विलसं संकल्यांतरेरमेत्यर्थः २३॥

मधुमाधव

100

२३॥

भाषा अनुवाद

ऐसी दुखसंयोग के अभाव अवस्था विशेष को योग संज्ञा जानो
दुखशब्द से विषय सुख जो हैं उनको ग्रहण करनेहैं अर्थात् जि
स अवस्था मे दुख का लेशमात्र भीनहीं है सोई अवस्था योग है
इसमे थिरचित्त होय कर निश्चय से योग अभ्यास करना अवश्य।
ही कर्त्तव्य है निर्वेद शब्दका अर्थतो यत्न करने मे शैथिल्य है सो
ई कहा कि अनिर्विण्णचित्त होय अर्थात् शैथिल्य छोड़ि यत्नपूर्वक
अभ्यास करै २२

दोहा

तिह दुखनाशक जानिए योगनाम जिह कोय निश्चयजुत
मैं होत सो योग अकाम चित सोय २३॥

101

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः॥ २४॥

शाङ्करभाष्यं

किञ्च संकल्पेति संकल्पप्रभवान् संकल्पः प्रभवो येषां कामानां। ते संकल्पप्रभवाः कामास्तान् त्यक्त्वा परित्यज्य सर्वानशेषतो निर्लेपेन किञ्च मनसैव विवेकयुक्तेनेन्द्रियग्राममिन्द्रियसमुदायं। विनियम्य नियमनं कृत्वा समन्ततः समन्तात् २४॥

आनन्दगिरिकृतटी०

एतस्य योगस्य कर्तव्यत्वमिति प्रतिज्ञातानीते किञ्चेति केन क्रमेण। कर्तव्यत्वमित्यपेक्षायामाह संकल्पेति संकल्पः शोभनाध्यासः सर्वा। नित्युक्त्वा पुनरशेषत इति पुनरुक्तिरिमाशंक्याह निर्लेपेनेति यथा शेषो न भवति तथा सर्वेषां कामानां शोभनाध्यासाधीनानां त्याग स्य योगानुष्ठानशेषत्वविवेकयुक्तेन मनसा करणसमुदायस्य स र्वतो नियमनमपि तत्र शेषत्वेन कर्तव्यमित्याह किंचेति २४

स्वामिकृतटीका

किंच संकल्पेति संकल्पात्प्रभवो येषां तान्कामान्प्रतिकूलान् सर्वान्का मानशेषतः सवासनांस्त्यक्त्वा मनसा विषयदोषदर्शिना सर्वतः प्रस रन्तमिन्द्रियसमूहं विशेषेण नियम्य शनैः शनैरुपरमेदित्युत्तरेणान्व यः २४॥

पैशाचभाष्यं

किंच संकल्पः प्रभवो येषां कामानां ते संकल्पप्रभवाः कामास्तांस्त्य क्त्वा परित्यज्य सर्वानशेषतो निःशेषं निर्लेपं किंच मनसैव विवेकयु क्तेनेन्द्रियग्राममिन्द्रियसमुदायं विनियम्य नियमनं कृत्वा समन्ततः सम न्तात् २४

रामानुजभाष्यं

स्पर्शजाः संकल्पजाश्चेति द्विविधाः कामाः स्पर्शजाः शीतोष्णादयः। संकल्पजाः पुत्रपौत्रक्षेत्रादयः ततः संकल्पप्रभवान्स्वरूपेणैव त्यक्तुं शक्यांस्तान्सर्वान्मनसैवतदनन्वयानुसंधानेन त्यक्त्वा स्पर्शजेषु वर्ज नीयेषु तन्निमित्तहर्षद्वेषौ त्यक्त्वा समन्ततः २४॥

प्रतिनिर्विण्णस्य पेयमाप्नोति दृढतरं संसारं दुःखबहुलं प्रति निर्विण्णं चेतो यस्य कामानामुपायत्याग उपायः संकल्पत्यागस्तमाह +

श्रीअभिनवगुप्तकृतटीका

+ मनसैव न व्यापारेण परमेण धृतिगृहीतया क्रमात्क्रमम् अभिलाषक्षयः । एवं न तूष्णीं किंचिदपि न चिन्तयेदिति विषयाणां त्यागग्रहणादिकं यथा त्वन्यैर्व्याख्यातं न किंचिदपि चिन्तयेदिति तत्रासम्भवन्नुचितं शून्यवादप्रसंगात् २५ ॥ २५ ॥

परमार्थप्रपाटीका

एवमभ्यासयोगमुक्त्वाधुना राजयोगं वक्तुमारभते संकल्पेत्यादिना । संकल्पात्प्रभव उत्पत्तिर्येषां ते तथाभूता ये कामास्तान्सर्वानशेषतः त्यक्त्वा मनसाभिः सहस्थका तत्रापि कारणमाह मनसेति समन्ततः प्रसरन्तं तमनेकमिन्द्रियग्रामं समग्रं मनसैव नियम्य तदुपसंहरणादिप्रयासैः तद्वके नयाहि वेतस्वमितन्तलतोऽपि देहेन्द्रियाणि नेत्ररूपप्रकाशने व यत्रकृतापूपविशन्ति सेविकारयस्वस्वनिदानमेतदिति २४ ॥

वनमालीटीका

किमभ्यसनीयं तत्राह संकल्पेति संकल्पो दुष्टेष्वपि विषयेषु शोभनत्वादर्शनेन शोभनत्वभ्रान्तिस्तस्मात्संकल्पादिर्येषां दिर्येषां दिति कामाभावेति तान् शोभनत्वभ्रान्तिजनितान् विचारजन्याशोभनत्वनिश्चयेन शोभनत्वभ्रान्तिनिवृत्त्या दृष्टेष्वश्रुतेषु च वेदनवनितादि दृष्टदृष्टेषु पारिजाताप्सरः प्रभृतिषु वान्तपायसवत्स्वतपवक्त्रस्य पर्यंतानशेषतः सवासनांस्त्यक्त्वा अतएव कामपूर्वकत्वादिन्द्रियप्रवृत्तेस्तन्नाशे मनसैव विवेकयुक्तेन मनसैवेन्द्रियग्रामं च तत्तदिमियमेभ्यः समन्ततः सर्वेभ्यो विषयेभ्यो विनियम्य शनैः शनैरुपरमेदित्यन्वयः २५ ॥

मधुसूदनीटीका

नन्वीदृशं योगमारभमाणो योगी प्रथमं किं कार्यं करोतीत्यपेक्षायामाह संकल्पप्रभवान्निश्चियेऽपि कामाः द्विविधाः संकल्पप्रभवाः स्पर्शप्रभवाश्च तथापि स्पर्शप्रभवानां कामानां मनोऽधीनत्वाभावात्तेऽपि संकल्पप्रभवा एव अतः संकल्पप्रभवान् संकल्पात्मनोवृत्तिविशेषात्प्रभवः उद्भवो येषां तेन तथाभूतान् संकल्पजातान् देहेन्द्रियादीनां स्पर्शादीन्स्पर्शांश्च शीतोष्णादीन्सर्वानैहिकामुष्मिकभोगविषयानशेषतो वासनासहितान् कामान् विषयाभिलाषरूपान् स्पकापरित्यज्य मन

मेव विषयदोषदर्शिनैवेंद्रियग्रामं करणसमूहं समंततः सर्वस्मा
द्विषयात् विनियम्य संकोच्य क्रमाच्छनैः शनैरुपरमेदित्युत्तरेणा
न्वयः २४

किं कृत्वा योगोऽभ्यसनीयः॥

मधुसूदनीटीका

संकल्पोऽदुष्टेष्वपि विषयेषु शोभनत्वादर्शनेन शोभनाध्यासः त

दिदं मे स्या

स्माच्च संकल्पादिदं मे स्यादिदं मे वं भूयादिति कामः प्रभवंति तानशोभनाध्य
सप्रभवान् विषयाभिलाषान् विचारजन्याशोभनत्वनिश्चयेन शोभ
नाध्यासबाधात् दृष्टेष्विव स्रक्चंदनवनितादिष्विवादृष्टेष्वपि स्वर्गलोकपारि
जाताप्सरः प्रभृतिषु श्ववांतपायसवत् त्यक्त्वा सर्वान्ब्रह्मलो
कपर्यंतानशेषतः निरवशेषान् सवासनान् यस्मादेव कामप्र
वर्तकत्वादिंद्रियप्रवृत्तेस्तदपाये मतिविवेकयुक्तेन मनसैवेंद्रियग्रा
मं चक्षुरादिकरणसमूहं विनियम्य समंततः सर्वेभ्यः विषयेभ्यः प्र
त्याहृत्य शनैः शनैरुपरमेदित्यन्वयः २४ ॥

सदानंदीटीका

दृष्ट्वा संसारमागारमापदां प्रीतिजन्मनां विरज्याल्पसुखेभ्यश्च भो
गेभ्यो मतिमान्नरः १ कृत्वापादरतो भक्त्या सद्गुरुं प्राप्य शांतिदं लब्ध्वा
ततः परब्रह्मोपदेशं योगमभ्यसेत् २ यावद्ब्रह्मात्मध्यानेन मतिर्ह्यो
निश्चलापरा धियो न विंदते तावद्योगो योक्तव्य आदरात् ३ प्रतिष्ठा
यो मस्मिञ्जायेत कृतकृत्यो भवेन्मुनिः एतद्धि नियत्याप्याह भगवान्भूत
भावनः ४ इदं मे स्यादिदं मे स्यादिति संकल्पजातिमान् शोभनाध्यास
जान्कामान्दुष्टेष्वपि विषयेष्वपि ५ सकामो भोगाभिलाषाख्यान्दोषदृष्ट्या
प्यशेषतः सर्वान्द्रुहिणलोकांतान्त्यक्त्वा मनसा सहितान्मुनिः प्रत्याहृत्यें
द्रियग्रामं विषयेभ्यः समंततः कामापाये विवेकेन प्रकाशितयानया
तया ।२४ ॥

नीलकंठीटीका

शमदमोपरमसमाधानक्रमेणाभ्यासक्रमं द्वयेन विधत्ते संकल्पेति
संकल्पः इदं मे भूयादिति चेतोवृत्तिः ततः उद्भवो येषां तान् कामान् का
म्यमानान् विषयान् अशेषतो वासनोच्छेदपूर्वकं संकल्पनिरोधेन

सक्ता एतेनांतरिंद्रियनिग्रहलक्षणः शमउक्तः बाह्येंद्रियनिग्र
हलक्षणंममाह मनसैवेति विषयदोषदर्शिना मनसैव सर्वतः
सर्वप्रकारेण श्रोत्रादिकमिंद्रियग्रामं समंततः सर्वेभ्यो विषयेभ्यो वि
नियम्य उपरमेदित्यन्तरेणान्वयः २४ ॥

आनन्दीटीका

एवं लक्षणमुक्त्वा योगसिद्ध्युपायमाह ॥ २४ स्पष्टार्थम्

रामकण्ठीटीका

क्रमेणैतद्व्याख्यायते २४ ॥ अग्रिमश्लोके उक्तार्थम् ॥ एवं बाह्यविषयपरिहारक्रमे
णचित्तवृत्तिनिरोधलक्षणं समाधिसिद्धिमभिधाय पुनरपि प्रकृत
कर्मयोगक्रममेव समाश्रयति सिद्धिं प्रदर्शयितुमा

लासिकी [illegible]टीका

+एवं श्रुत्वा योगलक्षणमु
क्तास सर्वशास्त्रसारभूतमु
पदेशं सर्वं सश्रुत्वा योगश्रा
स्तुपायं सांतिम् श्लोकद्वये
नाह ॥+

+बाह्याविषयाइंद्रियनिरोधेत्यक्त्वा एव संकल्पश्चित्तवृत्तिः प्रभवो यो
निर्येषां तान् सर्वान् कामान् विषयान् अशेषतः संस्कारस्याप्यभावेन सवा
सनांस्त्यक्त्वा तथेंद्रियग्राममकरणवर्गं समंततः सर्वेभ्यो विषयेभ्यो म
नसैवात्ममननात्मकेन विनियम्य निगृह्य आत्ममननमेवेंद्रियाणां
निग्रहस्य तदर्थमवधारणं अन्यथेंद्रियनिग्रहः शनैः शनैः प्रयत्नेनापि दुः
शकः २४ ॥

पंचोलीटीका

किंच संकल्पेति संकल्पप्रभवात्वेन प्रसिद्धा कामना ध्यानं संकल्पः
प्रभवो येषां तान् सर्वान् अशेषतः सवासनान् कामान् अभिलाषान् त्य
क्त्वा विवेकयुक्तमनसैव इंद्रियग्राममिंद्रियसमुदायं समंतात् विनि
यम्य उपरमेत् २४

रणवीरसमिद्धोयिनी ॥

एतदेव विवृणोति संकल्पप्रभवानिति सर्वान् कामान् का
म्यन्ते इति कामाः पुत्रमित्रादयो विषयास्तान् अशेषतः साक
ल्येन त्यक्त्वा मनसः सकाशात् दूरीकृत्य चेतो विषयान्संपाद्य कु
त्संभूतान् संकल्पप्रभवान् संकल्पाः पापाशंकायाः प्रभव
ति येभ्यस्तान् स्वकार्यप्रच्यावक कथं भीष्ममहमित्यादि रूप

दुष्टसंकल्पोत्पत्तिनिमित्तभूतानित्यर्थः तथा मनसा सर्वेंद्रिय
ग्रामं समंततो विषयजाताद्विनियम्य प्रत्यावर्त्य स्ववशे संस्था
प्येत्यर्थः धृतिगृहीतया धैर्यैर्लोकविषयीकृतया बुद्ध्या निश्च
येन शनैःशनैरुपरमेत् शास्त्रसमीपाद्विरमेत् लक्ष्यं पात
यितेति शेषः मनश्चित्तमात्मसंस्थं प्रयत्नविषयं कृत्वा किंचि
दपि गुरुत्वश्चादिकं न चिंतयेत् २४ २५॥

मधुभाष्य

२४॥

भाषा अनुवाद

संकल्प से प्रभव कहे प्रगट जो योग के प्रतिकूल कहे विरोधी । बाधकरूप सकल कामना उन को वासना समेत त्याग करिके विषयों के दोष देखना हुआ पुरुष मन के द्वारा सर्वत्र धावमान इन्द्रियों को सब ओर से दमन करिके योगाभ्यास करै अथवा सर्वत्र धावती हुई इन्द्रियों को मन हीं से रोक कर योग करै २४

दोहा

सभी कामनात्याग तिह संकल्प हि सें जो होय मनसहइं
द्रियग्रामको रोके सभसें सोय २४॥

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया आत्म-
संस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् २५॥

शाङ्करभाष्यं

शनैरिति शनैः शनैर्न सहसा उपरमेत् उपरतिं कुर्यात् कया बु-
द्ध्या किंविशिष्टया धृतिगृहीतया धृत्या धैर्येण गृहीतया धैर्येण यु-
क्तयेत्यर्थः आत्मनि संस्थिते आत्मैव सर्वं न ततोऽन्यत् किंचिदस्ती-
त्येवमात्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् एष योगस्य पर-
मो विधिः तत्रैवमात्मसंस्थे मनः कर्तुं प्रवृत्तो योगी २५॥

आनन्दगिरिकृतटीका

कामस्यागद्वारेणेन्द्रियाणि प्रत्याहृत्य किं कुर्यादिति शङ्कितारं प्र-
त्याह शनैःशनैरिति सहसा विषयेभ्यः सकाशादुपरमे मनसो न स्वा-
स्थ्यं सम्भवतीत्यभिप्रेत्याह न सहसेति तत्र साधनं धैर्ययुक्तां बुद्धिं-
माह कयेत्यादिना भूम्यादीन्यव्याकृतपर्यन्ताः प्रकृतीरहो पूर्वत्र
पूर्वत्र धारणं कृत्वानन्तरानन्तरक्रमेण प्रविलापयेदितिभावः अव्यक्तमा-
त्मनि प्रविलाप्य आत्ममात्रनिष्ठं मनो विधाय चिन्तयितव्याभावादति
स्वस्थो भवेदित्याह आत्मेति तत्संस्थितिमेव मनसो विवृणोति आ-
त्मैवेति योगविधिमुपक्रम्य किमिदमुक्तमित्याशङ्क्याह एष इति य-
न्मनसो नैश्चल्यमिति शेषः ननु मनसः शब्दादिनिमित्तानुरोधेन।
रागद्वेषवशादत्यन्तचञ्चलस्यास्थिरस्य तत्र तत्र स्वभावेन प्रवृत्तस्य
कुतो नैश्चल्यं नैश्चल्याभावे चेति तत्रेति योगप्रारम्भः सत्यमर्थः एवश-
ब्देन मनसैवमादिरुक्तप्रकारो गृह्यते २५॥

स्वामिकृतटीका

यदि त्वप्राक्तनकर्मसंस्कारेण मनो विचलेत् तर्हि धारणया स्थिरीकु-
र्यादित्याह शनैरिति धृतिर्धारणा तया वशीकृतया बुद्ध्या आत्मसंस्थं आ-
त्मन्येव सम्यक्स्थितं निश्चलं मनः कृत्वा उपरमेत् तच्च शनैः शनैरभ्या-
सक्रमेण न तु सहसा उपरमस्वरूपमाह न किंचिदपि चिंतयेत् नि-
श्चले मनसि स्वयमेव प्रकाशमानपरमानंदस्वरूपो भूत्वा आत्मध्याना-
दपि निवर्ततेत्यर्थः २५॥

गृहीतया

गी.
टी.
ष.

106

पैशाचभाष्यं

शनैः शनैः न सहसा उपरमेदुपरतिं कुर्यात् कया बुद्ध्या धृतिगृहीतया धैर्ययुक्तयेत्यर्थः आत्मसंस्थमात्मनि स्थितमात्मैव सर्वं न ततोऽन्य। किंचिदस्तीत्येवमात्मसंस्थं मनः कृत्वा न किंचिच्चिंतयेत् एष योगस्य परमो विधिः तत्रैवात्मसंस्थं मनः कृत्वा प्रवृत्तो योगी ॥ २५ ॥

रामानुजभाष्यं

सर्वस्माद्विषयात्सर्वेंद्रियग्रामं विनियम्य शनैः शनैर्धृतिगृहीतया विवेकविषयया बुद्ध्या सर्वस्मादात्मव्यतिरिक्तादुपरम्यात्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥ २५ ॥

५४

अभिनवगुप्तकृतटी· पूर्वश्लोके उक्तोऽर्थः

मनसैव तत्पारोपरमेण ॥ २५ ॥

परमार्थप्रपा टी·

अथास्यापि निर्वाहमाह शनैः शनैरिति धृतिधीरमानतया गृहीतया नियमितया निश्चयात्मिकबुद्ध्या कृत्वा संकल्पात्मकं मनः बलादात्मसंस्थं कृत्वा आत्मातिरिक्तं न किंचिदपि चिंतयेत् एवं शनैः शनैरभ्यासक्रमेण न सहसा उपरमेत् वासनाभ्यो वा उपरमं प्राप्नुयात् तदुक्तं योग नारावल्यां अग्रसमर्थो यदाभ्यासे राजयोगेन दाचरेत् येन स्थानं या स्तु४ वस्था सा प्रकैवोन्मनी भवेत् १ प्रसरत्संकल्पपरंपराणां संकोचनेन संततमात्मावधानः आलेवनाशादपवीयमाने शनैः शनैः शांतिमुपैति चित्तः २ प्रकाशमाने परमात्मभानौ नश्यत्यविद्यातिमिरे समस्ते अहो बुधा निर्मलदृष्टयोपि किंचिन्न पश्यंति जगत्स्वरूपमिति ॥ २५ ॥

वनमालीटीका

धृतिर्धैर्यम् अविच्छिन्नता तया बुद्ध्या करणेन बलान्निग्रहरूपया शनैः शनैर्गुरूपदिष्टमार्गेण उपरमेन्मनो निरुंध्यात् मन आत्मनि परमात्मनि सम्यक् स्थितं निश्चलं कृत्वा तद्व्यतिरिक्तं किंचिदपि न चिंतयेदिति संप्रज्ञातसमाधिरसंप्रज्ञातसमाधौ तु वृत्तिकचित्तस्य लयपरस्वरूपज्ञानेन स्वरूपानंदानुभवस्तत्र विवेकः शनैः शनैरित्यनेन यथाकंटकललानुष्ठकं वस्त्रं शनैः शनैर्निःसार्यते कृपणलालस्यातिवेदादि

कं विहायाँ हिकाले विषयात्मकं चित्तमुपरमेनयेदिष्टकं भवति य
त्नुयणाचट्उभयमानो विषयत्यर्गएवोऽयमेन जलादिष्यात्मसूर्यनेतिः
सार्थनेव विषयवृत्तिः सारयितेनशकाते तथाविज्ञमुभयमानेविस्
रांमेवोभयतेड्न्यस्मिन्नमुणानिषिक्तदुनतामवनुचटदुःखोदिरूपते
भोगहेतयमोयमेसहकृतसामग्रीवशाङ्कवति तत्रचटदुःखोयता
त्माकारे विरागप्रयत्नाभ्यामेन निवारिते पिनिर्निमित्तं स्वैदाकारेवा
स्थितेनशकातेततो निर्हेतिकेन चित्तेन संस्कारमात्रशेषतयाति सू।
त्मतेननिरुपाधिकचिदात्ममात्राभिमुखत्वान्नाहृतिंविनैवात्मानुभ
य तिष्ठतितत्र संस्कारशेषेणचित्तावस्थानस्य सुषुप्तावपिसत्वेना
न्नमुक्तानमनापाविचतत्रप्याप्नतेदानुभवापत्तेः मूर्च्छायामपिनाट
यातेदानुभवापत्तेश्च चित्तस्पन्दनाभावेनतदवच्छिन्नस्यसतातन्ना
त्मभेवचाचित्तस्यपाविद्विषयत्वातेनगीकारेणासंप्रज्ञातेप्यात्मानुभ।
वोऽकेवलकलाद नसंतःकरणसंमूर्विषयकंनिर्विषयकस्यतद
वच्छिन्नस्यचज्ञानत्वापत्तेः २५ ॥

हूतमवैजयन्तीटी·

एवंभूतस्य योगिनोऽन्तिमे कृत्यमाह शनैः शनैरिति धृतिगृही
तयाऽत्मविषयात्मकविवाह्यत्वादचलात्मकधैर्येनगृहीतावश
शीकृतातयातुद्ध्याविवेकवत्या आत्मसंस्थं आत्मनिसम्यक्तिष्ठती
तितेतथा देहं मनःसेकत्वात्मकेकृत्वा आत्मस्वरूपध्यानाशनैः।
शनैर्मनाधिकाभ्यासक्रमात्‌मंदंमंदंनतहठ वलेनोपरमेत्तमा।
धौतिष्ठेत् ततएवकिंचिदपिवाह्यवस्त्वल्पमपि नचिंतयेत्तनस्मरेत् २५

मधुसूदनीटी·

भूमिकाजयक्रमेण शनैः शनैरुपरमेत् धृतिर्धैर्यमविच्छिन्नतात।
यागृहीतयाबुद्धिरवश्यकर्तव्यतानिश्चयरूपातयायदा[illegible]क
दाचित्वश्यंभविष्यत्येवयोगः किंत्वरयेवमेवंरूपयाशनैःशनैःगु
रूपदिष्टमार्गेणमनो निरुंध्यात् एतेनाऽवैदनिश्चयोऽशयु‌क्तोदर्शितो
तथाचश्रुतिः यच्छेद्वामनसीप्राज्ञस्तद्यच्छेज्ज्ञानआत्मनितानमात्म
निमहति नियच्छे[illegible]ज्ञातआत्मनीति वागितिवाचेलौकिकी

गी॰
टी॰
३

वैदिकी च मननमिद्यापारवन्ति नियच्छेत् नानुध्यायाद्बहूञ्छब्दान्वाचो
विग्लापनं हि तदिति श्रुतेर्वाग्वृत्तिनिरोधेन मनोवृत्तिमात्रशेषो भवेदि
त्यर्थः वक्तृत्वादिनिरोधोप्येतेन सोपानक्रमो द्रष्टव्यः मनसीति कोदसंदेश्यं।
तन्मनः कर्मेन्द्रियज्ञानेन्द्रियसहकारिनानाविधविकल्पसाधनं करणं
तानेजानातीति ज्ञानमिति व्युत्पत्त्या ज्ञानपदेनात्मनि शब्दाल्लोपाधावहंकारे नि
यच्छेत् मनोव्यापारान्परित्यज्याहंकारमात्रेण परिशेषयेत् तच्च ज्ञानं ज्ञात
त्मोपाधिमहंकारमात्मनि महति महत्तत्त्वे सर्वव्यापके नियच्छेत् द्विविधो
ह्यहंकारो विशेषरूपः सामान्यरूपश्चेति अयमहमेतस्य पुत्र इत्येवं व्यक्त
मभिमन्यमानो विशेषरूपो व्यष्ट्यहंकारः अस्मीत्येतावन्मात्रमभिमन्य
मानः सामान्यरूपः समष्ट्यहंकारः स च हिरण्यगर्भो महानात्मेति च सर्वा
नुस्यूतत्वादुच्यते ताभ्यामहंकाराभ्यां विविक्तो निरुपाधिकः शान्तात्मा।
सर्वान्तरः तस्मिन्महान्तमात्मानं समष्टिबुद्धिं नियच्छेदेवं तत्कार
णमव्यक्तमपि नियच्छेन्मनो निरुपाधिकात्मपदं लभ्यः शुद्ध आत्मा सा
क्षात्कृतो भवति अङ्गेहि विवेकरसेप्रसंगात्म निजडशक्तिरूपमति
वीर्यमव्यक्तं प्रकृतिरूपाधिः सा च प्रथमं सामान्याहंकाररूपेण महत्तत्त्वं।
नामधेयमव्यक्तीभवति ततो बहिर्विशेषाहंकाररूपेण ततो बहिर्मनो
रूपेण ततो बहिर्वागादीन्द्रियरूपेणेत्येतत् क्रमाभिप्रेत्य इन्द्रियाणि
पराण्याहुरिन्द्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः
महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा का
ष्ठा सा परा गतिः तत्र वागादिष्विव बाह्यनिरोधः प्रथमा भूमिः बालमुग्धा
दिष्विव निर्मनस्त्वं द्वितीया तन्द्रीभिर्वाहंकारराहित्यं तृतीया सुषुप्ता
विव महत्तत्त्वराहित्यं चतुर्थी तदेतद्भूमिचतुष्टयमपेक्ष्य शनैः शनैरुपर
मेदित्युक्तं यद्यपि महत्तत्त्वशान्तात्मनोर्मध्ये महदव्यक्तोपादानमव्याकृ
ताख्यं तत्त्वं श्रुत्योदाहारि तथापि तत्र महत्तत्त्वस्य नियमनं नाभ्यधायि।
सुषुप्ताविव स्वरूपलयप्रसंगात् तच्च कर्मत्वेनेति पुरुषप्रयत्न
मंत्रेणासत्त्वेनव सिद्धत्वात्तत्त्वदर्शनोपयोगित्वाच्च दृश्यते त्वग्र्यया बु
द्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति शुद्धं समभिधाय तस्यासिद्धये निरोधस
माधेरभिधानात् स च तत्त्वदर्शनसाधनत्वेन दृष्टत्वेन सुजीवन्

व

ति

त्व

श्चिदेकर

त्वा

ना

107

५०

त्तुकिंप्रतिबंधस्यक्लेशात्मकायाः पेक्षितः ननुशांतात्मसवकरुड्विम
सहृत्तिरहितेनचेनसंघमवतदृशीनदेहत्वलमितिचेन्न सतःसिद्ध
स्यदर्शनस्यनिवारयितुमशक्यत्वात् नत्वंके आत्माकारात्माकारेस्वभा
वेनावस्थितेसदाचित्ते आत्मैकाकारतयातिरस्कृतत्वात् महर्षिविर
चित यथाघटउत्पन्नमात्रः स्वतोवियत्पूर्णोपद्योत्पद्यते जलतंडुलादि
पूरणेतुसमनेघटेपश्चात्तस्यप्रयत्नेनभवति यत्रजलादीनिःसारिते
पिवियतिःसारयितुंनशक्यते मुखपिधानेप्येनवियदवतिष्ठतएव
तथाचित्तमुत्पद्यमानेचैतन्यपूर्णमेवोत्पद्यते उत्पत्त्यैतस्मिन्नस्मि
घातिधिकरुडतनाभवत्घटडःखादिरूपतेभोगहेतुधर्माधर्मसहकृ
तसामग्रीवशाद्भवति तत्रघटडःखाद्याकाराकारेविरामप्रत्ययाभ्या
सेननिवारितेपिनितिमिरः चिदाकारोवारयितुंनशक्यते ततोनि
रोधसमाधिनानिर्वृत्तिकेनचित्तेनसंस्कारशेषतयातिसूक्ष्मत्वेननि
रुपाधिकचिन्मात्राभिमुखमाहितिविदेवनिर्विघ्नमात्मानुभूयते
तदेतदाह आत्मसंस्थंमनःकृत्वानकिंचिदपिचिंतयेदिति आत्मनिरुपाधि
केप्रतीचिसंस्थासमाभिर्यस्यतदात्मसंस्थंसर्वप्रकारवृत्तिशून्यस्वभा
वसिद्धात्माकारमात्रविशिष्टंमनःकृत्वाधृतिगृहीतयाविवेकबुद्ध्या
सेपायासंप्रज्ञातसमाधिस्थः सन्किंचिदपिअनात्मानमात्मानंवा
नचिंतयेत् तदृश्याविषयीकुर्यात् अनात्माकारवृत्तौहिव्युत्थानमेव
स्यात् आत्माकारवृत्तौचसंप्रज्ञातःसमाधिरसंप्रज्ञातसमाधिस्थै
र्यायकाममपिचित्तवृत्तिंनोत्पादयेदित्यर्थः ॥

सदानंदटीका

गुरूपदिष्टमार्गेणोपरमेदुपशनैःशनैः अविच्छिन्नात्मधैर्येणाक्रा
यधीस्तयामनः १ आत्मन्येवसमाधिर्हियस्यतद्ब्रह्मगोचरं कृत्वा
विचिंतयेत्रात्मवृत्तिमन्योन्नवाश्रयेत् २ आत्मैवास्याखिलंनान्यदिति
निश्चयवान्मुनिः नान्यत्किंचिंतयेत्किंचिदेषाग्राह्यायोपरोवधिः २५

नीलकंठटीका

शनैःशनैरिति भूमिकाजयक्रमेणलादिव्यादिव्यविषयेभ्यः उपरमेत्
व्यावृत्तोभवेत् कथं धृतिगृहीतयाबुद्ध्येति धृतिःधारणायाधार

दा

थिथिं स्वभावसिद्धात्मनिति

गी॰
टी॰
म॰

108

यतेमनः प्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सा।
त्विकी तुकुलक्षणान्तया गृहीतया वशीकृतया बुद्ध्या उपरमेत् तथाप
वमुपरतेमनः आत्मनिस्वरूपे संस्थाप्यतिर्यस्मवतद्रूपेदृष्टरिवात्तत
था आत्मैकाकारमेकाग्रमित्यर्थः दृष्टदृश्योपरक्तंचित्तं सर्वार्थं सर्वार्थे
कार्यतेयोः तयोद्रूपो चित्तंस्यैकाग्रतापरिणामःतस्मिंश्चित्तमेकाग्रंस्थाप
येत् सत्रार्थेसत्रग्रहमिदंयद्यपामीमनुभवेदिदृष्टादृश्यंदर्शनंचभासते।
तत्रदर्शनभानमप्रमाणंयन्मनोदृष्टरिदृश्येचोपरक्तंचित्तंसर्वार्थमिति
नतद्दर्शनेोपरक्तंनापिसर्वार्थंतायोगिना तदभावेचित्तस्यनाशप्रसंगः
दृष्टदृश्योपरागाभावेतत्प्रकाशितंतदृश्यते यथाखप्ने तत्रदिदृश्येनाली
तिपाप्रमाणमपिप्रसिद्धं दृष्टांपिनास्ति तदाइंद्रियाणामभावात् आ
त्मेंद्रियमनोयुक्तंभोक्तेतिश्रुतेर्वभोक्तृत्वस्येंद्रियमनोयोगाशिष्टत्वात्।
किंतदृष्टदृश्यवासनवासितंचित्रपटसदृशमेकंमनएवास्ति तत्रस्वयं
ज्योतिषाउरुषेणभास्यमानंजाग्रदूत्स्वप्नेपिदृष्टदृश्योपरागंप्रकाशय
ति तद्वासनावासितत्वात् एवंसतियदासर्वार्थतायाःक्षयःएकाग्रता
याउदयस्तदाचित्तस्यैकाग्रतारूपःपरिणामोभवतीति तदेवमात्म
संस्थंमनःकृत्वेतिसंप्रज्ञातसमाधिरुक्तः तत्रापिपूर्वाभ्यासवशा
च्चित्तस्यदृष्टदृश्योपरागोवासनामयोभातीतितन्निवारणेनअसंप्र
ज्ञातसमाधिमाह नकिंचिदपिचिंतयेदिति ध्यानुध्यानध्येयविभा।
गमपिनस्मरेत्किंत्वखंडैकरससंविदात्मनासर्वभवतिष्ठेदित्यर्थः

आनंदटीका

धृतियोगधारणा २५ ॥

रामकंठीयेका

शनैःशनैःकृत्वोरोत्तरविशेषारोहणाक्रमेणाननुसहसैवोपरमेत् वा।
ह्यविषयेभ्यःसंगात् तथादेहादावात्माभिमानात् निवर्तेतेनकेनसा
धनेनवृद्धामस्यग्ज्ञानेन कीदृश्याधृतिगृहीतयाधृतिःपरमात्मत्वाद्
कारावर्षंभलक्षणंतयेधृतया धृतीतास्वीकृतयावुद्धिर्ध्यानादृश्याद्वि
कीदृशीधृतिर्योवुद्धिंधारयतिसात्रयोगसाधनत्वमईतियस्याधृतेर्लक्षण
वक्ष्यति धृत्यायया धारयतेमनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारि
ण्या धृतिः सा पार्थ सात्विकीपूर्वंकिंकृत्वापरमेत्मनसैवमेरणामोलवि

२५

सा॰

षयेनैवचेतसाप्राक्स्थावरंसंत्यर्यंकोनेसंकल्पप्रभवान् विषयग्रहणा।
व्यग्रंजंगमममनःसमन्तात् दृष्टानुश्रविकभेदेनसमस्तान् तथाप्रत्येकं।
मशेषान् अविद्यमानसंस्कारमात्रान् कामान्भोगांस्त्यक्त्वायदिस्यात
याप्तिनैवमनसानन्तविषयविषयेभ्योंद्रियग्रामंकरणावर्गंसमंततःसर्वेभ्यो
विहितेभ्योपिशास्त्रादिभ्योविनियम्यरागादिदूपरिहारात्मना विशेषेणानिरु।
ध्येत्यनेनशमस्तत्समस्तयानुष्ठानसाध्यकर्मयोगविषयं कर्मत्यागसंहि
यनियमसमवपूर्वोक्तक्रममेवस्मारयति एवमनेनक्रमेणात्मसंस्थमत्वा।
आत्मनिब्रह्मलायतनात्मिसम्यक्स्थितेलब्धविशांतिमनेनैतःकरणांकृत्वास
पायतन्मुक्तिरिक्तंवस्तुंतरंनकिंचिद्यायेत्तदानीदिहमनंवब्रह्मभूयतयैवप्र
काशते २५ ॥

लाक्षिकी [illegible]टीका

एवंसति धृतिर्धारणाध्येयविषयेदार्ढ्यं तयानिगृहीतयोपलब्धयाउ
ज्ञात्मबोधेन मनोमननात्मकमंतःकरणमात्मसंस्थमात्मन्यहंतापत्र
येसम्यग्देहाद्यभिमानकालष्यतानवतावतस्थितस्थितंविश्रांतंकृत्वाशनैः
शनैर्मनसःसम्यग्विश्रान्त्यवसानेन नतुसहसाविश्रांत्यारंभाउपरमेव
उपरमेत् उपरमस्वरूपमाह नकिंचिदपिचिंतयेत् इति आत्मानेदाविभावा
र्थमात्मनिमनःसंस्थापनानुसंधानमपिनकुर्यादित्यर्थः तदुक्तंश्रीकु
लार्णवे नकिंचिच्चिंतनादेवस्वयंतत्त्वंप्रकाशयते स्वयंप्रकाशितेतत्त्वेतत्
क्षणात्तन्मयोभवेदिति एतदुक्तंभवति धारणायादेहात्मस्वरूपविवेके
नात्मानंवुद्ध्वा तस्मिन्देहाहंभावविस्मरणपूर्वंमनःप्रतिष्ठाप्यततस्तत्प्र
तिष्ठापनानुसंधानमपिनविदधीतेत्येषसर्वस्वयोगस्यपरमोविधिः सं
कल्पप्रभवानित्यादिश्लोकद्वयतात्पर्यं श्रीदेव्यापंचशत्यां भगवंतरेणाउ
कलाततं प्रलीनेशास्त्रेचेतस्युविरतेविन्दुविभवे ततस्तत्त्वेचाष्टधनिवसु
रूपापिनुपरते स्थितेशाक्ते पर्वण्यनुकलितचिन्मात्रगहनां स्वसंविन्निर्यो
तीरमयतिशिवाख्यांपरतनुमिति आभ्यांश्लोकाभ्यामात्मसंयमस्वरूपस्य
ध्यानयोगस्यलक्षणमुपदिष्टंमंतव्यमिति अन्येत्वांगभूताइति निरुप्य
नस्यसौंदर्यस्यसहसाविश्रांतिरहितमेतत्राह २५ ॥

पंचोलीटीका

परित्यागकृतसंस्कारेण मनो विचलेत् न हि धारणया स्थिरीकुर्या
दित्याह शनैः शनैरिति धृतिगृहीतया धैर्ययुक्तया बुद्ध्या शनैः शनैरु
परमेत् उपरतिं कुर्यात् न सहसा मनः आत्मसंस्थमात्मनि संस्थितं
कृत्वा आत्मैव सर्वं न ततोऽन्यत् किंचिदपि चिंतयेत् २५॥

रणवीरसमिद्धोधिनी ॥

स्पष्टम् २५॥

मधुभाष्य

२५॥

भाषा अनुवार

ग्रोर जो मन पूर्व जन्म कृत कर्म्म के संस्कार से चलविचल हो
य तोभी धारणा जो धैर्यरूप बुद्धिशक्ति तिससे थिर करै यह
कहते हैं कि धारणा से वशीभूत जो बुद्धि तिससे मन को ग्रा
त्माने ग्रच्छीतरह स्थापन करि के उपरम करै ग्रर्थात् फेरि न
कछु चिन्तन करै परन्तु यह भी सनैः सनैः कहे धीरे धीरे धै।
र्यवती बुद्धि के द्वारा क्रमसे मन को ग्रात्मा मे थिर करै सह
सा न करै २५

दोहा

धान धान लहै उपराम है बुद्धिधीर सोय ग्रात्मा मे मनस्थापके
नहि कछु चिंतत जोय २५ ॥

भाषा अनुवार

और जो मन एवं जन्म कृत कर्म के संस्कार से चलविचल हो य तौभी धारणा जो धैर्यरूप बुद्धिशक्ति जिससे थिर करै यह कहते हैं कि धारणा से वशीभूत जो बुद्धि जिससे मन को आत्मामे अच्छीतरह स्थापन करि के उपरम करै अर्थात् फेरि न कुछ चिन्तन करै परन्तु यह भी सनैः सनैः कहे धीरे धीरे धैर्यवती बुद्धि के द्वारा क्रमसे मन को आत्मा मे थिर करै सहसा न करै २५

दोहा

धान धान लहैं उपरामहैं बुद्धिधीर सोय आत्मामे मनस्थापके
नहि कछु चिंतत जोय २५ ॥

यतोयतोनिश्चरतिमनश्चञ्चलमस्थिरं ततस्त
तोनियम्यैतदात्मन्येववशंनयेत् २६ ॥

शाङ्करभाष्यं

यतइति यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेर्निश्चलति निर्गच्छ
ति स्वभावदोषान्मनश्चञ्चलमत्यर्थं चलमत एवास्थिरं ततस्तस्माच्छब्दादे
र्निमित्तान्नियम्य तत्तन्निमित्तं याथात्म्यनिरूपणेनाभासीकृत्य वैराग्यभा
वनया चैतन्मन आत्मन्येव वशं नयेत् आत्मावश्यतामापादयेत् २६ ॥

आनन्दगिरिकृतटीका

स्वाभाविको दोषो मिथ्याज्ञानाधीनो रागादिः शब्दादेर्मनसो नियमनं
कथमित्याशङ्क्याह तत्तन्निमित्तमिति याथात्म्यनिरूपणं तदिष्टत्वेऽपि दुः
खमिश्रत्वाद्यालोचनं तेन तत्तत्र वैराग्यभावनया तत्तदाभासीकृत्य
ततस्ततो नियम्यैतन्मन इति सम्बन्धः २६ ॥

स्वामिकृतटीका

एवमपिरजोगुणवशाद्यदिमनःप्रचलेत् तर्हिपुनःप्रत्याहारेणवशी
कुर्यादित्याह यतोयतइति स्वभावतःचञ्चलंधार्यमाणमप्यस्थिरंम
नोयेयेविषयंप्रतिनिर्गच्छतिततःततःप्रत्याहृत्यात्मन्येववशंनयेत्
स्थिरंकुर्यात् २६ ॥

पैशाचभाष्यं

यतोयतोयस्माद्यस्मान्निमित्ताच्छब्दादेर्निश्चलतिनिर्गच्छतिस्वभावदो
षादेतन्मनश्चञ्चलमतएवास्थिरंततस्ततस्तस्माच्छब्दादेर्निमित्तान्निय
म्यएतन्निमित्तंयाथात्म्यनिरूपणेनाभासीकृत्यवैराग्यभावनयाचैंत्म
तन्मनआ
मेववशमेतितथात्मन्येवप्रशाम्यति २६ ॥

रामानुजभाष्यं

यतइति चलस्वभावतयाऽस्थिरंमनः यतोयतोविषयप्रावण्यहेतो
र्निश्चलति ततस्ततोमनोनियम्यात्मन्येवातिशयितसुखभावनयावशं
नयेत् २६ ॥

अभिनवगुप्तकृतटी·

इतीतरदीनात्कर्मात्मकमभिलाषद्वेषयतनरूपं किञ्चिदपिविष
याणांमार्गारणादिकंनचिन्तयेत् यत्नैर्याभ्यासेनतत्किञ्चिदपिचिन्तये

गी· रिति तदस्मन्नंतरविश्रंभस्यात्मसंगात् नवविषयसुखपरमसमाश्रमे
टी· वशाप्यमित्युच्यते २६ ॥ यतो यतो मनो निवर्तते तन्निवर्तनसमनन्तरमेवात्मनि शमयेत् अन्यथा पुनः चित्तं पुनरपि विषयानेवालम्बते २६
घ·

परमार्थप्रपाटीका

अथैनावतापि रजोगुणप्रचुरं मनो यद्यात्मस्वरूपं न भजते हि समाहा रेण वशं नयेत् इत्याह यतो यत इति स्वभावतश्चपलं बलाज्जलतुल्यमत विकारवशाद्यमानमप्यस्थिरं मनो येनयेन विषयेण प्रति निर्गच्छति ततस्त तो विषयान्नियम्य प्रत्याहृत्य आत्मन्येव वशं नयेत् तदुक्तं वाशिष्ठे हस्तं हस्तेन संपीड्य दंतैर्दंतान् विचूर्ण्य च अंगान्यंगैः समाक्रम्य जयेदादौ स्वकं मनः चित्तमेकं न शक्नोति जेतुं स्वाले प्रवर्तितं यत् ध्यानवातोविदव्रजः सकिंलोके नंतन इति २ तथा चोक्तं विष्णुपुराणे विषयेभ्यः समाहृत्य विज्ञानात्मा मनोवृत्तिः चिंतयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरं आत्मभावे नयत्येनं तद्ब्रह्मध्यापिनं मुने विकार्यमात्मनः शक्त्या लोहमाकर्षको यथेति २६ ॥

वनमालीटीका

शब्दादीनां चित्तविक्षेपहेतूनां मध्ये यतो यतो यस्माद्यस्मान्निमित्ताच्छ ब्दादेर्विषयाद्रागादेर्वा हेतोश्चंचलं विक्षेपाभिमुखं सत् मनो निश्चरति वि त्तिमेसतु विषयाभिमुखं प्रमाणविपर्ययविकल्पस्मृतीनामन्यतमा मपि समाधिविरोधिनीं वृत्तिमुत्पादयति तथालयहेतूनां निद्राशेषव कषानश्रमादीनां मध्ये यतो यतो निमित्तादस्थिरं लयाभिमुखं सन्म नो निश्चरति लीनं सत् समाधिविरोधिनीं निद्राख्यां वृत्तिमुत्पादयति त तस्तस्माद्विक्षेपनिमित्तात् लयनिमित्ताच्च नियम्यैतन्मनो निर्वृत्तिकं कृ त्वात्मन्येव परमानंदघने सर्वेश्वरमध्ये वर्तिरूपस्य स्वस्य वशं नयेत् वशी कुर्यात् यथा पुनर्न विक्षिप्येत न वा लीयेतेति २६ ॥

अस्तमवेसयन्तीटी·

नन्वति चंचलस्वभावं संकल्पात्मकं मनो यदि वशीभूतं स्यात्तदैवं संकल्प प्रभवान्कामानपि त्यक्तुं शक्नुयादस्मान्नेति चेन्नत्याह यतो यत इति चंच लं चपलस्वभावमत एवास्थिरमेकत्र स्थितिरहितं मनः संकल्परूपकं यतो यतस्सर्वविभक्तेस्तसिलिति सूत्रात्तसि ल्पनया ज्ञानाघं यविषयम ति निश्चरति निर्गच्छति ततस्तत स्तस्मात्तस्माद्विषयादेतन्मनो नि

यमप्यसमाहृत्यात्मन्येव स्वस्वरूपे एव वशं स्वाधीनं नयेत्स्थापयेत् आ
त्मनो निरवधिकातिशयस्वात्वस्वभावत्वेन वशीकुर्यादित्यर्थः २६॥
एवं निरोधसमाधिं कुर्वन् योगी॥ मधुसूदनीटीका यस्मात्
शब्दादीनां चित्तविक्षेपहेतूनां मध्ये यतो यतो यस्माद्यस्मान्निमित्तात् शब्दादे
र्विषयाद्रागद्वेषादेश्चैव चलं विक्षेपाभिमुखं सन्मनो निश्चरति विवि
क्षं सत् विषयाभिमुखीं प्रमाणविपर्ययविकल्पस्मृतीनामन्यतमाम
पि समाधिविरोधिनीं वृत्तिमुत्पादयति तथा लयहेतूनां निद्राशेष
बहुशनश्रमादीनां मध्ये यतो यतो निमित्तादस्थिरं लयाभिमुखं सत्
मनो निश्चरति लीनं सत् समाधिविरोधिनीं निद्राख्यां वृत्तिमुत्पादयति।
ततस्ततो विक्षेपनिमित्तालय[illegible]निमित्ताच्च नियम्यैतन्म
नो निर्वृत्तिकं कृत्वात्मन्येव स्वप्रकाशपरमानन्दघने वशं नयेत् निरु
ध्यात् यथा न विक्षिप्येत न वा लीयेत तथैव कारेणात्मगोचरत्वेन समा
पेकीरयति एतच्च विवृतं गौडपादाचार्यैः उपायेन निगृह्णीयाद्विक्षि
प्तं कामभोगयोः सुप्रसन्नं लये चैव यथा कामो लयस्तथा १ दुःखं स
र्वमनुस्मृत्य कामभोगान्निवर्तयेत् अजं सर्वमनुस्मृत्य जातं नैव तु पश्य
ति २ लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः सकषायं विजानीयात् स
मप्राप्तं न चालयेत् ३ नास्वादयेत्सुखं तत्र निःसंगः प्रज्ञया भवेत् निश्चलं नि
श्चरच्चित्तमेकीकुर्यात्प्रयत्नतः ४ यदा न लीयते चित्तं न च विक्षिप्यते पुनः
अनिंगनमनाभासं निष्पन्नं ब्रह्म तत्तदेति पंचभिः श्लोकैः ५ उपायेन व
क्ष्यमाणेन वैराग्याभ्यासेन कामभोगयोर्विक्षिप्तं प्रमाणविपर्ययविक
ल्पस्मृतीनामन्यतमयापि वृत्त्या परिणतं मनो निगृह्णीयात् निरुन्ध्या
दात्मन्येवेत्यर्थः कामभोगयोरिति चिन्त्यमानावस्थाभुज्यमानावस्थाभे
देन द्विवचनेन पालीयतेऽस्मिन्निति लयः सुषुप्तं तस्मिन् सुप्रसन्नमाया
सवर्जितमपि मनो निगृह्णीयादेव सुप्रसन्नं चेत्कुतो निगृह्यते तत्राह
यथा कामो विषयगोचरप्रमाणादिवृत्त्युत्पादनेन समाधिविरोधी त
था लयोऽपि निद्राख्यवृत्त्युत्पादनेन समाधिविरोधी सर्ववृत्तिनिरोधो हि स
माधिः अतः कामादिकृतविक्षेपादिव श्रमादिकृतलयादपि मनो निरो
द्धव्यमित्यर्थः १ उपायेन निगृह्णीयात् केनेत्युच्यते सर्वं द्वैतमविद्यावि

गी. टी. ब.

ज्ञेभिनतमल्पं दुःखमेवेत्यनुस्मरणयोर्बैभ्यमानान् सर्वान्नाशेन तत्स्वरूपमसि
अप्ययदल्पं तन्मर्त्यं तद्दुःखमिति निश्चयमर्थं गुरूपदेशादनुपश्यात्त्यक्तलोक्य
कामान् चिंत्यमानावस्थान् विषयान् भोगान् भुज्यमानावस्थांश्च विषयाञ्छिव
र्जयेत् मनसः सकाशादिति शेषः कामस्य भोगस्य कामभोगेन स्यात्मनो।
निवर्तयेदिति वा एवं द्वैतस्मरणकाले वैराग्यभावनोपायः स्पष्टः द्वैतवि
स्मरणं तु परमोपायः स्मात् अजं ब्रह्म सर्वं न ततोऽतिरिक्तं किंचिदस्तीति शा
स्त्राचार्योपदेशादनंतरमनुस्मरणतद्विपरीतं द्वैतजातं न पश्यत्येव अप्रतिष्ठा
नेत्यनेकस्मिन् स्मांवान् पूर्वोपायापेक्षया वैलक्षण्यसूचनार्थस्तु शब्दः २
एवं वैराग्यभावनात्मदर्शनाभ्यां विषयेभ्यो निवर्त्यमानं चित्तं यदि दैनं
दिनलयाभ्यासवशाल्लयाभिमुखं भवेत् तदा निद्राशेषाजीर्णबह्वशन
श्रमाणां लयकारणानां निरोधेन चित्तं सम्यक् प्रबोधयेत् ध्यानप्रयत्नेन।
नपरिप्लवते वं प्रबोध्यमानं दैनंदिनप्रबोधाभ्यासवशात् कामभोगयो
र्विक्षिप्तं स्यात् तदा वैराग्यभावनया तत्साक्षात्कारेण च पुनः शमयेत्
एवं पुनः पुनरभ्यस्यमानेन लयात्संबोधितं विषयेभ्यश्च व्यावर्तितं नापि समम्।
शामं नरालावस्थं चित्तं स्तब्धीभूतं सकषायं रागद्वेषादिप्रबलवासना
वशेन स्तब्धीभावाख्येन कषायेन दोषेण युक्तं विजानीयात् समाहिता
च्चित्ताद्विवेकेन जानीयात् ततश्चैतत्समाहितमिदमावगाम्यलयविक्षेपा
भ्यामिव कषायादपि चित्तं निरुंध्यात् ततश्च लयविक्षेपकषायेषु परिहृ
तेषु परिशेषाच्चित्तेन समं ब्रह्म प्राप्यते तच्च समं शामं चित्तं कषायलयप्रश्र
मान्न चालयेत् विषयाभिमुखं न कुर्यात् किंतु एतन्निग्रहीतप्रयत्नाल्लयक।
षायप्राप्तेर्विविच्य तस्यामेव समप्राप्तावस्थितं न ध्यापयेत् ३ ततः समा
धौ परमसुखं अजकेपि सुखेनात्यास्वादयेत् एतावंतं कालमहं सुखीति।
सत्सुखास्वादरूपां स्तुतिं न कुर्यात् समाधिभंगप्रसंगादिति प्रागेव कृतव्या।
ख्यानं अतत्पायद्रुपलभ्यते सुखं तदविद्यापरिकल्पितं मृषैवेति भावन
या निःसंगो निःस्पृहः सर्वसुखेषु भवेत् अथवा तत्प्राप्तं सविकल्पसुखा
कारत्वं निरूपयास सत्संगं परित्यजेत् तत्स्वरूपसुखमपि निर्वृत्तिकेन चि।
त्तेनानुभवेत् स्वभावशमस्य तत्स्य वारयितुमशक्यत्वात् एवं सर्वतो निवृ
त्ति निश्चलं प्रयत्नवशेन कृतं चित्तं स्वभाववंचलात् द्विषयाभिमुखं तत् यतो निश्च

रद्दृढिर्निरोधकृत् एकीकुर्यात्स्वयमतः निरोधप्रयत्नेन समाधेर्ब्रह्मण्येकतां
नयेत् ४ समप्रज्ञाते चित्तं कीदृशमित्यपेक्षायां यदा न लीयते नापि स्तब्धीभव
ति तदा समस्तसाम्येन लयशब्देनैव स्तब्धीभावस्योपलक्षणात् न च विक्षि
प्यते पुनः न शब्दाद्याकारवृत्तिमनुभवति नापि सुखमास्वादयति राजस
तमसाम्येन सुखास्वादस्यापि विक्षेपशब्देनोपलक्षणात् एवं भेदनिर्देश
स्तत्पृथक्प्रयत्नकरणाय एवं लयकषायाभ्यां विक्षेपसुखास्वादाभ्यां
च रहितं प्रतिगतमिंगं चलनं सवातप्रदीपवत् लयाभिमुखं रूपेन (ख
रहितं निर्वातप्रदीपकल्पं अनाभासं न केनचिद्विषयाकारेणाभासत
(स्वा) इत्येतत् कषायसुखास्वादयोरुभयोरन्तर्भाव उक्त एव यदैवं दोषचतुष्टय
रहितं चित्तं भवति तदा तच्चित्तं ब्रह्मतिष्ठत् समं ब्रह्मप्राप्नोति भवतीत्यर्थः ५
एतादृशश्च योगः श्रुत्या प्रतिपादितः यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा।
सह बुद्धिश्च न विचेष्टते तामाहुः परमां गतिं तां योगमिति मन्यन्ते स्थिरा।
मिन्द्रियधारणां अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययाविति एतन्
मूलकमेव च योगश्चित्तवृत्तिनिरोध इति सूत्रं तस्माद्युक्तं ततस्ततो नि
यम्यैतदात्मन्येव वशं नयेदिति २६ [illegible] ॥

सदानंदीटी

एवं कुर्वन्समाधिं न योगी चित्तनिरोधे चित्तविक्षेपहेतूनां प्रमादीनां।
वमथनः यस्माद्यस्मान्निमित्तात्कामादेश्चंचलं मनः अनात्मविषया
भ्यासादित्ति मेसरहृद्वेनेन २ ततस्ततो विक्षेपनिमित्तात्तन्मनोमु
तिः कृत्वा तिर्हितिकं प्रत्यगात्मन्येवाहं साक्षी ३ स्वप्रकाशपरानंद।
यवेनतन्मेवशं नयेत् समस्तदुःखसीमैत्यन्मनोदृश्यगोचरं ४ समस्त
सुखसीमैत्यन्मनोब्रह्मगोचरे विचार्यैवं धिया विद्वान्वेदान्तवाक्य।
वाक्यतः ५ भोगानुत्सृज्य न देहान्कामांस्त्यक्त्वा प्रपद्य इति यत्र यत्र मनो ग
च्छेद्व्याहारो भोगगोचरे ततो विचार्य विषयेषु वैराग्यादिवेकतः आभा
सीकृत्य दोषाणामाकरत्वात्समस्ततः ७ ततश्चात्मकृष्णपरमानंदरूपे विरा
(नि॰) मस्थापयेदिति तात्पर्यं श्रीमद्भगवतो हरेः ८ २९
नीलकंठीटीका

गी॰ टी॰ ष॰

शनैःशनैरिमेवंसौकर्यमाचष्टे यतोयतइतिद्विभिः यतोयतोहेतोर्यस्मा द्विषयेयद्धीतेमनोनिश्चरतिबहिर्गच्छतिततस्ततस्तत्रतत्रदोषदर्शने नततस्ततोविषयात्एतन्मनोनियम्यप्रत्याहृत्यआत्मन्निरूपेएवव शंनयेनएर्यवस्थापयेत् एतेनप्रत्याहारोव्याख्यातं २६ ॥

आनंदीटीका

चंचलंवायुवद्दुर्ग्रहम् अस्थिरंप्रार्थितेपिवस्तुनिनचिरंतिष्ठतीति २६

रामकंठीटीका

एवंविधेनाभ्यासक्रमेणयतोयतोयस्माद्यस्मात्कुतश्चिदन्यनभूता ईप्सितरागादुपात्ताश्च मनश्चेतोनिश्चरतिनिर्गच्छति तस्मात्तस्मान्नियम्यप्र तिषिध्यात्मनिपरमकारणएववशंनयेत्तेवनिबध्नीयात्यतःस्वभावत एवचंचलंचपलंतथाप्रार्थितेपिविषयेनचिरमवतिष्ठतेइत्यस्थिरम् त्रै॰ २६

नतुमनसश्चांचल्यादात्मविश्रांति दुर्लभेत्याह —

लासिकी [illegible]टीका

मनोविमर्शात्मकंयतोयतः शब्दादिष्वर्थवानिद्रायामाभिमुख्येन निश्चरतिसंकल्पानन्तरूपांस्तोवृत्तिंभजतेयतश्चंचलविषयप्रवणमस्थि रंलघु[illegible]एवशंच एतन्मनः ततस्ततः शब्दादेर्विषयान्निद्रायाश्चनिय म्यप्रत्यावर्त्य आत्मन्येवप्रतीच्येववशंनयेत् प्रतिष्ठापयेत् तथाचश्रु तिः तावदेवनिरोद्धव्यं यावद्धृदिगतंक्षयम् एतज्ज्ञानंचध्यानंचशेषोन्यो ग्रंथविस्तरइति [illegible] २६।

पंचोलीटीका

एवमपिरजोगुणवशात्यदिमनःप्रचलेत्तर्हिपुनःप्रत्याहारेणवशी कुर्यादित्याह यतइति चंचलंस्वभावतश्चंचलंधार्यमाणमप्यस्थिरंएतन्म नःयतःयस्मात्शब्दादेर्निमित्तान्निश्चरतिनिर्गच्छतिततस्ततोनिय म्येतत्कृत्वाआत्मन्येववशंनयेत् २६ ॥

रत्नावीरसमिद्धोधिनी॥

कथं मनो निरोधः स्यादिति तदुपायमाह यतोयतइति यतोय
तो येनयेन यथा मनो निश्चरति निर्गच्छति यतश्चंचलं चप
लस्वभावं यतश्चास्थिरं स्वोचितकर्मैकविषयतामनापादितं
ततस्ततो मार्गादेतन्मनो नियम्य प्रत्यावर्त्य आत्मन्येव यत्न
पवविषयेव वशं स्वायत्ततां नयेत् प्रापयेत् २६॥

मधुभाष्य

२६॥

114

भाषा अनुवाद

फिर भी जो रजोगुण वशाते मन विचलित होय तो फेरि फे
रि उसको अपने वश करना यह कहते हैं कि स्वभावसे से
चञ्चल मन धारणा को रक्षा करते भी जो चञ्चल होय तो जि
स विषय मे गमन करे उसी उसी विषय से खैंचिकरि आत्मा
ही मे थिर करै २९

दोहा

जह जह मन सो जात है अस्थिर चंचल जोय तह तह ताकों
रोक के अपने वश करें सोय २९॥

प्रशान्तमनसंह्येनं योगिनं सुखमुत्तमं उपैति
शान्तरजसं ब्रह्मभूतमकल्मषं २७ ॥

शाङ्करभाष्यं

एवं योगाभ्यासबलाद्योगिन आत्मन्येव प्रशाम्यति मनः प्रशान्तेति प्रशान्तमनसं प्रकर्षेण शान्तं मनो यस्य स प्रशान्तमनास्तं प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमं निरतिशयमुपैति उपगच्छति शान्तरजसं प्रक्षीणमोहादिक्लेशरजसमित्यर्थः ब्रह्मभूतं जीवन्मुक्तं ब्रह्मैव सर्वमित्येवं निश्चयवन्तं ब्रह्मभूतमकल्मषं धर्माधर्मादिवर्जितं २७ ॥

आनन्दगिरिकृतटी०

मनसो वशीकरणेनोपशमे किं स्यादित्याह एवमिति योगाभ्यासो विषयविवेकद्वारा मनोनिग्रहाद्याहितिः प्रशान्तमात्मन्येव प्रलीनमिति यावत् मनस्तद्वृत्त्योरभावे स्वरूपभूतसुखाविर्भावस्स्वापादौ प्रसिद्धिं द्योतयितुं हिशब्दः मोहादिक्लेशप्रतिबन्धाद्योगिनि यथोक्तसुखाप्राप्तिमाशंक्य मनो विलयमुपेत्य परिहरति प्रशान्तेति तस्यासत्त्वादि विलक्षणत्वमाह ब्रह्मभूतमिति उक्तरीतेरपि सतो ब्रह्मभूतत्वेन तत्त्वं जीवन्मुक्तत्वमित्याशंक्याह ब्रह्मैवेति धर्माधर्मप्रतिबन्धादस्य का यथोक्तसुखप्राप्तिरित्याशंक्योक्तं अकल्मषमिति २७ ॥

स्वामिकृतटीका

एवं प्रत्याहारादिभिः पुनः पुनर्मनो वशीकुर्वतो रजोगुणक्षये सति योगसुखं प्राप्नोतीत्याह प्रशान्तमनसमिति एवमुक्तेन प्रकारेण शान्तं रजो यस्य तं अत एव प्रशान्तं मनो यस्य तमेवं निष्कल्मषं ब्रह्मत्वं प्राप्तमेनं योगिनमुत्तमं समाधिसुखं स्वयमेवोपैति प्राप्नोति २७ ॥

एवं योगाभ्यासबलात् योगिन आत्म[न्ये]व प्रशाम्यति

पिशाचभाष्यं

प्रशान्तं मनो यस्य सः प्रशान्तमनास्तं प्रशान्तमनसं ह्येनं योगिनं सुख [illegible] मुत्तमं निरतिशयमुपैति उपगच्छति शान्तरजसं प्रक्षीणमोहादिक्लेशरजसमित्यर्थः ब्रह्मभूतं जीवन्मुक्तं ब्रह्मैव सर्वमित्येवं निश्चयवन्तं ब्रह्मभूतमकल्मषं धर्माधर्मवर्जितं २७ ॥

रामानुजभाष्यं

गी. प्रशांतमनसंआत्मनिविमलमनसंततएवहेतोर्दग्धाशेषकल्मषं तत
टी. एवशांतरजसंब्रह्मभूतंस्वस्वरूपेणावस्थितमेनंयोगिनमात्मानुभवस्व
घ. रूपमनन्तंसुखमुपैतीतिहेतोरुत्तमसुखस्वरूपमात्मस्वरूपमुपैतीत्यर्थः २७

गन्दिभूतमुपैति २७

अभिनवगुप्तकृतटीका

नचात्मनिशुद्धंतचित्तंयोगिनंकर्मभूतंसुख

यतोयतोमनोनिवर्ततेननिवर्ततेनमनस्तेनैवात्मनिशमरोन् २७

परमार्थप्रपाटीका

एवंरजोगुणात्ययेसतिस्वतएवात्मसुखप्राप्तिरित्याह प्रशांतमिति ए
वंविधमेनंयोगिनंउत्तमंसुखंसर्वोत्कृष्टमात्मसुखंस्वतएवोपैति
प्राप्नोतिहि किंभूतंयोगिनंप्रशांतमनसं अतएवशांतरजसं अतए
वब्रह्मभूतं अकल्मषंनिरस्तमोहजाले २७ ॥

वनमालीटीका

हनुमद्वैजयन्तीटीका

ननु वशीकृतमनसं योगिनं किमुपैतीत्यपेक्षायामाह प्रशान्तम-
नसमिति प्रशान्तमनसं प्रकर्षेण शान्तं विषयविभ्रमरहितं मनो य-
स्य स तथा विषयव्याकुलतया न मनसेव स्थितमित्यर्थः अत एव शा-
न्तरजसं शान्तमुपरतं रजो यस्मात्स तथा तं शान्तेन रजस्तमउपरत-
मनसमित्यर्थः अत एव कल्मषेनास्तिकल्मषं संचितविषयवासना-
रूपदोषो यस्य स तथा तं प्राकृतवासनाशून्यमित्यर्थः अत एव ब्रह्मभू-
तमेतेनात्मात्मस्वरूपं योगिनं समाधिमन्तं यतिं हि निश्चयेनोत्तमं स्व-
स्वरूपानुभवात्मकं श्रेष्ठं सुखं केवलं परमेवोपैति प्राप्नोतीति २७ ॥

एवं योगाभ्यासबलादात्मन्येव **मधुसूदनीटीका** योगिनः प्रशाम्यति मनः ततश्च ॥

प्रकर्षेण शान्तं निर्हेतिकतया निरुद्धं संस्कारमात्रशेषं मनो यस्य तं
प्रशान्तमनसं ह्येनं मनसो निर्मलत्वे निर्मलत्वहेतुगर्भं विशेष-
णद्वयं शान्तरजसमकल्मषमिति शान्तं विक्षेपकं रजो यस्य तं वि-
क्षेपशून्यं तथा न विद्यते कल्मषं लयहेतुस्तमोगुणो यस्य तमकल्मषं लयशू-
न्यं शान्तरजसमित्यनेनैव तमोगुणोपलक्षणे अकल्मषं संसारहे-
तुधर्माधर्मादिवर्जितमिति वा ब्रह्मभूतं ब्रह्मैव सर्वमिति निश्चयेन सम-
मेव ब्रह्म प्राप्तं जीवन्मुक्तं एनं योगिनमेवमुक्तेन प्रकारेणेति श्रीधरः
उत्तमं निरतिशयं सुखमुपैत्युपगच्छति मनसः सूक्ष्मीभावे सुखमो-
क्षरूपसुखाविर्भावप्रसिद्धेर्योगपतिहितिशब्दः तथा च प्रागव्याख्यातो-
तं सुखमात्यन्तिकं यत्तदित्यत्र [illegible] २७ ॥

सदानन्दीटीका

योगाभ्यासबलादेवं योगिनश्चित्तमात्मनि प्रशाम्यति ततो मे तं शान्तं
निर्वृतिकं स्थिरं १ मनो यस्य तथा शान्तं रजो विक्षेपकं मलं कल्मषं लय-
हेतुर्यत्तमो यस्य न विद्यते २ धर्माधर्मादिरूपं वा कल्मषं नो भवशृङ्खलं य-
स्य तं ब्रह्मवत्सर्वं समं पश्यतीति वेदितं ३ सम्यग्ज्ञाते परे तत्त्वे लीनमोह-
मये मले ब्रह्मभूतं मुनिं शान्तमुपैति सुखमुत्तमं ४ दृश्येनास्ति परं
ब्रह्मैवास्ति सर्वं निरन्तरं इति निश्चयवन्तं तं सुखं समुपगच्छति ५
प्रभावे चित्तवृत्तीनां सुषुप्तौ चित्तवृत्तयः स्वप्नाविर्भावमेवं हि शास्त्रो

गी.
टी.
स.

घोतयन्मयं ९ २२ ॥

नीलकंठीटीका

एवमात्मवशे मनसि किं स्यादित्याशंक्याह प्रशांतेति हि यस्मादए
नं प्रशांतमनसं प्रकर्षेण उपरतचेतसं योगिनं एकायतनाभूमौ उत्तमं
सुखं संप्रज्ञातसमाधिफलभूतं उपैति भौतिकानां बाह्यानां मानोर
थिकानां मानराणां च विषयाणां भोगात् शांतरजसं प्रक्षीणमोहा
दिक्लेशं ब्रह्मभूतं सद्रूपं अकल्मषं धर्माधर्मवर्जितं यथोक्तं योग
भाष्ये एकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति कर्मबंधनानि श्लथ
यति निरोधमभिमुखीकरोति क्षिणोति च क्लेशान् स संप्रज्ञातो ।
योग इत्याख्यायत इति एतेनात्मसंस्थं मनः कृत्वेति व्याख्यातं २७॥

आनंदटीका

प्रशांतं विषयस्य वस्तृहारहितं मनो यस्य तम् अत एव हेतुः शांतं
विगतं रजः विषयप्रवृत्तिहेतुः रागो यस्य तम् २७॥

रामकंठटीका

यस्मात्तस्मिन्नात्मवशं नीते सत्येनं योगिनं प्रशांतमनसं विषयसु
खोन्मुखत्वलोभविरतिनिर्वृतचेतसं संतं स्वयमेवोत्तमं नित्यं निरव
यवस्वभावत्वादुत्कृष्टं सुखं सहजानंदमुपैति गच्छति कीदृशं यो
गिनं शांतरजसं शांतं विलीनं रजो विषयप्रवृत्तिहेतुर्गुणो यस्य
तमेव ब्रह्मभूतं परमात्मसमापन्नं यस्मादकल्मषमविद्यमानाज्ञा
नलक्षणाकिल्बिषकलंकम् २७॥

लौसिकी
एवमात्मनि लब्धस्थैर्यमनसि तदनुसंधा [illegible]टीका नसमुत्पन्नस्तु ततः किं स्यादित्यत

आह — हि स्वधारणाप्रकर्षेण आवृत्तिसंस्कारस्याप्यभावेन शांतवृत्तिप्रवाह
रूपं मनो यस्य तं प्रशांतमनसमेवं संतमेनं यथोक्तसमाध्यनुशी
लनपरं योगिनं कर्मभूतं उत्तमं सुखमलौकिकमानंदः स्वयमेवोपै
ति आत्मत्वेन व्याप्नोति एषएव मुख्यो योगः अत्र चोत्तमसुखस्यो
पादनेस्यात्तेन गाविवक्षया योगिनः क्रियाव्याप्यत्वविवक्षया च वै
कल्पिकानंदरूपस्य रसास्वादस्य निरासः एषैवावस्था श्रीमत्स्व
जिद्गुरुकैर्निरुक्ता नाहमस्मि न चान्योस्ति ध्येयं ध्यानं न विद्यते ।

आनंदपदसंलीनेमनः समरसीगतेति एवंसमाधिसिद्ध्यनन्तरमेवाति
शयाभ्यासेनब्रह्मभावस्यभावितयाभूतमिवमन्यमानोभगवान्विशेषण-
गणमाह समाध्यनुशीलनेनशांतंनिवृत्तंरजोबहिर्मुखतात्मप्रवृत्तिहेतु
र्गुणोयस्यतम् अतएवब्रह्मत्वंप्राप्तम् अतएवाकल्मषंप्रक्षीणधर्माध
र्मरूपकर्माणाम् एतदेवसुखंप्राप्नोतीत्यर्थः २७॥

पैठोलीटीका

एवंप्रत्याहारादिभिः पुनः पुनः वशीकुर्वन् रजोगुणलयेसत्वंप्राप्नोति
इत्याह प्रशांतेति हियस्मात्एनंयोगिनंप्रशांतमनसंमदीयमोहादि।
क्लेशरहितंसंप्रस्थंब्रह्मभूतंजीवन्मुक्तमकल्मषंपापरहितं उत्तमंनिरतिशयं
सुखंउपैतिउपगच्छति २७॥

रत्नावीरसमिद्धोथिनी ॥

एतादृशस्य प्रागादिमोत्तमस्वरूपस्ययोगस्यफलमाह प्रशांते
तिद्वाभ्यां एवंकर्मयोगिनंप्रशांतमनसं अत्यन्तिकसंकल्पवे
नैकविषयतां प्रापितचेतस्कं कर्मभूतं उत्तमंसुखंकर्तृउपैति
स्वयमेवोपतिष्ठते कथंभूतंशांतरजसं शांतंरजोरजोवन्निषयाव
रकःकामोयस्यतं अतएवब्रह्मणिथनुवैदेभूतं समंसाम्येनप्रव
र्तमानं अतएवाकल्मषं गुरुवधादि पातकैरस्पृष्टं २७॥

मधुभाष्य

२७ ॥

भाषा अनुवाद

इस प्रकार मन औ इन्द्री वशकारी पुरुष को रजोगुण की लय होने से परे योग सुख प्राप्त होना है सोई कहते हैं कि पूर्वोक्त रीति से जिसका रजोगुण नाश भया औ अच्छीतरह मन भी शान्त भया है सोई पापरहित अक्षीण मोह तथा ब्रह्मभाव को प्राप्त योगी उत्तम समाधि सुख को अनायास पावना है २७

दोहा

उत्तम सुख पा योगिको मन प्रशांतको होय शांतरज ब्रह्म
रूपको पाप रहित को सोय २७॥

119

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः सु
खेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते २८॥

शांकरभाष्यं

युञ्जन्निति युञ्जन्नेवं यथोक्तेन क्रमेण योगी योगान्तरायवर्जितः
सदा सर्वदात्मानं युञ्जन् विगतकल्मषो विगतपापः सुखेनानाया
सेन ब्रह्मसंस्पर्शं ब्रह्मणा परेण संस्पर्शो यस्य तद्ब्रह्मसंस्पर्शं सुखम
त्यन्तमुत्कृष्टं सुखं निरतिशयं सुखमश्नुते व्याप्नोति २८॥

आनन्दगिरिकृतटीका

उत्तमं सुखं योगिनो भवतीत्युक्तं तदेव स्फुटयति युञ्जन्निति क्रमो
यथोक्तो मनसेन्द्रियग्राममित्यादि योगान्तरायो रागद्वेषादि सदा
त्मानं युञ्जन्नित्यत्र सम्बन्धः २८॥

स्वामिकृतटीका

ततश्च कृतार्थो भवतीत्याह युंजन्निति एवमनेन प्रकारेण स
र्वदात्मानं मनो युंजन् वशीकुर्वन् विशेषेण सर्वात्मना गतं कल्मषं वि
यस्य स योगी सुखेनानायासेन ब्रह्मणः संस्पर्शोऽविद्यानिवर्तकः
साक्षात्कारः तदेवात्यन्तं सर्वोत्तमं सुखमश्नुते जीवन्मुक्तो भवतीत्य
र्थः २८॥

पैशाचभाष्यं

युंजन्नेवं यथोक्तेन प्रक्रमेण योगी सदात्मानं विगतकल्मषः विगत
पापः सुखेनानायासेन ब्रह्मसंस्पर्शं अत्यन्तं सुखमश्नुते २८॥

रामानुजभाष्यं

युंजन्निति एवमुक्तप्रकारेणात्मानं युंजन् तेन विगतप्राचीनसमस्त
कल्मषो ब्रह्मसंस्पर्शं ब्रह्मानुभवरूपं सुखमत्यन्तमपरिमितं सुखे।
नानायासेन सदाश्नुते २८॥

अभिनवगुप्तकृतटीका·

[illegible]
[illegible] २८॥ अनेनैव क्रमेण योगिनां सुखेन ब्रह्मावाप्तिः न तु कष्टयो
गादिना इति तात्पर्यम् २८

परमार्थप्रपाटी·

गी·
टी·
ष·

120

ततस्सुक्तोभवतीत्याह एवमिति एवमनुक्तप्रकारेणात्मानंमनः
युंजन्वशीकुर्वन्योगीविगतकल्मषः शांतस्तोभवति तथाविधःसु
खेनस्रवेणायासेनब्रह्मणः संस्पर्शः अविद्यानिवर्तकोःयोत्यंतमा
त्माकारः तदेवात्यंतमासमंतिकंशान्तदुःखमनंतसुखंपरमानंदमश्नुते
जीवन्मुक्तोभवतीत्यर्थः २८ ॥

वनमालीटीका

उक्तंसुखंयोगिनःस्फुटीकरोति युंजन्निति एवंमनसैवेंद्रियग्राम।
मित्याद्युक्तक्रमेणात्मानं मनःसदायुंजन्समादधत् योगीयोगेननिर्मलं
बुद्धीविगतकल्मषःसंसारहेतुविद्याख्यमलरहितः सुखेनानाया
सेनैवपरप्रणिधानात्मवीतरागनिदिध्यासनब्रह्मणःसम्यकस्पर्शोविष
यताख्यसंबंधोयस्यासौब्रह्मसंस्पर्शस्तावासौमतिश्चसा अंतःक[illegible]
मेकारणंयस्मिन्तद्ब्रह्मसंस्पर्शमत्यंतेसुखमश्नुते सामतिस्ताविक्षि
तस्वरूपात्मिकेवयद्वाब्रह्मणःसम्यक्स्पर्शःप्रसादाख्यःसंबंधोयस्मि
न्तदत्यंतंदुःखलेशवर्जितंनिरविकलसायतनंसंपत्ययाजानतपरेशायोते
जीवेब्रह्मणःप्रसादाख्यःसंबंधयस्तेनाविद्यानिवृत्याविर्भूतंपूर्णानं
दस्वरूपसुखमश्नुतेइत्यर्थः २८

कृष्णमैवजयन्तीटी·

तत्वंयोगीस्वस्वरूपानुभवरूपमेवसुखंलभतेयद्वापरमप्यस्ति किं
चित्प्राप्नोतीत्याशंक्यापरमपिब्रह्मानुभूतिरूपसुखंलभतेइत्याह यु
ञ्जन्नेवमिति एवंपूर्वोक्तप्रकारेणसदाहरहः आत्मानंस्वस्वरूपंयु
ञ्जन्नसत्वपरिपाकयोगाभ्यासेनानुभवन्सन् विगतकल्मषःतेनैवा
त्मानुभवरूपेणयोगेणानलरूपेणनिर्दग्धाशेषानादिसंचितक्रिय
माणात्मकर्मरूपदोषोयोगीआत्मानुभवीसुखेनाप्रयासेनब्रह्मसं
स्पर्शंब्रह्मणःपरमात्मनःसम्यकस्पर्शोनुभवोयस्मिंस्तत्तथापरमा
त्मस्वरूपानुभवरूपमनिरवधिकातिशयंसुखंपरमानंदरूपमश्नुते
प्राप्नोति २८ ॥

मधुसूदनीटीका

उक्तंसुखंयोगिनः स्फुटीकरोति॥
एवमनेनैवेंद्रियग्राममित्याद्युक्तक्रमेणात्मानंमनःसदायुंजन्।
समादधत् योगीयोगेननिर्मलंबुद्धीविगतकल्मषः विगतमलः

तेसारहेतुः धर्माधर्मरहितः सर्वेनानायासेनेश्वरप्रणिधानात्।
सर्वान्तरायनिवृत्त्या ब्रह्मसंस्पर्शसम्यक्तेन विषयास्पर्शेन सहब्रह्म
णः स्पर्शनात्तादात्म्यमस्मिन्नपि विषयासंस्पर्शिब्रह्मस्वरूपमिमेतत् प्र
मेते सर्वान्तेनानपरिच्छेदानतिक्रान्ते निरतिशयस्वखमानंदमप्युतवा
प्नोति सर्वेनानिवृत्तिकेन विमलेन लयविक्षेपविलक्षणमनुभवति वि
क्षेपहतिमत्त्वात् लयैवमनसोपि स्वरूपेणामत्त्वात् सर्ववृत्तिशून्येन स्व
रूपेण मनसा सुखानुभवः समाधावेवेत्यर्थः अथ चान्तरायास्तेनैवान्तराय
निवृत्तिरुक्ता तेषामन्तरायाद्दर्शितानामाहसूत्रेण व्याधिस्त्यानसंशयप्र
मादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्त
विक्षेपास्तेन्तरायाः चित्तं विक्षिपंति योगादपनयंतीति चित्तविक्षेपाः।
योगप्रतिपक्षाः संशयभ्रान्तिदर्शनेनावृत्तिरूपतयावृत्तिनिरोधस्य समाधेः
साक्षात्प्रतिपक्षौ व्याध्यादयस्तु वृत्तिसहचरितयानन्तरा प्रतिप। न
ताः इत्यर्थः व्याधिर्धातुवैषम्यनिमित्तो विकारो ज्वरादिः १ स्त्यानमकर्म
ण्यता गुरुणा शिरसा मानस्याप्यामृतादिकर्मानर्हतेति यावत् २ योगः
साधनीयो न वेत्युभयपक्षकोटिस्पृक् विज्ञानं संशयः तद्रूपप्रतिष्ठितत्वे
न विपर्ययेणान्तर्गतोपि सन्नुभयकोटिस्पर्शि[illegible]ककोटिस्पर्शित्वरूपावां
तरविशेषविवक्षया तु विपर्ययाद्भेदेनोक्तः ३ प्रमादः समाधिसाध
नानामननुष्ठानस्वभावयम्यानुष्ठानशीलता विषयान्तरव्यापृततया।
योगसाधनेषूदासीनमिति यावत् ४ आलस्यं सत्यामप्योदासीन्य
प्रवृत्तौ कफादिना तमसा वा कायचित्तयोर्गुरुत्वं व्याधित्वेनाप्रसिद्धम
पि योगविषये प्रवृत्तिविरोधि ५ अविरतिः चित्तस्य विषयविशेषे
पकोतिकोनिकोभिलाषः ६ भ्रान्तिदर्शनं योगासाधनेपि तत्साध
नत्वबुद्धिस्तथा तत्साधनेष्वसाधनत्वबुद्धिः ७ अलब्धभूमिकत्वं स
माधिभूमेरेकाग्रताद्यलाभः क्षिप्तमूढविक्षिप्तरूपत्वमिति यावत् ८
अनवस्थितत्वं लब्धायामपि समाधिभूमौ प्रयत्नशैथिल्याच्चित्तस्य तत्रा
प्रतिष्ठितत्वं ९ नवैते चित्तविक्षेपा नव योगमला योगप्रतिपक्षा यो
गान्तराया इति चाभिधीयन्ते १० दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्र
श्वासा विक्षेपसहभुवः दुःखं चित्तस्य राजसः परिणामो बाधनाल

गी॰ टी॰ ष॰

लणः तत्राध्यात्मिकं शारीरं मानसं च व्याधिवशात् कामं च शात्भव
ति आधिभौतिकं व्याघ्रादिजनितं आधिदैविकं ग्रहपीडादिजनितं द्वेषा।
(?)विपर्ययहेतुत्वात् समाधिविरोधितो मनस्यमिच्छाविघातादि बलव
त्दुःखानुभवजनितः चित्तस्य तामसः परिणामविशेषः दौर्मनस्य।
र्णयः लब्धीभवः मनकषायत्वात् समाधिविरोधी २ अंगमेजयत्वम
गकंपनमानसस्थैर्यविरोधि ३ प्राणेन बाह्यस्य वायोरंतः प्रवेशनं श्वासः
समाध्यंगरेचकविरोधी ४ प्राणेन कोष्ठस्य वायोर्बहिर्निःसरणं प्रश्वासः
सामाध्यंगपूरकविरोधी ५ समाहितचित्तस्यैते न भवंति विक्षिप्तचित्त।
स्य भवंती विक्षेपसहभुवोंतराया एव एतेभ्यासवैराग्याभ्यां निरोद्धव्याः
ईश्वरप्रणिधानेन च तीव्रसंवेगानामासन्नः समाधिलाभे[illegible]तेश्वर
प्रणिधानाद्वेति पतंजलिनाप्युक्ता प्रणिधेयमीश्वरं क्लेशकर्मविपाका।
शयैरपरामृष्टः पुरुषविशेष ईश्वरः तत्र निरतिशयं सर्वज्ञबीजं स पूर्वे
षामपि गुरुः कालेनानवच्छेदादिति त्रिभिः सूत्रैः प्रतिपाद्य तत्प्रणिधा।
नं द्वाभ्यामसूत्रयत् तस्य वाचकः प्रणवः तज्जपस्तदर्थभावनमिति।
ततः प्रत्यक्चेतनाधिगमोप्यंतरायाभावश्च ततः प्रणवजपरूपात्तदर्थ
ध्यानरूपाच्चेश्वरप्रणिधानात् प्रत्यक्चेतनस्य पुरुषस्य प्रकृतिविवेके।
नाधिगमः साक्षात्कारो भवति उक्तानामंतरायाणामभावोपि भवती
त्यर्थः अभ्यासवैराग्याभ्यामंतरायनिवृत्तौ कर्तव्यायामभ्यासदार्ढ्यार्थ
माह तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः तेषामंतरायाणां प्रतिषेधार्थमे
कस्मिंश्चित्तत्त्वेभिमते तत्त्वेभ्यासः चेतसः पुनः पुनर्निवेशनं कार्यं तथा
मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनात
श्चित्तप्रसादनं मैत्री सौहार्दं १ करुणा कृपा २ मुदिता हर्षः ३ उपेक्षौ
दासीन्यं ४ सुखादिशब्दैस्तद्वंतः प्रतिपाद्यंते सर्वप्राणिषु सुखसंभोगा
पन्नेषु सुखायेतन्मम मित्राणां सुखित्वमिति मैत्रीं भावयेत् न तु ईर्ष्यां दुःखि
तेषु कथं नु नामैषां दुःखनिवृत्तिः स्यादिति कृपामेव भावयेत् नोपेक्षां
न वा हर्षं २ पुण्यवत्सु पुण्यानुमोदनेन हर्षं कुर्यात् न तु विद्वेषं नोपेक्षां
अपुण्यवत्सु औदासीन्यमेव भावयेन्नानुमोदनं न वा द्वेषं ४ एवमस्य भाव्यं
तः शुक्लो धर्म उपजायते ततश्च विगतरागद्वेषादिमलं चित्तं प्रसन्नं सदेका

अनायासं भवति मैत्र्यादिचतुष्टयेनोपलक्षणं अभयं सत्वसंशुद्धि
रित्यादीनाममानित्वमदंभित्वमित्यादीनां च धर्माणां सर्वेषामेव सा
धकानां रूपत्वेन मलिनवासनानिवर्तकत्वात् रागद्वेषौ महाशत्रू स
र्वप्रकृष्टानां प्रतिबंधकौ महता प्रयत्नेन परिहर्तव्याविति नतु सत्वाधः
एवमन्येपि ज्ञानिनामात्मगुणाः चित्तप्रसादनोपदर्शिताः तदेत
च्चित्तप्रसादनं भगवदनुग्रहेण प्रसज्जमानं तु प्रमेयैव न दुर्वं नसत्वेनेति
अभ्यासामनःप्रशमानुपपत्तेः [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥

सदानंदीटीका

स्फटीकरोतिभगवान्योगिनःसुखमीरितं मनसैवेंद्रियग्राममभिता
शुक्रमेणयः १ योगेननियमस्वेधीमनोनितेसमादधत् संसार
हेतुधर्मादिमलसूत्योतिनिर्मलः २ ज्ञानायासेनमद्भावायोगभ्रमस्पृह
वर्जितः सर्वब्रह्मस्वरूपंयदपरिछिन्नमानंदं ३ लयविक्षेपशून्यत्वा
त्तामन्याप्नोतिनिरंतरं सर्वब्रह्मस्वयोगीभूत्वातिष्ठतिनिश्चलः ४।२८

नीलकंठीटीका

अस्यफलमाह युंजन्निति एवमनेनप्रकारेणयोगीआत्मानंमनो
युंजन्समादधानःविगतकल्मषोनिरस्ताविद्यादिक्लेशः सुखेनअ
नायासेनब्रह्मसंस्पर्शंनिर्विशेषब्रह्मणाएकंत्रिविधोपाधिप्रविलया
त् अत्यन्तमाप्नोति कीदृशंब्रह्मसंस्पर्शं अत्यंतंअंतोदृष्टस्यभावेन
परिच्छेदस्तमतिक्रांतंनिर्विशेषसुखंपरमानंदैकरूपं एतेननकिं
चिदपिचिंतयेदितिचतत्रोपासेव्याख्यातः २८ ॥

आनंदीटीका

स्पष्टम् २८ [illegible] ॥

रामकंठीटीका

एवमनेनयथोक्तेनक्रमेणप्रबंधप्रतिपादितेननियतमानसःसं

यतांतःकारणो योगी सर्वदा सर्वास्ववस्थासु एवं शृणु नित्यादिना प्रतिपादितः स्वात्मानं युंजन्समादधानः सुखेनासनप्राणायाम प्रत्याहारध्यानधारणादिक्लेशाभावादनायासेन ब्रह्मणापरा मात्मना संयोगमभेदमत्यंतनित्यमेवाधिगच्छति प्राप्नोति [illegible]
[illegible]
[illegible] २८ ॥

एतदेवस्फुटंप्रतिपादयति ॥

लासिकी [illegible]टीका

एवमसंकल्पप्रभवान्कामानित्याद्युक्तक्रमेणात्मसदाप्रत्याहृतियतेन्द्रिय ग्रामादिसमयेषु अथवा सर्वास्ववस्थासु एवं युंजन्नित्यादिप्रात्मानं युंजन्समादधानो योगी अतएव विगतकल्मषः संसारहेतुधर्माधर्म रहितः सुखेनासनप्राणायामादिक्लेशाभावादनायासेन ब्रह्मसंस्पर्शं कस्यचिदवयवस्यपरिहारेण कस्यचिदध्यापनेनावयवसंचयं म श्नुते व्याप्नोति किमत्यंतेन सर्वपरिच्छेदाक्रांतमानंदरूपं यदुक्तं श्रीम च्छ्रुते माशावलोकनं स्थानात्स्वरूपालोकनं हि यत् आत्मव्याप्तिर्भव नेषा शिवव्याप्तिस्ततोऽन्यथा चैतन्यं हेतुरूपिणीति प्रशांते मनसि आविर्भूतस्यात्मसुखस्य समाधिकाले देह एव सत्वादेशतः काल तश्च परिछिन्नत्वमित्यतोत्यंतमित्युक्तात्मसुखादेतद्यावाछिन्नम् व लयोगाकाशस्येव निरंशस्यापि मायाकल्पितमवयवद्वयं चेतनव र्गो जडवर्गश्चेति तत्र चेतनवर्गव्याप्त्या परमयोगित्वं जडवर्गस्या पि व्याप्त्या सालोक्यलतया जीवन्मुक्तत्वमेव तदुक्तं देहादिष्वचेत्य मानेष्वपि विदेकात्मप्रतिपत्तिरात्मज्ञजीवन्मुक्तिरिति [illegible]
[illegible]
[illegible] २८ ॥

सर्वत्रादिगुणत्रयेषी व्यापकात्मा वयेद्यदा शिवव्याप्तिर्भवेदेषा [illegible]

उक्तपूर्वस्य

पंचोलीटीका

ततश्च संतार्थे भवतीत्याह युंजन्निति एवं यथोक्तप्रकारेण सर्वदा आत्मानं अंतःकरणं युंजन्समाधियुक्तं कुर्वन् विगतपापो योगी। योगांतरायवर्जितः सुखेन अनायासेन ब्रह्मसंस्पर्शं ब्रह्मरूपस्य अनंतेनिरतिशयं सुखं अश्नुते प्राप्नोति २८ ॥

युञ्जन्नेवमिति एवं पूर्वोक्तप्रकारेण सदा सर्वास्ववस्थासु आ
त्मनो मनो युंजन् आरभ्यमाणस्वजात्युचितकर्मैकविषयं कुर्व
न् अयं योगी योगः समता लक्षणोतिशयेन विद्यते यस्य सः अ
तिशयस्य प्रतिपक्षबललक्षणः परिपक्वसाम्ययोगविशिष्ट इत्य
र्थः अत एव विगतकल्मषः रागद्वेषादिराहित्येन केवलं धर्म
बुद्ध्या प्रवृत्तिमत्वाद्धं युद्धवधादिजन्यपापास्पर्शः सुखेनाना
यासेनैव अत्यंतं निरवधि सुखमश्नुते प्राप्नोति कथंभूतं सुखं
ब्रह्मपरमेश्वरात्म्यं तत्वं तेन संस्पर्शः संबंधो यस्य परमेश्वर
सुखवत्त्वमित्यर्थः अत्यंततां च सुखस्य बहुप्रकारकता ऐ
हिकं राज्यादिलक्षणं पारत्रिकं च स्वर्गभोगादिलक्षणमाप
वर्गिकं च मोक्षलक्षणमिति त्रिविधं क्रमेण प्राप्नोति योगीति
पर्यवसितोयमर्थः २८ ॥

मधुभाष

१५। एवं युंजन्निति स्पष्टमाह २८ ॥

भाषा अनुवाद

अब योगीजन की कृतार्थता कहते हैं कि इसी प्रकार सदै
दा मन वशीभूतकारी पुरुष जिसका सम्पूर्ण पापदूर भया
है सोई योगी अनायास ब्रह्मसंस्पर्शी अर्थात् अविद्या निवृत्ति
कारी जो अत्यन्त ब्रह्मज्ञान सर्वोत्तम सुख सो पावते अर्थात्
जीवन्मुक्त होते हैं २८ ॥

दोहा

जोइन ऐसें चित नित योगी सो निरपाप विनाखेद अति
सुख लहैं ब्रह्मसंगको आप २८ ॥

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ईक्षते
योगयुक्तात्मा सर्वत्र समदर्शनः २९

शांकरभाष्यं

इदानीं योगस्य यत् फलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं तत् प्रदर्श्यते सर्वेति सर्वभूतस्थं सर्वेषु भूतेषु स्थितं स्वमात्मानं सर्वभूतानि चात्मनि ब्रह्मादीनि स्तम्बपर्यन्तानि च सर्वभूतान्यात्मन्येकतां गतानि ईक्षते पश्यति योगयुक्तात्मा समाहितान्तःकरणः सर्वत्रसमदर्शनः सर्वेषु ब्रह्मादिस्थावरान्तेषु विषमेषु सर्वभूतेषु समं निर्विशेषं विक्रियारहितं ब्रह्मात्मैकत्वविषयं दर्शनं ज्ञानं यस्य स सर्वत्रसमदर्शनः २९ ॥

आनन्दगिरिकृतटीका

पापप्रध्वंसलक्षणं गुणमुक्त्वापि ब्रह्मस्पर्शत्वादात्यन्तिकसुखं उत्कर्षो विषयासंस्पर्शो योगमनुतिष्ठतो ब्रह्मभूतस्य सर्वानर्थनिवृत्तिनिरतिशयसुखसमाप्तिलक्षणो द्विविधो मोक्षो हेतुत्वाकेन स्यादिति शङ्कमानं प्रत्याह इदानीमिति स्वमात्मानमीक्षत इति सम्बन्धः सर्वभूतान्यपि तद्विशेषणत्वेन पश्यति चेन्न भेदवत्त्वात्तानमिति नाविद्यानिवृत्तिरित्याशंक्याह सर्वभूतानीति उक्ते दर्शने चित्तसमाधानमुपायं दर्शयति योगेति विषमेष्वपि भूतस्वरूपादिषु सममेव दर्शनं उपदर्शितदर्शन प्रतिबन्धकं प्रत्यस्यति सर्वत्रेति २९ ॥

स्वामिकृतटीका

ब्रह्मसाक्षात्कारमेव दर्शयति सर्वभूतस्थमिति योगेनाभ्यस्यमानेन युक्तात्मा समाहितचित्तः सर्वत्र समं ब्रह्मैव पश्यतीति समदर्शनः तथा स्वमात्मानमविद्याकृतदेहादिपरिच्छेदशून्यं सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु च स्थितं पश्यति तानि च स्वात्मन्यभेदेन पश्यति २९ ॥

पिशाचभाष्यं

इदानीं योगस्य फलं ब्रह्मैकत्वदर्शनं प्रदर्श्यते सर्वभूतस्थं सर्वेषु भूतेषु स्थितं स्वात्मानं सर्वभूतानि च ब्रह्मादीन्यात्मन्येकतां गतानीक्षते पश्यति योगयुक्तात्मा समाहितान्तःकरणः सर्वत्रसमदर्शनः २९ ॥

गी॰
टी॰
ष॰

रामानुजभाष्यं

अथ योगविपाकदशा चतुःप्रकारा उच्यते सर्वभूतस्थमिति स्वात्मनः परेषां च भूतानां प्रकृतिवियुक्तस्वरूपाणां ज्ञानैकाकारतया साम्याद्वैषम्यस्य प्रकृतिगतत्वाद्योगयुक्तात्मा प्रकृतिवियुक्तेष्वात्मसु सर्वत्र ज्ञानैकाकारतया समदर्शनः सर्वभूतस्थमात्मानं सर्वभूतानि च स्वात्मनीक्षते सर्वभूतसमानाकारं स्वात्मानं स्वात्मसमानाकाराणि च सर्वभूतानि पश्यति एकस्मिन्नात्मनि दृष्टे सर्वस्यात्मवस्तुनस्तत्साम्यात्तथैव स्वदृष्टं भवतीत्यर्थः सर्वत्र समदर्शन इति वचनात् योयं योगस्त्वया प्रोक्तः साम्येनेत्यनुभाषणात् निर्दोषं हि समं ब्रह्मेति वचनाच्च २९ ॥

अभिनवगुप्तकृतटीका

अनेनैव क्रमेण योगिनां स्वभावेन वस्त्वावाप्तिः तत्र कस्य योगोऽपीति तात्पर्यम् २९ ॥ सर्वेषु भूतेष्वात्मानं ग्राहकतयानुप्रविष्टं भावयेदात्मनि च ग्राह्यतां ज्ञानद्वारेण सर्वाणि भूतान्येकीकुर्यादतश्च समदर्शनत्वं जायते योगस्येति संक्षेपार्थः विस्तारस्तु भेदवादविदारणादिषु ग्रन्थेषु देवीस्तोत्रविवरणे च मयैव निर्णीत इति तत एवावधार्यः ॥ २९

परमार्थप्रपाटीका

एवं निरंतरमन्तर्ध्यानावस्थस्य देहाद्यनुबन्धेनात्मानुभवसुखकारः कृतार्थः कदापि बाह्यदृष्टेः सर्वात्मकत्वेनात्मप्रतीतिमीशावास्योपनिषदुक्तां दर्शयति सर्वभूतस्थमिति योगेनाभ्यासेन युक्तः समाहित आत्मा मनो यस्य एवंविध आत्मानं स्थूलसमष्टिरूपं सर्वभूतेषु स्थूलव्यष्टिरूपेषु आनतयोमित्वेन तिष्ठन्तं ईक्षते पश्यति तथा सर्वभूतानि आत्मनि स्थूलसमष्टिरूपे जलतरंगवदभेदेन पश्यति अत एव सर्वत्र समदर्शनः सर्वभूतेषु समं तारतम्यविवर्जितं दर्शनं प्रतीतिर्यस्य स तथा श्रुतिश्च यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूतेषु चात्मानं ततो न विचिकित्सतीति भाष्यं यः मुमुक्षुः सर्वाणि भूतानि आत्मन्येव पश्यति जले तरंगानिव तथा सर्वभूतेषु आत्मानमेव पश्यति तरंगेषु जलमिव एवंभूतश्च तदा न विचिकित्सतीति तारतम्यविचारं न करोतीत्यर्थः २९

वनमालीटीका

इदानीं सिद्धयोगस्य जीवन्मुक्तस्य स्थितिविशेषं निरूपयितुं तस्य हरिप्रसादाविर्भूततत्स्वरूपस्य ज्ञानरायमहत्त्वात्प्रतिबद्धसेहसेन तिष्ठर्वकं रागिणां विषयेषु एवस्वाभाविकं सर्वत्र समदर्शनमलौकिकं भगवद्दर्शनमाह सर्वेति योगयुक्तात्मा योगेन निर्विकारत्वे शरीरयुक्तोऽपि रूपेण युक्तः प्रसादं निम

तदा मामस्यात्मा विशिष्यस्य आत्मानं सर्वेश्वरं मां नियामकत्वेन व्याप
कत्वेन च सर्वभूतस्थं ब्रह्मादिस्तम्बपर्यन्तेषु भूतेषु स्थितं यस्त्वन्नयत्वेन रत
त्वेन च पश्यति तथा सर्वभूतान्यात्मनि मय्याधारकारणभूते
षम्यानि च तत्त्वाऽश्रयत्वेन च व्यापरौततः पश्यति कीदृशः सर्वत्र व्यव
हिताव्यवहितप्रकृष्टाविप्रकृष्टेषु च सर्वेषु समं परोक्षरूपं दर्शनं यस्य स
र्वेषु जीवेषु ज्ञानानन्दैश्वर्यनियम्यत्वादिना समानेन दर्शनं यस्य सः २९

ऊसमवैजयन्तीटीका

एवं निष्पन्नयोगस्य योगिन आत्मतत्त्वे परमात्मतत्त्वं च भवतीत्युक्त्वा
येदानीं केन प्रकारेण स्वपरस्वरूपमनुभवति तस्य च कीदृशी दशेत्या
शंक्य तस्य योगविपाकदशायां स्वतो भिन्नाः केचन मतः प्रकारस्तत्र प्रथम
तो नरेश्वरेष्वपि सदृशं पश्यतीति योगात्मानुभवप्रकाशमाह सर्वभूतस्थमिति
योगयुक्तात्मा स्वात्मपरमात्मस्वरूपयोः संयोगो योगशब्देनोच्यते स्वात्म
परमात्मसंयोगे युक्तः समाधौ ध्यानेन संयुक्तः आत्मा मनो यस्य स तथा
आत्मात्मीयभावविषये ध्यानस्य मनात्मनो सर्वत्र निखिलात्मपरमा
त्मवस्तुषु समदर्शनः समं तानेकाकारस्वरूपत्वेन न संदर्शनं ज्ञानं
यस्य स तथा स्वस्वरूपस्वव्यतिरिक्तानां प्रकृतिसंबंधरहितानां जी
वस्वरूपाणां च परमात्मस्वरूपस्य च ज्ञानैकाकारस्वरूपत्वात्तत्समेव
स्वरूपमिति ज्ञानवानित्यर्थः सर्वभूतस्थं सर्वेषु ब्रह्मादिस्थावरान्ते
षु भूतेषु जीवेषु ज्ञानाकारसाम्यस्वरूपत्वेन तिष्ठतीति तथाभूतं आ
त्मानं स्वस्वरूपमीक्षते पश्यति च पुनरात्मनि स्वस्वरूपे सर्वभूतानि
ब्रह्मादिस्थावरान्तानि जीवस्वरूपाणि ज्ञानस्वरूपसाम्यानि पश्यति।
यथाहं ज्ञानस्वरूपो ज्ञानादिधर्माश्रयस्तथैवान्यान्यपि भूतानि भवंतीत्येवं
सर्वभूतसमानं स्वस्वरूपं पश्यति तथैव तानि ज्ञानस्वरूपाणि ज्ञानादि
धर्माश्रयाणि तथाहमपि ज्ञानस्वरूपश्चेत्येवं स्वस्वरूपसमानानि सर्व
भूतानि च पश्यतीत्यर्थः यथैवैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृन्मयं
विज्ञातं स्याद्यथैवैकेन लोहमणिना विज्ञातेन सर्वं लोहमयं विज्ञातं स्या
त्तथैवैकात्मविज्ञानेन सर्वमात्मवस्तु विज्ञातं स्यादित्यादिश्रुतेः २९

मधुसूदनीटीका

तदेवं निरोधसमाधिना त्वंपदलक्ष्यं तत्पदलक्ष्येण च शुद्धेन साक्षात्कृते न तदेकगोचरा तत्त्वमसीति
वेदान्तवाक्यजन्या निर्विकल्पकसाक्षात्काररूपाऽहं ब्रह्मास्मीति विद्याभिधाना जायते ततश्च कृत्स्ना
विद्यातत्कार्यनिवृत्त्या ब्रह्मस्वरूपमत्यन्तमश्नुत इत्युपपादयति त्रिभिः श्लोकैः तत्र प्रथमं त्वंपद

गी॰
टी॰
ष॰

126

लब्धोपस्थितिमाह ॥

सर्वेषु भूतेषु स्थावरजंगमेषु शरीरेषु भोक्तृतया स्थितमेकमेव नित्यं वि
भुमात्मानं प्रत्यक्चेतनं साक्षिणं परमार्थसत्यमानंदघनं साक्ष्येभ्योऽनृतज
डपरिच्छिन्नदुःखरूपेभ्यो विवेकेनेक्षते साक्षात्करोति तस्मिंश्चात्मनि
साक्षिणि सर्वाणि भूतानि साक्ष्याण्यध्यासिकेन संबंधेन भोग्यतया
कल्पितानि साक्षिसाक्ष्ययोः संबंधांतरानुपपत्तेः मिथ्याभूतानि परि
च्छिन्नानि जडानि दुःखात्मकानि साक्षिणो विवेकेनेक्षते कः योगयुक्ता
त्मा योगेन निर्विचारवैशारद्यरूपेण युक्तः प्रसादं प्राप्तः आत्मांतःक
रणं यस्य स तथा तथा च पातंजले सूत्रं निर्विचारवैशारद्येऽध्यात्मप्रसादः
ऋतंभरा तत्र प्रज्ञा श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वादिति
तथा च शब्दानुमानागोचरयथार्थविशेषवस्तुगोचरयोगजप्रत्यक्षेण
ऋतंभरसंज्ञेन युगपत्सूक्ष्मव्यवहितविप्रकृष्टं च सर्वं तुल्यमेव पश्य
तीति सर्वत्र समं दर्शनं यस्येति सर्वत्र समदर्शनः स ज्ञात्मानमनात्मा
नं च योगयुक्तात्मा यथावस्थितमीक्षत इति पूर्वे[illegible]योगयुक्ता
त्मा यो वा सर्वत्र समदर्शनः स आत्मानमीक्षत इति योगिसमदर्शिना।
वाक्येन तात्पर्यकारिणा युक्तो यथा हि चित्तवृत्तिनिरोधः साक्षिसाक्षात्
कारहेतुः तथा जडविवेकेन सर्वानुस्यूतचेतनस्यैकत्वकरणमपि ताव
दपेक्षितं योगयत्नापेक्षितः अत एवाह वसिष्ठः द्वौ क्रमौ चित्तनाशस्य योगो
ज्ञानं च राघव योगस्तद्वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणं असाध्यः कस्य
चिद्योगः कस्यचित्तत्त्वनिश्चयः प्रकारौ द्वौ ततो देवो जगाद परमः शिव इ
ति चित्तनाशस्य साक्षिणः सकाशात् पृथग्भूतचित्तस्यादृष्टस्यैककारण
त्वदर्शनस्य तस्योपायद्वयं पक्वे संप्रज्ञातसमाधिः संप्रज्ञातसमा
धौ हि आत्मैकाकारवृत्तिप्रवाहयुक्तमंतःकरणसत्त्वं साक्षिणानुभूयते
निरुद्धसर्ववृत्तिकं तु परिशांतं तत्त्वानुभूयत इति विशेषः द्वितीयपक्षे सा
क्षिणि कल्पितं सात्मसमस्तं तत्त्वाज्ञानस्यैव साक्षेव तत्परमार्थसमः केवलो
विद्यत इति विचारः तत्र प्रथममनुपायं प्रपंचपरमार्थतावादिनो हैरण्य
गर्भीदयः प्रपेदिरे तेषां परमार्थस्य चित्तस्यादर्शनेन साक्षिदर्शनं निरोधा
त्तिरिक्तोपायासंभवात् श्रीमच्छंकरभगवत्पूज्यपादमतोपजीविना।
स्त्वौपनिषदाः प्रपंचानृततावादिनो द्वितीयमेवोपायमुपेयुः तेषां हि

योगो

विज्ञसनत्

ध्यानजातानंदातिशये स्खलितत्वकल्पितस्य बाधितस्य दृश्यस्यादर्शनम।
न्यायासिद्धं नैवोपपद्यते अत एव भगवत्पूज्यपादैः क्वापि ब्रह्मविदां
योगापेक्षानभ्युपगमाद्योगभ्रष्टः अत एवोपनिषदः परमहंसाः श्रो
त्रियैकांतवाक्यविचारैरेव गुरुमुपसन्नाः प्रवर्तंते ब्रह्मसाक्षात्काराय
न तु योगविचारेणेति विशेषनिराकरणेन तस्याः प्रथमसिद्धत्वा
दिति कृतमधिकेन [illegible] २८

सदानंदीटीका

इदानीं योगसंसिद्धफलं ब्रह्मैकात्म्यदर्शनं सर्वसंसारविच्छेदकारणं
तत्प्रदर्शयति १ आब्रह्मस्थावरांतेषु सर्वभूतेषु चिद्रूपेण स्वात्मानमेकम
द्वैतमनुस्यूतं प्रपश्यति २ तथा सर्वाणि भूतानि ब्रह्मादीन्यात्मवस्तु
नि ऐक्यं गतानि युक्तात्मा पश्यत्यात्मैकदृष्टिः ३ सोऽसौ भोक्ता तत्त्वतः
स्वभावविवेकेन विविच्याथ सात्त्विकेन शमगात्मानमसंगं परिपश्यति ४
सात्त्विकेनाखिलभूतानि कल्पितान्यात्ममायया आध्यासिकोऽहमेवं योगमा
यया सात्त्विकाः स्थिताः ५ तेन निरस्य विवेकेन मिथ्याभूतानि पश्यति योगे
नैकाग्ररूपेण चित्ते यस्य समाहिते ६ सर्वत्रात्मसमं यस्य दर्शनं ब्रह्म
गोचरं स योगी ब्रह्मविद्रूपः पश्यत्यमत्र पश्यति २९ ॥

नीलकंठीटीका

द्विविधस्यापि योगस्य फलमाह सर्वेति सोपाधिनिरुपाधिभेदेन द्वेधा
ब्रह्मविद्यते सोपाधिकः स्यात्सर्वात्मा निरुपाधिको निरुपाधिक इति वा
र्तिककारीया संप्रज्ञाते आत्मनः सार्वात्म्यमनुभवन्योगी सर्वेषु भूतेषु
उपादानतया स्थितं आत्मानं ईक्षते पश्यति तथा असंप्रज्ञाते सर्वाणि
भूतानि ब्रह्मादिस्तंबपर्यंतानि आत्मन्येकतां गतानि रज्जाविवाध्यस्त
सर्पदंडधारादीनि नतु ह्यपश्यति योगयुक्तात्मा योगेन समाहितचित्तः
मा अस्यैव अभ्यासावस्थामाह सर्वत्रेति सर्वेषु ब्रह्मादिस्थावरांतेषु विषमेषु
भूतेषु समं निर्विशेषं ब्रह्मात्मैकत्वविषयं दर्शनं यस्य स सर्वत्र समद
र्शनः तथा च श्रुतयः यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्व
भूतेषु चात्मानं ततो न विजुगुप्सते सर्वभूतात्मा भवति ब्रह्मदाशा ब्र
ह्मदासा ब्रह्मैमे कितवा उत इदं सर्वं यदयमात्मेत्यादयः पतमर्थं वदति पा

दर्शयंति यत्तयोयोगयुक्तात्मायोवासर्वत्रसमदर्शनः सन्नात्मानमीक्ष
तइतियोगिसमदर्शिनावात्मैकत्वाधिकारिणोयुक्तो यथाहिचित्तवृ
त्तिनिरोधःसाक्षात्कारहेतुः तथाजडविवेकेनसर्वानुस्यूतचैतन्य
स्यपृथक्करणमपि नावश्यंयोगएवापेक्षितइति तत्र समाहितोऽम
नात्मन्येवात्मानंपश्यति ततस्तंपश्यतिनिष्कलंध्यायमानइत्यादि
श्रुतिभिः समाधिध्यानापरपर्याययोगस्यैवात्मदर्शनहेतुत्वप्रति
पादनात् तत्कारणीभूतयोगाभिप्रायेणैवायमेतोयोगविधिश्च कृ
तइतिलिंगाच्चतानयोगयोःसमुच्चयावगमात् नचश्रौतेयौ
क्तिकविवेकमात्राज्जडाजडयोर्देहात्मनोःपृथक्करणंसंभवति सो
पाधिकस्यभ्रमस्यउपाधिनिवृत्तिमंतरेणनिवृत्त्यसंभवात् आदर्श
यनिवृत्ताविपप्रतिबिंबादिभ्रमनिवृत्त्यापत्तेः अतएवाधिष्ठानसाक्षा
त्कारेऽपिसतितत्रकल्पितस्यचित्तस्यतद्दृश्यस्यवादर्शनमनाशसैनैवो
पपद्यतइतिनिरस्तं योगंविनाधिष्ठानज्ञानस्यैवासंभवात् यदाहुः
तः स्वसंवेद्यंहितद्ब्रह्मकुमारीस्त्रीसुखंयथा अयोगीनैवजानाति
जात्यंधोहियथाघटमिति यत्तुकेचिद्भगवत्पूज्यपादैः ब्रह्मविदःकथा
पियोगापेक्षानसुरात्सर्वोऽवमभूदिति तद्यात्तोब्रह्मजिज्ञासेत्यत्रा
थशब्दस्यचितमसमूहविशेषणीभूतसाधनचतुष्टयानंतर्गतत्वसा
धुपपसमाधिमहिम्नोक्तमितितद्दोषः हेकमाविनिवसिहवाक्य
तात्पर्येतपरस्परनिरपेक्षमार्गद्वयोपगमेनान्यःपंथाइतिश्रुतिबा
धापत्तेःप्रतिपत्तिकमभेदमात्रपरतयाप्रागेववर्णितमितिदिक् किं
चयोगप्रकारेणयोगानपेक्षमार्गान्तरप्रतिपादनमसंगतं नचतत्
त्त्वचकोऽत्रकश्चिच्छब्दोवर्तते संभवतिवाऽकृष्णेनरतोयोवासमदर्श
नइतिवापदाध्याहारोपसंगतइतिदिक् २९ ॥

इत्यंसिद्धनिरुत्तरसंयमस्ययोगिनः आत्मदीपिका नः स्वरूपमाह ॥

योगेनप्रधानजयांतेनपरमसंयमेनयुक्तः परमात्मनियोजितआत्
मायेनेदृशः सर्वत्रसमंहेयोपादेयोपेक्षाबुद्धिहीनेनिर्विकारंदर्शनं
ज्ञानंयस्यसः आत्मानंस्वकर्मयोगार्थंसकलंमध्यगतं सर्वेषुभूतेषुच
तर्दृशभूतसर्गश्राणिषुस्थितंवर्तमानमीक्षते वयुत्ररात्मन्यात्मन्येव

जीवशरीरे सर्वभूतानि पृथिव्यादिप्रधानांतानि यो मानुषः समनोजेनतं यमप्रकारेणात्मानं करोति [illegible]

[illegible] २९ ॥

इत्थं सिद्धनिरुत्तरसमाधेः कर्मयोगिनो **रामकंठीटीका** लोकोत्तरं व्यवहारं प्रतिपादयितु माह - यथोक्तेऽस्मिन् कर्मयोगे युक्तः समाहितः सर्वत्र सर्वदा सर्वथा वर्तित विद्वान् योगी आत्मानमद्वयचिन्मात्रैकलक्षणं तं यथोक्तस्वरूपं सर्वभूतेषु परस्परं भिन्नतेनावस्थितेषु चराचरेषु प्राणिषु स्थितं पश्यति यदात्मनः समानं चिन्मात्ररूपमेकं तदात्मकान्येव भूतानि प्रेक्षत इत्यर्थः २९ ॥

एवं सर्वदा सिद्धसमाधेः कर्म लासिकी [illegible]**टीका** योगिनस्तत्त्वनवर्गव्याप्तित्वलक्षणं ब्रह्मसंस्पर्शमाह चतुर्भिः योगेन यत्रोपरमते चित्तमित्याकृतफलत्वेन सख्येन युक्तात्मा वर्तितस्वभावः अत एव सर्वत्र भूतमात्रे समं निर्विशेषं ब्रह्मैव पश्यतीति समदर्शनः स आत्मानमद्वैतं चिन्मात्रैकलक्षणं सर्वेषु भूतेषु परस्परं भिन्नेषु ब्रह्मादिस्थावरांतेषु तथोक्तस्वरूपस्यात्मनि सर्वाणि भूतानीक्षते अभेदेन साक्षात्करोति सर्वत्र चेतनवर्गस्यात्माभेदमेव पश्यतीत्यर्थः सर्वेषु भूतेष्वात्मानं द्रष्टृकतयानुप्रविष्टं भावयेत् आत्मनि च प्राणितानि नदीनां सर्वाणि भूतान्येकीकुर्यात् अतश्च समदर्शनत्वं जायत इति [illegible] २९

[illegible] ॥

पंचोलीटीका

इदानीं योगाभ्यासफलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं निदर्शयति सर्वेति योगयुक्तांतःकरणः सर्वभूतस्थं सर्वेषु भूतेषु ब्रह्मादिस्थावरांतेषु विषयेषु समं निर्विशेषं ब्रह्मात्मैकत्वेनात्मानं पश्यति च पुनः सर्वभूतानि आत्मनि पश्यति यः सर्वत्र समदर्शनः २९ ·

रणवीरसमिद्धोधिनी ॥

सर्वभूतस्थमिति योगे कर्मकौशललक्षणे युक्तः सावधान आत्मा चित्तं यस्य स तादृशः तथा सर्वत्र शत्रुमित्रादौ समं तुल्यं दर्शनं यस्य स शत्रुत्वमित्रत्वादिकं विशेषोपाधिं विहायाततायित्वं तेषां सर्वेषां वधा

ईताथांसामान्यंनिमित्तमादायस्वधर्माहितिं प्रयोगिकां पप्रपन्नि
तियावत् पतद्विशेषणद्वयेनच कर्मकौशल्लसमत्नोभयलक्षणे
योगद्वयाद्रूढस्यथीवसीयते सवात्मानं परमेश्वरं सर्वभूतेषु स्थि
तमीक्षते साक्षात्करोति सर्वभूतानिचात्मनि परमेश्वरे स्थितानी।
क्षते साक्षात्करोति मोक्षोपितस्यकरस्थएवेतितात्पर्यं २९॥

मधुभाष्य

सर्वभूतस्थमिति सर्वभूतस्थमात्मानं परमेश्वरं सर्वभूतानिचा
त्मनि परमेश्वरे तंचपरमेश्वरं ब्रह्मन्दगादवेश्वर्यादिनासाम्ये
नपश्यति तदुक्तं आत्मानंसर्वभूतेषुभगवन्तमवस्थितं अपश्य
त्सर्वभूतानि भगवत्यपिचात्मनीति समंसर्वेषुभूतेषुतिष्ठंतंपर
मेश्वरमिति फलमाह २९॥

भाषा अनुवाद

ब्रह्म साक्षात्कार रूप अपरोक्ष ज्ञानकैसा होता सो देखावते
है कि योग युक्तात्मा पुरुष ब्रह्म से ले स्थावर पर्यन्त मे स
मदर्शी सर्वभूत कहे प्राणी मात्रमे अपनेको देखता और या
वत् जीवों को भी अपने मे देखताहै अर्थात् अविद्याकृत देशा
दि भेद दूर होय ब्रह्ममय ज्ञानवान सर्वत्र समदर्शीन होता है २९

दोहा

सभीभूत मह आत्मको आत्म मह सबभूत देखें योगयुत चि
त सो सबमे समदृष्टाभूत २९॥

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति तस्या
हं न प्रणश्यामि स च मे न प्रणश्यति ३० ॥

शाङ्करभाष्यं

एतस्यात्मैकत्वदर्शनस्य फलमुच्यते योमामिति योमां पश्यति वा
सुदेवं सर्वस्यात्मानं सर्वत्र सर्वेषु भूतेषु पश्यति सर्वं च ब्रह्मादिभूतजातं
मयि सर्वात्मनि पश्यति तस्यैवमात्मैकत्वदर्शिनः अहमीश्वरोन प्रण
श्यामि नपरोक्षतां गमिष्यामि स च मेन प्रणश्यति स च विद्वान्मम
वासुदेवस्य नप्रणश्यति न परोक्षो भवति तस्य च मम चैकात्मकत्वा
त् स्वात्मा हि नामात्मनः प्रिय एव भवति ३० ॥

आनन्दगिरिकृतटीका

उक्तस्यैकत्वज्ञानस्य फलविकल्पनशङ्कां शिथिलयति एतस्येति त
दैकत्वदर्शनमनुवदति योमामिति ननु फलमिदानीमुपन्यस्यति त
स्येति ज्ञानानुवादभागं विभजते योमामिति तत्फलोक्तिभागं व्याच
ष्टे तस्यैवमिति अनेकत्वदर्शिनोपीश्वरो नित्यत्वान्नप्रणश्यतीमाशंक्या
ह नेति अहं परमात्मा तेनमति परोक्षोभवामीत्यर्थः स चेत्यादि व्याच
ष्टे विद्वानिति विद्वानिवाविद्वानपीश्वरस्य न नश्यतीमाशंक्याके नेत्या
दिना अविदुषस्तु स्वरूपेण सतोपि व्यवहितत्वादविषयत्वा नष्टप्रायत्वेनम
तेः ईश्वरस्य विदुषश्च परस्परमपरोक्षत्वे हेतुमाह तस्य चेति आत्मैकत्वेपि
कथं मिथोऽपरोक्षत्वं तत्राह स्वात्मेति ३० ॥

स्वामिकृतटीका

अनेन विविक्तस्वपदार्थ इति दर्शिता ततः पदार्थदर्शायन् एवं भूता
त्मना तस्य सर्वभूतात्मत्वेन यामइयामतेनमुख्यं कारणमिमाह यइति
मां परमेश्वरं सर्वत्र भूतमात्रेयः पश्यति सर्वं च प्राणिमात्रं मयि यः पश्य
ति तस्याहं न प्रणश्यामि अदृश्यो न भवामि स च मम अदृश्यो न भवति अ
नुग्रहीभूताकृपादृष्ट्यातं विलोकयं रक्षामीत्यर्थः ३० ॥ नु

पिशाचभाष्यं

एतस्यैकात्म्यकत्वदर्शनस्य फलमुच्यते योमां वासुदेवं सर्वत्र सर्वभूते
"पश्यति षु यः सर्वं च ब्रह्मादिभूतजातं मयि सर्वात्मनि पश्यति तस्यैवमात्मै
कत्वदर्शिनः अहमीश्वरोन प्रणश्यामि न परोक्षतां गमिष्यामि स

गी॰ टी॰ ष

130

व मे न प्रणश्यति न परोक्षो भवति तस्याहमात्मैकत्वात् स्वात्मा हि नामात्मनः प्रकाश एव भवति ३० ॥

रामानुजभाष्यं

यो मामिति ततो विपाकदशापन्नो मम साधर्म्यमागतः निरंजनः परमं साम्यमुपैतीत्युक्तप्रकारेण सर्वस्यात्मवस्तुनो विधूतपुण्यपापस्य स्वरूपेणावस्थितस्य मत्साम्यात् सर्वत्रात्मवस्तुनि मां पश्यति सर्वमात्मवस्तु च मयि पश्यति अन्योन्यसाम्यादेकतरदर्शनेनान्यतरमपि तादृशमिति पश्यति तस्य स्वात्मस्वरूपं पश्यतोऽहं तत्साम्यान्न प्रणश्यामि नादर्शनमुपयामि स मामपि पश्यन् मत्साम्यात्स्वात्मानं मत्सममवलोकयन् स नादर्शनमुपयाति ३० ॥

अभिनवगुप्तकृतटीका

सर्वत्र [illegible] मत्वेन [illegible]
[illegible] एकीकुर्वीत [illegible] दर्शनं [illegible]
[illegible] मेदवादविहारणादि [illegible]
[illegible] नप्रणश्यति ३० ॥

एष पदार्थः स्पष्टीक्रियते प्रणश्यो कार्यकारित्वात् तथा हि परमात्मनः सर्वगतं रूपं येन पश्यति तस्य परमात्मा स्वरूपप्रकटीकाराभावात् यच्चेदं वस्तुजातं तदाभासनात्मनि परात्मनि विनिविष्टं भाति तथाविधं यं न पश्यति स परमात्मस्वरूपात् प्रणष्टः तद्व्यतिरेके सत्त्वनिर्भासात् यस्तु सर्वगतं मां पश्यति तस्याहं न प्रणष्टः स्वरूपेणाभासनात् भावांश्च मयि पश्यति तेनैवाभासनोपपत्तौ द्रष्टृतायां स्फुरणगतां स न प्रणष्टः परमात्मनः ॥ ६० ॥

परमार्थप्रपाटीका

अथ स्थूलसमष्टिरूपेण सर्वात्मकत्वेना[illegible]नमयनीतिमाह यो मामिति यः पुरुषः मां स्थूलसमष्टिरूपं हिरण्यगर्भं सर्वेषु स्थूलव्यष्टिरूपेषु स्थूलशरीरेषु पश्यति तथा सर्वं व्यष्टिरूपं मयि समष्टिरूपे पश्यति तस्य पुरुषस्याहं न प्रणश्यामि स्वदेवानुभवाद् [illegible] स च पुरुषो मे न प्रणश्यति मत्कृपाकटाक्षशरणोपवनितिष्ठमीत्यर्थः ३० ॥

वनमालीटीका

एवं दर्शनफलमाह मामित्येन प्रियोहमपि तस्यात्यन्तप्रियश्चस्मादृश इति यो। योगी मां सर्वेश्वरं सर्वान्तर्यामित्वेन सर्वव्यापकत्वेन च सर्वत्र सर्वभूतेषु पश्यति सर्वं च चिज्जडं सञ्च मयि पश्यतीति एवं सोऽकोऽहं तस्यानुवाद्यात्मप्रत्यक्षाभिव्यक्तिभ्रान्तिनिरासाय तस्याहं न प्रणश्यामि स्वतोऽविवहिता विप्रकृष्टो वा नानादर्शनपरोक्षतां न व्रजामि स च मे न प्रणश्यति मत्तो व्यवहितो विप्रकृष्टो वा भवत्यवममपरोक्षतां नापि न व्रजति स्वरूपभावः सहस्रादाराद्विभिन्नतस्य योग्यायोग्यशेषविपकस्वरूपमयत्नगाप

महत्त्वात्प्रतिबद्धाविच्छिन्नप्रेमप्रवाहस्यैकस्य योगिनोहं स्वनितिवशो
न भवामि किंतु तद्वशीभूतः करामलकवत्तस्मैमं तनेयरोहं न यातिशामि
ममानंतब्रह्मांडोदयादिकरणेनानाविधमदाराधकानांफलदानेइह
निग्रहेमुक्तहेतूनामनुयेभ्यास्मत्सा काशवदुदासीनस्यवशेमरण
नयाहृदयेवहुमहेच्छिःसोप्पदर्शनस्पेतणीअनानव्रजति किंतुतस्यजी
वन्मुक्तस्यमदेकवद्यानुरागस्य योगतेमंवहामीति १० ॥

हनुमद्वैजयन्तीटी·

एवमात्मज्ञानरूपयोगविपाकदेशामुक्त्वेदानींतत्तोप्यधिकदशामा
ह योमामिति यएवमत्तो योगी सर्वत्र स्थावरादिस्थावरांतेषु चेतनाचेतन
रूपेषु चेतनमात्रेश्वासामात्मस्य मयंस्वरूपं सर्वचेतनाचेतनात्मंर्यामिनं सर्व
नियंतारं सर्वेश्वरं पश्यति च पुनर्मयि सर्वव्यापकरूपे सर्वाधारं सर्वकारण
पुरुषोत्तमे सर्वचेतनाचेतनपरमात्मरूपं पश्यति तस्यैवंभूतस्य स्वरूपपश्य
तो मदधीनस्थितिप्रवृत्तिकस्य मदेनमभक्तस्य मदेकजीवनस्य योगिनोऽ
हमहमप्रयामि न्नरूपो विश्वोद्भवस्थितिलयलीलः सर्वनियंता सर्वात्माव
सदेवतदद्दोन प्रणश्यामि प्रद्दर्शयोन भवामि सर्वेदृशो भवस्तद्रूपं पश्य
न्मदनन्यभक्तोमेममैस्वरस्य न प्रणश्यति प्रदर्शयो न भवति १० ॥

एवंशुद्धत्वंपदार्थंनिरूप्यशुद्धं मधुसूदनीटीका तत्पदार्थंनिरूपयति ॥

यो योगी मामीश्वरं तत्पदार्थमशेषप्रपंचकारणं मायोपाधिकमुपा
धिविवेकेन सर्वत्रप्रपंचे सद्रूपेण स्फुरणरूपेण चानुस्यूतं सर्वोपाधिवि
निर्मुक्तं परमार्थसत्यमानंदघनमनंतं पश्यति योगजेन प्रत्यक्षेणापरो
क्षीकरोति तथा सर्वं प्रपंचजातं मायया मय्यारोपितं मद्भिन्नतया स्वप्नादिव
यष्णुद्धविते नैव पश्यति तस्यैवं विवेकदर्शिनोऽहं तत्पदार्थो भगवान्प्रणश्यामि
ईश्वरः कश्चिन्मद्भिन्नोऽस्तीति परोक्षज्ञानविषयो न भवामि किंतु योगजा
परोक्षज्ञानविषयो भवामि यद्यपि वाक्यजापरोक्षज्ञानविषयत्वं त्वं प
दार्थाभेदेनैव तत्पदार्थस्य केवलस्यापि तत् तदर्थस्य योगजापरोक्षज्ञानवि
षयत्वमुपपद्यत एव एवं योगजेन प्रत्यक्षेण मामपरोक्षीकुर्वन्स च मन
प्रणश्यति परोक्षो न भवति स्वात्माद्विमम सविदानतिश्रियत्वात् स
र्वदा मदपरोक्षज्ञानगोचरो भवति येषामासमध्ये तेनो स्तयेवमज्ञा

स्यहमस्मिकेः तथैवशरणयास्यभीक्ष्णयानस्यपृथिविरिंशतिभगवतो
केः अविदितात्मस्वात्मनमपिमेतेभगवंतेनपश्यति अतोभगवानपश्य
त्यपितेनपश्यति सपनमविदितोनभुनक्तीतिस्फतेः विदितात्मसदेवस
त्रिविदितोऽनुग्रहभाजनमित्यर्थः ॥

सदानंदीटीका

तेषु परमार्थेतिरूपेषुवंशुद्धेतनैकात्मदृश्ये विशुद्धस्तसदार्थोपिदर्शिनाचनि
रूप्यते १ योयोगीतत्पदार्थंमांजगज्जन्मादिकारणं मायोपाधिविवेकेन
सर्वभूतेजगतीश्वरं २ तत्तात्करणरूपेणानुस्मृतेनिरुपाधिकं अद्वयानं
दमात्मानमपरोक्षीकरोतिवै तथासर्वंजगत्कार्यमारोपितंमायचेतने
तस्यैवदर्शिनोनाहंतत्पदार्थोमहेश्वरः ४ परोक्षज्ञानविषयोभवामि
स्वात्मतांगतः ईश्वरंकश्चिदस्मीतिमतत्तेतिपरोक्षधीः ५ पश्यामी
त्यसत्यमनधिगमात्विशेषणप्यति विदात्मस्वरूपपक्षात्वितपरोक्षोममा
पिसः ६ अविदितात्मत्वेनपश्यतीश्वरमात्मतं अतोनतेपरोक्षोपिप्रश्य
त्यपिअप्रपश्यति ७ तानीतिमापरोक्षत्वाद्दीशानुग्रहभाजनं ८ ३० ॥

नीलकंठीटीका

अस्यात्मैकत्वदर्शनस्यापिफलमाह योमामिति सर्वत्रास्मच्छब्दः स
र्वगात्मपरः योयोगीआत्मानंसर्वत्रपश्यतिसर्वंचात्मनिपश्यतितस्य
योगिनः तत्त्वज्ञात्मानप्रणश्यतिअदर्शनंनगच्छतितज्ञातआत्मानपु
नस्तिरोभवति सकलद्वैतस्यमूलाज्ञानस्यबीजाभावेनपुनरुदयासंभ
वादित्यर्थः ननुकार्यकारणसंघाताभिमानिनाशुक्तिरूप्यवद्ब्रह्मण
ध्यस्तेनतदभिमानत्यागसर्वंकेनात्मनास्याधिष्ठानभूतेब्रह्मात्मनिशोधि
तेनविलयंगतस्यात्मनःअर्थाद्ब्रह्मैवात्मकजीवस्यापितिरस्कारोऽच्छेदोभव
तीत्याशंक्याह सचमेनप्रणश्यतीति सचविद्वान्मेममनप्रणश्यति
नतिरोभवति मदभिन्नत्वात् भवेदेतदेवयदिजीवोमत्तः पृथक्स्याद्वा
ममविकारोवाभवेत् तदाविरन्तयोक्तेदृशास्यात् अहमेवतत्त्वमसितः
त्वमस्यहंब्रह्मास्मित्रयमात्माब्रह्मेत्यादिशास्त्रात् तस्माद्युक्तमुक्तं
सचमेनप्रणश्यतीति ३० ॥

एवंसंप्राप्तपरसमाधेरात्मवि **आनंदीटीका** षयां स्थितिं लक्षयित्वा परमात्मविषयां दृष्टिमीश्वरः प्रणिधा

नहेतुकाम ह॥

सर्वत्र यः परमयोगी संयमवृत्त्या सर्वेषु भूतेषु वर्तमानः मां वासुदेवमनन्तमितं परमेश्वरं सर्वानुग्राहकं सर्वत्र पश्यति सर्वेषु भूतेषु स्थितं साक्षात्करोति सर्वं भूतवर्गं च मयि पश्यति मदाधारत्वेन प्रवर्तमानं पश्यति जगतां स्वयं प्रकृत्त्वसंभवात् तस्याहं न प्रणश्यामि इत्यादि मम साक्षात्कृतमेवायं प्राप्तः स्वार्थः ३० ॥

रामकंठीटीका

यथोक्तस्वरूपे स्वात्मनि सर्वभूतानि विगलितान्योन्यभेदानि पश्यती त्यात्म; सर्वभूतानां चाभेददर्शनप्रतिपादनपरमेतद्यथा चैतत्संभवति तथा प्रतिपादितमेव प्राक् तथापि स्फुटार्थं पुनरुच्यते आत्मा नामायं स्वावङ्गः स्वग्राह्यग्राहकभूतत्वशून्यतादिसकलविकल्पविरहविशुद्धसंवित्प्रकाशैकलक्षणात्मस्वसंवेदित्त्वं नामाप्याभिव्यक्तिरीत्या तेन यद्यत्संवेदितं तत्तत्संवेद्यमानमेव तेन तेन रूपेणात्मानं लभते ३० ॥:

अथ सिद्धसमाधेः सकाशाद्भ **लालिकी[illegible]टीका** द्भूतस्य विशेषमाह॥

यो योगी सर्वत्र भूतमात्रे मां सकललक्षणमहैतस्वरूपमात्मानं पश्यति संवेदयति तथा सर्वं च प्राणिजातं मयि पश्यति तस्याहं न प्रणश्यामि मितयोगिनः सर्वदृश्यो न भवामि कुत्यानाभावात् स च मम मे स्वरस्यादृश्यो न भवति स्वरूपभूतत्वात् न चैवं विधो विधिकिंकरो योगभ्रष्टो वा स्यादित्याह ३०

पंचोलीटीका

एतस्य आत्मैकत्वदर्शनस्य फलं दर्शयति यः मां सर्वस्य आत्मानं सर्वत्र सर्वेषु पश्यति सर्वं च ब्रह्मादिभूतजातं मयि विश्वात्मनि आरोपितं पश्यति तस्यैवं आत्मैकत्वदर्शिनः अहमीश्वरो न प्रणश्यामि न परोक्षतां गच्छामि स च विद्वान् मम वासुदेवस्य न प्रणश्यति न परोक्षो भवति तस्य च मम च एकात्मकत्वात् एवं श्लोकार्थे सम्यग्दर्शनमनूद्य तत्फलं मोक्षविधानं तस्य निर्वंधराहित्यं दर्शयति ३०

योमामिति यः कर्मयोगी मां परमेश्वरं सर्वत्र स्थाने वर्तमानं पश्य
ति साक्षात्करोति मयि च सर्वं जगत्पश्यति तस्य कर्मयोगिनो ऽहं
न प्रणश्यामि नऽदृश्यो भवामि स च कर्मयोगी मम न प्रणश्यति
अदृश्यो न भवति प्रत्यक्षो भूत्वा हृत्पादस्यान्तं विलोकनजयभागि
नं करोमीत्यर्थः ३०॥

मध्वभाष्य

योमामिति तस्याहं न प्रणश्यामीति सर्वदा योगक्षेमवहः स्या
मित्यर्थः स च मे न प्रणश्यति सर्वदा मद्भक्तो भवति भृत्यापि
स्वामिन्यरक्तस्यन्न तथः एवं भृत्येऽपि भजन्त्यभृत्यइति हि प्रसि
द्धिः उक्तं च सर्वदा सर्वभूतेषु समं मां यः प्रपश्यति अचलात्तस्य
भक्तिः स्यात् योगक्षेमं वहाम्यहमिति गारुडे एतदेव स्पष्टय
ति ३०॥

भाषा अनुवाद

अब पूर्वोक्त ज्ञानीको जो फल होता सो कहते हैं कि साक्षा
त् परमेश्वर जो मै तिसको यावद्रूप मात्र सब मे और सकल
यो कुछहै सो मेरे मे यो देखता है तो उसको हम अदृश्य न
हीं औ हमको वह भी अदृश्य नही अर्थात् हम प्रत्यक्ष होय
कृपादृष्टि से उसपर अनुग्रह करते है ३०

दोहा

जो मोहि देखें सर्व मह सर्वलखें मो माहि सो दूर नहि मोह
सें मे अदृश्य नहि ताहि ३०॥

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः सर्वथा
वर्त्तमानोपि स योगी मयि वर्त्तते ३१॥

शांकरभाष्यं

यस्मात्त्वहमेव सर्वात्मैकत्वदर्शी इत्येतत् पूर्वश्लोकार्थं सम्यग्
दर्शनमनूद्य तत्फलं मोक्षोभिधीयते सर्वेति सर्वथा सर्वप्रकारैर्व
र्त्तमानोपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्त्तते नित्यमुक्त
एव सः न मोक्षं प्रति केनचित् प्रतिबध्यत इत्यर्थः ३१॥

आनन्दगिरिकृतटीका

विहितप्रतिषिद्धयोरेककर्तृत्ववादेन विद्याफलं विवृणोति यस्मात्त्वेति तस्मा
देकत्वदर्शनार्थं प्रयतितव्यमिति शेषः पूर्वार्द्धेनानूद्योत्तरार्द्धेन फलवि
धिरिति मत्वाह इत्येतदिति रागादिरहितस्य यमनियमादिमत्कारवतः
स्वेच्छाप्रवृत्तस्यापि नाशङ्कितव्य तावदेवोक्ति सर्वथेति प्रतिभासमानो
पि यथेष्टचेष्टाङ्गीकारे कुतो ज्ञानवतो नित्यमुक्तत्वं प्रातीतिक इत्याह
प्रतिबन्धाद्विनाशं वारयति नमोक्षमिति ३१॥

स्वामिकृतटीका

नचैवंभूतो विधिकिंकरः स्यादित्याह सर्वभूतस्थितमिति सर्वेषु भू
तेषु स्थितं मामभेदमास्थितो यो भजति स योगी ज्ञानी सन् सर्वथा कर्मपरि
त्यागेनापि याज्ञवल्क्यादिवत् ऊर्ध्वं गापि जनकादिवत् निषिद्धेनापि दत्ता
त्रेयादिवत् वर्त्तमानो मदेकत्वेन मय्येव वर्त्तते मुच्यते न तु भ्रश्यतीत्यर्थः ३१

पैशाचभाष्यं

यस्मात्त्वहमेव सर्वैकात्मकत्वदर्शी इत्येतत्पूर्वश्लोकार्थं सम्यग्दर्शनमनू।
द्य तत्फलं मोक्षोभिधीयते सर्वभूतस्थितमित्यादिना सर्वथा सर्वप्रका
रैर्वर्त्तमानोपि सम्यग्दर्शी योगी मयि विष्णोः परे देवे नेव वर्त्तते नित्यमुक्त एव
सः न मोक्षं प्रति केनचित्प्रतिबध्यत इत्यर्थः ३१॥

रामानुजभाष्यं

ततोपि विपाकदशामाह सर्वभूतस्थितमिति योगदशायां सर्वभूत।
स्थितं माम् असंकुचितज्ञानैकाकारतया एकत्वमवस्थितः साधर्म्येण
विभागेन सुदृढं यो भजते स योगी व्युत्थानकालेपि यथा तथा वर्त्तमानः स्वा
त्मनि सर्वभूतानि च पश्यति स्वात्मनि सर्वभूतेषु च सर्वदा मत्साम्यमेव पश्य

गी० टी० ३

तीत्यर्थः ३८ ॥

अभिनवगुप्तकृतटीका

~~आत्मायोकार्यकारिकत्वात् न व्याहिपरमात्मनः सर्वगतेश्वरस्येत्य एवमितस्य परमात्मावलम्बिनः स्वरूपप्रकटीकारणं भावान् यथेदेव तत्वान्तेनदात्तत्वात्त्रिपरमात्मनिविनिविहमाति ३८ ॥~~ यस्मैवं ज्ञानं

विद्वांसावेकत्वमेवैकात्म्य भगवंतं सर्वगतं विद् स्वचिवस्यागातोपि न लिप्यते ३८

परमार्थप्रपाटीका

अथैतदनेनैवं सर्वं दृश्यजातमात्माकारेण पश्यतीत्याह सर्वभूतेति । यः सर्वभूताकारेणास्थितं एकत्वमास्थितः सन् भजति अनुवर्तते स वर्त्तमानोपि नामरूपाकारेणास्थितोपि मयि वर्तते मदाकारो भवति तदुक्तं पुराणम् यामहमनुजमानं गतरागसर्वगत्याज्ञाग्रहिरसतत्वयोमा हिषमुखे महाभूतोद्भूतसविद्धदधिपीलादिसकलं तथैतन्मात्रमतं स्मर तिपुरतोमनयनयोरितिश्रुतिरपि यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्वि जानतः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति भाष्यं यस्य विज्ञा नतो विज्ञानवतः पुरुषस्य सर्वाणि भूतानि सर्वभूतात्मकं विश्वमात्मैवाभू त् भूतभावनया हि मेनद्रात्माकारमनुजानतस्तस्यैकत्वमद्वैतं अनुपश्य तः को मोहः मायाविलासरूपमतस्तानकुतः तथा तत्सयुक्तः शोकश्च कुत इत्यर्थः ३८ ॥

वनमालीटीका

सर्वभूतेषु ब्रह्मादिस्तंबपर्यंतेषु नियामकत्वेन व्यापकत्वेन वा स्थितं मे ऐकत्वं केवलजीवन्मुक्तिमास्थितो भजति तेन यथावदविद्वि ज्ञा सर्वोत्तमत्वधीरविकारेण हृसंततिमपि करोति सयोगीसदामद रो तत्त्वज्ञो यावच्छरीरादिकं वर्तते तावन्मामध्यकमशोवस्था सर्वका २४ मे मार्गेन यावन्लादिवत् विहितेनवाकर्मणा जनकादिवत् प्रतिषि द्धेनवाकर्मणा दत्तात्रेयजडभरतादिवत् सर्वथा येनकेनापि रूपेण । वर्तमानोपिमत्प्रसादेन निश्शमस्वरूपानंदमत्स्वरूपाकारकाविद्य त्वेनापरीत्तीभूते मय्येवजलेमत्स्यवद्रमते विहरति कृतकृतस्य कार्यं कि चिन्नास्तीत्यर्थः ३८ ॥

श्रीमद्वैजयन्तीटीका

ततोप्यधिकदशामाह सर्वभूतस्थितमिति सर्वभूतस्थितम् सर्वेषु नि खिलेषु भूतेषु चेतनेषु अन्तर्यामिरूपेणा तिष्ठतीति सन्तधातानिखिलचेतना

चेतना

१३४

वेदनात्मगतस्मात्मनामहमर्थाभिन्नेन गुणशक्तिस्वरूपकं सर्वेश्वरं
पुरुषोत्तमं योयोगी पीयकत्वे सकलब्रह्मादिस्थावरांतेषु चेतनाचेतना
त्मकेषु विशेषकपदेष्वपरस्परं तु यो मामिहरूपेणानिष्ठतीमेवं भावनयाप।
कत्वे यद्वा परमेश्वरादनारायणादेवमनुष्याद्याकारैर्गौरश्यामादिरूपे
षु भिन्नभिन्नत्वेऽपि नत्वनन्तेश्वरस्वरूपकपदेवेति भावनयैकत्वे यद्वा सर्वे
षामनन्तस्वरूपाणां जीवात्मनां सुरनरादिष्वाकृतदेहाद्यैः श्वकृश्व
कृ[illegible]।
गुणशक्त्यादिविशिष्टैर्भिन्नभिन्नत्वरूपमानत्वेऽपि प्रकृतिमेवं परहि
तत्वेसमिस्तात स्वरूपेण स्वाभाविकः समानएव स्वरूपरतिभावेनए
कत्वमास्थितः सन् भजते सेवते ध्यायति वा स ईदृशो योगी सर्वथा
सर्वप्रकारेण वर्तमानोऽपि ध्यानकालेषु ध्यानकालेष्वमपि इह कर्म
कुर्वन्नपि मयि पुर्विंशे सच्चिदानंदरूपे वर्तते तिष्ठति वर्तमानदेहे
स्थितोपि न सर्वदालिलतणमोतेतिष्ठतीत्यर्थः ३१ ॥

आसमन्तात् विचारेण आस्थितः

एवं त्वंपदार्थं तत्पदार्थं च शुद्धं

मधुसरस्वतीटीका

निरूप्य तत्त्वमसिवाक्यार्थं निरूपयति ॥

सर्वभूतेषु अधिष्ठानतया स्थितं सर्वज्ञं सत्यं सन्मात्रं मामीश्वरं तत्
पदलक्ष्यं स्वेन त्वंपदलक्ष्येण सहैकत्वमभेदमास्थितः बु
द्धाकाशो महाकाशाः सर्वेषामुपाधिभेदनिराकरणेन निर्विशेषो भजति स्थि
अहं ब्रह्मास्मीति वेदांतवाक्येन साक्षात्कारेणापरोक्षीकरोति सो
विद्यात्तत्कार्यनिवृत्त्या जीवन्मुक्तः कृतकृत्यएव भवति यावत्तत्सर्वावधि ह्रेन
तावत् बाधितानुवर्तते नावत् प्रारब्धकर्म प्राबल्यात् स
र्वकर्मत्यागेन वा याज्ञवल्क्यादिवत् विहितेन कर्मणा वा जनकादि वत् प्रतिषिद्धेन कर्मणा गा
वत् सर्वथा येन केनापि रूपेणावर्तमानोऽपि व्यवहरन्नपि स योगी ब्रह्मा दत्तात्रेयादि
हमस्मीति विद्वान् मय्यपि परमात्मन्येवाभेदेन वर्तते सर्वथा न स्वमोक्षं
प्रति नास्ति प्रतिबंधशंका न स्पृहते देवाश्च नाभूत्या ईशत न आत्मा से
षां स भवतीति श्रुतेः देवा महाप्रभावा अपि तस्य मोक्षाभवनाय नेशा
ते किमुतान्ये तत्त्वज्ञास्मर्यः वस्त्र विहितो निषिद्धकर्मणो प्रवर्तकयोः।
रागद्वेषयोरसंभवेन निषिद्धकर्मासंभवेऽपि तदंगीकृत्य तत्त्वज्ञानस्तु मपि

मिदश्रुकं सर्वथावर्तमानोपीनिहत्वापिसर्वमांल्लोकान्नहंतिनतिब। ध्यतइतिवत् । [illegible] ॥ ३१ ॥

सदानंदीटीका

नत्वेपदार्थमुक्त्वैवमखंडार्थोनिरूप्यते ब्रह्मादिस्थावरांतेषुभूतेषु भावभेदय: १ निर्विशेषेचिदानंदेमायमहंतेनिरंजने गुणाद्रूपक्रियाद्ल्लविक्रियाद्यैकहेतुके २ भेदमुक्तोध्यजन्शुद्धंसर्वाविद्यावितथास्थितेन मदाद्यैकलक्ष्यस्वात्मोलक्षणस्माश्रितः ३ सहैकत्वंसमोमितिइममेवाभेदमाश्रितः श्रेहत्रयेनिवेदेनवाक्यजज्ञानवर्त्मना ४ श्रुपरोक्षीकृतामात्मस्वरूपः विधातव्यकृतं कृतकृत्यमनपायमोपजीवन्मुक्तउदारधी: ५ यावत्तस्यशरीरादिदर्शनंचानुवर्तते आभासमात्रंतूपस्यपश्यात्मस्वदर्शनं ६ प्रारब्धकर्मशावसंतानकर्माणि वासजन् कुर्वन्नपिविहितंकर्मनिषिद्धंवासमाचरन् ७ येनकेनापिरूपेणयोगीसर्ववर्तते पि ब्रह्मणीतिप्ठियाविद्वानत्मव्यवपरमात्मनि ८ एकत्वंवर्ततेनित्यमद्वैतेनैवसर्वदा निमग्नकस्वभावत्वात्कर्मभिर्नैवलिप्यते ९ यमेयमोर्धनीतेदिपदेनित्यंविराजते १० यस्मात्सर्वत्रणाकदाचविलसद्वैराग्यमुख्योदयालम्यज्ञानमसीनिनेगमगिरोद्भूतात्मबोधाग्निना दग्धाज्ञानमशेषभेदजनकंधीरापरंविद्वत्रेतिष्ठेदात्मपदःप्रदंतमनिशंक्तस्मभजेहंसदा ॥३१॥

नीलकंठीटीका

यस्मात्सर्वात्मैकत्वदर्शी अहमेवसर्वेनान्यसोत्तः अतिवध्यमानस्माह सर्वभूतेति सर्वोपादानतया सर्वेषुभूतेषुमनारूपेणास्फुरणरूपेणावस्थितंमांपरमात्मानमेकत्वंजीवब्रह्मणोरैक्यमास्थितः सन्भजतिनि। विकल्पेनसमाधिनामेवनेसयोगीयुग्मानदशायांप्रारब्धकर्मवशात्

बाधितानुवृत्त्या देहमात्रदृष्टः सर्वथा सर्वप्रकारेण प्रारब्धवशाद्विक
र्मयोगेन वा व्युत्थानकाले विहितकर्मणा वा रागाद्येर्यादिवन्निषिद्ध
कर्मणा वा वर्तमानोऽपि व्यवहरन्नपि मय्येव वर्तते न मत्तश्च्युतो भवति
यतो देवेभ्योऽपि नास्य भयमित्युच्यते तस्य ह न देवाश्चनाभूत्या ईशत
आत्मा ह्येषां स भवतीति नैनमयमण्यर्षे देवाश्चपितस्य ब्रह्मविदः
अभूत्यै अनैश्वर्याय न ईशानेन समर्था भवंति यतो यमेषामात्मेति श्रु
त्यर्थः सततं संसारी सर्ववद्वर्ततीत्यर्थः ३१ ॥

आनंदीटीका

एकत्वमास्थितः कर्मभोगार्थं नानाशरीरस्थोऽप्यहमेवैकरूपवन्नाय
भूषणो कृष्णो सर्वव्यापी भोक्तेति सयोगी सर्वथा मनसि धारयन्
मां परमेश्वरं भजति सयोगी सर्वथा सर्वेषां कर्मभोगार्थं संक्रांतानां
तेषां तेषां शरीराणां प्रकारैः कायिकैर्वाचिकैश्च वर्तमानोऽपि मयि वर्तते
मत्सायुज्यभाक् व्याख्यातं चैतत् संस्कारमात्रात्कारात्सर्वज्ञाति परि
ज्ञानमिति सूत्रे परत्राप्येवमेव संस्कारमात्रात्कारात्सर्वज्ञातिसंवेदनमि
ति [illegible] ३१ ॥

रामकंठीटीका

संवेद्यमनेनाचनिर्विकल्पावस्थापूर्विका भवति तेन यद्यत्किंचिद्यदा
यदा यत्र यत्र येन येन प्रमात्रा संवेद्यते तत्तदहमेवेति चिन्मात्रस्वरूपमि
त्यात्मनः संवेदितुर्वेद्यानां च सर्वभूतानां नास्ति कश्चिद्भेदो वास्तवः केव
लमविद्यापारमेश्वरमायोपाधिनैव वेद्यवेदकविकल्पः सर्वमिदमन्योन्य
विभिन्नतयावभासयति स च परमेश्वरप्रसादादाकस्मिकतया विद्याख्यया
दृष्टातत्त्वविच्छिन्नात्दशो विभाव्यमानो यदा विगलति तदाभिन्नसेतु सा
गरसलिलवत्सर्वमिदमात्मतयैवैकेनावभासते ज्ञानकर्मसमुच्चयानुष्ठा
नात्मनि चास्मिन्महायोगप्रसादेन विद्याप्रक्रियेवाधिकृत इति कर्मयोगी
सर्वत्र स्थावरे जंगमे च [illegible] भूततया समदर्शनेदैतात्मकत्वेकदर्शी न
क्वैः [illegible] ॥

लाक्षि की [illegible] टीका

सर्वभूतेषु मामभेदेन यो भजते सयोगी सर्वथा कर्मत्यागेन वर्तमा

नोपि मय्येववर्त्तते नतुभ्रश्यतेइत्यर्थः [illegible] ३१ ॥

पंचोलीटीका

सर्वभूतस्थितमिति यः सर्वभूतस्थितं मांएकत्वमास्थितः सर्वत्राभेदबुद्ध्याभजते सयोगीसम्यग्दर्शी सर्वथासर्वप्रकारैः कर्मसंगेनवापिवैसवेपरेपदेवर्ततेनकेनचित्प्रतिषिध्यतइत्यर्थः ३१॥

रणवीरसमिद्बोधिनी॥

सर्वभूतस्थितमिति यः कर्मयोगी मांपरमेश्वरंसर्वभूतस्थितं सर्वप्राणिहृदयेषुस्थितंतांस्तान्क्रियासुप्रवर्तयंतंभजति साध्यसिद्धयेप्यारणंकरोति कथंभूतः एकत्वंसुहृदादिषुसमतां समास्थितः सकर्मयोगीमयि परमेश्वरेवर्तमानः यथेश्वरेच्छा स्यात्तथाभवतुनाम परंत्वहंस्वधर्ममनुतिष्ठाम्येव येनाहंवाच्यो नभवामीत्येवंनिश्चयवान् सर्वथावर्तते सर्वैःप्रकारैः प्रवर्तते यद्वा सर्वथासर्वैःप्रकारैर्वर्तमानः कर्मसुप्रवृत्तिमान् सकर्मयोगीमयिवर्तते अंतकालेमामेवप्राप्नोतीत्यर्थः ३१॥

मधुभाष्य

सर्वभूतस्थितमिति एकत्वमास्थितः सर्वत्रैकएवेश्वरइतिस्थितः सर्वप्रकारेणवर्तमानोपिमय्येववर्तते एकमपरोक्षंप्रपन्नोज्ञानफलंनियतमित्यर्थः तथापिप्रायेनाधर्मंकरोति कुर्वन्नपिस्वमदृष्टे दुःखसूचकंभवतीत्युक्तंपुरस्तात् आदेव कदाचिदपिनाधर्मेबुद्धिर्विस्वरूपंभवेत् प्रमादात्तत्कृतंपापंस्वल्पंभस्मीभविष्यति आदिराजैस्तथादेवैःऋषिभिःक्रियतेकिंयत् वादूत्यात्कर्मणस्तेषांदुःखसूचकमेवतदिति सामान्यप्रकारान्तरेणव्याचष्टे ३१

भाषा अनुवाद

एवम्भूत पुरुष विधि कहे कर्म के अधीन नहीं है सो कहते
हैं कि सर्व भूत मे वर्तमान जो मै तिस को एक बुद्धि करे ए
क मो हिं केर और बुद्धि नहीं है जिस के सो मेरे ही को आश्र
य करि भजता है सो योगी तत्वज्ञानी सकल कर्म्म परित्याग
करिके सर्वथा वर्तमान करे जीवित दशा मे भी मेरे मे प्राप्त है
अर्थात् सायुज्य गतिको प्राप्त है ३१

दोहा

सभीजीवमें स्थितमोहिको भजेंजोएकता पाय सम वि
धि वर्तत योगी जोसो मो मांहि समाय ३१॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन सुखं
वा यदि वा दुःखं स योगी परमो मतः ३२॥

शांकरभाष्य

किञ्चान्यत् आत्मेति आत्मौपम्येन आत्मा स्वयमेव उपमीयतेऽनयेति
उपमा तस्याः उपमायाः भावः औपम्यं तेनात्मौपम्येन सर्वत्र स
र्वभूतेषु समं तुल्यं पश्यति योऽर्जुन सच किं समं पश्यतीत्युच्यते य
था मम सुखमिष्टं तथा सर्वप्राणिनां सुखमनुकूलं वाशब्दश्चार्थे य
दि वा यच्च दुःखं मम प्रतिकूलमनिष्टं यथा तथा सर्वप्राणिनां दुः
खमनिष्टं प्रतिकूलमित्येवमात्मौपम्येन सुखदुःखे अनुकूलप्रतिकू
ले तुल्यतया सर्वभूतेषु समं पश्यति न कस्यचित् प्रतिकूलमाचरत्य
हिंसक इत्यर्थः यएवमहिंसकः सम्यग्दर्शननिष्ठः स योगी परम उत्कृ
ष्टो मतोऽभिप्रेतः सर्वयोगिनां मध्ये ३२॥

आनन्दगिरिकृतटीका

स्वैराचरणस्याप्रतिबन्धकत्वकथनात् परपीडनस्य योगिनः सम्यग्द
र्शने प्रत्यप्रतिबन्धकत्वप्रसक्तावुक्तं किंचेति प्रत्यवदपि किंचदुच्यते।
परमयोगिनो निर्देशद्वारा योगमाहात्म्यमित्यर्थः उपमैवौपम्यमा
त्मा च तदौपम्यं च तेन सर्वभूतेषु यः समं पश्यतीत्युक्तं तदेव सम्यग्द
र्शने प्रश्नपूर्वकं विवृणोति किमित्यादिना विकल्पार्थत्वं वारयति वा
शब्द इति उपदर्शितसमदर्शनफलमभिलपति न कस्यचिदिति कि
मपेक्षया तस्य परमत्वं तदाह सर्वेति ३२॥

स्वामिकृतटीका

एवं भजतां योगिनां मध्ये सर्वभूतानुकंपी श्रेष्ठ इत्याह आत्मौ
पम्येन सर्वत्रेति आत्मौपम्येन स्वसादृश्येन यथा मम सुखं प्रियं दुःखं
चाप्रियं तथान्येषामपीति सर्वत्र समं पश्यन् सुखमेव सर्वेषां यो वा
ञ्छति न तु कस्यापि दुःखं स योगी श्रेष्ठो ममाभिमत इत्यर्थः ३२॥

पिशाचभाष्य

किंच आत्मा स्वयमेव उपमानं तद्भावमात्मौपम्यं तेन तदौपम्येन सर्व
त्र सर्वभूतेषु समं तुल्यं पश्यति योऽर्जुन किं तत्पश्यतीत्युच्यते यथा मम

गी॰
टी॰
६॰

मसुखमिष्टंतथाप्राणिनांसुखमनुकूलंवाशब्दश्चार्थेयदिवायथा
दुःखंममप्रतिकूलमनिष्टंतथासर्वप्राणिनामनिष्टंप्रतिकूलमित्ये
वमात्मौपम्येनदुःखंसुखंवानुकूलप्रतिकूलेतुल्यतयासर्वभूतेषुसमं
पश्यतिनकस्यचित्प्रतिकूलमाचरतिअहिंसकइत्यर्थः एवमहिं
सकःसम्यग्दर्शननिष्ठःसयोगीपरमःउत्कृष्टोमतोभिमतःविनत
इत्यर्थः ३२ ॥

रामानुजभाष्यं

ततोऽपिकाष्ठामाह आत्मौपम्येनेति आत्मनश्चान्येषांचआत्मनामसं
कुचितज्ञानैकाकारतयोपम्येनस्वात्मनिचान्येषुसर्वत्रवर्तमानेषु
पुत्रजन्मादिरूपंसुखंतन्मरणादिरूपंदुःखंचसमंचैवसाम्यात्समंयः
पश्यति परपुत्रजन्ममरणादिसमंस्वपुत्रजन्ममरणादियःपश्यती
त्यर्थः सयोगीपरमयोगकाष्ठांगतोमतः ३२ ॥

अभिनवगुप्तकृतटी॰

तथाविधेयोगेनपश्यतिसर्वपरमार्थस्वरूपात्मनाएवदुःखितेकेवल
निर्मलात् एवसर्वगतेमोपश्यतितस्याहंनप्रणश्यःस्वरूपेणभा
सनात् भावांश्चमयिपश्यति तेषांभासनोपादानोहस्यमायांमस्या
गतस्तस्यप्रणाशःपदार्थानां ३२ ॥ सर्वस्यचसुखदुःखेआत्मतुल्यतयापश्यतीतिस्वरूप

परमार्थप्रपाटीका

अथेनादृशस्यापिपुरुषस्यलोकव्यवहारवर्त्तेष्टमानस्यदशामाह।
आत्मौपम्येनेति यःपुरुषःसर्वत्रसर्वभूतेषुसुखंदुःखंवाआत्मौप
म्येनपश्यति यथामे आत्मनःसुखमिष्टंमाऽदुःखमनिष्टंतथैवसर्व
जन्तूनामितिपश्यतिसपरमःश्रेष्ठःसर्वदर्शासमोयोगीमतः ३२ ॥

वनमालीटीका

भगवदुपरोक्तस्यानिवृत्तनिखिलविषयस्यप्रारब्धकर्मवशात्समाधे।
र्व्युत्थानेऽपीदृशंवर्तनमित्याह आत्मेति आत्मौपम्येनात्मदृष्टा
न्तेनसर्वत्रप्राणिजातेसुखंयदिवादुःखंसमंतुल्यंपश्यतियथास्यानिष्टं
यथानसंपादयतितथापरस्याप्यनिष्टंनसंपादयति अद्वेषतद्बीजावि
द्याशून्यत्वात् एवंस्वस्येष्टंयथासंपादयतितथापरस्यापीष्टंयःसंपा
दयतितथाप्यनिष्टंनसंपादयति अद्वेषतद्बीजाविद्याशून्यत्वात्एवं

स्वसेहंययासंपादयतितथा परस्यापीहंयः संपादयतिरागतद्देत्व
वियाशून्यत्वात् सनिर्वासनतयोपशान्तमनाः परमः श्रेष्ठः पूर्वस्मात् ।
उक्तत्वेपिभगवत्पादैरेतेकश्चित्मनोनाशवासनाक्षययोर्निः शेषतया
भावात्जीवन्मुक्तिः सुखंस्वयोगफलत्वेनानुभवतिचित्तविक्षेपेण
परदृष्टदुःखमननुभवतिसोपरोयोगीदेहपतिकैवल्यभागित्वात् देहस
द्भावपर्यन्तंवरदृष्टदुःखोनुभवात् अपेत्नजातत्स्वयोगपाशेषभगवद्धिशे
षापरोहोलब्धपूर्णानस्यमारोहेनितिवृत्तेः शेषाविष्टोजातमनोनाशवा
सनाक्षयः युगपदभ्यासाद्दृष्टदुःखवतिवृत्तिपूर्वकंजीवन्मुक्तिसुख
मनुभवन्प्रारब्धकर्मवशात्समाधेर्व्युत्थानेपिस्वदृष्टान्तेनसर्वप्राणि
नांसुखंदुःखंचसमंपश्यन्नात्मदृष्टतिसपरमोयोगीतिभावः ३२ ॥

ऊममवैजयन्तीटीका

ततोप्यधिकंयोगविपाकदशामाह आत्मौपम्येनेति हे अर्जुन अहं
न करणायतनस्ततोप्यधिकदशामापन्नोयोगी सर्वत्र सर्वेषु भूतेषु
दृष्टोऽनुरागद्वेषशून्यविधेयभूतेषु आत्मौपम्येनस्वपरेषामात्मना
मौपम्येनतात्मैकस्वरूपत्वेनसाम्येनसमदृष्टेनवासुखंवायदिवामिल
नादिरूपंयदिवादुःखंशत्रुमिलनादिरूपंसममनुभयोस्तुल्यमात्मनपश्य
ति यतः सुखंआध्यात्मिकादित्रितापत्रयरहितंदुःखंयद्युक्तंसमंपश्यति
यथास्वमित्रपुत्रकलत्रादिशरीरादीनांतापत्रयमभूयरूपसुखेनसुखी
नयुक्तत्वेनदुःखीभवेत्तथापरमित्रपुत्रादिशरीरादीनामपितापत्रयर
हितात्मकसुखेनसुखीनयुक्तत्वेनदुःखीभवेदितिमभिप्रायः सस्वसुखदुः
खवत्परसुखदुःखंसममत्वेनपश्यन्योगीपरमः श्रेष्ठोमतोममाभिमतो
भवतिस्वपरसुखदुःखसममदृष्टिस्तु ततस्तोपिश्रेष्ठोनभवतीतिभावः ३२

मधुसूदनीटीका

+ आत्मौपम्येनआत्मामुपमानेनात्मदृष्टान्तेनसर्वत्रप्राणिजातेषुसुखंवायदि
वादुःखंसममतुल्यंयः पश्यतिस्वस्यानिष्टंययायानसंपादयति यथेवपर
स्याप्यनिष्टंयोनसंपादयति परद्वेषशून्यत्वात्पथंस्वसेष्टंययासंपाद
यतितथापरस्यापीष्टंयः संपादयतिरागशून्यत्वात् सनिर्वासनतयो
पशान्तमनायोगीब्रह्मविन्परमः श्रेष्ठोमतः पूर्वस्मात्हे अर्जुन अस्मा

+ एवमुक्तत्वेपितत्ववोधेकश्चित्मनोनाशवासनाक्षययोरभावाज्जीवन्मुक्तिसुखंनानुभवति चित्तवि
क्षेपेणचदृष्टदुःखमनुभवतिसोपरमोयोगीदेहपातेकैवल्यभागित्वात् देहसद्भावपर्यन्तंचदृष्टदुःखा
नुभावात् तत्वज्ञानमनोनाशवासनाक्षयाणांतुयुगपदभ्यासाद्दृष्टदुःखनिवृत्तिपूर्वकंजीवन्मुक्तिसु
खमनुभवन्प्रारब्धकर्मवशात्समाधेर्व्युत्थानकाले ॥ +

गी॰
टी॰
ष

अतस्तत्त्वज्ञानमनोनाशवासनाक्षयाणामक्रमं(म)भ्यासाय महान्प्रयत्न
आस्थेयः श्रुत्यर्थः नेदं सर्वं द्वैतजातमद्वितीये चिदात्मनि मायया क
ल्पितत्वान्मृषैव आत्मैवैकः परमार्थसत्यः सच्चिदानंदाद्वयोऽहमस्मी
ति ज्ञानं तत्त्वज्ञानं १ प्रदीपज्वालासंतानवद्वृत्तिसंतानरूपेण परिणाम
[illegible]मानं अंतःकरणद्रव्यं मननात्मकत्वात् मन इत्युच्यते तस्य नाशो ना
म वृत्तिरूपपरिणामं परित्यज्य सर्ववृत्तिविरोधिना निरोधाकारेण परि
णामः २ पूर्वापरपरामर्शमंतरेण सहसोत्पद्यमानस्य क्रोधादिवृत्ति
विशेषस्य हेतुश्चित्तगतः संस्कारविशेषो वासना पूर्वपूर्वाभ्यासेन चित्ते
वास्यमानत्वात् तस्याः क्षयो नाम विवेकजन्यायां चित्तप्रशमवासनायां
दृढायां सत्यामपि बाह्यनिमित्ते क्रोधाद्यनुत्पत्तिः ३ तत्र तत्त्वज्ञाने सति मिथ्या
भूते जगति नरविषाणादिवद्धीहेतौ दृश्यादात्मनमुद्गृहते नभ्रतः ।
हेमत्वप्रयोगात्त्रिविधनाशिवन्मनो नश्यति नष्टे मनसि संस्काराद्बोधक
स्य बाह्यस्य निमित्तस्याप्रतीतेर्वासना क्षीयते एवं क्षीणायां वासनायां दे
हाभावेन क्रोधादिहेत्वनुदयान्मनो नश्यति नष्टे च मनसि शमदमादि
संपन्नात्तत्त्वज्ञानमुदेति एवमुक्तेन तत्त्वज्ञाने रागद्वेषादिरूपा वासना ।
क्षीयते क्षीणायां च वासनायां प्रतिबंधाभावात् तत्त्वज्ञानोदय इति पर
स्परकारणत्वं दर्शनीयं अत एव भगवान्वसिष्ठ आह तत्त्वज्ञानं मनोना
शो वासनाक्षय एव च मिथः कारणतां गत्वा दुःसाध्यानि स्थितानि हि ।
तस्माद्राघव यत्नेन पौरुषेण विवेकिना भोगेच्छां दूरतस्त्यक्त्वा त्रयमेत
त् समाश्रयेदिति पौरुषो यत्नः केनाप्युपायेनावश्यं संपादयिष्यामीत्येवंवि
धोत्साह रूपो निर्बंधः विवेको नाम विविक्तानिश्चयः तत्त्वज्ञानस्य श्रव
णादिकं साधनं मनोनाशस्य योगः वासनाक्षयस्य प्रतिकूलवासनो
त्पादनमिति एतादृशा विवेकयुक्तेन पौरुषेण प्रयत्नेन भोगेच्छायाः
स्वल्पाया अपि हविषाक्तस्य वर्त्मैवेति मायेन वासनावर्द्धकत्वाद् दूरत
स्त्यक्ते द्विविधो हि विद्याधिकारी कृतोपास्तिरकृतोपास्तिश्चेति तयो
राद्यस्य तत्कारणपर्यंतमुपास्तिकृतत्वात् तत्त्वज्ञानोत्पत्त्यनंतरं वासना
क्षयमनोनाशयोरुत्पन्नत्वेन तत्त्वज्ञानादूर्ध्वं जीवन्मुक्तिः स्वत एव सिध्यति
इदानींतनस्तु प्रायेणाकृतोपास्तिरेव मुमुक्षुस्तेन सकामार्जनं हसा

विद्यायां प्रवर्त्तते योगं विना विज्ञद्विवेकमात्रेणैव च मनोनाशवा
सनाक्षययोस्तात्कालिकौ संपाद्य शमदमादिसंपन्नाः श्रवणमनननि
दिध्यासनानि संपादयन्ति तेषां दृढाभ्यासैः सर्ववेद्यविकेहितत्वज्ञा
नमुदेति अविद्याग्रन्थिर्ब्रह्मत्वेन हृदयग्रन्थिः संशयः कर्माण्यसर्वं
कामत्वेऽस्मः प्रवर्त्तन्ते चेतनेनैकविधो चेयोत्तानान्निवर्तन्ते तथाश्रु
ते एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य ब्रह्म
विद्ब्रह्मैव भवति भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य
कर्माणि तस्मिन् दृष्टे परावरे सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहा
यां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति तमे
व विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति यस्तु विज्ञानवा
न् भवत्यमनस्कः सदा शुचिः स तु तत्पदमाप्नोति यस्माद्भूयो न जा
यते य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्यसर्वं तत्त्वज्ञानविफ
लमुदाहार्यं सेयं विदेहमुक्तिः तत्त्वविदेहस्तानोत्पत्तिसमकालीनात्र
या ब्रह्मण्यध्यारोपितानां नामरूपाद्यानामविद्यानाशे सति निवृ
त्तौ पुनरुत्पत्त्यसंभवात् अतः शरीरस्य देहत्वाभावात् तत्त्वज्ञानेन सानुव
र्त्तते मनोनाशवासनाक्षययोरदृष्टाभ्यासाभावाद्योगमदेन प्रारब्धेन
कर्मणा बाध्यमानत्वाच्च संभवात् प्रदेशमदीपवत् सहसा निवर्त्तेते अत
इदानीं तत्स्वरूपतत्त्वज्ञानिनः प्राक्सिद्धेन तत्त्वज्ञानेन प्रयत्नापेक्षा किंत
मनोनाशवासनाक्षययोः प्रयत्नसाध्याविति तत्र मनोनाशः संप्रज्ञा
तसमाधिनिरूपणेन निरूपितः प्राक् वासनाक्षयस्त्विदानीं निरूप्यते
तत्र वासनास्वरूपं वसिष्ठ आह दृढभावनया त्यक्तपूर्वापरविचारणं
यदादानं पदार्थस्य वासना सा प्रकीर्त्तिता अत्र वस्तुस्वदेशाचारकुलध
र्मस्वभावभेदतद्भावपशब्दास्तु शब्दादिषु प्राणिनामभिनिवेशः सा
मान्यतोदाहरणं सा च बहिर्विधा मलिना शुद्धा च शुद्धादैवी संपत् शास्त्र
संस्कारप्राबल्यात् तत्त्वज्ञानसाधनत्वेनैकरूपैव मलिना तु त्रिविधा
लोकवासना शास्त्रवासना देहवासना चेति सर्वे जना यथा न निंदंति
तथैवाचरिष्यामीत्याशाकाराभिनिवेशो लोकवासना तस्याश्च को
लोकमाराधयितुं समर्थः इति न्यायेन संपादयितुमशक्यत्वात् प्रकृष्टा

र्थानुपयोगित्वाच्च मलिनत्वं १ शास्त्रवासनात्रिविधा पाठव्यसनं
बहुशास्त्रव्यसनं अनुष्ठानव्यसनं चेति क्रमेण भरद्वाजस्य दुर्वाससो
निदाघस्य च प्रसिद्धं मलिनत्वं चास्याः क्लेशावहत्वात् पुरुषार्थानुपयो
गित्वाद्दर्पहेतुत्वाज्जन्महेतुत्वाच्च २ देहवासनापि त्रिविधा आत्मत्वभ्रा
न्तिर्गुणाधानभ्रान्तिर्दोषापनयभ्रान्तिश्चेति तत्रात्मत्वभ्रान्तिवि
रोचनादिषु प्रसिद्धा सा च लौकिकी गुणाधानं द्विविधं लौकिकं शास्त्री
यं च समीचीनशब्दादिविषयसंपादनं लौकिकं गंगास्नानसालिग्रामादि देवसमा
°पयन तीर्थादिसंपादनं शास्त्रीयं दोषापनयनमपि द्विविधं लौकिकं शास्त्रीयं ।
चिकित्सकोक्तैरौषधैर्व्याध्यपनयनं लौकिकं वैदिकस्नानाचमना
दिभिरशौचापनयनं वैदिकं ३ एतस्याश्च सर्वप्रकाराया मलि
नत्वमप्रामाणिकत्वात् अशक्यत्वात् पुरुषार्थानुपयोगित्वात् पुनर्ज
न्महेतुत्वाच्च शास्त्रप्रसिद्धं तदेतल्लोकशास्त्रदेहवासनात्रयमविवेकि
नामुपादेयत्वेन प्रतिभासमानमपि विविदिषोर्वेदनोत्पत्तिविरोधित्वा
द्विदुषो ज्ञाननिष्ठाविरोधित्वाच्च विवेकिभिर्हेयं तदेवं बाह्यविषयवास
नास्त्रिविधा निरूपिता आभ्यन्तरवासना तु कामक्रोधदंभदर्पाद्याऽऽ
सुरसंपद्रूपा सर्वानर्थमूलं मानसी वासनेत्युच्यते तदेवं बाह्याभ्यन्तर
वासनाचतुष्टयस्य शुद्धवासनया त्यागः संपादनीयः तदुक्तं वसिष्ठेन
मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः मैत्र्यादिभावनानाम्ना गृहा
णामलवासना इति तत्र विषयवासनाशब्देन पूर्वोक्तास्तिस्रो लोक
शास्त्रदेहवासना विवक्षिताः मानसवासनाशब्देन कामक्रोधदंभदर्पा
द्यासुरसंपद्विवक्षिता यद्वा शब्दस्पर्शरूपरसगन्धा विषयाः तेषां भुज्यमा
नत्वदशाजन्यः संस्कारो विषयवासना २ काम्यमानत्वदशाजन्यः सं
स्कारो मानसवासना अस्मिन्पक्षे पूर्वोक्तानां मनःस्मरणमनयोरेवान्त
र्भावः वासनान्तरव्यतिरेकेण वासनान्तरासंभवात् तासां वासनानां प
रित्यागो नाम तद्विरुद्धमैत्र्यादिवासनोत्पादनं ताश्च मैत्र्यादिवासना
भगवता पतंजलिना सूत्रिताः प्राक्संक्षेपेण व्याख्याता अपि पुनर्वि
स्पष्टार्थं व्याख्यायंते चित्तं हि रागद्वेषपुण्यपापैः कलुषीक्रियते तत्र सुखानुशयी रा
गः मोहादनुभूयमाने सुखमनुशेते कश्चिद्धीवृत्तिविशेषो राजसः स

वैतत्सुखजातीयं मे भूयादिति तच्च दृष्टादृष्टसामग्र्यभावान्नैव संपादयितु
मशक्यं अतः स रागः चित्तं कलुषीकरोति यदा तु सुखितेषु प्राणिषु
मैत्रीं भावयेत् सर्वे ह्येते सुखिनो मदीया इति तदा तत्सुखं स्वकीयमेव
संपन्नमिति भावयतस्तस्य रागो निवर्तते यथा स्वस्य राज्यनिवृत्तावपि
पुत्रादिराज्यमेव स्वकीयं राज्यं मन्यते तत्र निवृत्ते च रागे वर्षाव्यपाये जलमिव
चित्तं प्रसीदति तथा दुःखानुशयी द्वेषः दुःखमनुशेते कश्चिद्दीनविशे
षः तमेवानुगतरजःपरिणाम ईदृशो सर्वे दुःखं सर्वदा मे मा भूदिति तच्च श
त्रुव्याघ्रादिषु सत्सु न निरावपि तेन शक्यं न च सर्वे ते दुःखहेतवो हन्तुं शक्य
न्ते अतः स द्वेषः सदा हृदयं दहति यदा तु स्वस्यैव परेषामपि सर्वेषामपि दुः
खं मा भूदिति करुणां दुःखितेषु भावयेत् तदा वैर्यादिद्वेषनिवृत्तौ चित्तं
प्रसीदति तथा च स्मर्यते प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधव इति एतदेवेहाप्युक्तं आत्मौपम्ये
न सर्वत्रेत्यादि तथा प्राणिनः स्वभावत एव पुण्यं नानुतिष्ठन्ति पापं च
नुतिष्ठन्ति तदाहुः पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः न पापफ
(न) लमिच्छन्ति पापं कुर्वन्ति यत्नत इति ते च पुण्यापुण्ये अक्रियमाणक्रियमा
णे पश्चात्तापं जनयतः स च अक्रमानुदिनः किमहं साधु नाकरवं किम
हं पापमकरवमिति यदा सो पुण्यपुरुषेषु मुदितां भावयेत् तदा तद्वा
सनावासनया स्वयमेव प्रमत्तो शुक्लकर्मसु पुण्ये प्रवर्तते तदुक्तं कर्माशुक्ला
कृष्णं योगिनस्त्रिविधमितरेषां अयोगिनां त्रिविधं शुभकृष्णमशुभं शु
क्लकृष्णं शुभाशुभमिति तथा पापपुरुषेषूपेक्षां भावयतः स्वयमपि तद्वा
सनावासनया पापान्निवर्तते ततश्च पुण्यकरणापापकरणनिमित्तस्य पश्चा
त्तापस्याभावेपि चित्तं प्रसीदति एवं सुखितेषु मैत्रीं भावयतो न केवलं रा
गो निवर्तते किं त्वसूयेर्ष्यादयोऽपि निवर्तन्ते परगुणेषु दोषाविष्करणम
सूया परगुणानामसहनमीर्ष्या यदा मैत्रीवशात् परसुखं स्वकीयमेव सं
पन्नं तदा परगुणेषु कथमसूयादिकं संभवेत् तथा दुःखितेषु करुणां भा
वयतः शत्रुवधादिको द्वेषो यदा निवर्तते तदा दुःखितप्रतियोगिका
स्वसुखित्वप्रयुक्तो दर्पोपि निवर्तते एवं दोषान्तरनिवृत्तिरप्यूहनीया एवं मि
श्रामायणादिषु तदेवं तत्तत्र मैत्र्यादीनां वासनातः स्थितिश्च समभ्य

कर्मास्ति शुक्लं

गी.
टी.
ध.

सनीयं नतूक्तेनापिहारेणापुनः पुनस्तत्त्वानुस्मरणं तत्त्वज्ञानाभ्यासः
तदुक्तं तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ब्रह्म
भ्यासं विदुर्बुधाः सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत्सदा इदं जगदहं
चेति बोधाभ्यासं विदुः परमिति दृश्याभा सविशोधियोगाभ्यासो मनो
निरोधाभ्यासः तदुक्तं अन्येनाभावमज्ञोत्तान्नैयमस्य च स्तनः प्रभा
शात्वेर्यतेनेयतेष्वज्ञाभ्यासितः स्थिता इति ज्ञानज्ञेययोर्मिथ्यात्वधीरभा
वसंपत्तिः स्वरूपेणाप्यप्रतीतिरत्यंताभावसंपत्तिः नदर्थं फलायोगे
नदृश्यासंभवबोधेन रागद्वेषादितानवे रतिर्बलोदिता यासौ ब्रह्माभ्यासः
स उच्यते इति रागद्वेषादिक्षीणतारूपवासनाक्षयाभ्यासः उक्तः तस्मा
दुपपन्नमेतत् मनस्तत्त्वज्ञानाभ्यासेन मनोनाशाभ्यासेन वासनाक्षयाभ्यासेन
च देहमप्यमन्यमानः स्वपरसुखदुःखादिषु समदृष्टिः स परमो योगी मत
नो यस्तु विषमदृष्टिः स तत्त्वज्ञानेप्यपरमो योगीति ३२

सदानंदीटीका

स्वदृष्टांतेन सर्वत्र प्राणिजाते चतुर्विधे सुखं वा यदि वा दुःखं स यः
परिपश्यति १ यथा मम सुखं नित्यमिष्टमेवं हि देहिनां सर्वेषाम
नुकूलं स्यादिति पश्यति सन्मतिः २ प्रतिकूलं यथा दुःखं ममैवं सर्वदे
हिनां प्रतिकूलं तथावायं सर्वभूतहिते रतः ३ कस्यचिन्मनसा वा
वापि जंनाचरती हृयः कर्मणा वा स योगीत सर्वोत्कृष्टतया मतः ४ ३२

नीलकंठीटीका

यद्यपि निषिद्धकर्मणापि आत्मवित्र बध्यते तथापि शीलवानेव योगी
श्रेष्ठ इत्याह आत्मौपम्येनेति यथा स्वस्य सुखमिष्टं दुःखमनिष्टं तद्व
त्परस्यापीति बुद्ध्या यो न परस्मै दुःखं प्रयच्छति सोऽहिंसकः परमयो
गी मतश्रेष्ठः ३२ ॥

आनंदीटीका उक्तमर्थं सिद्धांतयति ॥

स्पष्टम् [illegible]
च

यद्वात्मासोऽहमेवेत्यभेदं भगवान् रामकंठीटीका
प्रतिपादयितुमाह - यो योगी सर्वत्र भावजाते मायया आत्मतत्त्वैकरूपमयो पपत्या पश्य

ति मयि सर्वं तथैव पश्यति तस्य तत्त्वदर्शिनो ऽहं न प्रणश्यामि नादृश्यो भवा
मि सो ऽपि मे स्वरूपभूतत्वान्न प्रणश्यति नादृश्यत्वमापद्यत इति कर्मयो
गसिद्धस्य योगिनः स्वात्मनश्चाभेदप्रतिपादनपरमेतद्भगवद्वचनम् किं
च यो योगी सर्वत्र सर्वस्मिन्देहप्रभृति सुखं दुःखं वा सुखं वाकं विलाणीय
र्ममनुक्तयोपपद्यासंवेद्यमानस्य संविदात्मकतापत्तिरूपतया समं संवि
त्माद्वैकस्वभावं पश्यति उच्यते कथमात्मौपम्येनात्मानमुपमातीक्ष
त्य स्वानुभववदित्यर्थः स सर्वथा सर्वेणाकेन विहितेकसाधारणेन प्रका
रेण वर्तमानो ऽपि मयि वर्तते मदभिन्नो ऽहमेवास्मीत्यर्थः स एवं विधो
योगी सर्वास्ववस्थास्वविच्छिन्ननिरुद्धरसमाधिफलास्वदेहवीरविछ्रह
त्वाबंधतः साधु योगानुष्ठाननिष्ठोपलभ्यसमाधिफलस्यवीक्ष्य यो
गपदेदलया परमो निरुत्तरातिशयप्रकर्षः ईश्वरत्वसाम्यदशापत्तिरूढत्वात्स
जीवन्मुक्त इत्यर्थः [illegible]
[illegible] ॥

लासिकी [illegible] टीका

किंच- यो योगी सर्वत्र प्राणिजाते सुखं दुःखं वा सुखं वा कं चित्प्राणिनम् मात्
मौपम्येनात्म तत्समतया स्वानुभववदित्यर्थः समं निर्विशेषं किंचिन्मा
त्रमपि न विपर्यस्तं पश्यति साक्षात्करोति स योगी सर्वयोगिषु मध्ये
श्रेष्ठो मतः एवमस्य स्वरूपमेतदानूदितं न पुनरेषा सर्वो विधिः तदुक्तं
कुलार्णवे जनः स्वदेहकंडूतिं विजानाति यथा तथा परं ब्रह्मस्वरूपी
चवेत्ति विश्वविचेष्टितमिति योगिन निर्देशेनास्माद्धेतुलक्षणात्तानिस
र्वाणाख्यातिरेकउक्तः [illegible]
[illegible] ३२ ॥

पंचोलीटीका

ज्ञानिनामपि सर्वभूतानुकंपा श्रेष्ठा इत्याह आत्मौपम्येनेति हे अर्जुन यः स
र्वत्र सर्वभूतेषु सुखं वा यदि दुःखं आत्मौपम्येन आत्मा स्वयमेवोपमा या
भावं औपम्यं तेन समं पश्यति यदात्मनः सुखकारि तदन्यस्य करोति य
त् आत्मनः असुखकारि तदन्यस्य न करोति स योगी परमो मतः ३२ ॥

आत्मौपम्येनेति आत्मनः स्वस्यौपम्यमुपमा तेन प्रतिद्वंद्विभावः इति याव
त् प्रतिद्वंद्वीति तत्तुल्यस्य घातारोहणस्य पूर्वं पापादि वर्जितं समानमेव
प्रतिद्वंद्वी भवतीति तथा चात्मौपम्येन स्वप्रतिद्वंद्विभावेन देहेनेति फलि
तोर्थः यद्वा आत्मनः शत्रुमरणादि रूपस्य यत्नस्यौपम्येनुत्तल्यत्वेन दे
हेनेति कोर्थः यथापि पवः प्रतिपक्षीभूय शत्रुमरणादिकं कुर्वीति त
थैव चेन्मित्रादयोपि कुर्युः किमन्तरं तेषामुभयेषां येन शत्रुवपक्षवधा
र्हा न तु न मित्रादयः अतो वध्यताप्रयोजकं तुल्यमेवाततायित्वमुभ
येषामिति तथोक्तं आततायिनमायांतं हन्यादेवाविचारयन् तथा
नाततायिवधे दोषो हन्तुर्भवति कश्चनेति तदुपेक्षणं च निषिद्धं परा
शरेण आहूतो न निवर्तेत द्यूताय च रणाय चेति मनुनापि समो
त्तमाधमैः राजा त्वाहूतः पालयन्प्रजाः न निवर्तेत संग्रामात्क्षात्रं धर्म
मनुस्मरन्निति तथा चायमन्वितोर्थः आत्मौपम्येनैकरूपयत्नवत्वे
नाततायित्वेन वध्यताप्रयोजकेन देहेनायो योगी समतां लक्षण
योगारूढः सर्वत्र शत्रुमित्रादिषु विषयेषु समं साधारणं पश्यति मि
त्रत्वादिविशेषं परित्यज्य प्रतिपक्षभावमेव तदा ते परामृशति यदि वा
शब्दः समुच्चये सुखं दुःखं च समं समानं पश्यति सुखं वा दुःखं वा भव
तु नाम नाधर्मो मम स्यादिति निश्चिनोति यद्वा यदि शब्दो वधारणे
वा शब्दः समुच्चये तथा च सुखं च दुःखं यदि वा दुःखमेव दुःखादभि
न्नमेव पश्यति कोर्थः स्वबंधुहानिद्वतः सुहृदादीनां सुखकारण
मपि मित्रादयो गत्यादिषापकेन दुःखदायकमेवेति स योगी पर
पक्षसाम्ययोगारूढः परमः परान् शत्रून् मीनाति हिनस्तीति परमः
शत्रुहनने प्रवृत्तत्वेन कर्मकौशललक्षणयोगारूढस्य मनो मह
त्वैरिति शेषः यद्वा परम उत्कृष्टो मतः इत्यर्थः ३२॥

मधुभाष्य

आत्मौपम्येनेति पूतस्य योगस्य स्थिरां स्थितिं न पश्यामि मन
सश्चंचलत्वात् उक्तं च मनसश्चंचलत्वाद्धि स्थितिर्योगस्य वै स्थिरा

विनाभ्यासंनशक्यास्याद्वैराग्याद्धानसंशयइतिव्यास
योगे नकदाचित्स्वयमेवमनोनियम्यते शुभेच्छादि
नानांतद्वेषिणांचरमापत्तौ नास्तिकानांचवैधर्मास
दामुक्तिर्नजायतइतिनिषेधात् कालेश्रयतिरप्रयत्नः
योगस्यजिज्ञासुरपि ज्ञातव्योमयायोगइतिपस्यानी
वेच्छासोपिशब्दब्रह्मातिवर्तते परंब्रह्मप्राप्नोतीत्यर्थः
नैकजन्मनीत्याह ४२॥

भाषा अनुवाद

और ऐसे योगी जनोंके बीच मे जीवों पर अनुग्रह करने वा।
ला श्रेष्ठहै सो कहते हैं कि हे अर्जुन जो अपनी उपमा करि
और सब मे भी अपने समान सुख या दुख तथा प्रिय अ
प्रिय देखता है और सब को सुखकी इच्छा करता दुख न
ही देख सकता है सोई योगी श्रेष्ठ है ३२

दोहा

आपदि सदृश सर्वमें समदृष्टि देषें नर जोय सुख अथवा दुः
खको परम योगी मानियें सोय ३२॥

143

अर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां ३३

शांकरभाष्य

एतस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःसम्पाद्यतामालक्ष्य ध्रुवं प्राप्त्युपायमर्जुन उवाच योऽयमिति योऽयं योगस्त्वया प्रोक्तः साम्येन समत्वेन हे मधुसूदन एतस्य योगस्याहं न पश्यामि नोपलभे चंचलत्वान्मनसः किं स्थिरामचलां स्थितिं प्रसिद्धमेतत् ३३

आनन्दगिरिकृतटीका

मनसश्चलत्वमस्थिरत्वमित्युपश्रुत्य निर्विशेषे चित्तस्थैर्यं दुःशकमिति मत्वा तस्योपायं बुभुत्सुः सपाद्दक्षनीति प्रश्नमुत्थापयति एतस्येति तस्याभ्युपायं ध्रुवमिति मत्वाऽऽह मनसश्चलत्वेऽपि तत्त्विशहृदाययोगस्थैर्यं सम्पादनामित्याशंक्याह एतस्येति प्रसिद्धमिति समन्वयः ३३

स्वामिकृतटीका

उक्तलक्षणस्य योगस्यासंभवं मन्वानोऽर्जुन उवाच योऽयमिति साम्येन मनसो लयविक्षेपशून्यतया केवलात्माकारावस्थानेन योऽयं योगस्त्वया प्रोक्तः एतस्य योगस्य स्थिरां दीर्घकालां स्थितिं न पश्यामि मनसश्चंचलत्वात् ३३ ॥

पिशाचभाष्य

सर्वयोगिनामेतस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःसंपाद्यतामालक्ष्य ध्रुवं प्राप्त्युपायमर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः साम्येन (^हे मधुसूदन) एतस्य योगस्याहं न पश्यामि नोपलभे चंचलत्वान्मनसः स्थितिं स्थिरामचलां प्रसिद्धमेतत् ३३ ॥

रामानुजभाष्य

योऽयं देवमनुष्यादिभेदेन जीवेश्वरभेदेन [illegible] भिन्नेष्वात्मस्वेककालमनुभवेन सर्वेषामात्मनां ज्ञानैकाकारतया परसाम्येनात्मकर्मवृष्यापन्नतादैस्वरसाम्येन सर्वतः समदर्शनरूपो योगस्त्वया प्रोक्तः एतस्य योगस्य स्थिरां स्थितिं न पश्यामि मनसश्चंचलत्वात् ३३॥॥

गी·
टी·
ष·

अभिनवगुप्तकृतटी·

योयमिति परोक्तमप्रत्यक्षं वा वचकाभ्यामेवोच्यते भगवद्वाभिहितान्नरोपायपरम्परयास्फुटमपिप्रत्यक्षनिर्दिष्टमपि ब्रह्ममनसश्चाञ्चल्यदोषात्सम्यान्नहृदये वर्तते इति परोक्षायमाणम् ३३ ॥

परमार्थप्रपाटीका

अथैतस्य योगस्य ३३ साध्यत्वमसमानोऽर्जुनः प्राह योयमिति मनसः साम्येन विहितश्च येन योऽयं योगः केवलमात्माकारावस्थानरूपस्तथा प्रोक्तवतस्तस्य स्थिरां स्थितिं न पश्यामि कुतः मनसश्चञ्चलत्वात् अनेकवित्तैपरंस्थिरत्वात् अतएवमधुसूदनेति सम्बुद्धिः यतो मधादिदैत्यविवर्हणशक्तोसि परं वस्वस्मनोनिग्रहो न कृतिनशक्तिः। मत्रकिंचित्करान्तस्यानेवोपदिशसीमर्थः अत्र पार्थसारथे सत्ये देववचोः वर्यायं तथाभ्यासे ग्रहणतः परे वैतो विषमतेन तत्र विषयास्वादप्रतीतिं विना पैशाच्यं किमेवात्मसमनस्योयत्नपेवभ्रतांहनेकिं कुर्यां तदधीनवृत्तिरहमप्याज्ञापयस्व प्रभो ३३

वनमालीटीका

उक्तमर्थमाक्षिपन्प्रकृतिपरनिष्पोयोऽयं सर्वत्र समभावस्त्वदुःखादिलक्षणः परमो योगः साम्येन समत्वेन चित्तागतानां रागद्वेषादीनां दीनाविषमदृष्टिहेतूनां निराकरणेन त्वया सर्वज्ञेनेश्वरेण प्रोक्तः हे मधुसूदन सर्वान्तर्यामिन् सर्ववैदिकसंप्रदायप्रवर्तक एतस्य त्वदुक्तस्य सर्वमनोवृत्तिनिरोधलक्षणस्य योगस्य स्थितेर्विद्यमानतायाः स्थिरां निरन्तरदीर्घकालानुवर्तिनीं न पश्यामि न संभावयामि कुतस्त्वञ्चञ्चलत्वान्मनस इति शेषः ३३ ॥

कृष्णभैवैजयन्तीटी·

इत्येवं भगवदुक्तं निशम्यार्जुनः संदिग्धहृदयो भगवन्तं स्वसारथिं पृच्छति यमयोः यमिति हे मधुसूदन मधुदैत्यदलन साम्येन सर्वनरादिविचित्रशरीरयोगेनानामनो परस्परात्मन्त्व विजातीयस्वरूपप्रतीयमानत्वेपित्वनेकाकारतयातोत्मादर्शमेवपश्यतः पश्यतो स्थावर

स्वपरसुखदुःखतौल्येन योयं सर्वसमदर्शनरूपो योगो ज्ञानयोगस्त्व
या सर्वसमदर्शनेन सर्वज्ञेन प्रोक्तः प्रकर्षेण सपरिकरेणोक्तः कथितः
एतस्य योगस्य स्थिरां सर्वदैकरूपां स्थितिं निष्ठामहं नात्मत्वाभिज्ञा
हं सर्वथैकरूपको न पश्यामि नैव कुतो न पश्यामीत्यपेक्षायां हेतुमाह चंच
लत्वात् श्रुतिवलिष्ठस्यातिचपलस्यानादिविषयवितिमस्य मनस
श्चलत्वाच्चपलतरत्वात् ३३ ॥

मधुसूदनीटीका

॥ उक्तमर्थमाक्षि

पत्र॥ ८म

योयं सर्वत्र समदृष्टिलक्षणः परमो योगः साम्येन समत्वेन चित्तगता
नां रागद्वेषादीनां विषमदृष्टिहेतूनां निराकरणेन त्वया सर्वज्ञेन
प्रोक्तः हे मधुसूदन सर्ववैदिकसंप्रदायप्रवर्तक एतस्य त्वदुक्त
स्य सर्वमनोवृत्तिनिरोधलक्षणस्य योगस्य स्थितिं विद्यमानत्वेऽपि स्थि
रां दीर्घकालानुवर्तिनीं न पश्यामि न संभावयामि अहमस्मदादिर्यो
वा योगाभ्यासनिपुणः कस्मात्संभवाय स्थितिं चांचल्यत्वान्मन
स इति शेषः ॥ सर्वलोकप्रसिद्धत्वेन तदेव चंचलत्वमुपपादयति ३३

सदानंदीटीका

दुःसंपाद्यत्वमालक्ष्य योगस्योक्तस्य चार्जुनः तत्प्राप्त्युपायं शुश्रूषुः
पृच्छति स्म हरिं प्रति १ योयं सर्वत्र साम्येन योगः प्रोक्तः परात्मना
सर्वज्ञेन महेशेन त्वया निगमयोनिना २ एतस्याहं त्वदुक्तस्य योगस्या
विचलात्मनः न पश्यामि स्थितिं सम्यग् दीर्घकालानुवर्तिनी ३ मन
सोत्यन्तचांचल्यान्नैवं संभावयाम्यहं ४ ३३ ॥

नीलकंठीटीका

साम्ययोगमशक्यत्वान्न तूपायांतरं बुभुत्सयार्जुन उवाच योय
मिति योयं योगस्त्वया साम्येन प्रोक्तः हिंसाद्यभावेन संन्यासपूर्व
केन यावर्णितः हे मधुसूदन तस्य योगस्य सर्ववृत्तिनिरोधरूपस्य
स्थिरां स्थितिं न पश्यामि मनसश्चंचलत्वादिति शेषः ३३ ॥

आनंदीटीका

तदेवमस्य संयमयोगस्य दुष्करतां प्रतिपादयितुमर्जुन उवाच ॥ ॥

गी॰ टी ६

परां स्थितिं प्रोक्तकर्मा साम्यरूपां मनसश्चंचलत्वात् ध्यानसं
भावयामीत्यर्थः ३३

अथ संभवत्वेनभूतत्वादस्य सर्व **रामकंठी टीका** साम्यप्रतिपत्तिफलस्य समाधेरसंभाव्य तोमन्यमानोर्ज्जुन आह हे कृष्ण योयं समनंतरकर्मयोगलक्षणो योगस्त्वया प्रोक्त एतस्य प
रां स्थितिं प्रकृष्टां प्रतिष्ठां न तर्कयामि न पश्यामि चंचलत्वादनवस्थि
तत्वात् [illegible]
[illegible]

एवं सर्वत्र समतया हृत्वादि संवेदन लास्तिकी ... टीका हूयस्य योगस्यानत्नभूतत्वात् संभाव्यतां
मन्यमानोर्ज्जुन उवाच योयमिति परोक्त प्रत्यक्षवाचकाभ्यामेवं सूच्यते भवदभिहितानेन
रोपायपरंपरया स्कार्दं प्रत्यक्षतानिर्दिष्टो यो नत्नभूतत्वात्परोक्षतायमा योगो
योयं योगः साम्येन समत्वेनात्म तुल्यतया सुखाद्यनुभवरूपेणात्मयासवे
त्वात् प्रोक्तः एतस्य योगस्य मनसश्चंचलतया स्थिरां दीर्घकालानुवर्ति
नीं स्थितिं न पश्यामि न तर्कयामि [illegible] ३३

पंचोलीटीका

सर्वयोगिनामपि यत्स्य पयोक्तस्य समदर्शनलक्षणस्य योगस्य दुः
शकत्वमालक्ष्य मनस्तत्र्यपायविविदिषुः अर्जुन उवाच योयमिति हे म
धुसूदन त्वया योयं योगः साम्येन समत्वं तु त्वया प्रोक्तः अहमेतस्य योग
स्य मनसः चंचलत्वात् स्थिरां अचलां स्थितिं न पश्यामि ३३ ॥

रणवीरसमिद्धोधिनी ॥

अथोक्तलक्षणस्य योगस्य दुष्करत्वेनासंभवं मन्वानोर्ज्जुन उवा
च योयमिति निगदव्याख्यातेनास्य किंतु चंचलत्वादित्यत्र मन
सइति शेषः परां स्थितिं चिरकालमवस्थानमिति मनसोतिच
पलत्वेन क्षणमात्रस्थायी योगोयमिति भावः ३३ ॥

मधुभाष्य

३३ ॥

भाषा अनुवाद

ऐसे योग के लक्षण भगवान से सुनि करि असम्भव जानि अर्जुन कहते हैं कि मनकी लय औ विक्षेप शक्ति हर करि केवल आत्मा मे जो अवस्थान करे सम भाव से मन का थिर हो रहना रूप योग जो आप ने कहा सो हे मधुसूदन मन की चंचलताईके हेतु हमको इस योग की दीर्घ काल अवस्थिति करे थिर रहना देख पड़ता नही है ३३

दोहा

जो मधुसूदन तुम कह्यो समतासें यह योग चंचलतासें ना लखों या स्थिति परम किम होग ३३॥

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढं तस्याहं नि
ग्रहं मन्ये वायोरिव सुदुष्करं ३४ ॥

शाङ्करभाष्यं

चञ्चलमिति चञ्चलं हि मनः कृष्ण इति कृषतेर्विलेखनार्थस्य रूपं
भक्तजनपापादिदोषाकर्षणात् कृष्णः हि यस्मान्मनः चञ्चलं न केव
लमत्यर्थं चञ्चलं प्रमाथि च प्रमथनशीलं प्रमथ्नाति शरीरमिन्द्रि
याणि च विक्षिपति परवशीकरोति किञ्च बलवत् प्रबलं न केना
चिन्नियन्तुं शक्यं दुर्निवारत्वात् किञ्च दृढं तन्तुनागवदच्छेद्यं तस्यैवं
भूतस्य मनसोऽहं निग्रहं रोधं मन्ये वायोरिव यथा वायोर्दुष्करो निग्रह
स्ततोऽपि मनसो दुष्करं मन्य इत्यभिप्रायः ३४ ॥

आनन्दगिरिकृतटीका

मनसश्चञ्चलत्वेऽपि कृष्णपदपरिनिष्पत्तिप्रकारं सूचयति कृष्ण इतीति
कथं कर्षकत्वमात्मकामस्य भगवतः सम्भवतीत्याशङ्क्याह भक्तेति
ऐहिकामुष्मिकसर्वसम्पदामाकर्षणशीलत्वाच्चेति द्रष्टव्यं प्रमथ्नाति
क्षोभयति तदेव क्षोभकत्वं प्रकटयति विक्षिपतीति दुर्निवारत्वमभि
प्रेतादिविषयादाकृष्टुमशक्यत्वं विशेषणान्तरमाह किञ्चेति अच्छेद्यत्वे
विशेषणान्तरमाह किञ्च दृढमिति तन्तुनागो वरुणपाशशब्दितो
जलचारी पदार्थः मन्त्रदृष्टगणा छेत्तुमशक्यत्वेन प्रसिद्धो विवक्षितः
वायोरिवेत्युक्तं व्यनक्ति यथेति ३४ ॥

स्वामिकृतटीका

एतदेव स्फुटयति चञ्चलमिति चञ्चलं स्वभावेनैव चपलं किञ्च प्रमाथि
प्रमथनशीलं देहेन्द्रियक्षोभकं किञ्च बलवत् विचारेणापि जेतुमशक्यं किं
च दृढं विषयवासनानुबद्धतया दुर्भेदं अतो यथा आकाशे दोधूयमानस्य वा
योः कुम्भादिषु निरोधनमशक्यं तथा तस्य मनसोऽपि निग्रहं निरोधं दुष्करं
सर्वथा कर्तुमशक्यं मन्ये ३४ ॥

पैशाचभाष्यं

कृष्ण इति कृषतेर्विलेखनार्थस्य योगीभक्तजनपापादिदोषकर्षणात्

कृष्ण केवलमत्यर्थं चंचलं मनः प्रमाथि च प्रमथनशीलं प्रमथ्नाति शरी
रमिंद्रियाणि च विक्षिपति परवशीकरोति किंच बलवत् केनचिद्विनिय
न्तुमशक्यं किंच दृढं तंतुनागवदच्छेद्यं अतस्तस्य मनसः अहं निग्रहं निरोधं म
न्ये वायोरिव सुदुष्करं यथा वायोर्दुष्करो निग्रहस्तथा दुष्करं मन्ये इत्यभि
प्रायः ३४

रामानुजभाष्यं

तथा हि नवरताभ्यस्तविषयेष्वपि स्वत एव चंचलं पुरुषं बलात् प्रमथ्य
यदृच्छयात्र चरति तस्य स्वाभ्यस्तविषयेष्वपि चंचलस्वभावस्य मनस
स्तद्विपरीताकारात्मनि स्थापयितुं विनिग्रहं प्रतिकूलगतेर्महावातस्य
व्यजनादिनेव दुष्करमहं मन्ये मनोनिग्रहो वायोरपि दुःशकः तस्य नि
ग्रहोपायो वक्तव्य इत्यभिप्रायः ३४ ॥

श्रीम[illegible]कृतटी०

[illegible] भगवद्भिहितानंतरो
[illegible] निर्दिष्टमपि ३४ ॥ प्रमथ्नाति दृष्टादृष्टेष्वल

रामानुजभाष्यं

तथा हि नवरताभ्यस्तविषयेष्वपि स्वत एव चंचलं पुरुषं बलात् प्रमथ्य
यदृच्छयात्र चरति तस्य स्वाभ्यस्तविषयेष्वपि चंचलस्वभावस्य मन
सस्तद्विपरीताकारात्मनि स्थापयितुं विनिग्रहं प्रतिकूलगतेर्मह
वातस्य व्यजनादिनेव दुष्करमहं मन्ये मनोनिग्रहो वायोरपि दुःशकः
तस्य निग्रहोपायो वक्तव्य इत्यभिप्रायः ३४ ॥

परमार्थप्रपाटी०

प्रयत्नतः प्रश्नार्थमेव प्रकटयति चंचलमिति भोः कृष्ण तस्य मनसो
निग्रहं निरोधं सुदुष्करं सुतरां दुःखेन कर्तुमशक्यं मन्ये कस्येव वा
योरिव यथाकाशे वहमानस्य वायोः कुंभादिषु निरोधः कर्तुं न श
क्यते नहि वायोरेकत्रावस्थानं प्रयत्नेन हन्त प्रयत्नस्य दुर्निग्रहत्वे च वन
भिः प्रकारैरुपपादयति चंचलमिति चंचलमेकत्रानवस्थितं प्रमा
थि प्रमथनशीलं देहेंद्रियक्षोभकं बलवत् विचारेणापि जेतुमश
क्यं दृढं अनादिविषयवासनानुविद्धतया वैराग्यादिना दुर्भेद्यं ३४ ॥

वनमालीटीका

तदेवोपपादयति चंचलं सदातिचलनस्वभावं मनो हि प्रसिद्धमेवैतर्
त् भक्तानां पापादिदोषान्सर्वान्वारयितुमशक्यानपि कृषतीति तेषामे
व सर्वेषां पापानामशक्यानपि पुरुषार्थान् अपकर्षति नाशयतीति वा कृ।
स तेन रूपेण संबोधयन् दुर्निवारमपि चित्तं वास्य निवार्यं दुःशाप।
मपि समाधिस्वेनैव साधयितुं शक्योऽसीति सूचयति न केवलं चंच
लं प्रमाथि शरीरमिंद्रियाणि च प्रमथितुं क्षोभयितुं शीलं यस्य तत् किंच ब
लवत् अभिप्रेताद्विषयात्केनाप्युपायेन निवारयितुमशक्यं किंच दृ
ढं वासनासहस्रस्यूतत्वादच्छेद्यमशक्यं तस्मात्तिरस्कृत्य बलवतो बलवत्
या प्रमाथिनः प्रमाथित्वादिति च चलस्य महामत्तगजस्येव मनसो नि
ग्रहे निरोधे निर्हृतिकं तथा वश्यानेन दुःकरं सर्वथा कर्तुमशक्यमहमे
वायोरिव यथाकाशे दोधूयमानस्य वायोर्निश्चलत्वसंपादनेन निरोधन
मशक्यं तद्वत् ३४ ॥

कृतमेवेनयत्नीटी॰

नन्वात्मानं रथिनं विद्धि शरीरं रथमेव च बुद्धिं तु सारथिं विद्धि मनः
प्रग्रहमेव च इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् आत्मेंद्रिय।
मनोयुक्तं भोक्तेत्याहुर्मनीषिण इति श्रुतेर्मनसो बुद्धिनियम्यत्वश्रुय
तेः नो विवेकवत्या बुद्ध्या मनो नियमनं कुर्विति चेन्नत्राह चंचलं हीति।
हे कृष्ण मनः इंद्रियस्थानं यन्मनश्चंचलस्वभावत्वेनातिचपलं तत्रापि प्रमा
थि बुद्धिसहितं पुरुषं प्रकर्षेण मथितुं विलोडितुं शीलं यस्य तत्तथा।
विवेकिन्या बुद्ध्या सह पुरुषं हठात्स्वमप्यागत्य विषयेषु स्वेच्छाचारेण भ्र
मतीत्यर्थः कुत एवं यतो बलवत् यथा बलवान्श्वोऽदुर्बलमश्ववारंति
रस्कृत्य तन्नतो धावन्संलग्नतीसे पातयति स्वयमपि तथा बलवन्मनो
पि बुद्धिं पुरुषं चानादृत्य विषयेषु नयति पातयति चेत्यर्थः नन्वनितीत्या
ग्रास्त्रविर्यंयाभ्नेकानि वस्तूनि प्रमेयस्यानुगतस्य स्वरूपस्याधीनानि क
रोति न यान्निरत्ति शायवस्तु विचारात्मिका कुशाग्रा बुद्धिर्मनो विकारेण
प्रमेयस्यानुगतस्यात्मनो वर्णीकर्षणं करोमीति चेन्नत्राह दृढमिति दृ
ढमतिकठिनं यथा स्थललोहं सूचीनभिन्नं तथा बुद्धिरपीत्यर्थः त

गी॰ टी॰ ६॰

स्यानादिकालसिद्धमलविषयाकुलस्वभावस्य मनसो निग्रहं निरोधं वायोरिव महतो नभस्यमानस्य नभस्यतोऽवदादिषु निरोधमिव सुदुःकरं बहु नरपतेनापि कर्तुमशक्यमहं मन्ये ज्ञानेन तस्मात्कथ्योपायं कथयेति प्रष्टुरभिप्रायः ३४ ॥

मधुसूदनीटीका

चंचलमत्यर्थं चलं सदा चलनस्वभावं मनः हि प्रसिद्धमेवैतत् भक्तानां पापादिदोषान्सर्वथा निवारयितुमशक्यानपि कृषति निवारयति यथा मेव सर्वथा शमयितुमशक्यानपि रुग्धीनाकर्षयति प्रापयतीति वा कृष्णस्तेन रूपेण संबोधयन् दुर्निवारमपि चित्तचांचल्यं निवार्यं दुःप्रापमापि समाधिसुखमेव प्रापयितुं शक्तो भवानिति सूचयति न केवलमत्यर्थं चलं प्रमाथि शरीरमिंद्रियाणि च प्रमथितुं शीलमस्य तत्तो भवति तथा शरीरेंद्रियसंघातस्य विवशतानिहेतुरित्यर्थः किंच बलवदभिमतादिविषयान्केनाप्युपायेन निवारयितुमशक्यं किंच दृढं विषयवासनासहस्रानुस्यूततया भेत्तुमशक्यं तंतुनागवदच्छेद्यमिति भावः तंतुनागो नागपाशः तांतणी इति गूर्जरदेशे प्रसिद्धो महाह्रदनिवासी जंतुविशेषो वा तस्मादतिदृढतया बलवत्तया प्रमाथितया प्रमाथितयातिचंचलस्य महतो वनगजस्येव मनसो निग्रहं निरोधं निर्वृत्तिकतयावस्थानं सुदुष्करं सर्वथा कर्तुमशक्यमहं मन्ये वायोरिव यथाकाशे दोधूयमानस्य वायोर्निश्चलत्वसंपादनं निरोधनमशक्यं तद्वदित्यर्थः अयं भावः जातेपि तत्त्वज्ञाने प्रारब्धकर्मभोगाय जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुःखरागद्वेषादिलक्षणः चित्तधर्मः क्लेशहेतुत्वाद्बाधितानुवृत्त्यापि विरोधी भवति चित्तवृत्तिनिरोधरूपेण तु योगेन तस्य निवारणं जीवन्मुक्तिरित्युच्यते यस्याः संपादनेन स योगी परमो मत इत्युक्तं तत्र दृश्यते बोधः किं सात्त्विको निवार्यते किं वा विनान् नाद्यः तत्त्वज्ञानेनैव सात्त्विकोऽवस्य। निवारितत्वात् न द्वितीयः स्वभावविपर्ययायोगात् विरोधिसद्भावाच्च न हि जलादौष्ण्यमग्नेर्वौष्ण्यं निवारयितुं शक्यते प्रबलतरपरिणामिनो हि भवाकृत्वे चितिशक्तेरिति न्यायेन प्रतिक्षणपरिणामस्वभावत्वाच्चित्तस्य प्रारब्धभोगेन च कर्मणाकृतत्वात् विद्यातत्कार्यनाशेपि प्रवृत्तस्य तत्त्वज्ञान।

स्यापिप्रतिवंधकत्वात्स्वफलदानायदेहेंद्रियादिकमवश्यापेक्षितं
नचकर्मणास्वफलसुखदुःखोपभोगश्चदेहादिभिर्विनासंपाद
यितुंशक्यते तस्माद्यद्यपिस्वाभाविकानामपिचित्तपरिणामानांक
र्मविपाकेनाभिभवःशक्यतेकर्तुं तथापितत्त्वज्ञानादिवद्योगादपिप्रा
रब्धफलस्यकर्मणःप्राबल्यात्स्वरूपभाविनिचित्तस्यचांचल्येयोगेनत
न्निवारणमशक्यमहंस्वाबोधादेवमन्ये तस्मादनुपपन्नमेतदात्मौ
पम्येनसर्वत्रसमदर्शीपरमोयोगीमतइत्यर्जुनस्याक्षेपः [illegible]
[illegible] ३४ ॥

सदानंदीटीका

अन्यच्चचलत्वंहिप्रसिद्धंमनएवतत् हेकृष्णभक्तदोषाणांसर्वे।
याविनिवारक १ इंद्रियाणांशरीरस्यक्षोभकत्वात्प्रमाथितत् नैव
केनाप्युपायेननियंतुंशक्यतेवलात् २ दृढंमतमशक्यंवाप्यकेयंत
नागवत् अनादिवासनाजालैःस्यूतंवेननिरंकुशं ३ महामतंग
जस्येववनस्थस्यास्यनिग्रहे निवृत्तिकनयामध्यगवस्थानेमहत्करे ४
यथादोधूयमानस्यवायोराकाशगामिनः निरोधोघटवेष्टनादैक
नैकश्चित्त्वशक्यते ५ अप्यब्धिपानान्महतोमेरोरुन्मूलनादपि अपि
वह्न्याशनात्साधोविषमश्चित्तनिग्रहः ६ इत्येवंमनसोदार्ढ्यंवाभि
हेममयगीरिते ३४ ॥

नीलकंठीटीका

एतदेवोपपादयति चंचलंहीति प्रमाथिवलवद्दस्यदेहस्यप्र
मथनशीलं ३४ ॥

आनंदीटीका

प्रमाथिप्रमथनशीलं कुशलत्रामपिभ्रमिकासुन्मार्गप्रवर्त
नात्माजयमत्वयावर्तयितुंशक्यम् अतोवलवद्दुर्निरोधनात्
दृढमनेकपूर्वजन्माभ्यस्तविषयेषुसक्तम् ३४ ॥ ॥

रामकंठीटीका

यस्मात्तस्याथंनेचचलंप्रकृतिचपलं अतःप्रमाथिप्रमथनशीलं यतःकु कुलप्रमपिक्षुभिकामुन्मार्गप्रवणत्वा
दाशुविनाशनवततस्यावर्तयितुंशक्यतेवलवत् अस्याविषयान्प्रत्यभिधावतः
यति ॥

गी०
टी० ५

शैलेंद्रशिखरविशीर्यमाणसलिलौघवत् दुर्धरं बलं यतो जन्मसह
स्रेभ्यस्तेषु विषयपरमेषु दृढं आसक्तत्वात् दृढं तस्यैवंविधस्यास्य मन-
सो निग्रहं सत्पथात्प्रतिषेधं मन्ये दुष्करं दुःसाध्यं संभावयामि क
स्येव वायोरिव यथा वायुः स्वास्थ्यन् येन दिन्न प्रसरन्निग्रहीतुमशा-
क्यमेवं तन्मनः [illegible]

लासिकी [illegible]टीका

[illegible]

ऊतइत्यतआह ॥

हे कृष्ण यस्मात्तस्माधनेमनः प्रकृतिचपलं अतएव प्रमाथिप्र
मथनशीलं क्षुभ्यापकं बलवद्दुर्धरं अतएव दृढं विषयवासना
तुविद्धतया दुर्भेदं अतो यथा काशे दोधूयमानस्य वायोः कुंभा-
दिषु निरोधनमशक्यं तथा तस्य मनसोपि निग्रहं निरोधं सदुष्करं
सर्वथा कर्तुमशक्यं मन्ये [illegible] ३४

पंचोलीटीका

एतदेव स्फुटयति चंचलमिति हे कृष्ण हि यस्मान्मनः चंचलं प्र
माथि शरीरेंद्रियाणां प्रव्यातिपरवशानि करोति किंच बलव
त्केनचिन्नियंतुमशक्यं किंच दृढं नेन नागवत् अहं तस्यैवंभूतस्य
मनसो निग्रहं निरोधं वायोरिव दुष्करं मन्ये यथा वायोः दुःक
रो निग्रहः ततोपि दुःकरं मनसे इत्यभिप्रायः ३४ ॥

रणवीरसमिद्धोधिनी ॥

मनश्चापल्यमेव स्फुटयति चंचलं हीति हिः प्रसिद्धौ मनश्चंचलं
प्रकृतिचपलं भवतीति प्रसिद्धमेवैतदिति भावः यतश्चपलं त
तः प्रमाथि प्रमथितं मद्यायामसामां निश्चयभूमिकामुत्पाद्य प्रव
र्त्तत्वात् सयएव विनाशाधितं शीलमस्येति यतो बलवत् विष
यान्प्रति धावतोस्य शैलेंद्रशिखरविशीर्यमाणजलौघवद्दुर्धरं

वलमित्यतउत्पथात्पुत्रमित्रस्नेहरूपाद्यावर्तयितुमशक्यं यत
श्चेदं दृढं रागादिदोषानुस्यूतत्वेन भेत्तुमशक्यं तस्यैवंविधस्य म
नसो निग्रहं दुष्टसंकल्पेभ्योऽपि हठान्निवृत्तिजनकेभ्यः प्रतिषेधनं
सुदुष्करं सततं दुःसाध्यं मन्ये कस्येव वायोरिव यथा स्वाङ्कं येना
काशे ह्येव धूयमानो वायुर्निश्चलीकृत्य निग्रहीतुमशक्य एवमेत
न्मन इति भावः ३४॥

मधुभाष्य

३४॥

भाषा अनुवाद

और वही चंचलता को विस्तार करि कहते हैं कि हे कृष्ण यह म
न स्वभाव हीसे चंचल औ प्रमाथी अर्थात देह इन्द्रियों को विक्षि
प्तकारी और बलवान कहे विचारसे इसका जीतना असाध्य है त
था दृढ़ कहे विषयवासना से बढ़ इस मन को विषयोंसे भिन्न
करना अति दुष्कर कठिन है इस से जैसे आकाश मे वायु को
निश्चल करना कठिन तैसे इस मन का भी निग्रह कहे थिर क
रना हम को अति असाध्य बोधहोताहै ३४ ॥

दोहा

चंचलहै मन कृष्ण दृढ़ प्रमथशील बलवान ताकोनिग्रहजा
निए दुसकरपवनसमान ३४

159

श्रीभगवानुवाच असंशयंमहाबाहोमनोदुर्निग्रहंच
लंअभ्यासेनतुकौंतेयवैराग्येणचगृह्यते ३५

शांकरभाष्यं

श्रीभगवानुवाच एवमेतद्यथा ब्रवीषि असंशयं नास्ति संशयो म
नोदुर्निग्रहं चञ्चलमित्यत्र हे महाबाहो किन्तु अभ्यासेनतु अभ्यासो
नाम चित्तभूमौ कस्यांचित् समानप्रत्ययावृत्तिश्चित्तस्य वैराग्येणतच गृ
ह्यते वैराग्यं नामदृष्टादृष्टेषु भोगेषु दोषदर्शनाभ्यासात् वैतृष्ण्यं विषये
षु विरक्ता वैराग्यं तेनच वैराग्येण गृह्यते विक्षेपरूपः प्रचारश्चित्तस्य
एवं तन्मनोगृह्यते निगृह्यते निरुध्यत इत्यर्थः ३५॥

आनन्दगिरिकृतटी०

प्रश्नमंगीकृत्य प्रतिवचनमुत्थापयति श्रीभगवानिति कुत्रसंशयरा
हित्यं तत्राहमनइति कथंतर्हि मनोनिरोधो भवति तत्राह किन्त्विति।
अभ्यासस्वरूपं सामान्येननिदर्शयति अभ्यासो नामेति कस्यांचिच्चित्त
भूमाविति विशेषितो ध्येयो विषयो निर्दिश्यते समानप्रत्ययावृत्तिर्विजा
तीयप्रत्ययानन्तरितेति शेषः चित्तस्येति षष्ठी प्रत्ययस्य तद्विकारत्व
द्योतनार्था वैराग्यस्वरूपं निरूपयति वैराग्यमिति तेषु वै[illegible] वैराग्यं
नामेति सम्बन्धः तत्रहेतुं सूचयति दोषेति विषयेषु विरक्ता विषयेषु
दोषदर्शनमभ्यस्यन्ते तेनैव वैतृष्ण्यं जायते तेन निगृह्यमाणं निर्दिशति वि
क्षेपेति तस्मिन्गृहीते निरुद्धे मनोनिरोधोऽस्य किंसादित्यपेक्षायामाह
एवमिति अभ्यासहेतुकवैराग्यद्वारा चित्तप्रचारनिरोधे निरुद्धवृत्तिकं म
नो विषयविमुखमन्तर्निष्ठं भवतीत्यर्थः ३५॥

स्वामिकृतटीका

तदुक्तं चंचलत्वादिकमंगीकृत्यैवमनोनिग्रहोपायंच श्रीभगवानुवाच
असंशयमिति चंचलत्वादिनामनोनिरोद्धुमशक्यमिति यद्वदसि एत
न्निःसंशयमेव तथापितु अभ्यासेन विषयाचिंतनपूर्वकपरमात्माकार
प्रत्ययावृत्त्या विषयवैतृष्ण्येनचगृह्यते अभ्यासेनलयप्रतिबंधाद्वैराग्ये
णचविक्षेपप्रतिबंधादुपरतवृत्तिकं सत्परमात्माकाररूपेण[illegible]।
तिष्ठतीत्यर्थः तदुक्तंयोगशास्त्रे मनसोवृत्तिशून्यस्य ब्रह्माकारतयास्थि

गी॰
टी॰
ष॰

160

तिः याःसंप्रज्ञातनामासौ समाधिरभिधीयते ३५ ॥

पैशाचभाष्यं

श्रीभगवानुवाच असंशयं नास्ति संशयो मनोदुर्निग्रहं चलमित्यत्र किंत्व
अभ्यासेन अभ्यासो नाम चित्तभूमौ कस्यांचित् समानप्रत्ययावृत्तिः वैराग्यं
दृष्टादृष्टभोगेषु दोषदर्शनाभ्यासाद्वैतृष्ण्यं तेन वैराग्येण च गृह्यते विक्षेप
रूपप्रचारश्चित्तस्य एवं तन्मनो गृह्यते निरुध्यत इत्यर्थः ३५ ॥

रामानुजभाष्यं

चलस्वभावतया मनो दुर्निग्रहमेवेत्यत्र न संशयः तथापि आत्मनो गुणाका
रत्वाभ्यासजनिताभिमुख्येन आत्मव्यतिरिक्तेषु विषयेषु दोषाकारत्वद
र्शनजनितवैतृष्ण्येन च कथंचिद्गृह्यते ३५

अभिनवगुप्तकृतटी॰

"वश्यमनसं वैराग्याभ्यासौ हरेवर्नवहति यो लाघमाणोऽस्य मनस्याति
दृशाद्दृष्टे चलवत्कर्मे दृढेषु हथापारादारपितमशकाम् ३५ ॥

परमार्थप्रपाटीका

अथ द्विःप्रकारेण निग्रहोपायमुपदिशन् भगवानाह असंशयमिति ॥
चंचलत्वादिस्वभावं मनो निरोद्धुमशक्यमिति यद्दक्षितं तत्संशयेनिस्सं
दिग्धमेव तथापि अभ्यासेन वैराग्येण च गृह्यते वशीक्रियते तत्राभ्या
सो नाम निरन्तरमात्मानुध्यानं वैराग्यं च विषयवैरस्यं तत्तेनमरस्यता।
अथ मितिप्रतिभाति यतोमनसि निरन्तरीतेऽभ्यासो वैराग्यं वा सिध्यति
तथाभ्यासवैराग्याभ्यां मनो गृह्यत इति वक्तव्यं एतस्योभयस्य विचाराधी
नत्वात् तच्च श्रीमद्भगवता प्रागेवद्दत्तं शनैः शनैरुपरमेदिति तदेव
अभ्यासेन तत्कौंतेय वैराग्येण च गृह्यत इत्यनेन स्मारितं तथाहि तत्प
रमार्थप्राप्तौ तावदात्मविचारएव शरणमिति द्रष्टव्यः आत्मैवमनव
इति तथा वेदाहमेतमित्यादिश्रुतयो वदंति तत्रात्मादेहेंद्रियादिविलक्ष
णत्वद्रष्टृत्वात् नहि द्रष्टुर्द्रष्टा वा द्रष्टव्यं भवति अथ स कीदृगस्ती
ति विचारेणावरूपरसादिविषयग्राहकत्वेन प्रतिलक्षणमन्वेषणीयः संप
व स्मरणमभ्यासः तथाद्यंतेरंतेनरमेतावत्समयमस्मत्सुखदुःखयोर्म
ध्ये किमधिकमनुभूतमिति परामर्शे बाल्ययौवनवार्धकाद्य
वस्थासु सुखं दुःखमेव स्मर्यते यथा विषयलोभाद्येव लोभमपानं।

रयो॰

था॰

प्रकारांतरं वैराग्यलक्षणं विषयेष्वात्मसुखानाविलतापूर्वकं अभ्यासेनमोक्षय
दः ज्ञानार्थेकसंविधविषयीक्रियते इति द्वैतं नयादयानं उत्कंतानप्रमत्तता
माध्यस्थ्यता उभयार्थेनेः विस्तृतसिद्धार्थः इति

प्राणपर्यवसा[यी]त्वात: सदुःखरूप: भोगसमयस्तु निमेषमात्रेनावदेव
सुखं तदपि मन्त्रामिषन्यायेन परिणति विरसत्वात् दुःखपर्यवसाय्येवे
ति विचारेणावैराग्यप्रकार: किंच चंचले विषयलोलुपेपि मनसि श्रेष्ठा
सोविरागस्यसंभवति तदुक्तं योगशास्त्रे यत्रैव यातिचपलं तत्त्र चित्तमे
तत्तत्रैव भाति परमेश्वरपदमालात् प्रागदुःखदेशविरमे विरस: पदा
र्थो त्वात्माविरसत्वदर्शनात् निशं विविंसे इति अतएव कौन्तेय महाबाहो
इति संबुद्धद्वयविवेकत्यागयोर्ग्रहणं वंशत्वात्मभावभ्यां साहाय्यं करि
ष्यामयेवेत्यर्थ: ३५ ॥ वनमालीटीका

उत्तरमाह असंशयमिति सम्यग्विदितं तेचित्तचेष्टितं मनो निग्रहीतुं
शक्यं नेति संतोषेण संबोधयति हे महाबाहो प्रारब्धकर्मप्राबल्यादसं
यतात्मना दुर्निग्रहं दुःखेनापि निग्रहीतुमशक्यं चचलं चलस्वभा
वे मनः अत्र संशयो नास्येवात्र संशय: एवं सत्यपि संयतात्मनापि मात्रो
पायेन योगिना भ्यासेन च गृह्यते मनोनिग्रहे भ्यासवैराग्ययो: समुच्चय
बोधनाय चशब्द: ३५ ॥

ऊसमेवेनयनीटी·

एवमर्जुनेनप्रश्नमनसश्चंचलत्वादिकमंगीकृत्य तस्य निग्रहोपायं पार्थ
सारथिर्भगवानाह द्वाभ्याम् असंशयमिति हे महाबाहो इत्यनेनयु
द्धात्वेशौर्येण शत्रून् तपसि तथाति शय विवेकेन मनोपि जयेति सूचि
तम् यद्यपि मनो दुर्निग्रहं दुःखेनातिकष्टेन नि:शेषेण गृहीतुं शक्यं
तस्मात् चलत्वाचरण्ण निचपलं भवति असंशयमत्र संशय: संदेहो नास्ति
तथापि हे कौन्तेय तन्निश्चयेनाभ्यासेनात्मस्वरूपानुभवानंदजनितसुखा
सक्तत्वदनुभवैककामेन गुणानुपसानेन च पुनः वैराग्येण आत्मस्वरू
पेतरवस्तुनि रयवदुःखरूपदोषदर्शनजनितत्यागेन गृह्यते मनो नि
गृहीतुं शक्यते कौन्तेयेति संबोधनेन यथा गुणदोषविवेकवती कुन्ती
स्वपतिमरणभयान्मामसहसंगमकामरूपं दोषं विहाय तदाननयादेवरा
ज्ञाहंशावनरूपंगुणाभ्यं तन्मृमगरहणात तथा त्वमपि अत्र मपि गुणदोषवि
चारेणावमनो जययेति सूचितं ३५ ॥

मधुसूदनीटीका

तमिमं माक्षेपं परिहरन् ॥

सम्यग्विदितंतेचित्तंवेदहितं यतो मनोनिग्रहीतुंशक्ष्यामीति संबोधेण।
संबोधयति हे महाबाहो महांतौ महादेवेनापि सहकृतप्रहरणौ
बाहू यस्येति निरतिशयमुत्कर्षं सूचयति प्रारब्धकर्मवशादसंयता
त्मनादुर्निग्रहं दुःखेनापि निग्रहीतुमशक्यं प्रमाथिबलवद्दृढमिति वि
शेषणत्रयं पिंडीकृत्योक्तं चले चंचलस्वभावं मन इत्यसंशयं नास्त्येव
संशयोत्रममाप्येवमेवेतिहृषीकेशार्थः एवमत्यसंयतात्मनां समाधिर्मोक्षो
पायेन योगिनाः अभ्यासेन वैराग्येण च गृह्यते सर्ववृत्तिशून्यं क्रियते न तु सम
नस्यार्थः अनिग्रहीतस्य संयतात्मनः सकाशात्संयतात्मनो निग्रही
तविशेषद्योतनाय तुशब्दः मनोनिग्रहे अभ्यासवैराग्ययोः समुच्चयबोध
नाय चशब्दः हे कौंतेयेति पितृष्वसृपुत्रत्वमवश्यं मया सखीकर्तव्य इ
ति स्नेहसंबंधसूचनेनाश्वासयति अत्र प्रथमांशे न विवादः हठनिग्रहो
न संभवतीति द्वितीयार्द्धेन तु क्रमनिग्रहः संभवतीत्युक्तं द्विविधो मन
सो निग्रहः हठेन क्रमेण च तत्र हठः श्रोत्रादीनि ज्ञानेंद्रियाणि वाका
दीनि कर्मेंद्रियाणि च तत्तद्गोलकमात्रोपरोधेन हठान्निगृह्यंते तद्दृष्टां
तेन मनोपि हठेन निग्रहीष्यामीति मूढस्य भ्रांतिर्भवति न च तथा
निग्रहीतुं शक्यते तद्गोलकस्य हृदयकमलस्य निरोद्धुमशक्यत्वात् अत
एव क्रमनिग्रह एव युक्तः तदेतद्भगवान्वसिष्ठ आह उपविश्योपविश्यै
व चित्तेन मुहुर्मुहुः न शक्यते मनो जेतुं विना युक्तिमनिंदितां अंकुशे
न विना मत्तो यथा दुष्टमतंगजः अध्यात्मविद्याधिगमः साधुसंगम एव
च वासनासंपरित्यागः प्राणस्पंदनिरोधनं एतास्ता युक्तयः पुष्टाः संति
चित्तजये किल सतीषु युक्तिष्वेतासु हठान्नियमयंति ये चेतस्ते दीपमुत्
सृज्य विनिघ्नंति तमो अंजनेनेति क्रमनिग्रहे अध्यात्मविद्याधिगम एक उ
पायः स हि दृश्यस्य मिथ्यात्वं द्रष्टुश्च परमार्थसत्यपरमानंदस्वप्रका
शत्वं बोधयति तथा च सति मनः स्वगोचरेषु दृश्येषु मिथ्यात्वेन प्रयो

ना४

जनाभावं प्रयोजनवति च परमार्थसत्यपरमानंदरूपे द्रष्टृस्वरूपे स्वप्रका
शत्वेन स्वागोचरत्वं बुद्ध्वा निरिंधनाग्निवत्स्वयमेवोपशाम्यति यस्तु बो
धितमपि तत्त्वं न सम्यग्बुध्यते यो वा विस्मरति तयोः साधुसंगम एवो
पायः साधवो हि पुनः पुनर्बोधयंति स्मारयंति च यस्तु विद्यामदादिना

सनयापीसमानोनसाधनःनुवर्त्तितमुत् सहनेनस्यपूर्वोक्तविवेके
नवासनापरित्यागप्रवीणाय: यस्तुवासनानामतिशावल्यान्नास
क्नेनशक्नोति तस्यप्राणस्पंदनिरोधोपाय: प्राणस्पंदवासनयो:चि
त्तप्रेरकत्वात्तयोर्निरोधेचित्तशांतिरुपपद्यते तदेतदाहसएवद्वे
वीजेचित्तवृक्षस्यप्राणस्पंदनवासने एकस्मिंश्चतयो:क्षीणेक्षिप्रंद्वे
अपिनश्यत: प्राणायामदृढाभ्यासैर्युक्त्याचगुरुदत्तया आसनाशन
योगेनप्राणस्पंदोनिरुध्यते असंगव्यवहारित्वाद्भवभावनवर्जनात्
शरीरनाशदर्शित्वाद्वासनानप्रवर्त्तते वासनासंपरित्यागाच्चित्तंग
च्छत्यचित्ततां प्राणस्पंदनिरोधाच्चयथेच्छसितथाकुरु एतावन्मा
त्रकंमन्ये रूपंचित्तस्यराघव यद्भावनंवस्तुनोंतर्वस्तुत्वेनरसेनच य
दानभाव्यतेकिंचिद्धेयोपादेयरूपियत् स्थीयतेसकलंत्यक्त्वातदा
चित्तंनजायते अवासनत्वात्सततंयदानमननंतव अमनस्तां
तदोदेतिपरमात्मपदप्रदेति अत्रद्वावेवोपायौपर्यवसितौप्राणस्पं
दनिरोधार्थमभ्यास: वासनापरित्यागार्थंवैराग्यमिति साधुसं
गमाध्यात्मविद्याधिगमौत्वभ्यासवैराग्ययो:पादकतयात्वन्यथासि
द्धेतयोरेवांतर्भवत: अतएवभगवता:भ्यासेनवैराग्येणचेतिद्व
यमेवोक्तं अतएवभगवान्पतंजलिरसूत्रयत् अभ्यासवैराग्याभ्यां
तन्निरोधइति तासांप्रागुक्तानांप्रमाणविपर्ययविकल्पनिद्रास्मृतिरू
पाणांपंचविधानामानंतानामासुरत्वेनक्लिष्टानांदैवत्वेनाक्लिष्टानाम
पिवृत्तीनांसर्वासामपिनिरोधोविधिनाग्निवदुपशमाख्य:परिणा
मो:भ्यासेनवैराग्येणचसमुच्चितेनभवति तदुक्तंयोगभाष्ये चित्त
नदीनामोभयतोवाहिनीवहतिकल्याणायपापायच यातुकै
वल्यप्राग्भाराविवेकनिम्नासाकल्याणवहा यात्वविवेकनिम्नासं
सारप्राग्भारासापापवहा तत्रवैराग्येणविषयस्रोत:खिलीक्रियते
विवेकदर्शनाभ्यासेनचकल्याणस्रोतउद्घाट्यतेइत्युभयाधीनश्चित्तवृ
त्तिनिरोधइति प्राग्भारनिम्नपदेनदाविवेकनिम्नंकैवल्यप्राग्भार
चित्तमित्यव्याख्यातेयथातीव्रवेगोपेतेनदीप्रवाहेसेतुबंधनेननि

गी.
टी.
स.

वार्यं कृत्वा शाणायनेन सेत्राभिमुखं तिर्यक्प्रवाहांतरमुत्पाद्यते त
था वैराग्येण चित्तनद्या विषयप्रवाहं निवार्य समाध्यभ्यासेन प्रशांत
वाहिता संपाद्यत इति हार्दमेतत्तत्र चाद्ययपदव्यवहारेण द्वितीयव
ति द्धिकल्पः स्यादिमं च जपदेवताध्यानादीनां क्रियारूपाणामावृत्तिलक्ष
णोऽभ्यासः संभवति सर्वव्यापारोपरमरूपस्य समाधेः केनाभ्यासः इ
ति शंकां निवारयितुमभ्यासं स्वयमेव व्याख्यातमत्र स्थितौ यत्नोऽभ्यास इति त
त्र स्वरूपावस्थिते द्रष्टरि शुद्धे चिदात्मनि चित्तस्यावृत्तिकस्य प्रशांतवाहि
तारूपा स्थिरतानास्थितिः तदर्थं यत्नो मानस उत्साहः स्वभावचांच
ल्याद्बहिः प्रवाहशीलं चित्तं सर्वथा निरोत्स्यामीत्येवंविधः स चावर्त्य
मानोऽभ्यास उच्यते स तु दीर्घकालनैरंतर्यसत्कारासेवितो दृढभू
मिः अतिवैरेन दीर्घकालसेवितो विच्छेदाभावेन निरंतरासेवितः सत
कारेण श्रद्धातिशयेन चासेवितः सोऽभ्यासो दृढभूमिर्विषयसुखवास
नया चालयितुमशक्यो भवति अदीर्घकालत्वे दीर्घकालत्वेपि विच्छि
द्य विच्छिद्य सेवने श्रद्धातिशयाभावे च लयविक्षेपकषायसुखास्वा
दानामपरिहारेणाभ्यासानसंस्कारप्राबल्याद्दृढभूमिरभ्यासः फल
दं न स्यादिति त्रयमुपात्तं वैराग्यं तु द्विविधं परमपरं च यतमानसंज्ञा
व्यतिरेकसंज्ञैकेंद्रियसंज्ञावशीकारसंज्ञाभेदैरपरं चतुर्धा तत्र स्वर्गभू
मिजयेनोमरभूमिसंपादनविवलया यावत्तर्थमेवाल्पत्र यत्नः इहामुत्र
विकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति त्रिधोत्पादनमे
वार्थमिमादयोरहस्यविषयाः स्वर्गो विदेहता प्रकृतिलयरसादयो वै
दिकत्वेनानुश्रविका विषयास्तेषु भयपरिदृष्टेऽपि सत्यामेवरुस्यायां विवे
कनारतम्येन यतमानादित्रयं भवति अजगतिकिंसारं किमसार
मिति गुरुशास्त्राभ्यां तास्यामीत्युद्योगो यतमानं स्वचित्ते पूर्वविमान
दोषाणां मध्येऽभ्यस्यमानविवेकेनैतेपक्कापतेवशिष्टा इति विविक्त
विवे कवद्विवेचनं व्यतिरेकः दृष्टानुश्रविकविषयप्रवृत्तेर्दुःखात्मकत्वबोधेन बहि
रिंद्रियप्रवृत्तिमजनयंमानसि औत्सुक्याकारेण मनस्यवस्थानमेकें सिद्यव
द्रियं मनस्यपि तृष्णाशून्यत्वेन सर्वथा वैतृष्ण्यं ट्स्या विरोधिनी चित्तप्र

16

ज्ञितानप्रसादतृष्णावशीकारसंज्ञोवैराग्यंसंप्रज्ञातसमाधेरंतरं।
गसाधनमसंप्रज्ञातस्यतुवहिरंगं तस्यतेनांतरंगसाधनंपरमेववै
राग्यंतच्चासन्नयत्नतत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति संप्रज्ञात
समाधिपाटवेन गुणत्रयात्मकात्प्रधानादिविक्तस्यपुरुषस्यख्या
तिः साक्षात्कारउत्पद्यते ततश्चाशेषगुणत्रयव्यवहारेषुवैतृष्ण्यंपद्य
वतितत्तत्परंश्रेष्ठंफलभूतंवैराग्यंतस्यपरिपाकेनिमिमात्रविक्षेप।
शमपरिपाकात्दवितेवेनकैवल्यमिति ५४ [illegible]
[illegible]
[illegible] ३५ ॥

सदानंदीटीका

इत्येवमर्जुनप्रश्नेश्रुत्वाबाचजगद्गुरुः सममेवयथाज्ञेषेवेवलेम
नश्चाधिरे १ महाबाहुत्वयात्वेतनिगृहीतेवशहत्ति प्रारब्धकर्मप्रा
बल्यात्वरेणासंयतात्मना २ दुःखेनापिमनोशक्तोनिगृहीतेवलेहट
ठे एवंसत्यपिधीरेणसमाधौतत्परेणतत् ३ अभ्यासेनविशुद्धेन
वैराग्येणनिगृह्यते अभ्यासोनामकस्यांचिच्चित्तभूमौनिरंतरं ४
समानप्रत्ययावृत्तिश्चित्तस्याधिवियोगिनः दृष्टादृष्टेषुभोगेषुदो
षप्रत्यक्षदर्शनात् ५ विषयेषुपहेत्स्यंवैराग्यंतद्उदीरितं ताभ्यां
निगृह्यतेतस्मांमनविक्षेपशीलता ६३५ ॥

नीलकंठीटीका

मनसोदुर्ग्रहत्वमभ्युपेत्यभगवानुवाच यद्यप्येवंतथापिअभ्या
सवैराग्याभ्यांसमुच्चिताभ्यांदुर्निग्रहमपिमनोनिगृह्यते तत्राभ्य
सोनामकस्यांचिच्चित्तभूमौसमानप्रत्ययावृत्तिः वैराग्यंतुदृष्टा
दृष्टेष्टभोगेषुसमाधनेषुदोषदर्शनेनवैतृष्ण्यं तत्रयथाकेदारि
कः केदारेषुकुल्याजलंसंचारयन् एकस्यद्वारंपिधायापरस्योद्घा
टयतितद्वत्वैराग्येणविषयस्रोतः खिलीक्रियतेअभ्यासेनकल्या
णस्रोतउद्घाटयतइतिद्वयोरपिग्रावपकत्वं तथाचसूत्रं अभ्यास
वैराग्याभ्यांतन्निरोधइति ३५ ॥

गी॰
टी॰
अ॰

163

आनंदटीका

तथा च योगसूत्राणि चित्तवृत्तिनिरोधो योगः अभ्यासवैराग्याभ्यां तन्निरोधः तत्र स्थितौ यत्नोऽभ्यासः दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति ३५

यद्येतदभ्युपगमस्तर्हि शृणु इति भगवान्

रामकंठीटीका

नाह — नास्त्यत्र संशयः इदं चलं स्वभावचपलं मनो दुःखेन निग्रहीतुं शक्यते किंतु अभ्यासेन वैराग्येण चोपायद्वयेन गृह्यते अभ्यासस्तावत् कर्मयोगेषु श्रवणमननादिना शास्त्रक्रमेण सर्वेन्द्रियवृत्तिषु विहितविषयेष्वन्यत्र प्रवर्तमानानां स्वर्गप्राप्तिवृत्तिषु च शरीराद्यभिचारितानां तथैव प्रवर्तमानानां स्वप्रदेशात् समारोपक्रमेण यथोक्तस्वात्मनिवेशनात्मकस्थितिलाभविषयो यत्नः वैराग्यं चानिषिद्धविषयस्पर्शे तु भुज्यमाने स्वविस्मृत्यानंदनिरूपमास्वादाद्विस्मरणात् तत्रानासंगः ताभ्यामेवं विधाभ्यां कर्मयोगाधिकृतपुरुषैकगोचराभ्याम् अभ्यासवैराग्याभ्यामेतत्सुचंचलमपि चित्तं नियंतुं शक्यमेवेति [illegible] ३५

अथैतदभ्युपगमस्तर्हि लासिकी [illegible]टीका तत्त्वं श्री भगवानुवाच ॥

हे महाबाहो मनश्चंचलं अत एव दुर्निग्रहं दुःखेन सर्ववृत्तिशून्यतया निरोद्धुं शक्यं इत्यत्र नास्ति संशयः किंतु तन्मनोऽभ्यासेन शनैः शनैर्दृष्ट्या फल्गुतया परमात्माकारप्रत्ययावृत्त्या वैराग्येण विषयवैतृष्ण्येन च गृह्यते सर्ववृत्तिशून्यं क्रियते अभ्यासेन लयप्रतिबंधात् वैराग्येण च विक्षेपप्रतिबंधादुपरतवृत्तिकं सत्परमात्माकारतया परिणतं भवतीत्यर्थः तदुक्तं अभ्यासवैराग्याभ्यां तन्निरोध इति चः समुच्चये उक्तं चात्र भगवता भाष्यकृता उभयाधीनश्चित्तवृत्तिनिरोध इति [illegible] ३५ ॥

पंचोतीटीका

ततोमनसश्चंचलत्वादिकमंगीकृत्यमनोनिग्रहोपायंदर्शयतिभगवान् असंशयमिति हेमहाबाहोमनःअसंशयंनिश्चितंदुर्निग्रहंचलमित्यत्रसंशयोनत्वपुनःहेकौंतेयअभ्यासेनआत्मविषयसंततमनोवृत्तिः आत्मव्यतिरिक्तविषयप्रवृत्तिरहितअभ्यासस्तेनदृष्टादृष्टेहिकामुष्मिकेषुदोषदर्शनाभ्यासात् वैतृष्ण्यंवैराग्यंतेनवैराग्येणचगृह्यतेनिगृह्यतेइत्यर्थः ३५ ॥

रमावीरसमित्ठोधिनी॥

अथैतदभ्युपगम्यार्जुनाक्षेपंपरिहरन्भगवानुवाच असंशयमिति हेमहाबाहोचंचलत्वादिनामनोदुःखेननिग्रहीतुंशक्यतेइत्यत्रनास्तिसंशयः सत्यमेवैतद्वदसीति किंत्वभ्यासेनवैराग्येणचेत्युपायद्वयेनग्रहीतुंशक्यते नतुनःसर्वथास्यनिग्रहासंभवइति तत्राभ्यासःकर्मयोगविषयः यथायथएवत्रिस्याप्रयुक्तकर्मणाविषयाननुभवन्स्वपीडितेषुप्रमात्माचार्योपदेशानुसारिणाक्रमेणमनसआत्मैककार्यैकतानीभावरूपोयत्नः वैराग्यंचकेमेषुशब्दादिषुलोभादिष्ठानरूपमपिमांसजातेस्त्रीरोपेपरित्यज्यपापरूपाणयः प्रवृत्तिमागच्छंतीति सर्वथास्वेच्छत्यागःशेयोदीपकः

३५ ॥

मधुभाष्य

३५ ॥

भाषा अनुवाद

अर्जुन की कही मन की चञ्चलता अंगीकार करि भगवान उसके निग्रह करनेकी उपाय कहते हैं कि हे महाबाहो हो मन की चञ्चलता रोकना कठिन यह जो तुम कहते हो सो निःसन्देह ठीक। है पर तो भी हे कौन्तेय अभ्यास के द्वारा मन परमात्माकार वृत्ति मे विषयों की वैराग्य वशाते निग्रहीत हो सके है अभ्यास से लय और वैराग्य से विक्षेप ये दोनो दूर होय यह मन निवृत्ति होय परमात्माकारता पायकर थिर होता है क्यों कि योगशास्त्र मे कहा है कि वृत्तिशून्य मनकी ब्रह्माकारा करकारित रूप स्थिति होती है उसी को निर्विकल्पकसमाधि कहते हैं ३५ ॥

दोहा

संशय नहि महाबाहो चंचल मन दुर्याद कौंतिसुत अभ्यास
सें गहैं विरागसें ताहि ३५ ॥

165

असंयतात्मना योगो दुष्प्राप्य इति मे मतिः । व
श्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ३६

शांकरभाष्यं

यः पुनरसंयतात्मा तेन असंयतेति असंयतात्मना अभ्यासवैराग्या
भ्यां असंयत आत्मा अन्तःकरणं यस्य सोयमसंयतात्मा तेन योगो दुःप्रा
पो दुःप्राप्य इति मे मतिः यस्तु पुनर्वश्यात्मा अभ्यासवैराग्याभ्यां व
श्यत्वमापादित आत्मा मनो यस्य सोयं वश्यात्मा तेन वश्यात्मना तु
यतता भूयोपि प्रयत्नं कुर्वता शक्योवाप्तुं योग उपायतो यथोक्ता
दुपायात् ३६

तेन असंयतात्मना

आनन्दगिरिकृतटीका

संयतात्मनो योगप्राप्तिः सुलभेत्युक्ता व्यतिरेकं दर्शयति यः पुन
रिति व्यतिरेकोपन्यासपरं पूर्वार्द्धमनूद्य व्याकरोति असंयतेति पू
र्वोक्तान्यथाव्याख्यानपरमुत्तरार्द्धं व्याचष्टे यस्त्विमादिना अन्तःकरण
स्य स्ववशत्वे सिद्धेपि वैराग्यादवाप्यावता भवितव्यमित्याह यततेति
उपायवैराग्यादिपूर्वको मनोनिरोधः ३६ ॥

स्वामिकृतटीका

एतावांस्त्विह निश्चय इत्याह असंयतात्मनेति उक्तप्रकारेणाभ्या
सवैराग्याभ्यामसंयतः आत्मा चित्तं यस्य तेन पुरुषेण योगो दु
ष्प्रापः प्राप्तुमशक्यः अभ्यासवैराग्याभ्यां वश्यो वशवर्ती आत्मा चित्तं य
स्य तेन पुरुषेण तु पुनरनेनैवोपायेन प्रयत्नं कुर्वता योगः प्राप्तुं शक्यः ३६

पैशाचभाष्यं

यः पुनः असंयतात्मा तेन असंयतात्मनेति अभ्यासवैराग्याभ्याम
संयतोऽन्तःकरणः संयत आत्मा तेनासंयतात्मना योगो दुष्प्रापः दुःख
संप्राप्य इति मे मतिः यस्तु पुनः वश्यात्मा तेन वश्यात्मना अभ्यासवैरा
ग्याभ्यां वश्यत्वमुपपादित आत्मा मनो यस्य सोयं तेन वश्यात्मना तु य
तता भूयोपि प्रयत्नं कुर्वता शक्योवाप्तुं योग उपायतः यथोक्तादुपायात् ३६

रामानुजभाष्यं

गी॰
टी॰
ष॰

असंयतात्मनाः जितमनसा महता पि बलेन योगो दुःप्राप एव
उपायतस्तु वश्यात्मना पूर्वोक्तेन मदाराधनरूपेण ज्ञानगर्भेन ज्ञानकर्म
णा जितमनसा यतमानेनायमेव समदर्शनरूपो योगो वाप्तुं शक्यः ३६

अन्नयथा अत्यक्ता असंयता
त्मनो विरक्तस्यन कुर्यविद्योगा
वाप्तिः वश्यात्मनेति वैराग्यवता
यतमानेनेति साभ्यासेन।पाया
नू अनेकासद्धांतादिशास्त्रविहि
तानू संश्रित्य ३६

अभिनवगुप्तकृतटी॰

वैराग्येण विषयोत्सुकताविनाशने अभ्यासेन मोक्षोपायः कमा
कर्मविषयीक्रियते इति श्रद्धापादाने उभयत्र भवता भाव्यमि
ना उभयथापि निष्प्रत्यूहमनोनिरोध इति प्रणयवाक्यमिति ३६

परमार्थप्रपाटीका

अयोगभयप्रकारं विधुरस्य योगो दुःसाध्यस्तथाप्युभयोपेतस्य सुसा
ध्य इत्याह असंयतेति अभ्यासवैराग्याभ्यामसंयत आत्मा चित्तं।
यस्य तेन योगो दुःप्रापः प्राप्तुमशक्यस्ताभ्यां वश्यः वशवर्ती
आत्मा यस्य तेन यतता प्रयत्नं कुर्वता पुरुषेणोपायतोऽभ्यासवैरा।
ग्यरूपादवाप्तुं शक्य इति मे मतिः मदभिमतं ३६ ॥

वनमालीटीका

प्रारब्धकर्मणां नष्टत्वान्नादृष्टप्रबलेन स्वफलदानाय मनसो वृत्ति
षु नाशमानासु कथं तासां निरोध इति यदुक्तं तदेव परेण पाठेन नि
रोधः संभवतीत्याह असंयतात्मनेति भगवानसाताकारेऽपि
वैराग्याभ्यासाभ्यां न संयतो निरुद्धो हार्दिकनाशापित आत्मा चित्तं
येन तेनासंयतात्मना योगो मनोनिरोधः दुःप्रापः दुःखेनापि प्राप्तुं
न शक्यते प्रारब्धकर्मकृतात् चित्तचाञ्चल्यादिति पूर्वं वदसि तथैव मम मतिः
संमतिस्तथैव तथ्यः वश्यात्मना तु वैराग्यपरिपाकेन वासनात्यये
सति वश्यः स्वाधीनो विषयपारतन्त्र्यशून्य आत्मा मनो यस्य तेन वैरा
ग्येण विषयेभ्यो विमुखीकरणाद्भ्यासेन भगवदाकारताकरणाद्वे
ष्टोपायतो मनोनिरोधः अवाप्तुं शक्यः पुरुषप्रयत्नस्य चलौकिकस्य।
वा प्रारब्धकर्मापेक्षया प्राबल्यात् अन्यथा लौकिकानां कृष्यादिप्र
यत्नस्य वैदिकानां ज्योतिष्टोमादिप्रयत्नस्य च वैयर्थ्यापत्तेः प्रारब्ध
कर्मसत्त्वे ततः फलसंभवे किं पुरुषप्रयत्नेन वदसत्त्वे तत्सर्वथासं
भवात् किं तेनेति विकल्पस्य सर्वत्र संभवात् अथ कर्मणाः स्वयम

दृष्टरूपस्य दृष्टसाधनं विना फलजननासमर्थत्वादयेतितः
कृष्णादेरप्युरुषप्रयत्नइतिचेत्तयोगाभ्यासेपिसमं यहाप्रारब्धकर्म
फलेनतत्वज्ञानात्प्रबलमितिदृष्टत्वात् तथानस्मादपिकर्मणोयो।
प५ गाभ्यासः प्रबलस्तस्माच्छास्त्रीयप्रयत्नस्य सर्वतः प्राबल्यात् यहाजीवन्।
मुक्तिनः प्रागेवमनोनिरोधस्यशक्यत्वाच्छक्यत्वविचारेजीवन्मु।
क्तस्यज्ञानभगवत्महाप्रसादस्यनिष्टत्तविःशेषाविघ्नस्यमनोनिग्रहा
दिकेकिमपिकर्त्तव्यंनास्तीत्यर्थः ३९ ॥

कृष्णमैवजयन्तीटी·

किंच असंयतात्मनेति असंयतात्मना अभ्यासवैराग्याभ्याम् न
संयतः सम्यग्विषयादुपरमितआत्मामनोयेनसंतथानेनविषय
व्याकुलचित्तेनतत्त्वतानिनापिपुरुषेणयोगः सर्वेन्द्रियवृत्तिनिरो
धलक्षणोज्ञानयोगशिरस्कोष्टांगयोगोदुःप्रापःदुःखेनापिप्राप्तुम
शक्यः तनिश्चयेनवश्यात्मनावश्यत्वाभ्यावशीकृतआत्मामनोयेन
सतथातेनस्वाधीनमनसातत्रापियततास्त्रदृढोमनोनिरोधनायैव
प्रयत्नंकुर्वताउपायतःसर्वेश्वरस्यभगवतोसमाराधनात्मकेनात्र
गतज्ञानेनकर्मणावासौयोगप्रयोगशक्योनान्यथेत्यर्थः ३९

यत्त्वमवोचः प्रारब्धभोगेनक मधुसूदनीटीका र्मणातत्वज्ञानादपिप्रबलेनस्वफलदानायमनसोवृत्तिषूत्पाद्यमानासुकथंतासांनिरोधःकर्त्तुंशक्यइतितत्रोच्यते ॥

दुःप्रापइतितत्त्वसाक्षात्कारेवेदांतवाक्यश्रवणादिवासंगादालस्यादि।
दोषात्अभ्यासवैराग्याभ्यामसंयतोनिरुद्धआत्मान्तःकरणंयस्यतेनासं
यतात्मनातत्त्वसाक्षात्कारवतापियोगोमनोवृत्तिनिरोधःदुःप्रापः
दुःखेनापिप्राप्तुंनशक्यःप्रारब्धकर्मकृतवृत्तिप्रचलत्वादितिवचनेव
दृष्टिनत्रमेमतिः ममसंमतिः तत्रायेवमर्थः केनतर्हिप्राप्यतेउच्य
ते वश्यात्मनातुवैराग्यपरिपाकेनवासनात्तयेनवश्यः स्वाधीनो।
विषयपारतंत्र्यशून्यः आत्माअन्तःकरणं यस्य तेन तुशब्दोऽसंयतात्मनो
वैलक्षण्यद्योतनार्थः वधारणार्थोवायततायत्नेनापि यततायत्नमाने
नवैराग्येनविषयस्रोतःखिलीकरणेनात्मस्रोतउद्घाटनार्थमभ्यासेप्रा
गल्भ्यंकुर्वतायोगःसर्ववृत्तिनिरोधःप्राप्तुंशक्योवाक्यमेवनेवाचलानि

गी. टी. ४.

ञ्जितानि प्रारब्धकर्माण्यभिभूय प्राप्तुं शक्यः कथमतिबलवतां प्रा
रब्धभोगानां कर्मणामभिभवः उच्यते उपायत उपायात् उपायः पु
रुषकारस्तस्य लौकिकस्य वैदिकस्य वा प्रारब्धकर्मापेक्षया प्राबल्यात्
अप्रबलस्य लौकिकानां कृष्यादिप्रयत्नस्य वैदिकानां ज्योतिष्टोमादि
प्रयत्नस्य च वैयर्थ्यापत्तेः सर्वत्र प्रारब्धकर्मसद्भावविकल्पग्रासा
तत्र प्रागपि प्रारब्धकर्मसत्त्वेन तत एव फलप्राप्तेः किं पौरुषेण प्रयत्नेन
तदसत्त्वेन सर्वथा फलासंभवात् किं तेनेति अथ कर्मणः स्वयमदृ
ष्टरूपस्य दृष्टसाधनसंपत्तिव्यतिरेकेण फलजननासमर्थत्वाद्दृष्टे
स्तिनः कृष्यादौ पुरुषप्रयत्न इति चेत् योगाभ्यासेऽपि समं समाधानं न
त्साध्याया जीवन्मुक्तेरपि सुखातिशयरूपत्वेन प्रारब्धकर्मफलान्तर्भा
वात् अन्यथा प्रारब्धकर्मफलेन तत्त्वज्ञानात् प्रबलमिति कल्प्यते
दृष्टत्वात् तथा तस्मादपि कर्मणो योगाभ्यासः प्रबलोऽस्तु शास्त्रीय
त्वस्य सर्वत्र ततः प्राबल्यदर्शनात् तथा चाह भगवान्वसिष्ठः सर्वमेवे
ह हि सदा संसारे रघुनन्दन सम्यक्प्रयुक्तात्सर्वेण पौरुषात्समवा
प्यते उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतं तत्रोच्छास्त्रमनर्था
य परमार्थाय शास्त्रितं उच्छास्त्रं शास्त्रप्रतिषिद्धमनर्थाय नरकाय १
शास्त्रितं शास्त्रविहितं श्रेतः करणशुद्धिद्वारा परमार्थाय तत्त्वज्ञानाय पु
परमार्थमोक्षाय २ शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित् पौ
रुषेण प्रयत्नेन योजनीया शुभे पथि १ अशुभेषु समाविष्टं शुभेष्वेवा
वतारय स्वं मनः पुरुषार्थेन बलेन बलिनां वर २ द्रागभ्यासवशाद्या
ति यदा ते वासनोदयं तदाभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन ३ वा
सना शुभेति शेषः संदिग्धायामपि भृशं शुभामेव समाहर शुभायां
वासनावृद्धौ तात दोषो न कश्चन अव्युत्पन्नमना यावद्भवानज्ञाततत्प
दः गुरुशास्त्रप्रमाणैस्त्वं निर्णीतं तावदाचर ततः पक्वकषायेण नूनं
विज्ञातवस्तुना शुभोऽप्यसौ त्वया त्याज्यो वासनौघो निराधिनेति ४ तस्मा
त्स्वाभाविकस्य संसारस्याविवेकनिबंधनस्य विवेकसाक्षात्कारादपन
येऽपि प्रारब्धकर्मपर्यवसानापि तत्त्वविदस्स्वाभाविकीनामपि हानी

नोयोगाभ्यासप्रयत्नेनापनयेत्सतिजीवन्मुक्तः परमोयोगीचित्त
वृत्तिनिरोधाभावेनतत्त्वज्ञानवानप्यपरमोयोगीतिसिद्धं प्रपंचि
तंजीवन्मुक्तिविवेकेसविस्तरमस्माभिरित्युपरम्यते ३६ एवंप्राक्तनेनग्रं
थेनायमत्रतत्त्वज्ञानोः तुमत्रजीवन्मुक्तिरपरमोयोगीमतः उभयत्र।
तत्त्वज्ञानतुभयत्रजीवन्मुक्तिश्चपरमोयोगीमतस्तस्मात् नयोगभ्रष्टो
ऽपिज्ञानादत्तानन्नाशोऽपियावत् प्रारब्धभोगंकर्मदेहेंद्रियसंघाता
वस्थानान्नारब्धभोगकर्मापायेववर्तमानदेहेंद्रियसंघातनाशाया
मुनरुत्पादकाभावाद्विदेहकैवल्यप्रतिकापिनास्त्याशंका यस्त्वश्रा
कृतकृतकर्माभिर्लब्धविविदिषापर्यंतचित्तशुद्धिः कृतकार्यत्वात्स
र्वाणिकर्माणिपरित्यज्यप्राप्तपरमहंसपरिव्राजकभावः परमहं
सपरिव्राजकमात्मसालानत्कारेणजीवन्मुक्तेपरमबोधनदत्ते।
गुरुमुपसृत्यतत्त्ववेदान्तमहावाक्योपदेशप्राप्त्यनंतरंसंभावनावि
परीतभावनाख्यप्रतिबंधनिरासायाघातोताब्रह्मजिज्ञासेमायत्ना
वृत्तिःशमादिसंपन्नयावज्जलंतरणमीमांसयाश्रवणमनननिदिध्या
सनानिगुरुप्रसादात्कर्तुमारभते सश्रद्दधानोपिसन्नापुपोले
त्वेनाल्पप्रयत्नत्वादलब्धज्ञानपरिपाकः श्रवणमनननिदिध्यास
नेष्वक्रियमाणेष्ववमध्येप्ययतेसज्ञानपरिपाकस्तुल्येनाः नष्टा
ज्ञानोनमृत्युनेनाप्युपासनासहितकर्मफलेदेवलोकमनुभव।
मर्चिरादिमार्गेणनापिकेवलंकर्मफलेपितृलोकमनुभवतिसा
मा धूमादिमार्गेणकर्मणामुपासनानांचमकत्वात् अतएवनादृशोयो
गभ्रष्टः कीटादिभावेनकष्टांगतिमियात्तत्त्वले सनिदेवयानमार्गा पितृयान
संबंधित्वात् वर्णाश्रमाचारभ्रष्टवदथवाकष्टांगतिंनेयात् शास्त्र
निंदितकर्मश्रुत्वात्ताधामदेववदितिसंशयपर्याकुलमना ३७॥

सदानंदीटीका

ताभ्यामसंयतंयस्यमनोविलेपशालिनः चित्तवृत्तिनिरोधाख्यो
योगस्तस्यातिदुर्लभः १ प्रारब्धकर्मप्राबल्याद्योगबलादिमनोऽस्य
त् दुर्निग्रहत्वेचित्तस्यतत्रमेसंमतिर्हरेः वैराग्यपरिपाकेनवासना
नोदयेसति वशः स्वाधीनआत्मांतःकरणंयस्यतेनतत्र २ ईदृशेना

गी. टी. ६

पिपूर्वोक्तमभ्यासं कुर्वतादरात् चित्तवीवत्स्यकारिणि कर्मणापेवा। भिभूपद ४ शामु शक्यः स योगो हि चित्तवृत्तिनिरोधकः स शक्यो भिभवः कर्तुं कथं प्रारब्धकर्मणां मेवभोः सोप्युपायेन कर्तुं शक्यो विवेकिना यास्तीयस्य प्रयत्नस्य प्रावस्यादपि कर्मणां ६ कर्तुं वा भिभवः शक्योवासिद्धोपि तयोरिति सर्वमेव हि इह संसारे रघुनंदन सम्यक्पुरुषकारेण पौरुषात्समवाप्यते उक्तास्वशास्त्रितेव ति पौरुषं हि विधीयते ८ तयोर्बाह्यमनर्थायपरमार्थायशास्त्रितं शुभाशुभाभ्यां मार्गाभ्यां वहंती वासना सरित् ९ पौरुषेण प्रयत्नेन योजनीया शुभे पथि अशुभेषु समाविष्टं शुभेष्वेवावतारय १० स्वमनः पुरुषार्थेन बलेन बलिनांवर प्रागभ्यासवशाद्याति यदा ते वासनोदयं तदभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन संदिग्धायामपि भृशं शुद्धामेव समाहर ११ गुरुशास्त्रप्रमाणैस्तु निर्णीतं तावदाचरः

तन्‍ः पक्ककषायेण नूनं विज्ञातवस्तुना शुभोप्यसौ त्वया मार्ग्यो वासनौघो निरोधिना तस्मात्योगसमाश्रित्य शक्यः प्रारब्धकर्मणां १४ कर्तुं वाभिभवोपीति सिद्धमित्याशयो हरेः १५ योगाभ्यासपरैर्मर्त्यैर्न वर्तते स्थाप्यते यत्र देवब्रह्मात्मेंद्रः ईशनीश्वरो द्वयइति स्वमात्रयोगी यते वैराग्यादिगुणाः सत्वादिवस्तुलभोपद्रुतिक्लेशादिरूपेणा सोस्माकं हृदि सर्वदाजनैः सत्त्वोभूयान्मुकुंदोहरिः २९३६ ॥

नीलकंठीटीका ।

असंयतात्मना अजितचित्तेन वश्यात्मना जितचित्तेन उपायतः अभ्यासवैराग्यरूपात् ३६ ॥

आनंदीटीका

न संयतो निरुद्ध आत्मा मनो येन तेन दुष्प्रापो योगो इतिमया मन्यते तु पुनः वश्यात्मना निरुद्धचेतसा यतता यत्नपूर्वमभ्यस्यता उपायतः वैराग्यादियोगसंवनादवाप्तुं शक्यः [illegible]

[illegible]

रामकंठीटीका

अत एव — यतो व्याख्याताभ्यासवैराग्यलक्षणसाधनाभावादसंयतात्मना अ
नियमितान्तःकरणेन पुरुषेण एष योगो दुष्प्रापो दुर्लभः वश्यात्मना
विधेयान्तःकरणेन तु पुरुषेण यतता नित्यमविच्छिन्नोत्साहतया प्रय
त्नं कुर्वता उपायतो यथोक्तज्ञानलक्षणादुपायात्स्वीकर्तुं शक्य एव [illegible]
[illegible]
[illegible]
[illegible] ३६

लासिकी[illegible]टीका

किंच — अभ्यासवैराग्याभ्यां न संयतः सम्यङ्निर्मूलतया निरुद्ध आत्मान्तः
करणं येन तेन पुरुषेणायं योगो दुष्प्रापो दुर्लभः [illegible] वश्या
त्मना विधेयान्तःकरणेन वैराग्यवतेत्यर्थः यतता साभ्यासेनैवानेनो
पायेन स्वीकर्तुं शक्यः ३६ [illegible]
[illegible]
[illegible]
[illegible] ३६॥

पंचोलीटीका

एतावांस्त्विह विशेषः इत्याह असंयतात्मनेति योगः असंयतात्मना
अभ्यासवैराग्याभ्यामसंयतचित्तेन दुःप्राप इति मे मतिः तु पुनः वश्यात्म
ना अभ्यासवैराग्याभ्यां वशीकृतमनसा यतता यत्नं कुर्वता उपायतः य
थोक्तेन उपायेन योगेन प्राप्तुं शक्यः ३६

रणवीरसमिद्धोधिनी॥

अत एव असंयतात्मनेति न संयतो निगृहीतो दुष्टसंकल्पेभ्यः प्रत्या
वर्तित आत्मा मनो येन तेनावशीकृतमनसा योगः समतालक्षणः
कर्मकौशललक्षणश्च कर्मयोगो दुःखेनापि प्राप्तुं न शक्यः इत्यने
न प्रकारेण मे मम मतिर्निश्चयः वश्यात्मना स्वायत्तीकृतचित्तेन य

ततोयत्नंकुर्वतायांयोगः कर्मयोगउपायतः प्रोक्तलक्षणनिश्चय
रूपात् अवाप्स्यं प्राप्स्यं प्राकः अतोमनोजयेप्रयत्नएवनिश्चयदार्ढ्या
त्सर्वंसिध्यतीतिभावः ३६॥

मधुभाष्य

३६॥

भाषा अनुवाद

और संयतआत्मा को योगप्राप्ति सुलभ है यह कहते है कि उह रीति से अभ्यास औ वैराग्य के द्वारा जिस का चित्त व श नहीं है उस को यह योग दुःप्राप्य है और जिस का चि त्त वशीभूत है और जो पूर्व कथित उपाय से यत्न करता है वह मेरे मतसे योग प्राप्त हो सकता है ३६

दोहा

नमन जाके वश तिहयोग अलभ्य मोमत मन वश जाके ता हि को यतन लभ्य है सत ३६॥

अर्जुन उवाच अयतिः श्रद्धयोपेतो योगाच्चलितमा
नसः अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ३७

शांकरभाष्यं

तत्र योगाभ्यासाङ्गीकरणेन परलोकेहलोकप्राप्तिनिमित्तानि कर्मा
णि संन्यस्तानि योगसिद्धिफलं च मोक्षसाधनं सम्यग्दर्शनं न प्राप्त
मिति योगी योगमार्गान्मरणकाले चलितचित्त इति तस्य नाशमा
शंक्यार्जुन उवाच अयतिरिति अयतिरप्रयत्नवान्योगमार्गे श्रद्ध
यास्तिक्यबुद्ध्या योगतो योगादन्तकालेपि चलितं मानसं मनो यस्य
स चलितमानसो भ्रष्टस्मृतिः सोऽप्राप्य योगसंसिद्धिं योगफलं स
म्यग्दर्शनं कां गतिं हे कृष्ण गच्छति ३७ ॥

आनन्दगिरिकृतटीका

प्रश्नान्तरमुत्थापयति तत्रेत्यादिना मनोनिरोधस्य दुःखसाध्यत्वमाशं
क्य परिहृते सति प्रश्नः पुनरवकाशं प्रतिलभ्याविवेति संबन्धः ।
लोकद्वयप्रापककर्मसंन्यासे कृतो योगिनो नाशः शंक्यमाशंक्याह
योगाभ्यासेति तथापि योगानुष्ठानपरिपाकप्राप्तिसम्यग्दर्शन
सामग्र्यामुत्पन्नो कुतस्तस्य नाशशंकेति चेन्नैवमनेकान्त
रायत्वाद्योगस्येहजन्मनि प्रायेण संसिद्धेरसिद्धिमभिमन्यमा
ह योगसिद्धीति प्रश्नं दर्शयति अयत्नवद्विभोर्विनाशो योगमार्गेण
तु फलस्य सम्यग्दर्शनादिति शेषः तर्हि ततो बहिर्मुखत्वमेवास्ति
के संभवत्विमाशंक्याह श्रद्धयेति तर्हि योगमार्गमाश्रयते नेत्याह
योगादिति मरणकाले व्याकुलेन्द्रियस्य ज्ञानसाधनानुष्ठानावकाश
भावादुक्तं तत्प्रचलितमानसत्वमित्याशंक्याह अप्रेति गम्यत इति
गतिः पुरुषार्थः सामान्यप्रश्नमन्तर्भाव्य विशेषप्रश्नो द्रष्टव्यः ३७ ॥

स्वामिकृतटीका

अभ्यासवैराग्याभावेन कथंचिदसम्यग्ज्ञानः किं फलं प्राप्नोती
त्यर्जुन उवाच अयतिरिति प्रथमं श्रद्धयोपेत एव योगे प्रवृत्तः न तु
मिथ्याचारतया ततः परं त्वयतिः न सम्यग्यतते शिथिलाभ्यासश्च
यः तथा योगाच्चलितं मानसं विषयप्रवणं चित्तं यस्य संजातवैराग्य

गी॰
टी॰
ष॰
५त

171

इत्यर्थः एवमभ्यासवैराग्यशैथिल्याद्योगस्य संसिद्धिं फलं ज्ञानमप्राप्य कांगतिं प्राप्नोति ३७

पिशाचभाष्यं

तत्र योगाभ्यासांगीकरणेन परलोके इहलोकप्राप्तिनिमित्तानि कर्माणि संन्यस्तानि योगस्य फलं च मोक्षसाधनं सम्यग्दर्शनं न प्राप्तमिति योगी योगमार्गात्मरणकाले चलितचित्त इति तस्य नाशमाशंक्याह अर्जुनः अयतिरिति अप्रयत्नवान् योगमार्गे श्रद्धयास्तिक्यबुद्ध्यान्वितो योगादन्तकाले च चलितं मानसं मनो यस्य स चलितमानसः नष्टस्मृतिः अप्राप्य योगसंसिद्धिं योगफलं सम्यग्दर्शनफलं कां गतिं कृष्ण गच्छति ३७ ॥

रामानुजभाष्यं

अथ नेहाभिक्रमनाशोस्तीत्यादावेवश्रुतं योगमाहात्म्यं यथावच्छ्रोतुमर्जुनः पृच्छति अनेन गीतात्मज्ञाननिष्ठायोगशिरस्कं निष्कामकर्मयोगमाहात्म्यं तत्रोदितं तच्च योगमाहात्म्यमेव पृच्छन्नर्जुन उवाच अयतिरिति योगे प्रवृत्तो ह्यनन्तराभ्यासरूपयत्नवैकल्येन योगसंसिद्धिमप्राप्य योगाच्चलितमानसः कां गतिं गच्छति ३७ ॥

अभिनवगुप्तकृतटी॰

आसा योगाद्यदि चलिते ऽपि चित्ते श्रद्धा न हीयते विनष्टश्रद्धे हि सिद्धयोगोपि सर्वं निष्फलं कुरुते उक्तं हि यदा प्राप्यापि विज्ञानं दूषितं चित्तविभ्रमात् तदैव ध्वंसते शीघ्रं तूलराशिमिवानल इति योगस्य सम्यक्सिद्धावजातायां किं लोकात्रिभ्रष्टः सम्यक् ब्रह्मणि न लीन इति नश्येत् अथवा ब्रह्मण्यप्रतिष्ठत्वाद्विनश्यति परलोकबाधायेतिप्रश्नः ॥ ३२ ॥ ३७ ॥

परमार्थप्रपाटीका

अथो भयभ्रष्टत्वेन शिथिलाभ्यासवतः कां गतिरित्यर्जुनः पृच्छति अयतिरिति प्रथमं श्रद्धयोपेतः ईश्वरार्पणतया कर्म कुर्वाणः सन् योगे प्रवृत्तः न तु मिथ्याचारतया परं त्वयतिः सम्यग्यत्नेन योगसामग्रीविकलः सन् योगाच्चलितं विषयासक्तं मानसं यस्य स तथाभूतो योगसंसिद्धिमप्राप्य कां गतिं गच्छति ३७ ॥

वनमालीटीका

एवं प्राक्तनग्रंथेनोक्तभगवदुपदेशोत्तमनिःशेषविद्यानिवृत्तिपूर्वकस्वस्वरूपाविर्भावरूपजीवन्मुक्तिरूपो योगोमतः ३

मद्रूपरं ब्रह्मापरोक्षं उमवज्जीवन्मुक्तिस्तु परमो योगी मतः पूर्वं।
स भगवत्ताकाङ्क्षादिकाविद्यायानिहृतत्वेपि स्वस्वरूपानन्दाकाङ्क्षादिका
याप्रतिहृतत्वात् अन्त्यस्य तु विद्यादृश्यस्यापि निवृत्तिः विक्षेपस्य तु
व्यनश्यमारोवेधप्रहयनिहृतत्वात् के चित्तु के यस्तु कर्मफलत्यागविविदि
षापर्यन्तविशुद्धिः कृतकर्मत्वात् कर्माणि संन्यस्य जीवन्मुक्ते
परवोपनदृगुरूपसदनतोवेदान्तोपदेशश्रवणासंभावनविपरी
तभावनानिवृत्तिपूर्वकं भगवन्तमापरोक्षीकर्तुं प्रयातो ब्रह्मसाक्षा।
त्कारसाधनाहत्तिः शमादिसंपन्नयावज्जीवं तिमीमांसयाश्रवण
मनननिदिध्यासनानि गुरुसमीपादुक्तेमारभेते स श्रद्धालोप्ययु
क्तोस्येवतात्मप्रयत्नकात्त्वल्पज्ञानपरिपाकः श्रवणादिक्रियमा
णोऽपश्चादयमेवायमपयन् सोज्ञानसम्यग्भगवदपरोक्षत्वेनसंसारान्
मुच्यतेनापि स्वर्गादिफलभोक्ता तत्साधककर्मणामाभावात् अतएव
नादृशोयोगभ्रष्टः कीटादिभावेनकष्टांगतिमियादित्तिं सतिदेव
पिदयानाद्यसंबंधित्वात् स्ववर्णाश्रमाचारभ्रष्टत्वात् अथवा कष्टां
गतिंनेयात्कृतात्वनिर्दिष्टकर्मश्रद्धत्वात् ममदेवावदितिसंदेहानः पृ
च्छति अयतिरिति अयतिरल्पयत्नवान् अश्रवणोपवाक्यरितिव
चनस्यार्थकस्यहृयोयेनोगुरुवेदान्तवाक्यश्रविद्यासंयुक्तः अद्याव
शमाद्युपलक्षणं शान्तोदान्तउपरतस्तितिक्षुःश्रद्धावितोभूत्वात्मन्ये
वात्मानंपश्येदितिश्रुतेः नित्यानित्यवस्तुविवेकइहामुत्रभोगवि
रागः शमदमोपरतितितिक्षाश्रद्धादिसंपत् मुमुक्षुताचेतिसाधन
चतुष्टसंपन्नोप्यात्युपोस्पत्वेनमरणकालेवेदियव्याकुलत्वेनसाध।
नासंभवाद्योगाच्चलितमानसः योगाच्छ्रवणादिजन्मनस्तत्वज्ञा
नाच्चलितंतंनफलमप्राप्तमानसः योगसंसिद्धिंब्रह्मापरोक्षनि
मित्तांमुक्तिमप्राप्यानन्तत्त्वमव मृतकांगतिंगच्छतिसुगतिंवागच्छ
ति सोचितकर्मत्यागात् शास्त्रोक्तमोक्षसाधनानुष्ठायित्वाद्विहित
कर्मशून्यत्वाच्च ४० ॥

कृ

दि

ति

य

गी·
टी·
ष·

१७८

फलानुसंधानरहितस्यज्ञानगर्भकस्याष्टाङ्गयोगशिरस्कस्यकर्मयोग
स्यनेहाभिक्रमनाशोस्तीत्यादिनापूर्वंमाहात्म्यंश्रुतमपितुतस्य।
विस्तरश्रवणेच्छयार्जुनोभगवंतंपृच्छतित्रिभिः अयतिरिति हे
कृष्णयःकश्चित्स्वकृष्टःप्रथमंतशास्त्राचार्यवचनविश्वासेनोमत्त्या
याश्रद्धयोपेतोयुक्तोभवतिततःपश्चादयतिःस्वधर्माचरणेऽप्रय
त्नवान् अल्पार्थेनञ् अनुदराकन्येतिवत् अतएवयोगाद्ध्येगयो
गात्चलितमानसः अभ्यासवैराग्ययोःशैथिल्यप्रयत्नत्वात्समा।
धेःसकाशाच्चलितंविषयेष्वभृतंमानसंयस्यसतथाईदृशोसम्य
क्योगयोगीयोगसंसिद्धिंसर्वाङ्गसम्पन्नस्यज्ञानगर्भस्यकर्मशिर
स्कस्याष्टाङ्गस्यसंसिद्धिमात्मावलोकनरूपंफलमप्राप्यस्वधर्मानुष्ठा
नाभ्यासवैराग्यशैथिल्यादात्मानमनधिगम्यकांगतिंकिंशास्त्रोपा
नेकविधांशंकांसूचयतिगतिंशास्त्रस्वास्मिन्स्थानेयोनयति तथा
हिदेवयोनिंवामनुष्ययोनिंवापशुपतिसरीसृपादियोनिंवानिरय
योनिंवास्थावरयोनिंवागच्छतिप्राप्नोति यद्यप्ययतिःयोगाच्चलि
तमानसश्चभगवतितथापिश्रद्धावांस्तस्यकिंचित्फलंप्राप्नोत्येवतदि
दृश्येत्यर्थः ॥ ३७ ॥ मधुसूदनीटीका
यतिःयत्नशीलःअल्पार्थेनञ् अल्पयत्नोयवानृत्विग्वत् अयतिः
अल्पयत्नःश्रद्धयागुरुवेदान्तवाक्येषुविश्वासबुद्ध्याउपेतोयुक्तः
श्रद्धाचस्वसहकारिणांशमादीनामुपलक्षणंशमोदानउपरतित
तिक्षाःश्रद्धाविनोभूताःत्मन्येवात्मानंपश्यन्तीतिश्रुतेःतेननित्यानि
त्यवस्तुविवेकइहामुत्रफलभोगविरागःशमदमोपरतितितिक्षा
श्रद्धादिसंपत्मुमुक्षुत्वावेतिसाधनचतुष्टयसंपन्नःगुरुमुपसृत्यवे
दांतवाक्यश्रवणादिकुर्वन्नपिपरमायुषोऽल्पत्वेनमरणकालेवेंद्रि
ना४ याणांव्याकुलत्वेनसाधनानुष्ठानासंभवात्योगाच्चलितमानसःयोगा
च्छ्रवणादिपरिपाकलब्धजन्मनःतत्त्वसाक्षात्कारात्चलितंनतत्फल
मप्राप्तमानसंयस्यसःयोगोनिष्ठैवाप्राप्ययोगसंसिद्धिंतत्त्वज्ञान

तिमितामत्तानन्तत्कार्यनिवृत्तिमश्नुवानाहन्तिसहितामश्राप्यानत्व
त्तएवमतः सत्कांगतिं हे कृष्ण गच्छति सुगतिं दुर्गतिं वा कर्मणो
परित्यागात् ज्ञानस्य चानुत्पत्तेः शास्त्रोक्तमार्गसाधनानुष्ठापितावाक्का
लागर्हितकर्मश्रममत्वात् [illegible] ३७ ॥

मधुसूदनीटीका

योगाभ्यासप्रवृत्तेन सन्न्यस्तसर्वकर्मणा तत् इहामुत्रफलप्राप्तिहेतुभू
तेष्वनुष्ठानेषु १ योगसिद्धिफलमोक्षसाधनेन तत्त्वदर्शने न शक्तेः योगमा
र्गात्प्रच्याव्य चलितमतिः २ यस्य तस्याभितो नाशमालक्ष्यार्जुन
उवाच गुरुवेदान्तवाक्येषु विश्वासेन श्रद्धयोपेतः विरक्तः साधनोपेतः प्र
वृत्तो योगपथे तीव्रो शिथिलप्रयत्नो योगसदेवान्मध्येमरणो यदि योगसि
द्धिमसंप्राप्य कांगतिं याति सोऽयुक्त ५३७ ॥

नीलकण्ठीटीका

मनसो दुर्निग्रहत्वात् योगसिद्धेर्विघ्नं पश्यन् अर्जुन उवाच हे कृष्ण यो
गात्कर्मयोगाच्चलितमानसत्वात् कर्मसंन्यासी स्वधर्मः अद्धा उपे
तो योगमार्गं प्रविष्टोऽपि अयतिः अभ्यासवैराग्यदौर्बल्या
दात्मसंयत्नः अलवणप्रयत्नात् यतिर्मार्गान्नष्टः कदाचि
त् योगसंसिद्धिं योगफलं सम्यग्दर्शनमप्राप्य मरणात् कांगतिं
गच्छति ३७ ॥

आनन्दीटीका

अत्र हेतुः अनेकचित्तः नैकत्रावित्रेयस्य विभ्रान्तेन कापिलत्वं स्थितिः ।
मोहस्यानात्मज्ञानस्य वशंगतः हे कृष्ण योगसिद्धिमप्राप्य कांगतिं ग
च्छति ३७ ॥

रामकण्ठीटीका

+ अस्मोपदेशाद्युपायात्रिसंशयतया फलस्य च संभवनाश्रद्धा इति किलो
क्तानयोपेतः श्रद्धावान् अत एव सतां मरुक्षणां मत्रमफलार्थिनो
पुंसां पूर्वं प्यानं प्रेप्सुरपि यदि योगाद्वलनानात्ममायेच्चलितमानसः
विक्षिप्तचित्तवृत्तिः अत एव अयतो यत्नशून्यः ततश्च वलनाः परसोपे
यस्य तत्त्वस्य पद्यि प्राप्तुपायरूपे मार्गे प्रमूढः प्रकर्षेणा मूढः सम्यग्ज्ञा
नरहितः ३७ ॥

+ अथोपायस्य ज्ञानरूपस्य कृतिमाश्रावयन् तत्त्वादभ्यासवैराग्ययोर्यत्नं तु दुःसाधत्वादात्मनश्च संसारिधर्मानुपरमा
त्वयोगस्य दुःखावाप्तत्वमन्यमानः अद्धा मात्रमेकस्य कारणस्य योगं प्रत्युपायत्वं स्यात्र वेति संशयोऽर्जुन उवाच ॥+

१ अयतः श्रद्धयोपेतो योगाच्चलितमानसः लिप्समानः
सतां मार्गं प्रमूढो ब्रह्मणः पथि । अनेकचित्तविभ्रान्तो
मोहस्यैव वशंगतः अप्राप्य योगसंसिद्धिं कांगतिं कृष्ण
गच्छति अभ्यासवैराग्ययोः दुःसाध्यत्वाद्योगस्य निष्ठां दुष्प्रा
पां मन्यमानोऽर्जुन उवाच अयतेति नञ् स्वल्पभावे अयतः
यत्नशैथिल्यादभ्यासपरिपाकं न प्राप्तः अत एव योगाच्च
लितमानसः परमं योगमप्राप्तः किं तु कायोगादवश्यं ब्रह्म
प्राप्तिः स्यादिति श्रद्धयोपेतः नतु त्यक्तश्रद्ध अत एव सतां योगिनां मार्गं ब्रह्म
स्थितिं लब्धुमिच्छु ब्रह्मणः पथि उपायरूपे मार्गे प्रकर्षेण मूढः ॥

गी॰
टी॰
ष॰

173

+ तत्र ध्यानयोगेन तत्त्वज्ञानियतसमाधिरूपसिद्धियोगादारभ्यानल्पेनानुभूततया श्रद्धावश्यप्रकिंचिदप्रमद्वैततत्त्वं
ज्ञानोत्कर्षमप्राप्य जन्मप्रदसंसारासक्तेरभावाद्धकां गतिं प्राप्नोतीति संदिहानोऽर्जुन उवाच ॥ +

लास्तिकी[illegible]टीका

+ अयतिरल्पयत्नः यथा यथा यमसमाधानरूपपरमात्माकारभावनया सर्वरूपाभ्यासरहितः तथा श्रद्धयोपेतः प्राप्ता योगाद्बुद्धियोगादेर्ध्यानसमाधिरूपात्मभिन्ना चलितं व्युत्थितं च मानसं यस्य सः योगस्य संसिद्धिमद्वैतरूपां ज्ञानपाकमप्राप्य सन् हे कृष्ण स देहमत्स्यकां गतिं स्वर्गतिं दुर्गतिं वा प्राप्नोति [illegible] ॥

पंबोलीटीका

अभ्यासवैराग्यशैथिल्येन कथंचिद् आत्मसम्यग्दर्शनः मरणकाले योगाच्चलितमानसः सर्वकर्मसंन्यासी किं फलं प्राप्नोतीति शंकते अर्जुन अयतिः इति हे कृष्ण अयतिः योगमार्गे अप्रयत्नवान् श्रद्धया आस्तिकबुद्ध्या युक्तः योगात् अंतकाले चलितमनाः योगसंसिद्धिं योगफलं सम्यग्ज्ञानं अप्राप्य कां गतिं गच्छति ३७ ॥

रणवीरसमसिद्धोथिनी ॥

अथ वैराग्याभ्यासावेव प्रोक्तलक्षणौ मनोनिग्रहसिद्धये परमोपायतया आश्राविति सिद्धांतितं तत्र तावत् योऽवेव दुःसाधत्वात् मति मनोनिग्रहे प्रोक्तलक्षणस्य कर्मयोगस्य दुरवापत्वं तद्वत्स्यमेवमन्यमानः श्रद्धामात्रस्यैकस्यैव लाभ्यत्वात् कारणत्वं योगं प्रति स्यान्न वेति संशयानोऽर्जुन उवाच अयतिरिति मासाचार्योपदिष्टेऽर्थे एवमेवैतदिति निःसंशयतया श्रद्धया उपेत एव योगे श्रद्धः अनेनतरमनायत्तचित्तत्वेन पुत्रमित्रादिस्नेहादिनातिबलवत्तरेण योगात् प्रोक्तलक्षणात् कर्मयोगात् समनातात् लक्षणात् ज्ञानचलितं मानसं यस्य सोऽपरिपक्वप्रोक्तलक्षणवैराग्य इति यावत् अतएवायतिः अल्पार्थे नञ् मंदप्रयत्नः शिथिलाभ्यास इति यावत् स योगस्य कर्मयोगस्य संसिद्धिमैहिकामुष्मिकसर्वप्राप्तिलक्षणामप्राप्यालब्ध्वा हे कृष्ण कां गतिं गच्छति प्राप्नोति अयं भावः उपायो

तस्मादित्येन ब्रह्मणा ऐकालम्बनस्य तस्याल्पप्रयत्नत्वेन संग्रा
मादिहृतेः संभवाच्छत्रुभिरेत्यदत्तत्वेनापि लोको विस्रुवीभू
यमस्तेन वाङ्गे लोकाभावश्च तु मयलोकाभावे कस्यां योनौ सं
क्रमणं तस्येति प्रश्नाभिप्रायः ३०॥

मधुभाष्य

भाषा अनुवाद

अभ्यास वैराग्य के अभाव से वा और कोई प्रकार उपाय से जिस
को तत्वज्ञान न भया ऐसा मनुष्य कौन फल पायसकता है औ कि
स गती को जाता है यह प्रश्न अर्जुन करते हैं कि हे कृष्ण जो प्र
थम कपट रहित श्रद्धा युक्त होय योग मे प्रवृत्त भया परन्तु तिस
पीछे यत्न न किया अर्थात् अभ्यास से शिथिल कहे ढीला रहा
और जिसका मन विषय मे मग्न रहा कहे विषय से विराग
नभया ऐसा मनुष्य योग संसिद्धि जो ज्ञानरूप फल तिसको ।
न प्राप्त होके किस रूप गति को पाय सकता है अर्थात् कौन
गति को जाताहै ३७

दोहा

यत्नरहित श्रद्धायुक्त योग हिसें चलचित कृष्ण सिद्धि विन यो
गकी कागति लहैं सचित ३७ ॥

175

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिवनश्यति अप्र
तिष्ठोमहाबाहोविमूढोब्रह्मणःपथि ३८ ॥

शाङ्करभाष्यं

कच्चिदिति कच्चित् किंनोभयविभ्रष्टः कर्ममार्गात् विभ्रष्टः सन् छि
न्नाभ्रमिव नश्यति किंवा ननश्यति अप्रतिष्ठो निराश्रयो हेमहाबाहो
विमूढः सन्ब्रह्मणःप्राप्तिमार्गे ३८ ॥

आनन्दगिरिकृतटीका

प्रश्नमेव विवृणोति कच्चिदिति प्रश्नार्थत्वं कच्चिदित्यस्याङ्गीकृ
त्य व्याचष्टे किमिति उभयविभ्रष्टत्वं स्पष्टयति कर्ममार्गादिना वायुना
छिन्नं विशकलितमभ्रं यथा नश्यति तद्वदित्याह छिन्नेति नाशाशंका
निमित्तमाह निराश्रय इति कर्ममार्गरूपावष्टम्भाभावेऽपि ज्ञानमा
र्गावष्टम्भस्तस्य भविष्यतीत्याशंक्याह विमूढः सन्निति नहि कर्म्मिण
प्रतीयमानाशङ्का फलाभिलाषं त्यक्त्वेश्वरे समर्प्यैवाकृतकर्म्मानुतिष्ठतो
निरुपचारेण तद्भ्रंशवचनासम्भवात् सर्वकर्म्मसंन्यासिनस्तु विहि
ताद्वा मार्गात् ज्ञानोपायाच्च विच्युतेरनर्थप्राप्तिशङ्का युक्तेतिभावः ३८

स्वामिकृतटीका

प्रश्नाभिप्रायं विवृणोति कच्चिदिति कर्मणामीश्वरेऽर्पितत्वादन
नुष्ठितत्वाच्च ततावत्कर्मफलं स्वर्गादिकं प्राप्नोति योगानिष्पत्तेश्च न
मोक्षं प्राप्नोति एवमुभयस्माद्भ्रष्टः अप्रतिष्ठो निराश्रयः अतएव ब्रह्म
णः प्राप्त्युपाये पथि मार्गे विमूढः सन् कच्चिन्न नश्यति किंवा नश्यती
त्यर्थः नाशे दृष्टान्तः यथा छिन्नमभ्रं पूर्वस्मादभ्राद्विच्छिन्नं अभ्रान्तरं चाप्रा
प्तं सत् मध्य एव विलीयते तद्वत् ३८ ॥

पैशाचभाष्यं

कच्चिदुभयविभ्रष्टः कर्ममार्गाद्योगमार्गाच्च विभ्रष्टः छिन्नाभ्रमिवनश्य
ति किंवा अप्रतिष्ठो निराश्रयः हे महाबाहो विमूढो ब्रह्मणः पथि ब्रह्म
प्राप्तिमार्गे ३८ ॥

रामानुजभाष्यं

उभयविभ्रष्टोयं छिन्नाभ्रमिव कच्चिन्न नश्यति यथाभ्रशकलः पूर्वस्मा
न्महतोभ्राच्छिन्नः परं महान्तमेवभ्रमप्राप्य विनष्टो भवति तथैव कच्चि
न्न नश्यति कथमुभयविभ्रष्टता अप्रतिष्ठः विमूढो ब्रह्मणः पथि
यथावस्थिते स्वर्गादिसाधनभूते कर्मफलाभिसंधिरहितत्वात्तस्य पुरु
षस्य फलसाधनत्वेन प्रतिष्ठा न भवतीति अप्रतिष्ठः अकान्ते ब्रह्म
णः पथि विमूढस्तत्साधनात् प्रथमे प्रवृत्तः उभयभ्रष्टतया किं
मयं नश्यत्येव उत न नश्यति ३८ ॥

अभिनवयमकृतटीका समाप्तं ३८ पूर्वश्लोके उक्तार्थः

परमार्थप्रपा

उक्तानेवमे संशयं छेत्तुं ... लीनिश्चयः शेषं ... ६
प्रश्नाभिप्रायं विशदयन्नर्जुन उवाच कच्चिदिति हे महाबाहो पूर्वोक्तया
कर्मणामीश्वरार्पणतया स्वर्गादिफलभ्रष्टः ज्ञानयोगाच्चलितत्वादन्व
यिगतमोक्ष एवमुभयविभ्रष्टः सन् छिन्नाभ्रमिव अयतः प्रष्टोवा
महापीभूत्वान्तराभावान्मध्यस्थितमभ्रं यथा विलीयते तद्वद्ब्रह्म
णः पथि मोक्षमार्गे विमूढ अतएव अप्रतिष्ठो निराश्रयः कच्चिन्न
श्यति ३८ ॥

वनमालीटीका

कच्चिदिति साभिलाषप्रश्ने महाबाहो सर्वेषां भक्तानां सर्वोपद्रवनिवा
रणे समर्थः पुरुषार्थचतुष्टयदानसमर्थो वा त्वन्नाशो वा हे वा पस्य
सः ब्रह्मणः ब्रह्मप्राप्तिमार्गे विविक्तः अनुमन्तव्याभावेन गुणालय ब्र
ह्मणः साक्षात्कारोपसमः अप्रतिष्ठः देवयानादिप्रतिष्ठाभिलाषा
न्प्रापकसाधनै रहितः स उभयविभ्रष्टः कर्ममार्गात् ज्ञानमार्गाच्च वि
भ्रष्टः छिन्नाभ्रमिव वायुना छिन्नं विशकलितं पूर्वस्मान्मेघाद्भ्रष्टमु ६
त्तरमेघं चाप्राप्तमभ्रं यथा मध्ये एव गलत्येवं नश्यति तथा यो
गभ्रष्टोपि पूर्वस्मात् कर्ममार्गादिच्छिन्नः उत्तरं ज्ञानमार्गमप्राप्तो नग
लत्येव नश्यति कर्मफलं ज्ञानफलं च लब्धुं योग्यो न किमिति प्रश्नार्थः ३८

अभिनवजयन्तीटी

किंच प्रश्नाभिप्रायं स्पष्टयति कच्चिदिति हे महाबाहो अप्रतिष्ठः अ

गवदर्पितत्वात्कर्मफले स्वर्गादौ स्थितिरहितः एवं च ब्रह्मणः प
रमेश्वरस्य पथि मार्गे भक्तिसाधने विमूढः विशेषेण वै विस्तः भग
वत्प्राप्तिसाधनानुष्ठानसमर्थः ईदृशोऽयं पुरुष उभयविभ्रष्टः स
न् उभयस्मात्कर्मफलात्स्वस्वरूपावलोकनाच्च विभ्रष्टः प्रच्युतस्सन्।
छिन्नाभ्रमिव यथा पूर्वस्मान्महतो मेघात् छिन्नोऽभ्रमेघशकलोऽप
रं महान्तं मेघमप्राप्य नश्यति तथा कश्चित् किं न नश्यति वा न नश्यति ३८
एतदेव संशयबीजं विहृणोति ॥

मधुसूदनीटीका

कच्चिदिति साभिलाषप्रश्ने हे महाबाहो महान्तः सर्वेषां भक्तानाम
वोपद्रवनिवारणसमर्थाः पुरुषार्थवत्स्वप्रदानसमर्था वा बत्ना
रो बाहवो यस्येति प्रश्ननिमित्तकोपाभावस्तत्तदुत्तरदानमहिम्नस्त्व
सूचिते ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे ज्ञाने विमूढः विक्षिप्तः अ
नुत्पन्नब्रह्मात्मैक्यसाक्षात्कार इति यावत् अप्रतिष्ठः देवयानपितृ
यानमार्गगमनहेतुभ्यामुपासनाकर्मभ्यां प्रतिष्ठाभ्यां साधनाभ्यां र
हितः सोपासनानां सर्वेषां कर्मणां परित्यागात् एतादृश उभयभ्रष्टः
कर्ममार्गात् ज्ञानमार्गाच्च विभ्रष्टः छिन्नाभ्रमिव वायुना छिन्नं वि
शकलितं पूर्वस्मान्मेघाद्विष्टमुत्तरमेघं चाप्राप्तमसमग्रं यथा वृष्ट्ययोग्यं
सदन्तराल एव विनश्यति तथा योगभ्रष्टोऽपि पूर्वस्मात्कर्मंमा
र्गाद्विच्छिन्नः उत्तरं च ज्ञानमार्गमप्राप्तोऽन्तराल एव नश्यतीति कर्मफलं
ज्ञानफलं च लब्धुमयोग्यो न किमिति प्रश्नार्थः एतेन ज्ञानकर्मस
मुच्चयो निराकृतः एतस्मिन् हि पक्षे ज्ञानफलालाभेऽपि कर्मफलला
भसंभवेनोभयविभ्रष्टत्वासंभवात् न चैतस्य कर्मसंभवेऽपि फल
कामनाया अभावात्फलभ्रंशवचनमवकल्पत इति वाच्यं निष्कामाना
मपि कर्मणां फलसद्भावस्यापस्तंबवचनाद्युदाहरणेन बहुशः प्रति
पादितत्वात् तस्मात्सर्वकर्मत्यागिनं प्रत्येवायं प्रश्नः अनर्थप्राप्ति
शंकायास्तत्रैव संभवात्

॥ ३८ ॥

सदानंदीटीका

कर्ममार्गात् ज्ञानयोगाद्विभ्रष्टः सन् किंचयात् छिन्नाभ्रमिव नश्ये

गी॰
टी॰
ष॰

177

ह्यसौ न श्यति निराश्रयः। विमूढो ब्रह्मविन्मार्गे मत्कर्माश्रयो
यतः भक्तानां दोषसंदोहवारणाय स्ववाहवः समर्थाः स्युस्तदाने
व महाबाहो न मिमहो ११८ ॥

नीलकंठीटीका

कच्चिदिति कच्चिन्नोभयविभ्रष्टः कर्ममार्गाद्योगमार्गाच्च विभ्रष्टः
छिन्नाभ्रमिव पूर्वमपरं वा मेघमेघमप्राप्य मध्ये एव नश्यति नद्दत्
अप्रतिष्ठो निराश्रयः हे महाबाहो विमूढो ब्रह्मणः पथि ब्रह्मप्रा
प्तिमार्गे ३८ ॥

आनंदीटीका

कच्चिदितीष्टप्रश्ने प्रश्नेहोपेतः पृच्छतः उभयस्माद्भोगापवर्गाख्यस्मा वि
भ्रंशात्तल्लाभात् छिन्नाभ्रमिव न नश्यति वा अविशीर्णो मेघो यथा न वि
नश्यति एवं स्थानमाप्नोति तथायं किं प्राप्नोति योगभ्रष्टः स्थानमे
वाप्नोति वा प्रश्ने उताप्रतिष्ठस्थानमनाप्तः विनाशमेव नरकस्थानमे
वाधिगच्छति ३८॥

रामकंठीटीका

अतस्त्वोपायानिश्चयादनेकचित्तः विकल्पाकुलत्वात्सति तस्मिंश्चेव ल
ब्धा हृद्भावि धमनोवृत्तिः अतएवाविश्रांतोन्नक्वचिलब्धस्थितिः यतोऽ
मोहस्यैवाज्ञानस्य वशंगतः विधेयतां प्राप्तः तदेतयादृशस्ताम्यग्न्यायो
गमसिद्धिसमाधिलाभमप्राप्तः सन् कां गतिं गच्छति [illegible]
[illegible]
[illegible] ३८ ॥

अत्रविकल्पांतरमाह ॥

लासिकी [illegible]टीका

कच्चिदिति साभिलाषप्रश्ने हे महाबाहो उभयस्मात्संसारमार्गाद्विभ्रष्ट
स्तुतः अनासक्ततया वासनानाशनात् ज्ञानमार्गाच्चच्युतो धारान
पिरोहात् कच्चिदपि नाशमनन्वावति आत्यंतिकमभावं प्राप्नोति यतः सं
साराणामसक्ततया प्रतिष्ठो निरालंबः तथान्निकपार्थिकसुखलाभः प
वित्तानमार्गे विमूढो न सुखप्रवृद्धः तथा पूर्वस्मान्मेघाच्छिन्न उत्तरं मे

सवतो

वंचाशमो मेघवंद्वेन नश्यति तद्वत् तमेवं भगवानिताद्दशं संदेहनिवर्त
कोनान्य इत्याह ३८ ॥

पंचोलीटीका

प्रश्नाभिप्रायं विवृणोति कच्चिदिति द्वाभ्यां कच्चिदिति कोमलप्रश्ने हेकृ
लब्रह्मणःपथि प्राप्तिमार्गे विमूढः अप्रतिष्ठो निराश्रयः उभयविभ्रष्टः
कर्ममार्गात् ज्ञानमार्गाच्च उभयतो नष्टः छिन्नाभ्रमिव नश्यति ३८

भगवीरमसिद्धोथिनी ॥

तदेव स्फुटयति कच्चिन्नेति कच्चिदिप्रभीष्टप्रश्ने प्रस्तावेव योगी उभ
यस्माल्लोकाद्विभ्रष्टः अप्रतिष्ठो निरवलंबनः वैराग्याभ्यासाव
लंबन हृदयहीनत्वात् अत एव ब्रह्मणः पथि यत्र वेदमार्गे विमूढो
मोहं प्राप्तः छिन्नाभ्रमिव पवनविशीर्णो मेघ इव कच्चिन्न नश्यति
कर्मफलं ज्ञानफलं च लब्धुमयोग्यो न किमिति अयं भावः यथा
पवनविशीर्णो मेघः पूर्वस्मान्मेघाद्भ्रष्ट उत्तरमेघं चाप्राप्तो तएव
वृष्टययोग्यः सन्नंतरालएव नश्यति तथा योगभ्रष्टोपि पूर्वस्मा
त्स्वकीयाद्गृहादेर्विच्छिन्न उत्तरेण च परकीयेनालब्धसंयोगोम
ध्यएव च विप्लवीभूय पलायमानः सन शत्रुभिर्हन्यते इति
पापसंबंधान्न किं दुर्गतिं योनिं गच्छतीति साधकस्य प्रश्नः ३८ ॥

मधुभाष्य

३८॥

भाषा अनुवाद

पूर्वोक्त प्रश्न की अभिप्राय विस्तार से अर्जुन कहते हैं कि न तो निष्काम कर्म्म करि ईश्वर को समर्पण किया और न काम्यकर्म्म ही का अनुष्ठान किया तो स्वर्गादि फलसे भी रहित रहा और योग की असम्भवता कहे अप्रवीणता से मोक्ष भी न मिली तो फेरि हे महाबाहो वह अप्रतिष्ठित कहे प्रतिष्ठा रहित मनुष्य दोनो ओर से भ्रष्ट होय छिन्न मेघ के सँन का नष्ट तो नहीं। मा होता है जैसे मेघदल से भिन्न भया मेघ और मेघ को न प्राप्त होयके अन्तरिक्ष ही मे विलाय जाय है ३८

दोहा

कोन भ्रष्ट दोउ लोक सें ज्यों मेघ छिन्न होय नाश ब्रह्मपथमें
आलंब विन मूढ़ जो विश्वनिवास ३८॥

179

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ३९ ॥

शांकरभाष्यं

एतदिति एतन्मे मम संशयं कृष्ण छेत्तुमपनेतुमर्हसि अशेषतः त्वदन्यः त्वत्तोऽन्यः ऋषिर्देवो वा छेत्ता नाशयिता संशयस्यास्य नहि यस्मादुपपद्यते न सम्भवति अतस्त्वमेव छेत्तुमर्हसीत्यर्थः ३९ ॥

आनन्दगिरिकृतटीका

यथोपदर्शितसंशयापाकरणार्थमर्जुनो भगवन्तं प्रेरयन्नाह एतदिति मत्तोन्यः कश्चिदृषिर्वा देवो वा त्वदीयं संशयं छेत्स्यतीत्याशंक्याह त्वदन्य इति अन्यस्य संशयच्छेत्तृत्वाभावे फलितमाह अत इति ३९ ॥

स्वामिकृतटीका

त्वयैव सर्वज्ञेन अयं मम संदेहो निरसनीयः त्वत्तोऽन्यस्तु संदेहनिवर्तको नास्तीत्याह एतन्मे इति एतदेन छेत्ता निवर्तकः स्पष्टमन्यत् ३९ ॥

पिशाचभाष्यं

एतन्मे संशयं कृष्ण छेत्तुमर्हसि अशेषतस्त्वदन्यस्त्वत्तोऽन्यः ऋषिर्वा देवो वा छेत्ता नाशयिता संशयस्यास्य नहि यस्मादुपपद्यते नास्तीत्यर्थः ३९

रामानुजभाष्यं

तमेनं संशयमशेषतश्छेत्तुमर्हसि यस्मात्त्वमेव सर्वं सदा स्वत एव पश्यतस्त्वत्तः संशयस्यास्य छेत्ता न ह्युपपद्यते ३९ ॥

अभिनवगुप्तकृतटीका [illegible] ३९ स्पष्टोऽर्थः

एतदेव मे संशयं छेत्तुं भो कृष्ण ॥ परमार्थदर्शी।
त्वमेवार्हसीति प्रश्नः शेषं स्पष्टं ३९ ॥ ३९ ॥ ३९

वनमालीटीका

एतद्रूपं तं सर्वोक्तं मे मम संशयमशेषतः संशयमूलाधर्मानुच्छेदेन त्वदन्यस्त्वत्तः सर्वज्ञाच्छास्त्रकृतः परमात्मनोऽनिकालिकाद्योऽन्यो ऋषिर्जीवैश्छेत्ता सम्यग्ज्ञानदाने न नाशयिता हि यतो नोपपद्यते संभवति तस्मात्त्वमेव सर्वप्रत्यक्षदर्शी सर्वस्य परमगुरुरेतं संशयं

गी॰ टी॰ अ॰

छेत्तुमर्हसीशेषतः ३९ ॥

रामानुजीटीका

एतदिति हे कृष्ण मे मम एतं त्वमेव त्वमात्रमेतं संशयं संदेहं अशेषतो
निःशेषात् छेत्तुं नाशितुं त्वमर्हसि योग्यो भवसि त्वत्तु मत्तः दृशा वर
वः संशयच्छेत्ता रोजगति संनिहितः त्वमेवैकोऽस्य छेत्ता कथं भवामी
ति चेत्तत्राह त्वदन्य इति हि शब्दोऽस्य योगभ्रष्टस्य च्छेदायकोऽवधारणाय
रः कृष्ण एव वा मद्देवो नास्तीति वत् अस्येव मत्कृतस्य संशयस्य छेत्ता
नाशकः त्वदन्यस्त्वत्तः सर्वज्ञात् सर्वेश्वरात् योगीश्वरात् पृथग्जनादन्योऽस
तोऽनीश्वरो ब्रह्मादिरीश्वरोऽपि नैवोपपद्यते नैव योग्यो भवति तस्मा
त्वमेव मम संशयमपनेतुमर्हसि ३९ ॥

एतदेवं पूर्वापदर्शितं मे मम संशयं **मधुसूदनीटीका** हे कृष्ण छेत्तुमपनेतुमर्हसि अ

शेषतः संशयमूलाधर्माच्छेदेत्तम् त्वदन्यः कश्चित् ऋषिर्वा देवो वा त्वदीयमि
मं संशयं छेत्ता सत्यनिमित्तः शोकाह त्वदन्यः त्वत्परमेश्वरात् सर्वज्ञा
च्छास्त्रकृतः परमगुरोः कारुणिकादन्यः अन्यः परत्वेनासर्वज्ञः क
श्चिदृषिर्वा देवो वास्य योगभ्रष्टपरलोकगतिविषयस्य संशयस्य
छेत्ता सम्यग्ज्ञानदानेन नाशयिता हि यस्मान्नोपपद्यते न संभवति
तस्मात्त्वमेव प्रत्यक्षदर्शी सर्वस्य परमगुरुः संशयमेतं मम छेत्तुम
र्हसीत्यर्थः ३९

श्रीधरीटीका

तदेतं संशयं सर्वं छेत्तुं योग्यस्त्वमेवेत्याह एतन्म इति त्वदन्यः कश्चिद्
देवो मुनिर्वा सम्यग्ज्ञानदानेन संशयस्यास्य सर्वतः छेत्ता संभव
तीत्यस्मात् सर्वज्ञस्त्वं जगद्गुरुः प्रत्यक्षदर्शी सर्वस्य संशयं छेत्तुमर्हसि ३३९

नीलकंठीटीका

एतत् एते स्पष्टमस्यत् ३९ ॥

ज्ञानेंद्रीटीका

ततस्संसारसर्वोपगतिवेदिनोन्यो द्वितीयः संशयस्यास्य छेत्ता न संभा
व्यते इत्यर्थः ३९ ॥

रामकंठीटीका

नत्वेवं विधस्य श्रद्धामात्रैकालंबनस्य परिशिष्टापायरहितस्य देहाद्यूर्ध्वं कीदृशी योन्यंतरेगमनं तद्देवेत्यह
कच्चिदित्यभीष्टप्रश्नोपिनामैव श्रद्धावानः पुरुषः स्वर्गापवर्गगतिद्वयस्मा
द्विभ्रंशादभावादेकतरगतिप्रत्याशासंभवे किच्छिन्नाभ्रमिव पवनविशी
र्णो जलदो यथा नश्यति तद्वत् पुनरुत्थानमप्राप्यते उक्तगतिद्वयोपा
यतिस्थयाभावादप्रतिष्ठो निरवलंबनः संकुत्यंतिकमेव विनाशमाप्नो
ति अथ पुनरुत्थानायैव संसारस्य प्रेपततीत्येतमेवं विधं संदेहं मम विनाश
यितुमर्हसि यतस्त्वत्तः सर्वसंसारिगतिवेदिनः सर्वज्ञादन्यो यथोक्तसंश
यस्य परिहर्त्ता न संभाव्यते यत उक्तं बहूनि मे व्यतीतानीत्यत्र श्लोके सर्वज्ञ
त्वं नानागतिवेदित्वं [illegible]

लासिकी [illegible]टीका

ततः सर्वसंसारिगतिवेदिनः सर्वज्ञात्त्वत्तोस्य संशयस्य छेत्ता निवर्तको
नोपपद्यते न संभाव्यते यदुक्तं उत्पत्तिं च विनाशं च भूतानामागतिं गतिं
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति [illegible]

पंचोलीटीका

एतदिति हे कृष्ण मे मम एतत् एवं प्रश्नानुसारेण संशयं योगभ्रष्टस्य
नाशानाशलक्षणं संदेहमशेषतः सर्वप्रकारेण छेत्तुमर्हसि अस्य सं
शयस्य हि यस्मात् त्वदन्यः छेत्ता नोपपद्यते ३९ ॥

रणवीरसमिद्धोधिनी ॥

असंभाव्य विच्छित्तये सर्वज्ञं भगवंतमर्थयते एतदिति स्प
ष्टमेतत् ॥ ३९ ॥

भाषा अनुवाद

जिस से आप सर्वज्ञ हो इस से आप को छोड़ और कोई इस।
हमारी संशय का हर करने वाला नहीं है अर्जुन यह कहते।
हैं कि हे कृष्ण मेरी इस सन्देह को आप ही छेदन करने यो
ग्य हो और आपके विना दूसरा इसँदेह का निवृत्ति कर्त्ता न स
ही है सो इस सन्देह को कृपाकर मेरे मन से हर करो ३९

दोहा

मम सभ संशय छेद अरह तुमहि कृष्ण है योग और न संशय।
छेद को तुमसें दूसर अह लोग ३९॥

श्रीभगवानुवाच पार्थनैवेहनामुत्रविनाशस्तस्य
विद्यते नहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति ४०

शांकरभाष्यं

पार्थेति हेपार्थ नैवइह लोके नामुत्र परस्मिन् वा लोके विनाशस्त
स्य विद्यते नास्तिनाशो नामपूर्वस्माद्धीनजन्मप्राप्तिः सनयोगभ्रष्ट
स्य नास्ति नहि यस्मात् कारणात् कल्याणकृत् शुभकृत् कश्चिद्दुर्गतिं
कुत्सितां गतिं हेतात तनोत्यात्मानं पुत्ररूपेणेति पितातात उच्यते।
पितैवपुत्रइति पुत्रोपि तातउच्यते शिष्योपिपुत्रउच्यते यतोनग
च्छति ४०॥

आनन्दगिरिकृतटीका

योगिनोनाशशङ्कां परिहरन्नुत्तरमाह भगवानिति यदुक्तमुभयभ्रष्टो
योगीनश्यतीति तत्राह पार्थेति तत्रहेतुमाह नहीति योगिनोमार्गद्वया
दपिभ्रष्टस्यैहिकोनाशः शिष्टगर्हालक्षणोनभवतीति श्रद्धादेः सद्भावात्
तथापि कथमामुष्मिकनाशस्याभावमित्याशंक्य तद्रूपनिरूपणपूर्वकं तद
भावं प्रतिजानीते नाशोनामेति तत्रहेतुभागं विभजते नहीत्यादिना उ
भयभ्रष्टस्यापि श्रद्धेन्द्रियसंयमादेः सात्त्विकत्वश्रवणादेश्च भावादुपप
न्नं शुभकृत्त्वं तातेति कथं पुत्रस्थानीयः शिष्यः सम्बोध्यते पितुरेव ता
तशब्दत्वादित्याशंक्याह तनोतीति तेनपुत्रस्थानीयस्य शिष्यस्य तातेति
सम्बोधनमविरुद्धमित्यर्थः नगच्छति कुत्सितां गतिं कल्याणकरत्वा
दिति नाशाभावः ४०॥

स्वामिकृतटीका

अत्रोत्तरंश्रीभगवानुवाच पार्थेतिसार्धैस्त्रिभिः इहलोकेनाशउभय
भ्रष्टत्वात्पातित्यं अमुत्रपरलोकेनाशोनरकप्राप्तिः तदुभयंतस्यनास्त्येव
यतःकल्याणकृत् शुभकारीकश्चिदपिदुर्गतिंनगच्छति अयंचशुभ
कारीश्रद्धयायोगेप्रवृत्तत्वात् तातेति लोकरीत्योपलालयन्संबोधयति ४०

पिशाचभाष्यं

श्रीभगवानुवाच पार्थनैवेहलोकेनामुत्रपरस्मिंल्लोकेवाविनाशस्तस्य
विद्यतेनास्तिनाशोनामपूर्वस्माद्धीनजन्मप्राप्तिःसयोगभ्रष्टस्यनास्तिनहि

गी॰
टी॰
ष॰

यस्मात्कल्याणकृत् शुभकृत् कश्चिद्दुर्गतिं कुत्सितां गतिं हे तात तनोत्या त्मानं पुत्ररूपेणेति पिता तात उच्यते पितैव पुत्ररूपेणेति पुत्रोऽपि तात उच्यते गच्छ ति ४० ॥ (यतो न)

रामानुजभाष्यं

श्रद्धया योगे प्रक्रान्तस्य तस्मात् प्रच्युतस्येह वामुत्र च विनाशो न विद्यते प्राकृ तस्वर्गादिभोगे ब्रह्मानुभवे चाभिलषितानवाप्तिरूपप्रत्यवायाख्यो निष्ठ वाप्तिरूप विनाशो न विद्यत इत्यर्थः न हि निरतिशयकल्याणरूपयोगार म्भी कश्चित्कालत्रयेऽपि दुर्गतिं गच्छति ४० ॥

अभिनवगुप्तकृतटी॰

अत्र निर्णयं पार्थ नैवेत्यादिना न तस्य योगभ्रष्टस्येह लोके परत्र वा नाशोऽस्ति अनश्वरत्वादिति भावः किमिति तस्य लोकद्वया विनाशिनः स हि कल्याणं भगवन्मार्गलक्षणं कृतवान् न चा ग्निष्टोमादिवत्क्षयि ४० ॥ ४० ॥

परमार्थप्रपाटीका

अथोत्तरं भगवानाह पार्थेति तस्य पुरुषस्य इहामुत्र वा नाशो नास्ति इ ह लोकेऽधमयोनिप्राप्तिर्नाशः अमुत्र च निरयप्राप्तिर्नाशः एवमुभयत्र नाशो नास्ति कुतः भोक्ता तनोत्यात्मानं पुत्ररूपेणेति तातः पुत्रः एवमर्जु नस्य परमप्रेमास्पदत्वात्तातेति संबुद्धिः हि यस्मात्कारणात्कल्याणकृ त् सर्वमीश्वरार्पणतया कर्म कुर्वन् कश्चिदपि दुर्गतिं न गच्छति ४० ॥

वनमालीटीका

उभयविभ्रष्टो योगी नश्यतीति कोऽर्थः किमिह लोके निन्दितो भवति स्वक र्मत्यागात् किं वा परत्र निकृष्टां गतिं प्राप्नोतीति तदुभयमपि नेत्याह हे पार्थ तस्योभयत्र विनाशो निन्दा निकृष्टप्राप्तिरूपो न विद्यते हि यतः कल्याणकृ त् शास्त्रविहितकारी कश्चिदपि दुर्गतिमिह अकीर्तिं परत्र कीटादिरूपतां न गच्छति अयं तज्जातजिज्ञासुः श्रवणाद्यनुष्ठाता सर्वो न कश्चिदपि दुर्गति न गच्छतीति किमु तत्र वक्तव्यं पक्वं योगभ्रष्टः कष्टां गतिं गच्छति देवयानाद्य संबन्धित्वेन सन्त्यक्ततात्पर्य मेघवदिति तदपेक्ष्य देवयानाद्यसंबन्धित्वे हेतो

रसिद्धेः यत्रस्थो वितुर्यैवामीश्वरणेषु श्रद्धामसम्पूर्णास्तनेनेष्वर्विरभि
संभवतीति पंचाग्निविद्यायां पंचाग्निविदामिवाकृतनोश्रद्धास्त।
स्ववतोमुमुक्षूणामपि देवयानेन ब्रह्मलोकप्राप्तिकथनात् वृष्टवणा
दिपरायणास्व श्रद्धाविनो भूतत्वेन श्रद्धायाः प्राप्तत्वात् शोनेर्दानत्र
मादिनो दानभाषणरूपत्वाद्विः यत्र स्यासमस्य प्राप्तत्वात् बहिरिन्द्रियाणां बु
द्धेरखिलव्यापारनिरोधरूपस्य योगाङ्गत्वेन यमनियमादेः प्राप्त
त्वात् अतत्कृतत्वेऽपि ब्रह्मलोकप्राप्तिसंभवात् संन्यासाद्ब्रह्मणः।
स्थानमिति स्मृतेः ४० ॥

उत्तमवैजयन्तीटीका

इत्येवमर्जुनस्याशंकां निशम्यास्य संशयमपनुदन् सर्वेश्वरः पार्थस
खः श्रीभगवांस्तमुवाच पार्थेति हे पार्थ श्रद्धयापेतः श्रद्धाप्र
कस्य योगाच्चलितमानसस्य योगिनः इहास्मिन् देवमनुष्यादिप्राक्क
तिके लोके विनाशः स्वर्गादिलोकसंबन्धिसुखभोगभ्रंशरूपो न।
विद्यते न भवति किं तत्र तत्र खभोगाभावमेव श्रेयो वामुत्र स्वपरस्वरू।
पानुभवे विनाशस्तत्वदनुभवजनितसुखभ्रंशरूपो न विद्यते न भव
ति किं तत्र तत्स्वरूपभवत्येवमेव कुतो भवतीत्यपेक्षायामाह नही
ति हे तात पुत्ररूपेणात्मानं तनोतीति तातः पितातस्यातिवात्सल्यव
न संबोधनं हे तात पुत्र शिष्य यो रत्नं तत्कारणं वा तस्येन वतातेति
सम्बोधनं वक्तुमासङ्गतमित्यर्थः हि यस्मात्कल्याणकृत् कल्याणमो
त्साधनभूतं योगं करोतीति स तथा स संसारबन्धमुक्तये स्वधर्माच।
रणपूर्वकं कर्मयोगानुष्ठाने तत्परः ईदृशः कश्चिदपि ब्राह्मणादिस्त्रु
द्रान्तो मानवः कोऽपि दुर्गतिं तत्तद्भयप्राप्तरूपां दृष्टिदृष्टां तत्तद्भयप्र
युक्तिजनितदोषाक्रान्तिरयं वा नैव गच्छति नैव प्राप्नोति ४० ॥

एवमर्जुनस्य योगिनं प्रति नाशशंकापरिहारमुत्तरं ॥

मधुसूदनीटीका

उभयविभ्रष्टो योगी नश्यतीति कोऽर्थः किमिह लोके शिष्टगर्हणी
यो भवति वेदविहितकर्मत्यागात् यथा कश्चिदुच्छृंखलः किं वा प
रत्र निकृष्टां गतिं प्राप्नोति यथोक्तं श्रुत्या अथैतयोः पथोर्न कतरे
णचन ते कीटाः पतङ्गा यदिदं दन्दशूकमिति तथा चोक्तं मनुना वान्ताश्य

४८

न१

धं

कृपणोऽप्यसौ यस्य ब्रह्मविचारेणोऽत्ममपि स्थैमनः प्राप्नुयादि
ति ४० [illegible]
[illegible] ४० ॥

सदानंदीटीका

अर्जुनस्यैवमाशंकां निराकुर्वन्नुवाच ह श्रीमन्नारायणः कृष्णः
शरणागतवत्सलः सुमतोऽत्र वेदांतश्रवणादि प्रकुर्वतः वि
नश्यति निरोधेऽपि ब्रह्मस्य विरागिणः २ अंतराले मृतस्यापि वि
नाशो नोभयत्रैव नेह शिष्टविनिंदास्य यथा शास्त्रं प्रकुर्वतः ३
नाति दुर्गतिमाप्नोति परत्राप्यात्मजेत्ववत् यस्मात्कल्याणकृत्
कश्चित् शुभकृद्दुर्गतिं गतिं ४ स्वर्गकीर्तिं परत्रापि कुत्सितां नै
व गच्छति अथ तः सर्वतः श्रेष्ठः कथं गच्छेद्दुर्गतिं शीघ्रमस्य पुत्र
रूपेण कृपयाऽवतस्थवान् नानेति पदतः साक्षाद्धरिणा कृतमर्
जुने ५ ४० ॥

नीलकंठीटीका

अत्रोत्तरं भगवानुवाच पार्थेति हे तातेति वात्सल्यात्संबोधय
ति तस्य इह विनाशो नीचयोनिप्राप्तिः अमुत्र विनाशो नरकप्रा
प्तिस्तदुभयमपि न जायते हि यतः कल्याणकृत् शुभकृत् दुर्ग
तिं नैव प्राप्नोति ४० ॥

आनंदीटीका

एतत्संशयं छेत्तुं भगवानुवाच ॥ तस्य भोगापवर्गबीजभूतश्रद्धा
युक्तचेतसः इहामुत्र विनाशो नास्ति हि यस्मात्कल्याणकृत् कल्याण
मीश्वरार्पणबुद्ध्या कृतं कर्म तत्कारी कश्चन शुभकृद्दुर्गतिं न गच्छति ३ ४०
[illegible]
[illegible] ॥

रामकंठीटीका

अथैवंविधसंशयच्छेदाय भगवानुवाच ॥
तस्यैवंविधस्य भोगापवर्गलक्षणसिद्धिबीजभूतश्रद्धागुणसंयुक्त
तविन्नस्य पुंसः क्वचिदपि विषये विनाशः सर्वदुर्गतिहेतुत्वेनांशल
क्षणास्तिरोभावो न विद्यते कुतो विपरीतहामत्रवा इहेति दृष्टानुश्र

गी॰
टी॰ ६

विकभोगाधिकरणेसंसारे अमुत्रेत्यत्रतस्मादन्यत्रस्वात्मप्रतिशरीरे
नापवर्गे यतःकल्याणवान् कुशलाभिनिवेशीकश्चिद्दुर्गतिमज्ञा
नहृषितत्वाद्दुष्टांयोनिंप्राप्नोति अहोवतअकल्याणकारित्वमवश्य
मेवस्थितम् अहोहितानामपरमेश्वरप्रसादकल्पद्रुमस्यबीजकणिका
तेभोगापवर्गलक्षणासंपत्तिसमृद्धिमहत्त्वानातिवर्तते केवलंमृदु
मध्याधिमात्रत्वादितारतम्यात्फलविशेषायैतिणीस्वकार्यंनिवर्त
यति ॥

लासिकी ... टीका

अथोत्तरंश्रीभगवानुवाच ॥

हेपार्थइहलोकेसंसारे परत्रलोकेस्वर्गादौवा नतस्ययोगभ्र
ष्टस्य संसारानासक्तस्याविरक्तत्वात्सकामस्ययोविनाशःस्यात्इतिको
भावः प्रकृतिलयइतियावत् तदुक्तं वैराग्यात्प्रकृतिलयइति
सनविद्यतेइत्यनेनतिमप्रश्नस्योत्तरमभावव्याहृत्यर्थंपूर्वमेवोक्तं ननु
मास्त्वभावःस्वर्गातिदुर्गत्योरन्यतमागतिःस्यादेवेत्यतआह नही
तिहिरवधारणे तातेतिलोकरीत्योपलयन्संबोधयति कश्चिदपि
शुभकारी दुर्गतिंपूर्वस्माद्धीनजन्मप्राप्तिंदेहपातादूर्ध्वंनैवप्राप्नोति
अयंचशुभकारीश्रद्धयायोगेप्रवृत्तत्वात् तदुक्तंकुलार्णवे ध्याय
तःक्षणमात्रंवाश्रद्धयापरमेश्वरः यद्भवेत्सुमहत्पुण्यंनस्यांतोनैव
गण्यते लागंब्रह्माहमस्मीतियःकुर्यादात्मचिंतनम् तत्सर्वपात
कंहन्यात्तमःसूर्योदयेयथा ब्रह्मकृच्छ्रतपस्तीर्थदानादेवार्चनादि
षु यत्फलंकोटिगणितंतत्स्यान्मोनितत्त्वविदिति तथाचस्मृतिः
स्नातंतेनसमस्ततीर्थसलिलेसर्वापिदत्तावनिर्यज्ञानांचकृतंसह ॱतेन
स्रमाविलादेवाश्चसंपूजिताः संसाराच्चसमुद्धृताःस्वपितरस्त्रैलोक
पूज्योप्यसौयस्यब्रह्मविचारणेक्षणमपिस्थैर्यंमनोगच्छतीति ४०

॥

पंचोलीटीका

प्रश्नोत्तरमाह भगवान्पार्थेति चतुर्भिः हेपार्थतस्ययोगभ्रष्टस्येह
लोकेपरलोकेवाविनाशः सर्वस्मात्हीनजन्मप्राप्तिर्नविद्यतेतत्संभव
तिहियस्माद्धेतोः हेतातकश्चित्कल्याणकृत्दुर्गतिंकुत्सितांगतिंनग
च्छति ४०॥

रमावीरसमिद्धोधिनी॥

अथैवंविधसंशयव्युदासाय भगवानुवाच पार्थेति तस्यश्रद्धाव
त्वेनैवयोगेप्रवृत्तस्येहलोकेविनाशः सुखभोगप्रतियोगिका·
भावोनास्ति तथामुत्रपरलोकेपिनास्ति हियतः कल्याणकृत्
कल्याणायकरोतीतिकल्याणोद्देशेनकर्मसुप्रवृत्तः कश्चिद्दुर्ग
तिं नरकादियोनिंनगच्छति तातेतिसंबोधनेनानुकंप्यत्वंद्योत्य
ते ४०॥

मधुभाष्य

४०॥

भाषा अनुवाद

अर्जुन की इस प्रश्न का उत्तर श्रीभगवान साढ़े चारि स्लोक से।
कहते है कि हे पार्थ उस अधूरे योगाभ्यासी को योगभ्रष्ट होने
से यह लोक नाश करे इस लोकमे पातक और परलोक मे न
रक प्राप्ति ये दोनो नही होय हैं जिस हेतु किसी कल्याण कृत
करे शुभ आचरण करनेवाला पुरुष तात करे हे भाई अर्जुन
दुर्गतिको नही प्राप्त होता है तात शब्द से लोक रीति देखावते
भये भगवान ने स्नेह पूर्वक अर्जुन को सम्बोधन करि कहा है
तात का अर्थ पिता औ पुत्र है ४०

दोहा

नाति हनासें लोक अरु परलोकन पार्थनशाय कोउनहिसु
कृत करतासें तात दुर्गति जाय ८०॥

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः शु
चीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ४१॥

शांकरभाष्यं

किन्त्वस्य भवति प्राप्येति योगमार्गे प्रवृत्तः संन्यासी सामर्थ्यात्
प्राप्य गत्वा पुण्यकृतामश्वमेधादियाजिनां लोकांस्तत्र च उषित्वा वास
मनुभूय शाश्वतीर्नित्याः समाः संवत्सरान् तद्भोगक्षये शुचीनां।
यथोक्तकारिणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्टोऽभिजायते ४१

आनन्दगिरिकृतटीका

योगभ्रष्टस्य लोकद्वयेपि नाशाभावे किंभवतीति पृच्छति किंत्विति
तत्र श्लोकेनोत्तरमाह प्राप्येति कथं संन्यासीति विशेष्यते तत्राह।
सामर्थ्यादिति कर्मिणो आरुरुक्षकर्मिणो योगमार्गप्रवृत्तस्य पुण्य
तिस्वहत्वावपि फलाभिलाषविकलस्येश्वरे समर्पितसर्वकर्मणः
स्तद्भ्रंशाशंकानवकाशादित्यर्थः समानां नित्यत्वं मानुषसमावि
लक्षणत्वं वैराग्याभावविवक्षया विभूतिमतां गृहे जन्मेति विशिष्यते ४१

स्वामिकृतटीका

तर्हि किमसौ प्राप्नोतीत्यपेक्षायामाह प्राप्येति पुण्यकारिणामश्व
मेधादियाजिनां लोकान्प्राप्य तत्र शाश्वतीः समाः बहून्संवत्सरानुषि
त्वा सुखमनुभूय तद्भोगानन्तरं शुचीनां श्रीमतां सदाचाराणां धनि
नां गेहे स योगभ्रष्टोऽभिजायते जन्म प्राप्नोति ४१॥

पैशाचभाष्यं

किं तस्य भवति प्राप्येति योगमार्गे प्रवृत्तः संन्यासी सामर्थ्यात्प्राप्य ग
त्वा पुण्यकृतामश्वमेधादियाजिनां लोकांस्तत्रोषित्वा वासमनुभू
य शाश्वतीर्नित्याः समाः संवत्सरांस्तद्भोगक्षये शुचीनां यथोक्तका
रिणां श्रीमतां गेहे विभूतिमतां गृहे योगभ्रष्टोऽभिजायते ४१॥

रामानुजभाष्यं

कथमयं भविष्यतीत्यत्राह [illegible] यज्जातीयभोगकाम
या योगात्प्रच्युतोऽयमसौ पुण्यवतां लोकान् प्राप्य तज्जातीयानतिक
ल्याणभोगान् तावद्योगमाहात्म्यादेव भुञ्जानो यावत्तद्भोगतृष्णाव
सानं शाश्वतीः समास्तत्रोषित्वा तस्मिन्भोगे वितृष्णः शुचीनां श्रीमतां

गी॰ योगैर्पक्रमयोग्यानां कुले योगोपक्रमे भ्रष्टो योगमाहात्म्याज्जायते ४१

टी॰ शिवजीशिवर्षाणि शुचीनामिति येषां भगवदंशस्पर्शिचित्तम् ४१ श्रभिनवगुप्तकृतटीका समाप्तं ४१ प्राप्यतस्य विहाः समाः वैष्णवा

भा॰

परमार्थप्रपाटीका

किं तर्हि तत्र प्रथममल्पकालयोगभ्रष्टस्य गतिमाह प्राप्येति ॥ स योगभ्रष्टः पुण्यकृतामश्वमेधयाजिनां लोकान् प्राप्य तत्र शाश्वतीः समाः बहून् संवत्सरानुषित्वा शुचीनां सदाचारपरायणानां श्रीमतां धनिनां गेहे जायते उत्पद्यते ४१ ॥

वनमालीटीका

नदेवं योगभ्रष्टस्य तिरोभूतां तिन्निवार्य प्राप्यमाह प्राप्येति योगभ्रष्टः कश्चित् पूर्वोपचितयोगवासनाप्राबल्याद्विषयेभ्यः स्पृहयति कश्चित्तु वैराग्यभावनादार्ढ्यान्न स्पृहयति तयोराद्यः पुण्यकृतामश्वमेधादिकृतां मरिचिपूर्वकं ब्रह्मलोकादीन् प्राप्य तत्रोषित्वा शाश्वतीः समाः ब्रह्मपरिमाणेनैतयाः संवत्सरान् तदन्ते शुचीनां श्रीमतां गेहे योगवासनाशेषसद्भावात् जनकादिवद्योगभ्रष्टोऽभिजायते योगवासनाप्राबल्यात् ब्रह्मलोकान्ते सर्वैकर्मसंन्यासाद्योगपरो महाराज स्वकवर्ती भवतीत्यर्थः ४१ ॥

कृष्णमैवेजयन्ती

ननु यद्येवं भवति तर्हि सकिं फलं प्राप्नोतीत्यपेक्षायामैहिकं सर्वभोगात्मकं फलमाह प्राप्येति स योगभ्रष्टो यादृशानां देवमनुष्यादिसंवन्धिलोकानां विषयभोगवाञ्छया योगाद्भ्रष्टस्तेनैव योगी पुण्यकृतान् पुण्येनाश्वमेधादिमहायज्ञेन कृतां संपादितानां लोकान्स्वर्गादीन् तादृशानवाप्यान्नमदेवादिजन्मावाप्य तत्रानेकसहस्ररूपविषयभोगानुपभुञ्जानः सन् तन्मद्योगेन निहतवासनः सन् शाश्वतीः समाः अनेकसंवत्सराननुषित्वा वासं कृत्वा शुचीनां सदाचारपरायणानां निजनित्यनैमित्तिककर्मणा विधूतपापानां शास्त्रविचारकुशलानां तत्रापि श्रीमतां श्रेष्ठधनधान्यमदारपुत्रस्वरूपबलगुणादिसम्पन्नानां तद्दरिद्राणां गेहे लक्ष्मीसरस्वतीक्रीडास्थले गेहेऽभिजायते उत्पन्नो भवतीत्यस्मात्कयोगाद्भ्रष्टस्य योगिनो गतिरियं दर्शिता स्वल्पकयोगाद्भ्रष्टस्यानेनैव फलं भवतीत्याशयः ४१

तदेवं योगभ्रष्टस्य शुभकृत्त्वेन **मधुसूदनी टीका** लोकद्वयेपि नाशाभावे किं भवतीत्युच्यते ॥

योगमार्गे प्रवृत्तः सर्वकर्मसंन्यासी वेदान्तश्रवणादि कुर्वन्नन्तराले म्रि
यमाणः कश्चित् पूर्वोपचितभोगवासनाप्रादुर्भावाद्विषयेभ्यः स्पृ
हयति कश्चित्तु वैराग्यभावनादार्ढ्यान्न स्पृहयति तयोः प्रथमः प्राप्य पु
म५ ण्यकृतामश्वमेधयाजिनां लोकानर्चिरादिमार्गेण ब्रह्मलोकान् एकस्मि
न्नपि ब्रह्मलोके भोगभूमिभेदात् बहुवचनं तत्रोषित्वा वासमनु
भूय शाश्वतीः ब्रह्मपरिमाणेनाक्षयाः समाः संवत्सरान् तदन्ते शु
चीनां शुद्धानां श्रीमतां विभूतिमतां महाराजचक्रवर्तिनां गेहे कुले भो
गवासनाशेषसद्भावाज्जनकादिवद्योगभ्रष्टोऽभिजायते
भोगवासनाप्राबल्याद्ब्रह्मलोकान्ते सर्वकर्मसंन्यासायोग्यो महाराजो भ
वतीत्यर्थः [illegible] ४१ ॥

सदानंदी टीका

योगमार्गे प्रवृत्तः समीं अन्तराले मृतो द्विधे स गत्वा तावत् लोकानश्व
मेधादियाजिनां २ कोटीः संवत्सराणां उषित्वा वासं कृत्वा ततः तये यथो
क्तकारिणां गेहे यतिनां गेहे पतेः सतां २ वासनाशेषसद्भावात् स्ववैराग्य
वासनादि जनकादिवदेवासौ राज्ञां गेहे भिजायते ६ ४१ ॥

नीलकंठी टीका

इहामुत्र च नाशाभावमहत्त्वमेवास्त्रीमाह प्राप्येति उषित्वा वासं कृत्वा शा
श्वतीः समाः नित्या नु वत्सरान् योगभ्रष्टो रागी चेत् अल्पकालाभ्यस्तयो
गश्चेत् श्रीमतां गेहे जायते तत्रापि श्रीमान् योगं त्यजतीत्याशंक्याशुची
नामित्युक्तं शुचयो हि सत्कार्येष्वेव श्रियमुपयुंजानाः स्वकीयेन तथा मह
तं स्थानमासादयंतीत्यर्थः ४१ ॥

आनंदी टीका [illegible] ४१ स्पृहार्थमू
मदर्थं कृतस्य कर्मणो तयत्वात्केवलमदृष्टमध्याधिमात्रतादितारतम्यात्कालविशेषापेक्षेति दर्शय
ति ॥ ४१ ॥

यत एव मतः ॥ **रामकंठी टीका**

योगभ्रष्टो योगाय यथोक्तज्ञाननिष्ठतया शास्त्रविहितस्वकर्मानुष्ठानलक्षणा

गी॰
टी॰ष॰

त्समाद्योगभ्रष्टः परमेश्वरसमापत्तिलक्षणं फलमप्राप्यैव विच्छिन्नस्सन् शु
द्धाभिजनेसत्यपीश्वरेच्छावशादेवमप्रतीतिव्रमवेगाभावादयत्नादिसहकारि
सामग्रीवैकल्याद्विकालान्तरापेक्षिफलः सन् पुण्यकृतामश्वमेधयज्ञदानत
पःप्रभृतिशुभकर्मकारिणां स्वर्गादिलोकान् तत्कर्मार्जितभोगाधिक
रणभूतानि भुवनानि प्राप्यास्थाय तत्र च तत्कर्मानुरूपाः शाश्वतीः समाः
सहस्रसंख्यानि वर्षाण्युषित्वा निवासमनुभूय ततस्तादृशकर्मफलोप
भोगान्ते कर्मभूमावस्मिञ्छुचीनां श्रीमतां शुद्धाभिजनकर्मणां लक्ष्मीवतां कु
लेऽन्वयेऽभिजायते येन भोगाभिवाञ्छा लेशकलुषितचित्तत्वादसम्यगनु
ष्ठिता कर्मयोगाद्भ्रष्टः प्राप्तसत्त्वशुद्धिर्योगान्निर्दिष्टात् यस्त्वपवर्गप्रवणात्व
विरक्तः तस्मिन् तत्र कर्मयोगः सम्यङ्निर्वृत्तस्स इमां गतिमाप्नोती
ति [illegible] ४१ ॥

ल्लासिकी [illegible]टीका

तर्हिं क्व गच्छतीत्यपेक्षायामाह ॥

पुण्यकृतां यज्ञदानतपआदिशुभकारिणां लोकांस्तत्तत्कर्मार्जितभोगा
धिकरणभुवनानि प्राप्य तत्र च शाश्वतीः समाः सहस्रसंख्यान्संवत्सरा
नुषित्वा तन्निवाससुखमनुभूय ततः शुद्धाभिजनकर्मणां श्रीमतां ल
क्ष्मीवतां महाराजचक्रवर्तिनां गेहे अजातशत्रुजनकादिवद्योगभ्रष्टोऽभि
जायते जन्म लभते तदुक्तं योगवासिष्ठे योगभूमितयोत्क्रान्तजीवितस्य
शरीरिणः भूमिकांशानुसारेण क्षीयते पूर्वदुष्कृतम् ततः कतिपयं काले
शेषं दुष्कृतकर्मणाम् भुक्त्वा सुकृतभोगाय याति पुण्यवतां गृहम् योगभू
मिगतायेये म्रियन्ते पुरुषोत्तमाः ते तीर्णदुष्कृता मन्त्रारमन्ते स्वरसत्त्वसंस्थिति ४१

ल्प [illegible]
[illegible] ४१ ॥

पंचोलीटीका

किं तर्हि तस्य भवतीति तदाह प्राप्येति योगभ्रष्टो योगमार्गाच्च्युतः संन्या
सी पुण्यकृतामश्वमेधयाजिनां लोकान्प्राप्य तत्र शाश्वतीः समा दीर्घसंव
त्सरानुषित्वा ततः भोगक्षये शुचीनां पथ्योक्तकारिणां श्रीमतां गेहे अभि
जायते ४१ ॥

तर्हि का गतिस्तस्येत्यर्जुनाभिप्रायमाशंक्याक्रमतउभयलो
कसिद्धिंप्रतिपादयतिप्राप्येति योगाभ्यासविहितस्वकर्मा
नुष्ठानलक्षणाच्चित्तसमाधेर्भ्रष्टोविच्युतःसन् श्रद्धावीजेसत्य
पीश्वरेच्छावशादेवसंप्रतितीव्रतरसंवेगाभावायत्नादिसह
कारिसामग्रीवैकल्यादिकालांतरापेक्षिफलःसन् पुण्यकृ
तामश्वमेधादियज्ञरूपपुण्यकारिणांप्राप्यांल्लोकान्स्वर्गादि
कान्प्राप्य तत्रचशाश्वतीःसमाबहून्वत्सरानुषित्वाभोगाननुभ
भुज्य अनंतरंशुचीनांपवित्राचाराणांश्रीमतांमहासंपत्तिशा
लिनांगेहेसपूर्वोक्तलक्षणोभिजायतेजन्मलभते ४१॥

190

भाषा अनुवाद

तो फेरि वे योगभ्रष्ट लोग किस गति को जाते हैं इस अपेक्षा पर कहते हैं कि जिस स्वर्ग आदि लोक को अश्वमेध आदिक यज्ञ करि के मनुष्य जाते हैं पुण्यकर्मकारी योगभ्रष्ट पुरुष भी उसी उत्तम लोक मे जाय कर बहुत बरस तक तहां बसि सुख भोग करि के फेरि सत्कर्मकारी धनी लोगों के घर मे आय जन्मग्रहण करते हैं ४१

दोहा

होय प्राप्त पुण्यलोक को बहुत वर्ष स्थिति पाय लक्ष्मीयुत
शुचीगेहमह योगभ्रष्टभीजाय ४१॥

अथवायोगिनामेवकुलेभवतिधीमतां एतद्धि
दुर्लभतरंलोकेजन्मयदीदृशं ४२ ॥

शांकरभाष्यं

अथेति अथवा श्रीमतां कुलादन्यस्मिन् योगिनामेवदरिद्राणांकुले
भवति जायते धीमतां बुद्धिमतां एतद्धि जन्मयद्दरिद्राणां योगिनां कु
ले दुर्लभतरं दुःखेनलभ्यतरं पूर्वमपेक्ष्यलोके जन्मयदीदृशं यथोक्त।
विशेषणे कुले यस्मात् ४२ ॥

आनन्दगिरिकृतटीका

अज्ञावैराग्यादिकल्याणाधिक्ये पक्षान्तरमाह अथ वेति योगिनामि
ति कर्मिणां ग्रहणमाभूदिति विशिनष्टि धीमतामिति ब्रह्मविद्या
वतां शुचीनां दरिद्राणां कुलेजन्मदुर्लभं प्रमादकारणाभावादित्याह
एतद्धीति किमपेक्षास्य जन्मनो दुःखलभ्यादपि दुःखलभ्यतरत्वं तदा
ह पूर्वमिति यद्यपि विभूतिमतां शुचीनां गृहे जन्मदुःखलभ्यं तथा
पि तदपेक्षया इदंजन्मदुःखलभ्यतरं यदीदृशं शुचीनांदरिद्राणां वि
द्यावतामिति विशेषणोपेते कुलेलोके जन्मलक्षणमित्यर्थः यद्दु।
र्लभतरं जन्मोक्तं तस्योत्तमत्वे हेत्वन्तरमाह यस्मादिति ४२ ॥

स्वामिकृतटीका

अल्पकालाभ्यस्तयोगभ्रंशे गतिरुक्ता चिरकालाभ्यस्तयोगभ्रंशे
तु पक्षान्तरमाह अथवेति योगनिष्ठानांधीमतांज्ञानिनामेवकुलेजा।
यतेनतुपूर्वोक्तानामनारूढयोगानांकुले यत्तज्जन्मास्तीतिईदृशंहिय
ज्जन्मतल्लोकेदुर्लभतरंमोक्षहेतुत्वात् ४२ ॥

पिशाचभाष्यं

अथवाश्रीमतांकुलादन्यस्मिन्योगिनामेवदरिद्राणांकुलेभवतिजा
यते धीमतामेतद्धिजन्मदरिद्राणांयोगिनांकुलेदुर्लभतरंपूर्वमपेक्ष्य
लोकेजन्मयदीदृशंयथोक्तविशेषणेकुले ४२ ॥ यस्मात्

रामानुजभाष्यं

परिपक्वयोगविचलितस्ययोगिनांधीमतांयोगंकुर्वतांस्वयमेवयोगोप
देष्टॄणांकुलेभवतितदेतदुभयविधंयोगायोग्यानांयोगिनांचकुलेज

गी॰
टी॰
ष॰

न्मप्राकृतानां दुर्लभतरमेतद्योगमहात्म्यकृतं ४२ ॥

अभिनवगुप्तकृतटीका व्याख्यार्थं ४२ यदित्युक्तावचनम्येनाप्ता

पद्वीप्समिवत्वं न योगिनां दुर्लभं नापि प्राकृतानां सुलभं इति योगिनां गेहे विलावयस्य विकल्पं सहित ४२

परमार्थप्रपाटीका

अथचिराभ्यस्तयोगभ्रंशे पक्षान्तरमाह अथवेति अथवा योगिनां योगनिष्ठानां तथा धीमतां ज्ञानिनामेव कुले जायते न तु श्रीमतां मनारूढयोगानां यत्तदीदृशं यज्जन्म तद्दुर्लभतरं मोक्षहेतुत्वात् ४२॥

वनमालीटीका

द्वितीयं प्रतिपक्षान्तरमाह अथवेति अल्पश्रद्धावैराग्यादिकल्याणगुणाधिक्येन भोगवासनाविरहात् पुण्यकृतां लोकानप्राप्यैव किन्तु योगिनां धीमतां ब्रह्मविदां कुले योगभ्रष्टो भवति यत्कुचैलानां श्रीमतां गृहे योगिनां जन्म तद्दुर्लभं अनेकसुकृतसाध्यत्वात् मोक्षपर्यवसायित्वाच्च यच्छुचीनामकिं चेतानामश्रीमतां ब्रह्मविदां च वा। शिष्टादीनां कुले जन्म एतद्धि प्रसिद्धशुकादिवद्दुर्लभतरं दुर्लभमार पि दुर्लभं लोके यदीदृशं सर्वप्रमादरहितं जन्मेति द्वितीयः कल्पस्तत्र भोगवासनाशून्यत्वेन संसारासहत्वात् ४२॥

क्रमवैजयन्तीटीका

एवमल्पकालाभ्यासाद्योगाद्भ्रष्टस्य गतिमुक्त्वेदानीं चिरकालाभ्यासयोगभ्रष्टस्य गतिमाह अथवेति अथशब्दः पक्षान्तरे वाशब्दो विकल्पे चिरकालाभ्यासेन यदि परिपक्वयोगो योगी भवेत्तर्हि धीमतां सुपरेशकर्तॄणां ज्ञानिनां योगिनां स्वयमपि योगानुष्ठानं कुर्वतां हि। विप्रयोगयोग्यानामेव कुले वंशे भवति उत्पद्यते हे विप्रस्य जन्मनो माहात्म्यमाह एतद्धीति योगयोग्यानां योगं कुर्वतां च कुले पूर्वजन्मकृ। फलरागभस्मसाधनवलक्षणमीदृशं यज्जन्म हि निश्चयेन लोके प्राकृ। तलोके प्राकृतानां जनानां नादेतज्जन्म दुर्लभतरमतिशयदुर्लभं दुःप्राप्यं भवतीत्यर्थः ४२॥

मधुसूदनीटीका

द्वितीयं प्रतिपक्षान्तरमाह ॥

श्रद्धावैराग्यादिकल्याणगुणाधिक्येन भोगवासनाविरहात्पुण्यकृतां लोकानप्राप्यैव योगिनामेव दरिद्राणां ब्राह्मणानां न तु श्रीमतां राज्ञां कु

लेभवति धीमतां ब्रह्मविद्यावतां एतेन योगिनामिति निकर्षेयद्द
णं यत्कुलीनां श्रीमतां राज्ञां गृहे योगभ्रष्टस्य जन्म तद्दपि दुर्लभं अने
कसुकृतसाध्यत्वात् मोक्षपर्यवसायित्वाच्च यत्तु कुलीनां दरिद्राणां
ब्राह्मणानां ब्रह्मविद्यावतां कुले जन्म एतत् प्रसिद्धशुकादिवद् दु
र्लभतरं दुर्लभाद्पि दुर्लभं लोके यदीदृशं सर्वप्रमादकारणशून्यं जन्म
ति द्वितीयः स्वप्नेन भोगवासनाशून्यत्वेन सर्वकर्मसमाप्तिहेतुत्वात्
[illegible] ४२॥

सदानंदीटीका

वैराग्यादिगुणाधिक्ये वासनाविरहान्मुनिः योगभ्रष्टः सुकृतिनां
लोकानप्राप्य योगिनां ब्राह्मणानां दरिद्राणां ब्रह्मविद्यावतां कुले जा
यते नन्वकुले जन्म दुर्लभाद्पि दुर्लभं २ पुण्यसाध्यतया जन्मराज्ञां
गेहे पि दुर्लभं न स्यादपीदृशं जन्म योगिगेहे नितुर्लभं ३ समवायाः
दशाद्यौ पुमर्गाकाले जिवेमिनौ चक्रवाकाः शरदीवहंसाः सरसिमा
नसे ४ नैव जातानां कुले वै ब्राह्मणा वेदपारगाः अब्धिमात्रीवमेधाने
च्छत्रमेव सीदृष्य नद्धकेहरिवंशज वंशप्रस्तावन स्थले ५ ४२॥

नीलकंठीटीका

तद्योगी विरक्तश्चिराभ्यस्तयोगो वा वेत्तस्य गतिमाह अथवेति ४२

आनंदीटीका [illegible] याः स्पष्टार्थं
[illegible]

पतात्तरोप्युत्पासेना ३॥

रामकंठीटीका

अथवा योगभ्रष्टो योगिनां यथोक्तकर्मसमाधिनिष्ठानामतएव धीम
तां सुकृतज्ञानवृत्तकत्वात्प्रशस्तबुद्धिमतां कुले समुत्पद्यते ईदृशमेतदेवं
विधानां योगिनां कुले जन्म दुर्लभतरं कर्मयोगभ्रष्टमन्तरेणान केनवि
ल्लभ्यते शक्यं ४२॥

एवमुत्पका लाभमुक्तयोगभ्रंशेण लासिकी[illegible]टीका तिरिप्तकुत्का चिरकालाभ्यस्तयोगभ्रंशेतप्रत्तान्तर
माह॥ योगिनां योगनिष्ठानां दरिद्राणां धीमतां विद्यावतां कुले गेहे भवति जाय
ते शुकादिवत् एतज्जन्म लोके ति हियस्मात् ईदृशं यज्जन्म एतद्धि दुर्लभ लोके
तरं दुर्लभाद्पि दुर्लभं श्रीमतां गेहे जन्म दुर्लभम् [illegible]
[illegible] ४२॥ ४२

पंचोलीटीका

अल्पकालाभ्यस्तयोगभ्रंशे गतिरुक्ता चिरकालाभ्यस्तयोगभ्रंशे प
ल्लांतरमाह अथवेति अथवाधीमतांज्ञानिनांयोगिनांअकिंचनानां
कुलेजन्मभवतिजायते हि एतन्निश्चितं यत ईदृशं एतत्योगिनां
कुलेजन्मलोकेदुर्लभतरंदुःखप्राप्यतरं श्रीमतांकुलेजन्मापेक्षया यो
गिनांकुले अप्यनंतदुर्लभतरं ४२॥

रणवीरसमिद्धोधिनी॥

अथ अल्पकालाभ्यस्तयोगभ्रंशे गतिमुक्त्वा चिराभ्यस्तयोगभ्रंशे
तु पक्षांतरमाह अथवेति अथवाशब्दः पूर्वस्मात्पक्षाद्विशेष
द्योतनार्थः योगिनां कर्मयोगिनां दरिद्राणां ब्राह्मणानामेव कुले अ
वैकल्यलक्षणो योगभ्रष्टो भवति जन्म प्राप्नोतीति यावत् कीदृशा
नां धीमतां विद्यातत्कालग्राहिण्या बुद्ध्या युक्तानां निश्चयदार्ढ्या
दस्खलितांतःकरणानां यदीदृशं कर्मयोगिनां कुले भवं जन्म
हीति निश्चये एतस्मिन् लोके स्याकर्मभूमौ दुर्लभतरं अतस्त्वम
पि महाराजकुले उद्भूत आसन्नतर महाफलो मा समरान्निव
र्तस्वेत्यभिप्रायः ४२॥

मधुभाष्य

४२॥

भाषा अनुवाद

थोड़े दिन योगाभ्यास करि के योग से भ्रष्ट भये पुरुष की ग
ति कहि चुके अब बहुत काल अभ्यास कर के भ्रष्ट हुये योगी
की गति कहते हैं कि अथवा सतपात्र धनियों के घर जन्म
लेने से और जो दरिद्र बुद्धिमान योगाभ्यासियों के कुल मे जन्म
ग्रहण सो उत्तमहै ऐसा जन्म लोक मे अति दुर्लभ है सो चिरका
ल योगाभ्यासी योगभ्रष्ट होय ऐसे ही घर मे उत्पन्न होते हैं ४२

दोहा

योगिनके बुद्धिवंतके कुलमें अथवा होय दुर्लभहै यहलो
कमें ऐसोजन्महि सोय ४२॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च।
ततो भूयः संसिद्धौ कुरुनन्दन ४३ ॥

शांकरभाष्यं

तत्रेति तत्र योगिनां कुले तं बुद्धिसंयोगं बुद्ध्यासंयोगं बुद्धिसंयोगं लभते पौर्वदेहिकं पूर्वस्मिन् देहे भवं पौर्वदेहिकं यतते च प्रयत्नं करोति ततस्तस्मात् पूर्वकृतात् संस्काराद्भूयो बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे कुरुनन्दन ४३ ॥

आनन्दगिरिकृतटीका

बुद्ध्यात्मविषयेति शेषः पूर्वस्मिन् देहे भवं तत्रानुष्ठितसाधनविशेषजन्यमित्यर्थः तर्हि यथोक्तजन्मनि साधनानुष्ठानमन्तरेणैव। बुद्धिसम्बन्धः स्यादित्याशंक्याह यतते चेति प्रयत्नः श्रवणाद्यनुष्ठानविषयः ४३ ॥

स्वामिकृतटीका

ततः किमत आह तत्रेति सार्धेन। तत्र द्विप्रकारेऽपि जन्मनि पूर्वदेहे भवं पौर्वदेहिकं तमेव ब्रह्मविषयया बुद्ध्या संयोगं लभते ततश्च भूयो ऽधिकं संसिद्धौ मोक्षे प्रयत्नं करोति [illegible] विषयेभ्यः [illegible] ४३ ॥

पैशाचभाष्यं

यस्माच्च तत्रेति तत्र योगिनां कुले तं बुद्धिसंयोगं लभते पौर्वदेहिकं पूर्वदेहे भवं पौर्वदेहिकं [illegible] यतते च यत्नं करोति च ततस्तस्मात्पूर्वकृतात्संस्काराद्भूयो बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे कुरुनन्दन ४३ ॥

रामानुजभाष्यं

तत्र तमिति तत्र जन्मनि तमेव पूर्वदेहिकं योगविषयिकबुद्धिसंयोगं लभते ततः सुप्तप्रतिबुद्धवद्भूयः संसिद्धौ यतते यथा नान्तरायहतो भवति तथा यतते ४३

ति॰ अभिनवगुप्तकृतटीका [illegible] संसिद्धौ मोक्षात्मिकायाम् ४३

परमार्थप्रपाटीका

गी.
टी.
स.

तत्रकिंभवतीत्याहसार्द्धेन तत्रेति तत्रयोगिनांकुलेनेपूर्वदैहिकंआ
कृसंस्कारागतंबुद्धिसंयोगंलभते ततस्तेनबुद्धिसंयोगेनसंसि॥
द्धौमोक्षसाधनेयततेबहुतरंप्रयत्नंकरोति ४३ ॥

195.

वनमालीटीका

तत्रद्विप्रकारेपिजन्मनिपूर्वदेहेभवंपौर्वदैहिकंसर्वकर्मसंन्याससगु
रूपसदनश्रवणमनननिदिध्यासनानांमध्येयावत्पर्यन्तमनुष्ठितं
तावत्पर्यन्तमेवततःपरंब्रह्मविषययाबुद्ध्यासंयोगंतत्साधनकलाप
मितियावत् लभतेप्राप्नोति नकेवलंलभतएवकिंतुततस्तल्लाभा
नन्तरंभूयोपिकेसाधनसंपत्तिप्राप्यसंसिद्धौमोक्षोयततेप्रयत्नंकरोति ४३

कृष्णमवैजयन्तीटीका

आमुष्मिकेसर्वंवक्ष्यपूर्वसंस्कारनिमित्तकंसाधनमाह तत्रतमिति
तत्रोभयविधेजन्मनिपौर्वलक्षणायांसंयोगंतयासहसंबंधंलभते
ततःप्रभृतिबुद्ध्यायेनपूर्वजन्मकृतमात्मपरमात्मतत्त्वेनसंयोगाद्भ्रष्टो
योगीप्राप्नोतीत्यर्थः हेकुरुनंदनततस्तादृशबुद्धिसंयोगाद्भूयःसंसि
द्धौज्ञानरूपकरणशुद्धिपूर्विकायांस्वपरस्वरूपदर्शनरूपायांनिमित्तेन
पुनर्भूयोबहुतरंयततेयथासर्वविघ्नविहतोयोगीप्रभवनमध्येदानी
माभूदित्येवंमनसिनिश्चित्यप्राप्तिरफलंप्रयत्नंकरोतीत्यर्थः ४३ ॥

मधुसूदनीटीका

एतादृशजन्मद्वयस्यबुद्धिर्भवंत्वंकस्मा

यस्मात् ॥ तत्रद्विप्रकारेपिजन्मनिपूर्वदेहेभवंपौर्वदैहिकंसर्वकर्मसंन्याससगुरू
पसदनश्रवणमनननिदिध्यासनानांमध्येयावत्पर्यन्तमनुष्ठितंताव
त्पर्यन्तमेवतंब्रह्मात्मैक्यविषययाबुद्ध्यासंयोगंतत्साधनकलापमि
तियावत् लभतेप्राप्नोतिनकेवलंलभतएवकिंतुततस्तल्लाभानन्त
रंभूयोपिकेवलंआयाभूमेःरश्मिमाभूमिःसंपादयितुंसंसिद्धौसंसिद्धि
मोक्षः तन्निमित्तंयततेचप्रयत्नंकरोतिचयावन्मोक्षोतंभूमिकाःसंपा
दयतीत्यर्थः हेकुरुनंदननवापिपूर्वीनांश्रीमतांकुलेयोगभ्रष्टज
ति√ न्मजानमिपूर्ववासनावशादनायासेनैवतानलाभोभविष्यतीति।
सत्वपितेमहाप्रभावस्यकुरोःकीर्तनं प्रथमपर्योभगवद्भक्तिपूर्वव
नेव्यक्तः यथाश्रीरामः एकमप्याद्वितीयांवातृतीयांभूमिकांगत ।

प्रारब्धक्षयमरणस्यापि कीदृशी भगवता गतिः । एवं हि सति भूमयो व्याख्या-
ताः तत्र नित्यानित्यवस्तुविवेकपूर्वकादिहामुत्रार्थभोगवैराग्याच्छ-
मदमश्रद्धातितिक्षा सर्वकर्मसंन्यासादिपुरःसरा मुमुक्षा शुभेच्छा-
ख्या प्रथमा भूमिका साधनचतुष्टयसंपदिति यावत् ततो गुरुमुप-
सृत्य वेदान्तवाक्यविचारणात् मिका द्वितीया भूमिका श्रवणमनन-
संपदिति यावत् २ ततः श्रवणमननपरिनिष्पन्नस्य तत्त्वज्ञानस्याति-
विचिकित्सनात्मतनुमनस्तानाम तृतीया भूमिका निदिध्यासनसंप-
दिति यावत् ३ ततश्चतुर्थी भूमिका तत्त्वसाक्षात्काररूपा ४ पंचमषष्ठ-
सप्तमभूमयस्तु जीवन्मुक्तेरवांतरभेदा इति तृतीये प्राग्व्याख्याते
तत्र चतुर्थीं भूमिकां प्राप्तस्य सत्त्वस्य जीवन्मुक्त्यभावेपि विदेहकैवल्य-
प्राप्तिर्नास्त्येव संशयः तदुत्तरभूमित्रयप्राप्तस्तु जीवन्नपि मुक्तः कि-
मु विदेह इति नास्त्येव भूमिकाचतुष्टये शंका साधनभूतभूमिकात्रये
तु कर्मयोगात् तत्तालाभाश्च भवति शंकेति तन्नैव प्रश्नः श्रीवसिष्ठः
योगभूमिकयोत्क्रान्तजीवितस्य शरीरिणः भूमिकांशानुसारेण क्षी-
यते पूर्वदुष्कृतं ततः सुरविमानेषु लोकपालपुरेषु च मेरूपवनकुंजे-
षु रमते रमणीसखः ततः सुकृतसंभारे दुष्कृते च पुरा कृते भोगक्षया-
त्परिक्षीणे जायन्ते योगिनो भुवि शुचीनां श्रीमतां गेहे गुप्ते गुणवतां स-
तां जनित्वा योगमेवैते सेवन्ते योगवासिताः तत्र प्राग्भावनाभ्यस्तयो-
गभूमिक्रमं बुधाः दृष्ट्वा परिपतन्त्युच्चैरुत्तरं भूमिकाक्रममिति अत्र
प्रागुपचितभोगवासनाप्राबल्यादल्पकालाभ्यस्तवैराग्यवासनादौर्ब-
ल्येन प्राणोत्क्रान्तिसमये प्रादुर्भूतभोगस्पृहः सर्वकर्मसंन्यासी यः स ए-
वोक्तः यस्तु वैराग्यवासनाप्राबल्यात्प्रकृष्टपुण्यप्रकटितपरमेश्वरप्र-
सादवशेन प्राणोत्क्रान्तिसमये त्रुद्भूतभोगस्पृहः संन्यासी भोगक्षयवशा-
नेपि नैव ब्राह्मणानामेव ब्रह्मविदां सर्वप्रमादकारणशून्ये कुले समु-
त्पन्नः तस्य प्राक्तनसंस्काराभिव्यक्तेरनायासेनैव संभवान्नास्ति पूर्वस्येव
मोक्षप्रमाणशंकेति स च वसिष्ठेनोक्तो भगवतापि परमकारुणिकेना-
पवेति पृष्टेनार्जुनेनोक्तः पवस्पष्टमयते

गी॰
टी॰
५

[illegible]

५२

196

सदानंदीटीका

यतस्तेषां कुले बुद्ध्या संयोगं लभते त्वया पूर्वदेहसमुद्भूतमवलोक्य यानया १ पूर्वस्मादेव संस्काराद्यत्नं बहुतरं ततः करोति तत्त्वविज्ञानसंसिद्धौ योगतत्परः २ तथापि श्रीमतां गेहे जन्मास्ति कथं तदन्त प्रना यासात्तत्त्वज्ञाने भविष्यमेवमाशयः ३ प्रथमद्योपि वा सिद्धेयमतः श्री रामचोदनात् पकामष्ट द्वितीयां वा तृतीयां भूमिकामनु ४ आरूढस्य मृतस्याथ कीदृशी भगवन्गतिः श्रीवसिष्ठः योगभूमिकयोत्क्रान्त जीवितस्य शरीरिणः ५ भूमिकांशानुसारेण तीयते पूर्वदुःकृतं ततः सुरविमानेषु लोकपालपरेषु च ६ मेरूपवनकुंजेषु रमते सुरमणी सखः ततः सुकृतसंभारे दुःकृते च पुरा कृते ७ भोगक्षयात्परिक्षीणा जायंते योगिनो भुवि शुचीनां श्रीमतां गेहे कुलेऽगुणवतां सतां ८ जनित्वा योगमेवैते सेवंते योगवासिताः तत्र प्राग्भाववक्राभ्यस्तं योगभूमिक्रमं बुधाः ९ दृष्ट्वा परिपतंत्युच्चैरुत्तरं भूमिकाक्रमं १० ४२॥

नीलकंठीटीका

तत्र द्विविधेऽपि जन्मनि योगी दैहिकं पूर्वदेहस्थां बुद्धिसंयोगं यावती योगभूमिः पूर्वजन्मनि जिता तत्रैव यावान्बुद्धिलाभो जातस्तावंतं बुद्धिसंयोगं पूर्वाभ्यासादल्पेनैवाभ्यासेन लभते तस्मादपि भूयसा यत्नं संसिद्धौ ऊर्ध्वभूमिलाभार्थं निमित्तं यतते यत्नं करोति ४३॥

आनंदीटीका

यस्या भूमिकायाः पतितस्तस्या पवत्र आज्ञानेन संयोगं कृत्वा ततस्तस्या भूमेर्जयानंतरं भूयः पुनरप्युत्तरभूमिजयाय सिद्धौ यतते ४३॥

रामकंठीटीका

[illegible]

तस्मिंश्च जन्मनि तं बुद्धिसंयोगं तादृशेच्छाज्ञानसंस्कृततया संबंधं लभ-
ते कं तं पौर्वदैहिकं पूर्वस्मिन्देहे भवं यत्र ज्ञानक्रियासमुच्चयानुष्ठानरू-
पो योगस्तेनाश्रितस्तत्र निर्वाहितस्तत्र किल तथाविधयोगसमाश्रयणा-
हेतुभूतज्ञानसंस्कृततयाश्चात्मसंबंधो यो स्याभूदेव सचपरमेश्वरानुग्रहं वि-
नान भवति सचेश्वरानुग्रहो नादत्तफलो विरमति अतः कृतविधित्सले-
शाकं विकालं विलंबं न सहत एव ततस्तद्बुद्धियोगमाहात्म्या
भूयः पुनरपि प्रयत्नमारभते संसिद्धिनिमित्तं योगफलवाप्त्यर्थं यत्

लासिकीवनमालीटीका

एतादृशजन्मद्वयस्य दुर्लभत्वं कु तेनत्राह॥ तत्र द्विप्रकारे जन्मनि पूर्वदेहभवं पौर्वदैहिकं तेतादृशमेव संस्का-
रात्मनास्थितं बुद्धिसंयोगं बुद्ध्यात्मबोधेन संयोगं संबंधं लभते ततो
बोधलाभानन्तरं संसिद्धौ ज्ञानोत्कर्षप्राप्त्यर्थं भूयोऽधिकं पुनरपि बोधत-
तो प्रयत्नं करोति परमात्माकारसमाधानमावर्तत इत्यर्थः तदुक्तं त-
स्य च परमार्थमयी धारा मनसस्तमध्यविश्रान्तेः तत्पदलाभोत्क-
कवेन सोऽपि मरणो कदाचित्स्यात् योगभ्रष्टः शास्त्रकथितोऽसौ चित्र-
भोगमवनपतिः विश्रान्तिस्थानवशाद्भूत्वा जन्मांतरे शिवीभवतीति ४३

[illegible] पद्म॥

पंचोलेटीका

कुतो दुर्लभमित्यत्राह तत्रेति हे कुरुनंदन तत्र योगिनां कुले तं पौर्व-
दैहिकं पूर्वस्मिन् देहे भवं बुद्धिसंयोगं बुद्ध्यायोगं लभते च पुनः ततः पूर्व-
स्मात्संस्कारात् भूयः बहुतरं संसिद्धौ मोक्षनिमित्तं यतते प्रयत्नं करोति ४३

रागवीरसमिद्धेयिनी॥

तत्रेति तत्र तस्मिन्कर्मयोगिकुलविषयके जन्मनि तं पौर्वदैहि-
हिकं प्राग्भवीयदेहभवं बुद्धियोगं स्वकर्मानुष्ठाननिश्चयसंबंधं
लभते ततश्च भूयः पुनरपि सम्यक्सिद्धये यतते यत्नं करोति ह

धप्रयत्नस्तत्रभवतीतिभावः ४३॥

सपुभाष्य

४३॥

भाषा अनुवाद

सोई जन्मग्रहण के बादि क्या होताहै यह डेढ श्लोक से कहते हैं कि हे कुरुनन्दन तेई दोनो प्रकार के योग भ्रष्ट लोग जन्म धारण करिके भी पूर्व देह के अभ्याससे ब्रह्म विषयक बुद्धि संयोग युक्त होते हैं और फेरि भीमोक्ष की सिद्धिके लिये अधिक यत्न करते हैं ४२

दोहा

ताको बुद्धिसंयोग तहां पूर्वजन्मको होय करतयतनता सिद्धि
" हे कुरुनंदनसोय ४३॥

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः जिज्ञा
सुरपि योगस्य शब्दब्रह्मातिवर्त्तते ४४ ॥

शाङ्करभाष्यं

कथंभूतं तत्पूर्वदेहबुद्धिसंयोग इति तदुच्यते पूर्वेति यः पूर्वजन्मनि।
कृतोभ्यासः स पूर्वाभ्यासस्तेनैव बलवता ह्रियते संसिद्धौ हि यस्मादव।
शोपि सः योगभ्रष्टः न कृतं चेत् योगाभ्यासजात् संस्कारात् बलवत्त
रमधर्म्मादिलक्षणं कर्म्म तदा योगाभ्यासजनितेन संस्कारेण ह्रिय
तेऽधर्म्मश्चेद्बलवत्तरः कृतस्तेन योगजोपि संस्कारोऽभिभूयत एव त
त्क्षये तु योगजः संस्कारः स्वयमेव कार्य्यमारभते न दीर्घकालस्थस्या
पि विनाशस्तस्यास्तीत्यर्थो जिज्ञासुरपि योगस्य स्वरूपं ज्ञातुमिच्छन्
योगमार्गे प्रवृत्तः सन्न्यासी योगभ्रष्टः सामर्थ्यात् सोपि शब्दब्रह्म वेदो।
क्तकर्म्मानुष्ठानफलमतिवर्त्तते कर्म्मानुष्ठानलक्षणमतिक्रामत्यपाक
रिष्यति किमुत बुद्ध्वा यो योगं तन्निष्ठोऽभ्यासं कुर्यात् ४४ ॥

आनन्दगिरिकृतटीका

यदि पूर्वसंस्कारोऽस्वकार्य्यमुपनयन् प्रवर्त्तयति तथापि प्रवृत्तिरनिच्छया
स्यादित्याशङ्क्याह पूर्वेति सहि योगभ्रष्टः समनन्तरजन्मकृतसंस्कारव
शादुत्तरस्मिन् जन्मन्यनिच्छन्नपि योगे प्रसभाकृष्टो भवतीत्यर्थः तत्र।
कैमुतिकन्यायं सूचयति जिज्ञासुरिति पूर्वार्द्धं विभजते पूर्वेति तस्मा
देच्छया तस्य प्रवृत्तिरिति शेषः योगभ्रष्टस्याधर्म्मादिप्रतिबन्धेऽपि न
हि पूर्वाभ्यासवशाद्बुद्धिसम्बन्धः स्यादित्याशङ्क्याह नेत्यादिना यदि योग
भ्रष्टेन योगाभ्यासजनितसंस्कारवशाद्बलात् प्रबलतरधर्म्माधर्म्मरूपं।
कर्म्मैव कृतं स्यात्तदा तेन संस्कारेण वशीकृतः सन्निच्छादिरहितोपि बु
द्धिसम्बन्धभाग् भवतीत्यर्थः विपक्षे योगसंस्कारस्याभिभूतत्वान्न कार्य्या
रम्भकत्वमित्याह अधर्म्मश्चेदिति योगजसंस्कारस्याधर्म्माभिभूतस्य का
र्य्यमकृत्वैवाभिभावकप्राबल्ये प्रणाशः स्यादित्याशङ्क्याह तत्क्षयेत्विति।
कालव्यवधानाद्विकृतिं शंकित्वोक्तं नेति तृणजलौकादृष्टान्तयोगाभ्याससंस्का
रस्य दीर्घेणापि समयविगतत्वादितिभावः कैमुतिकन्यायोक्तिपरमुत्तरा
र्द्धं विभजते जिज्ञासुरपीत्यादिना अत्रापि सन्न्यासीति विशेषणं पूर्वव
दवधेयमित्याह सामर्थ्यादिति नहि कर्म्मी कर्म्ममार्गे प्रवृत्तो योगभ्रष्टः

गी॰
टी॰
ष

१९९

शंकिते शक्यते अतः संन्यासी पूर्वोक्तैर्विशेषणैः विशिष्टो योगभ्रष्टो
ऽभीष्टः सोपि वैदिकं कर्म्म तत्फलं वातिवर्त्तते किमुत योगे बुद्ध्वा निवि
ष्टः सताभ्यासं कुर्वन् कर्म्म तत्फलं वातिवर्त्तते किमिति वक्तव्यमिति
योजना योगनिष्ठस्य कर्म्म तत्फलातिवर्त्तने ततोधिकफलावाप्तिर्वि
वक्ष्यते ४४

स्वामिकृतटीका

तदेवं पूर्वाभ्यासवशेन प्रयत्नं कुर्वन् शनैःशनैर्मुच्यते इतीममर्थं कैमु
त्यन्यायेन स्फुटयति सार्धेन जिज्ञासुरिति योगस्य स्वरूपं जिज्ञासुरेव के
वलं न तु प्राप्तयोगः एवंभूते योगे प्रविष्टमात्रोपि पापवशाद्योगभ्रष्टो
पि शब्दब्रह्म वेदमतिवर्त्तते वेदोक्तकर्मफलान्यतिक्रामति
तेभ्योधिकं फलं प्राप्य मुच्यत इत्यर्थः ४४ ॥

पिशाचभाष्यं

पूर्वजन्मनि कृतोभ्यासस्तेन पूर्वाभ्यासेन बलवता तेनैव ह्रियते हि यस्मा
त्प्राप्यते बुद्धिसंयोगं स्ववशोपि सः योगभ्रष्टः किं च जिज्ञासुर्योगस्य ज्ञा
तुमिच्छुर्योगमार्गे प्रवृत्तः संन्यासी सामर्थ्यात्सोपि शब्दब्रह्म वेदोक्तके
वलकर्मानुष्ठानमतिवर्त्तते योगजिज्ञासापि केवलात्कर्मणो गरीयसीत्य
भिप्रायः किमुत बुध्वा योगनिष्ठोभ्यासं कुर्वन् ४४ ॥

रामानुजभाष्यं

तेन पूर्वाभ्यासेन पूर्वेण योगविषयेणाभ्यासेन स योगभ्रष्टोप्यवशोपि
योग एव ह्रियते प्रसिद्धं ह्येतद्योगमाहात्म्यमित्यर्थः जिज्ञासुरिति ।
प्रवृत्तयोगो योगजिज्ञासुरपि ततश्चलितमानसः पुनरपि तामेव
जिज्ञासां प्राप्य कर्मयोगादिकं योगमनुष्ठाय शब्दब्रह्मातिवर्त्तते शब्द
ब्रह्म देवमनुष्यान्तरिक्षस्वर्गादिशासनाभिलाषयोग्यं ब्रह्म प्रकृतिः प्रकृ
तिबन्धाद्विमुक्तो देवमनुष्यादिशासनाभिलाषानर्हे ज्ञानानन्दैकतानमा
त्मानं प्राप्नोतीत्यर्थः ४४ ॥

अभिनवगुप्तकृतटीका^ स्पष्टार्थं ४४

परमार्थप्रपाटीका

तत्र हेतुमाह पूर्वेति तेनैव पूर्वाभ्याससंस्कारेणावशोपि कुतश्चिदं
तरायादनिच्छन्नपि क्रियते बलात्कारेण विषयेभ्यः परावृत्तं ब्रह्मनि
ष्ठः क्रियते तदुक्तं विष्णुपुराणे अनिष्पन्नसमाधिस्तु परब्रह्मोपलब्धि

^ तत्र हेतुः तेनैव पूर्वदेहकृताभ्यासेनावशोपि कुतश्चिदन्तरायादनिच्छन्नपि सः क्रियते विषयेभ्यः परावृत्य ब्रह्मनिष्ठः क्रियते

अवशः परतन्त्र एव किल तेन पूर्वाभ्यासेन बलादेव योगाभ्यासं प्रति नीयते न चैतन्मात्रमपि योगजिज्ञासामात्रेणैव शब्दब्रह्माप्तिरूपि मनुष्याधारं शब्दब्रह्मातिवर्त्तते न स्वीकुरुते ४४ ^

४ अथयोगसामर्थ्यमाह जिज्ञासुरिति योगस्वरूपं जिज्ञासुरपि योगप्रविष्टमात्रोपि शब्दब्रह्मातिवर्तते शब्दात्मकं ब्रह्म शब्दब्रह्म वेदस्तदुक्तफलानि स्वर्गादीनि अतिवर्तते शब्दात्मकं ब्रह्म शब्दब्रह्म वेदस्तदुक्तफलानि स्वर्गादीनि अतिवर्तते अतिक्रामति तेभ्योधिकं फलं प्राप्य मुच्यते इत्यर्थः एवं मंदप्रयत्नोपि योगी परां गतिं याति

मात्र यद्येनरायदोषेणदूष्यतेसम्यमानसे जन्मांतरेरस्यसत्तोमु क्तिः पूर्वस्यजायते विनिष्पन्नसमाधिस्तुमुक्तिमत्रैवजन्मनि प्राप्नो तियोगीयोगाग्निदग्धकर्माचयोचिरात् ४४ ॥

वनमालीटीका

ननुयोवैराग्यवासनाप्राबल्यात्प्रकृष्टपुण्यप्रकटितपरमेश्वरप्र सादवशेनप्राणोत्क्रांतिसमयेनद्गतभोगस्यहस्तस्यब्रह्मविदःकुले जातस्यप्राचीनसंस्कारोद्बोधात्पुनरपिपरब्रह्मनिष्ठामोक्षपर्यंतम स्तु यस्तुश्रीमतांराज्ञांकुलेबहुविधविषयभोगव्यवधानेनोत्पन्नस्त स्यकायमनिर्व्यवहितत्वात्तेसंस्कारोद्बोधस्तत्राहपूर्वेति अतिव्यवहि तजन्मोपचितेनापितेनैवपूर्वाभ्यासेनयोगार्जितसंस्कारेणावशोपि मोक्षसाधनायाप्रयत्नमानोपिक्रियतेस्ववशीक्रियते अकस्मादेव। भोगवासनाभ्योव्युत्थाप्यमोक्षायोन्मुखीक्रियते जिज्ञासुरेनमि कुरपियोगस्यमोक्षसाधनत्वात्तस्य ज्ञातेमहाशयस्तोबहुविषयो पभोगमहाराजकुलेसमुत्पन्नोपियोगभ्रष्टः प्राचीनसंस्कारवशा तस्मिन्जन्मनिशब्दब्रह्मवेदंकर्मप्रतिपादकमतिवर्तते कर्माधि कारानिक्रमेणज्ञानाधिकारीभवतीत्यर्थः ४४ ॥

कृष्णमवैजयन्तीटी॰

सयोगीकेनयत्नेनेश्वरमुपेत्यायोहेतमाह पूर्वाभ्यासेनेति सयोग भ्रष्टोयोगीहीतिनिश्चयेनावशोपिकस्माच्चिदपिविघ्नाद्योगमति। क्रस्तोपितेनैवयोगविषयकेनपूर्वाभ्यासेनपूर्वजन्मदेहकृतानुष्ठाना भ्यासेनक्रियते आकृष्यते विषयेभ्यःपराङ्मुखात्मनिष्ठःक्रियतइत्यर्थः अस्ययोगस्यकेमुतिकन्यायेनमाहात्म्यमाह जिज्ञासुरिति अस्ययो गस्यज्ञानगर्भकस्याष्टांगाभिरस्कस्यजिज्ञासुरपियोगानुष्ठानाद्यह तःकेवलंयोगेज्ञातमेवेच्छुरपिजनःशब्दब्रह्माभ्यमिरायोगलोवाद्यः एवमनोबुद्धिरेवचैमादिशाहोनामयस्यतद्वत्याद्युपाभिज्ञापरापरप्रकृ तिरूपमतिवर्ततेऽतिक्रम्यवर्ततेप्रकृतिकार्यभूतस्यस्वर्गादिसुख भोगस्याप्यभिलाषंत्यजतीत्यर्थः यद्येवंभूतोप्यजिज्ञासुरपिस्या तर्हियोःविरताभ्यासयुक्तोभवतिसप्रकृतिमुल्लंघ्यवर्ततइतिकिमु वक्तव्यंनास्त्यत्रसंशयइत्यभिप्रायः ४४ ॥

मधुसूदनीटी॰

नत्रयोगभ्रष्टविदांब्राह्मणानांसर्वप्रमादकारणशून्येसकुलेत्पन्नःतस्यमध्येविषयभोगव्यवधानाभावा दव्यवहितप्राग्भवीयसंस्कारोद्बोधात्पुनरपिसर्वकर्मसंन्यासपूर्वकंज्ञानसाधनलाभोभवतुनाम यस्तुश्रीमतांमहाराजचक्रवर्तिनांकुलेबहुविषयभोगव्यवधानेनोत्पन्नः तस्यविषयभोगवासना

गी. टी. ष.

अतिविरव्यवहितजन्मोपचितेनापि तेनैव पूर्वाभ्यासेन शास्त्रीयज्ञा
नसंस्कारेणावशोपि मोक्षसाधनायाप्रयतमानोपि ह्रियते स्ववशी
क्रियते अकस्मादेव भोगवासनाभ्यो व्यावर्त्य मोक्षसाधनेनाभिमुखः
क्रियते ज्ञानवासनायाः प्रबलत्वात् कालाभ्यस्ताया अपि वस्तुविषयत्वेना
वस्तुविषयाभ्यो भोगवासनाभ्यः प्राबल्यमवश्यमेव प्रबुद्धहेतो
ज्ञानायाप्रयतमानोपि पूर्वसंस्कारप्राबल्यादकस्मादेव श्रवणाभिमुखो ज्ञाने
न्मुखो भूदिति अत एव शास्त्रे नेहाभिक्रमनाशोस्तीति अनेकजन्म
सहस्रव्यवहितोपि ज्ञानसंस्कारः स्वकार्यकरणेव सर्वविरोध्युपमर्दे
नेत्यभिप्रायः सर्वकर्मसंन्यासाभावेपि हितत्रियस्य ज्ञानाधिकारः सि
द्ध एव यथा पाटच्चरेण बहूनां रत्नानां मध्ये विद्यमानमपि अश्वादिद्र
व्यं स्वयमनिच्छद्भिः ज्ञानस्वीनभिभूय स्वसामर्थ्यविशेषादेवापह्रिय
ते यस्मात्तस्करात् पहृतमिति विमर्शो भवति एवं बहूनां ज्ञानप्रति
बन्धकानां मध्ये विद्यमानोपि योगभ्रष्टः स्वयमनिच्छन्नपि ज्ञानसंस्कारेण
बलवता स्वसामर्थ्यविशेषादेव सर्वप्रतिबन्धकानभिभूयात्मवशी
क्रियत इति हृतः प्रयोगेन सविनं अत एव संस्कारवशात् जिज्ञा
सुतोनभिक्रुर्पि योगस्य मोक्षसाधनज्ञानस्य विषयं ब्रह्म प्रथमभू
मिकायां स्थितः संन्यासीति यावत् सोपि तस्यामेव भूमिकायां मरणेन
गले बहून् विषयान्भुक्त्वा महाराजचक्रवर्तिनां कुले समुत्पन्नोपि यो
गभ्रष्टः प्रागुपचितज्ञानसंस्कारवशादस्मिन् जन्मनि शब्दब्रह्म वेदक
र्मप्रतिपादकमतिवर्तते अतिक्रम्यतिष्ठति कर्माधिकारातिक्रमेण
ज्ञानाधिकारी भवतीत्यर्थः एतेनापि ज्ञानकर्मसमुच्चयो निराकृत इति
द्रष्टव्यं समुच्चये हि ज्ञानिनोपि कर्मकाण्डातिक्रमाभावात् ४४

॥

सदानंदटीका

पूर्वजन्मकृताभ्याससंस्कारेणावशोपिसन् मोक्षमार्गेप्रवृत्तोपिस्ला
वशीक्रियतेबलात् १ अकस्मादेवसुभाष्यभोगवासनतोजनः ज्ञानसं
स्कारभावत्वात्क्रियतेसाधनोन्मुखः २ अल्पकालमपिज्ञानाभ्यासवा
सनयानया सम्यगभ्यस्तयानस्यावासनायाविशेषतः ३ महत्त्वविष्ट
त्वेनप्राबल्यादस्यगोचरात् यथानमेवपुरेस्मिन्पूर्वाभ्यासवशेनच ४ ज्ञा
नाभ्यासोमृत्युलोकस्यादेवाभ्यरितिचाशयः अतःसंस्कारप्राबल्याज्ज्ञानमि
कुर्वीहृयः ५ मोक्षसाधनबोधस्यविषयंब्रह्मविद्ध भुक्त्वाभोगान्बहून्स्व
र्गेजन्मप्राप्नोतिमेकुले ६ योगभ्रष्टोपिवेदोक्तकर्मानुष्ठानजंफलं अ
तीत्यवर्त्ततेनरैःकिंवाच्यंब्रह्मवेदिनः ७४४ ॥

नीलकंठीटीका

कुतोयंयतनतेशिथिलोपीत्यतआह पूर्वेतिअवशोपिप्रारब्धादिवमिथ्या
दृष्टिभिरन्यथानीयमानोपितेनैवपूर्वाभ्यासेनबलवताह्रियतेयोगंप्रव
णःक्रियते यतःयोगस्यजिज्ञासुःज्ञानमात्रमिच्छन्नपिभवतिसोपि
शाब्दब्रह्मकर्मकाण्डंवेदमपिअतिक्रम्यवर्त्ततेकिंपुनःपिज्ञातात्मा १
यंपूर्वाभ्यासवलेयत्नमहानमपिपिज्ञादिपत्नेहयाकरोतीत्यर्थः ४४

आनन्दीटीका

अत्रहेतुमाह अवशःप्रासप्राप्तासिद्धेःउज्ज्वादिवशोपिसन्तेनैवपूर्वा
भ्यासेनप्राग्जन्मसंचितसंस्कारेणाह्रियतेपितांताभूमिकांप्रापय्यपरे
ब्रह्मणिनीयतेरत्नपिप्राक्तस्यार्थःतेदवंयोगसिद्धेःअद्वैवपरमोपायइ
तिअर्हंसोति विवेकात्मानंसंयमात्ममदितेप्रज्ञालोकेशास्त्रजंज्ञा
नमपार्थकंस्यदीपवदितियोगानुष्ठानमनदृष्ट्वायोगस्यजिज्ञासुःअद्व
याज्ञातमिच्छुरपिअपिशब्दायोगमनुष्ठातमनारब्धोपिशाब्दंब्रह्मशास्त्र
मतिक्रमते अत्रेदंतात्पर्यम् अद्धायुद्धेहियस्यचेतःतस्यशोकेनमन
मध्यतीव्रसंस्कारापेक्षाकेमरणासंयमेनावश्यंब्रह्मप्राप्तिरितितिततः
पंरज्ञानव्यासाभावादृष्टब्रह्मरोज्ञानसाधनस्यनापेक्षेति ४४

रामकंठीटीका

यस्मात्तेनैव पूर्वजन्मसंबद्धेन महता अभ्यासेन योगविषयेण संस्का
रात्मनावस्थितेनावशोऽप्यनिच्छन्नपि ह्रियते आत्मसात्क्रियते कस्मा
त्तेनाभ्यासयोगेन क्रियते इत्याह यस्मात्कर्मसमाधिलक्षणस्य यो
गस्य जिज्ञासुरपि स्वरूपं ज्ञातुकामोऽपि शब्दब्रह्मलक्षणं स्वात्मकं तत्त्वम
तिवर्तते तिक्रामति निश्चयाभावाद्योगविषयाप्रवृत्तिरेव न संभवति
संशयितस्यैव शास्त्रमुपकारकमतो योगजिज्ञासुः शब्दब्रह्मातिव
र्तते इत्युक्तम् [illegible] ४४ ॥

लासिकी[illegible]टीका

ज्ञातस्मिंदंतरायादवशोऽपि अनिच्छन्नपि सन् तेनैव तादृशेनैव महता ग
पच्छुरितेन पूर्वाभ्यासेन संस्कारात्मनास्थितेन पूर्वदेहकृताभ्यासेना
त्रजन्मन्यभिव्यक्तेन सयोगभ्रष्टो ह्रियते आत्मसात्क्रियते ननुकृतो
स्य योगाभ्यासस्य ईदृशं बलं तेयदंतरायसंभवेऽपि ह्रियत इत्यतोऽस्य
प्रभावमाह जिज्ञासुरिति योगस्य जिज्ञासुरपि योगस्वरूपं ज्ञातुकामो
ऽपि शब्दब्रह्म वेदस्तस्यान्तरायभूतकर्मणो बलवत्त्वमपि पादकमतिव
र्तते अतिक्रामति योगान्तरायभूतकर्मपरवशो न भवतीत्यर्थः किं पुनः
प्राप्तयोगः एवं मन्दप्रयत्नोऽपि योगी विघ्नानपहत्याभ्यासक्रमेण परां
गतिं प्राप्नोति [illegible] ४४ ॥

पंचोलीटीका

कथं पूर्वदेहबुद्धिसंयोग इति तत्राह पूर्वाभ्यासेनेति हि यस्मात्स योग
भ्रष्टः तेनैव पूर्वाभ्यासेन पूर्वजन्मनि कृताभ्यासः पूर्वाभ्यासस्तेनैव अ
वशः अस्वतंत्रः ह्रियते पुनः अपि योगाभ्यासे प्रवर्तते योगस्य जिज्ञासुर
पि योगस्वरूपं ज्ञातुं इच्छन्नपि योगभ्रष्टः शब्दब्रह्म वेदोक्तकर्मफलम
तिवर्तते उल्लंघ्य गच्छति ४४

भगवीरमसिद्धैयिनी ॥

पूर्वाभ्यासेनेति तेनैव पूर्वाभ्यासेन प्राग्भवीयेनैव संस्कारेण स
योगभ्रष्टो महाकुलोत्पन्नः अवशोऽपि सन् यत्नं कर्तुमनिच्छन्न

विसन् ह्रियते प्रकृतिनिमित्तीभूतदृष्टसंकल्पेभ्यः पराव
श्यंयत्नोमुखः संपाद्यते योगस्यप्रोक्तलक्षणस्यकर्मयोगस्य
स्वरूपंज्ञातुकामोपि शाब्दब्रह्मशब्दस्वरूपंप्रथमवेदमिति यत्तु
वेदप्रतिपादितेषुयज्ञादौवर्त्ततेहानिंकरोति यज्ञादिनिष्ठोभवति
प्रबलत्वेनसंस्कारस्यदुरुच्छेद्यत्वात् किंपुनर्यत्नंकुर्वन्नेवन
यज्ञादिकर्मपारयतीतिकैमुतिकन्यायेनफलितं ४४॥

मधुभाष्य

४४॥

भाषा अनुवाद

वह पूर्व देह का बुद्धि संस्कार कैसा है और उस का कारण यह है कि सोइ पूर्व देह की अभ्यासे अवश अर्थात् जो कोई कारण या विघ्न वलते इच्छा न भी होय तो भी मोक्ष सिद्धि के अर्थ पूर्व संस्कार के जोर से अवश की नाईं यत्न करते हैं अर्थात् विषयों से विमुख हो ब्रह्म निरत होते हैं और इस तरह पूर्व अभ्यासके कारण से मुक्ति के अर्थ यत्नकारी मनुष्य जिस क्रम से मुक्त होते हैं सो के मुक्तिक माग्र्येस उक्त स्लोक के द्वारा कहते हैं कि जिज्ञासु कहे योग स्वरूप जाननेकी इच्छा करने वाला कुश केवल योग ही को नहीं प्राप्त होता किन्तु योगप्रविष्ट मनुष्य पापवशते योगभ्रष्ट होय भीशब्द ब्रह्म जो वेद तिस को अति वर्तन करता अर्थात् वेदोक्त फलकी अपेक्षा अधिक फल प्राप्त होय फेरि मुक्त होता है इतनाही नहीं इससे भी अधिक इस की कैमुतिकन्याय कहते हैं ४४

दोहा

सो पूर्व अभ्यासमें करैं यत्न अवश सोय जान्यो चाहत योगकों पाइब्रह्म स्थित होय ४४॥

203

प्रयत्नाद्यतमानस्तु योगी संसिद्धकिल्बिषः अ
नेकजन्मसंसिद्धस्ततो याति परां गतिं ४५ ॥

शांकरभाष्यं

कुतश्च योगित्वं श्रेय इति प्रयत्नादिति प्रयत्नात् प्रयतमानादधिक
तरं यतमान इत्यर्थः तत्र योगी विद्वान् संशुद्धकिल्बिषो विशुद्धकिल्बि
षः संशुद्धपापोऽनेकेषु जन्मसु किंचित् किंचित् संस्कारजातमुपचित्य
तेनोपचितेनानेकजन्मकृतेन संसिद्धोऽनेकजन्मसंसिद्धः ततो लब्ध
सम्यग्दर्शनः सन् याति परां प्रकृष्टां गतिं ४५ ॥

आनन्दगिरिकृतटीका

योगनिष्ठस्य श्रेष्ठत्वे हेत्वन्तरं वक्तुं उत्तरश्लोकमवतारयति कुतश्चेति ।
मन्दप्रयत्नोऽक्रमेण मोक्षं चेदधिकप्रयत्नस्य क्लेशहेतोः किं स्यादित्याशं
क्याशंका हेत्वन्तरमेव प्रकटयति प्रयत्नादिति तत्र योगविषये प्रय
त्नातिरेके सतीत्यर्थः ततः संचितसंस्कारसमुदायादिति यावत् सम्यग्
ज्ञानसम्यग्दर्शनवशात् प्रकृष्टा गतिः सम्यगात्मना लभ्यते तेन शीघ्रं
मुक्तिसिद्धये अधिकप्रयत्नो भवेदस्य प्रयत्नस्य चिरेणैव मुक्तिभागित्वम
र्थः ४५ ॥

स्वामिकृतटीका

यदैवं मन्दप्रयत्नोऽपि योगी परां गतिं याति तदा यस्तु योगी प्रयत्नादुत्तरो
त्तरमधिकं योगे यतमानो यत्नं कुर्वन् योगेनैव संशुद्धकिल्बिषो विधूत
पापः सोऽनेकेषु जन्मसूपचितेन योगेन संसिद्धः सम्यग्ज्ञानी भूत्वा ततः
श्रेष्ठां गतिं यातीति किं वक्तव्यमित्यर्थः ४५ ॥

पैशाचभाष्यं

कुतश्च योगित्वं श्रेय इति प्रयत्नादधिकं प्रयतमान इत्यर्थः ततो योगी
विद्वान् संशुद्धकिल्बिषः संशुद्धपापः अनेकेषु जन्मसु किंचित्संशुद्धसंस्का
रजातमुपचित्य तेनोपचितेन संस्कारेणानेकजन्मकृतेन संसिद्धोऽने
कजन्मसंसिद्धस्ततो लब्धसम्यग्दर्शनः संन्यासी याति परां प्रकृष्टां गतिम् ४५

रामानुजभाष्यं

प्रयत्नादिति यतस्त्वेवं योगमाहात्म्यं ततोऽनेकजन्मार्जितपुण्यसंचयैः

✢ किं पुनः प्रयत्नादित्याह प्रयेति अथ प्रयत्नादुत्तरोत्तरमधिकयोगे यतमानो यत्नं कुर्वन् योगेनैव संशुद्धकिल्बिषो विधूतपापः सोऽनेकेषु जन्मसु उपचितयोगेन संसिद्धः सम्यक् ज्ञानी भूत्वा श्रेष्ठां गतिं यातीति किं वक्तव्यमित्यर्थः यस्मादेवं तस्मात्

शुद्धकिल्बिषः संसिद्धश्च संजातः प्रयत्नाद्यतमानस्तु योगी चलितोऽपि पुनः परां गतिं याम्येव ४५॥

अभिनवगुप्तकृतटीका ४५ ततो जिह्वासान

परमार्थप्रपाटीका ✢

[illegible]

याति ४५॥

वनमालीटीका

प्रयत्नात्पूर्वकृतादप्यधिकमधिकं प्रयत्नं कुर्वन् योगी पूर्वोपचितसंस्कारवान् तेनैव योगप्रयत्नपुण्येन संशुद्धकिल्बिषः योऽनन्तानन्तप्रतिबन्धकपापमल अत एव संस्कारोपचयानुगुण्यपर्वयानेकैर्जन्मभिः संसिद्धः संस्कारातिरेकेण पुण्यातिरेकेण च प्राप्तसर्वसाधनः स पुण्येन परिपाकाद्याति परां ब्रह्मरूपां गतिं मुक्तिं ४५॥

४५

क्रमसमैवजयन्तीटीका

एवमैहिकीं सत्त्वसम्पत्तिमुक्त्वामुत्रिकीमाह प्रयत्नादिति तच्छब्दः तत्र वाचकोऽयं शब्दार्थः अयैहिकसत्त्वमाद्यं नेतरं प्रयत्ना। पूर्वजन्मकृतयत्नादपि विघ्नभयान्नावधानेन यत्नप्रकर्षेणाधिकतरेण प्रयत्नादनिरूढाभ्यासे योगान् यतमानः विक्षेपभयाद्वारंवारंप्रेत्य कुर्वन् संशुद्धकिल्बिषः विषयवासनारूपपापेन समतया अनेकजन्मसंसिद्धः एवं निर्विघ्नेन प्रयत्नेन प्राप्तसकलसपरिकरसाधनैरनेकैरपरिमितैः कृतपुण्यपुञ्जैर्जन्मभिर्विद्याभक्तिसत्त्वविसकलप्रसन्नसंसिद्धः सम्यक्परिपक्वयोगः सन् योगी आत्मदर्शी केनचिद्विघ्नेन प्रयत्नाच्चलितोऽपि ततः प्राप्तपरिपक्वयोगाद्धेतोः परां सर्वोत्कृष्टामात्मपरमात्मावलोकनरूपां गतिं मुक्तिं याति प्राप्नोति ४५

मधुसूदनीटीका

यदा चैवं प्रथमभूमिकायां मृतोऽपि अनेकभोगवासनाव्यवहितमपि विविधकारणमपि महाराजकुलेऽपि जन्म लब्ध्वापि योगभ्रष्टः पूर्वोपचितज्ञानसंस्कारप्राबल्येन कर्माधिकारमतिक्रम्य ज्ञानाधिकारी भवति तदा किं वक्तव्यं द्वितीयायां तृतीयायां वा भूमिकायां मृतो विषयभोगान्ते लब्धमहाराजकुलजन्मा यदि वा भोगम

कालेवत्स्वब्रह्मविद्यासग्णकुलजन्मायोगभ्रष्टः कर्माधिकारातिक्रमेणज्ञानाधिकारीभूत्वातत्साध
नानिसंपाद्यतत्फललाभेनसंसारबंधनात्मुच्यतइतिनिर्देनदाह ॥

+ प्रयत्नात्पूर्वकृतादप्यधिकमधिकंयतमानः प्रयत्नातिरेकेकु
र्वन्योगीपूर्वोपचितसंस्कारवान् तेनैवयोगप्रयत्नपुण्येनसंशुद्ध
किल्बिषः धौतज्ञानप्रतिबंधकपापमलः अतएवसंस्कारोप
चयात्पुण्योपचयाच्चअनेकजन्मभिः संसिद्धः संस्कारातिरेके
पुण्यातिरेकेणचप्राप्तचरमजन्मा ततः साधनपरिपाकाद्याति
परांप्रकृष्टांगतिंमुक्तिं नास्त्यैवात्रकश्चित्संशयइत्यर्थः [illegible]
[illegible]

सदानन्दी [illegible]टी·

योगभ्रष्टोवंजन्मलब्ध्वाब्रह्मविदांकुले ततस्तत्राधिकारीसन्ज्ञा
नसाधनतत्परः १ ज्ञानलाभेनसंसारबंधनान्मुच्यतेत्विति यतमा
नोधिकंयोगीयत्नात्पूर्वकृतादपि २ योगप्रयत्नपुण्येनधौतपा
पमलोभितः संस्कारोपचयात्पुण्योपचयाद्बहुजन्मभिः संस्का
रातिशयात्सिद्धः पुण्यातिशययोगतः लब्ध्वाश्चरमजन्मासोसा
धनातिशयात्ततः ४ साक्षात्कृत्यपरंतत्त्वंमुक्तिंप्राप्नोतिसद्गतिं ५ ४५

नीलकंठीटीका

एवंयोगभ्रष्टगतिमुक्त्वायोविषयेष्क्रियमाणोपिप्रयत्नेनयोगमे
वाभ्यसितुंप्रवर्ततेतस्यगतिमाह प्रयत्नादिति प्रयत्नान्मुहुर्हठात्
हठात्वायुनिरोधादिरूपात्ब्रह्मचर्यादिमुद्राविशेषाभ्यासाद्यतमा
मानः संशुद्धकिल्बिषोनिष्पापोभवति यदाहमनुः प्राणायामैर्द
हेद्देवानिति हठयोगानांसर्वेषांपापनिर्हरणयोगित्वेनतत्साक्षा
त्कारेसाक्षात्साधनत्वमित्यर्थः अतएवसः अनेकैर्जन्मभिः संसिद्धः
प्राप्तयोगोभूत्वाततः परांगतिंमोक्षंयाति एतेनचलक्ष्मीवानिरंशुदो
रितिपंचमोक्तेयत्नसूत्रितंतद्व्याख्यातं ४५॥

आनंदटीका

एतदेवसिद्धांतयति ततस्तद्वुद्धिसंयोगंलभतेपूर्वदेहिकमित्युक्तप्र
२ कारप्रवृत्तादेकस्मिंजन्मनिपरामप्राप्तेतंपुत्रादावात्मज्ञानाद्योगाद्य
नमानोयोगमनुतिष्ठन् अतएवसंशुद्धकिल्बिषः आपनायरभूमिज
यात्प्रक्षालितांतःकरणमलः अनेकैर्जन्मभिःसंसिद्धः योगसिद्धि
मारूढः ततःपरांगतिंयातिपरब्रह्माधिगच्छति ४५ [illegible]

गी॰
टी॰ष॰

४५ ॥

रामकंठीटीका

सशुनर्योगी ॥ --- प्रयत्नाद्योगाद्यतमानो योगमनुतिष्ठंस्तदनुष्ठानसंस्कारवशाच्च संशुद्धकिल्बिषः प्रक्षालिताज्ञानमयकलंको बहुभिर्जन्मभिः परां काष्ठामधिरूढेनात्मदर्शिज्ञानेन ततोनन्तरं संसिद्धः सम्यक्प्राप्तप्रापणीयः परां गतिं परमात्मसमापत्तिलक्षणां प्रकृष्टां भूमिं प्राप्नोति यतः परं गम्यान्तरं न विद्यते ४५

लासिकी टीका

तर्ह्यतिरेके यस्तु योगी प्रयत्नादुत्तरोत्तरमधिकं यतमानः परमात्मसमाधानमावर्तमानः अत एव संशुद्धकिल्बिषो विगतकर्मबंधनो नेकजन्मसंसिद्धोनेकेषु जन्मसूपचितेन योगेन संसिद्धः सम्यग्दृष्टतत्त्वलक्षणज्ञानोत्कर्षं प्राप्तः सन् ततः संसिद्ध्यनन्तरमेव परां गतिं मोक्षाख्यां प्राप्नोति न पुनरभ्यासक्रममपेक्षत इत्यर्थः तदुक्तम् यथाग्निः पांज्वलनो हुतमश्नुते यथा यात्यनुकैर्न समयैः अज्ञानपंकेपि तथा निरस्ते कालेन कैवल्यमुपैति देहीति ४५

पंचोलीटीका

सातानुयोगमाश्रितः फलविशेषमाह प्रयत्नादिति नपुनः योगी प्रयत्नादधिकं यतमानः संशुद्धकिल्बिषः निर्दग्धपापः अनेकजन्मसंसिद्धः अनेकजन्माभ्याससंस्कारोपचयेन संसिद्धः सम्यग्दर्शनस्ततस्तदनंतरं परां मोक्षाख्यां गतिं याति गच्छति ४५ ॥

रणवीरसमिद्धोधिनी ॥

अथैतस्य गतिं स्पष्टयति प्रयत्नादिति प्रकृष्टयत्नात्कायवाङ्मनोभिः समेत्योत्तरोत्तरमधिकं यतमानः स्वकर्मणि व्याप्रियमाणो योगी कर्मकौशललक्षणाद्योगाद्दृढः संशुद्धकिल्बिषः अन्तराय

भूतजन्मांतरार्जितपापकर्मभ्यः शुद्धः सन् यतोनेकजन्मसंसि
द्धः अनेकेषु जन्मसु सम्यक्सिद्धः इत्थंभूतयत्नविषयनिश्चय
त्वेन कर्मयोगेऽप्युत्तमो योगारूढ इति यावत् अनंतरं परां गति
मुत्तमामैहिकीमामुष्मिकीं च सर्वप्रधानां गतिं प्राप्नोति ४५॥

मध्वभाष्य

प्रयत्नादिति जिज्ञासुतो प्रयत्नं करोति एकमनेकजन्म
भिः संसिद्धोपरोक्षज्ञानीभूत्वा परां गतिं याति आह च अतीव
प्रहृष्टया युक्तो जिज्ञासुर्विष्णुतत्परः ज्ञात्वा ध्यात्वा तथा दृष्ट्वा जन्म
भिर्बहुभिः शुभान् विशेषान्नारायणं देवं नान्यथा तु कथंचनेति
नारदीये ज्ञानिभ्यः योगज्ञानिभ्यः तपस्विभ्यः कृच्छ्रादिचारि
भ्यः उक्तं च कृच्छ्रादेरपि यज्ञादेर्ध्यानयोगो विशिष्यते तत्रापि शे
षश्रीब्रह्मशिवादिध्यानतो हरेः ध्यानं कोटिगुणं प्रोक्तमधिकं
वा मुमुक्षुणामिति गारुडे अज्ञानात् ध्यायिनो ध्यानाज्ज्ञानमेव
विशिष्यते ज्ञात्वा ध्यानं ज्ञानमात्रान्ध्यानादपि तु दर्शनं दर्शना
देव भक्तेश्च न किं चित्तायनाधिकमिति नारदीये ४५॥

208

भाषा अनुवाद

जिस हेत मद यत्नकारी योगी श्रेष्टगति प्राप्त होते हैं तो उ
त्तरोत्तर योग से अधिक यत्न करने वे योग से निःपाप होय
अनेक जन्म संचित योगसे संसिद्ध अर्थात सम्यक ज्ञानी हो
य श्रेष्टगति पावैंगे इस मे और कुछ कहना या संदेह वा को
है सोई कहा कि अच्छी तरहसे यत्न करता योगी सो संशुद्ध ।
किल्बिष निःपाप अनेक जन्मसे सम्यक सिद्ध होय फेरि परम
गति को पाता है ४५ ॥

दोहा

यत्न करतसो यत्नसें योगी शुद्ध विनपाप जन्मअनेक संसि
द्धिसें परमगतिलहैं आप ४५ ॥

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ४६

शांकरभाष्य

तस्मादेवं तस्मात् तपस्विभ्य इति तपस्विभ्योऽधिको योगी ज्ञानिभ्यो
ऽपि ज्ञानमत्र शास्त्रार्थपाण्डित्यं तद्वद्भ्योऽपि मतो ज्ञातोऽधिकः श्रेष्ठः
इति कर्मिभ्यः अग्निहोत्रादि कर्म तद्वद्भ्योऽधिको योगी विशिष्टः त
स्माद्योगी भवार्जुन ४६ ॥

आनन्दगिरिकृतटीका

सम्यग्ज्ञानद्वारा मोक्षहेतुत्वे योगस्योक्तमनूद्य योगिनः सर्वाधिकत्व
माह यस्मादिति योगस्य सर्वस्मादुत्कर्षो स्वफलकर्तव्यत्वाय योगिनः
सर्वाधिकत्वं साधयति तपस्वीति योगिनो ज्ञानितश्च पर्यायत्वात् क
थं तस्य ज्ञानिभ्योऽधिकत्वमित्याशंक्याह ज्ञानमिति योगिनः सर्वाधि
कत्वे फलितमाह तस्मादिति ४६ ॥

स्वामिकृततीका

यस्मादेवं तस्मात्तपस्विभ्य इति कृच्छ्रचान्द्रायणादितपोनिष्ठेभ्यः ज्ञा
निभ्यः शास्त्रज्ञानवद्भ्योऽपि कर्मिभ्य इष्टापूर्तकारिभ्योऽपि योगी श्रेष्ठोऽभि
मतः तस्मात्त्वं योगी भव आत्मविद्भव ४६ ॥

पैशाचभाष्य

[illegible] तस्मादेवं तस्मात् तपस्विभ्योऽधिको योगी ज्ञानं मया [illegible] शास्त्रार्थ
[illegible]पाण्डित्यं तद्[illegible]द्भ्योऽपि मतः ज्ञा[illegible] अधिक इति कर्मिभ्योऽग्निहो
त्रादि कर्मिभ्यस्तद्वद्भ्योऽधिको योगी तस्माद्योगी भवार्जुन ४६ ॥

रामानुजभाष्य

अतिशयितपुरुषार्थनिष्ठतया योगिनः सर्वस्मादाधिक्यमाह तप
स्विभ्य इति केवलतपोभिर्यैः साध्यते आत्मज्ञानव्यतिरिक्तज्ञानेनार्थः
कश्च तत्केवलैरश्वमेधादिभिः तेभ्यः सर्वेभ्योऽधिकपुरुषार्थसाधनत्वा
द्योगस्य तपस्विभ्यः ज्ञानिभ्यः कर्मिभ्यश्चाधिको योगी तस्माद्योगी भ
वार्जुन ४६ ॥

अभिनवगुप्तकृतटीका

योगस्य प्राधान्यमाह तपस्विभ्य इति तपस्विभ्योऽधिकत्वे सर्वमेव सवि

ᐟभ्यः

ᐟदिकर्म

गी.
टी.
व.

ते ज्ञानिभ्योऽधिकत्वं ज्ञानस्य योगफलत्वात् कर्मिभ्य उत्कर्षः स एव कर्माणि
कर्तव्येति नवतिरीक्षं कष्टयोगमाइ सेविहिरमिमन्यते ४६ ॥

परमार्थप्रपाटीका

~~किंच तपःप्रभृतिभ्य आह तपस्वीति अष्टाङ्गयोगाभ्यासः ...~~
तपस्विभ्य इति तपस्विभ्यः
कृच्छ्रचान्द्रायणादितपोनिष्ठेभ्यः ज्ञानिभ्यः शास्त्रविद्भ्यः कर्मिभ्य इष्टा-
पूर्तकारिभ्योऽपि योगी श्रेष्ठोऽभिमतः तस्मात्त्वं योगी भव ४६ ॥

वनमालीटीका

योगिनस्तौति तपस्वीति तपस्विभ्यः कृच्छ्रादिनिष्ठेभ्यः अधिक उत्-
कृष्टो योगी तत्त्वज्ञानेन तदनिरोधेन मनोनाशवासनाक्षयकारी योगी
तत्त्वज्ञानिभ्योऽपि श्रेष्ठो मतः कर्मिभ्योऽपि ज्योतिष्टोमाद्यनुष्ठातृभ्यश्चा-
धिको योगी कर्मितपस्विभ्यो गरीयस्त्वेनमोक्तानर्हत्वात् ज्ञानिभ्यः परो-
क्षज्ञानवद्भ्योऽप्यपरोक्षज्ञानवानधिको मतः मम संमतः यस्मादेवं त-
स्मात्त्वमपि कायिकमयत्वबलात् योगभ्रष्टदशां गीतवान् तत्त्वज्ञानमनोनाशवा-
सनाक्षयैस्त्रिगणतसंपन्नः योगी जीवन्मुक्तोऽयं स योगी परमो मत इ-
ति शाकुन्तः सत्वं दृढो भव साधनपरिपाकात् ४६

ऊस्तमांजलीटीका

आत्मेतरविषयेभ्यस्तपोज्ञानकर्मादिसाधनेभ्यः फलानुसंधानरहि-
तस्य ज्ञानगर्भस्याष्टाङ्गयोगशिरस्कस्य कर्मयोगस्याधिक्यमाह त-
पस्विभ्य इति हे अर्जुन यस्मात् तपस्विभ्यः आत्मविषयव्यतिरिक्तेभ्यः
कृच्छ्रचान्द्रायणादितपःकर्तृभ्यः ज्ञानिभ्यः आत्मविषयेतरेभ्यः केव-
लार्थशास्त्रज्ञेभ्यः कर्मिभ्यो भगवदाराधनव्यतिरिक्तकेवलाश्वमेधा-
दिकर्मकर्तृभ्यश्चापि योगी उक्तलक्षणयोगनिष्ठोऽधिकः श्रेष्ठतमो मतो
मम सम्मतो भवति तस्मात्कारणात्त्वमपि योगी योगानुष्ठाननिष्ठो भव ४६ म

मधुसूदनीटीका

इदानीं योगी स्तूयते तेन प्रतिश्रद्धातिशयोत्पादनपूर्वकं योगविधानम् ॥
तपस्विभ्यः कृच्छ्रचान्द्रायणादितपःपरायणेभ्योऽप्यधिक उत्कृष्टो यो-

गीनत्वज्ञानोत्पत्त्यनंतरं मनोनाशवासनाक्षयकारीविद्ययानराशेरहंति
यत्रकामाः परागताः तत्रचंदतिल्लणांयोगिनांविदांसमस्तपस्विनस्तिष्ठ
ते: श्रुतयएवकर्मिभ्योऽदतिणामहितज्योतिष्टोमादिकर्मानुष्ठायिभ्यश्चा
धिकोयोगीकर्मिणोतपस्विनोवास्त्वेवमेतावतासेतान् तानिभ्योपि

व परोक्षज्ञानवद्भ्योपरोक्षज्ञानवानधिकोमनोयोगीएवमपरोक्षज्ञान
वद्भ्योपिमनोनाशवासनाक्षयाभावाज्जीवन्मुक्तेभ्योमनोनाशवा
सनाक्षयवत्त्वेनजीवन्मुक्तोयोग्यधिकोमतः ममसंमतोयस्मादेवंत
स्मादधिकप्रयत्नवत्तालाभंयोगभ्रष्टस्सानीनवज्ञानमनोनाशवास
नाक्षयैर्युगपत्संपादितैर्योगीजीवन्मुक्तोयः सयोगीपरमोमत
इतिमार्गकः सनाहृश्यप्रभवसाधनपरिपाकात् हेयर्जुनेतिमुहुरिति
संबोधनार्थः ४६ ~~[illegible]~~

सदानंदीटीका

श्रेष्ठाधिकोदयायाद्ययोगीसंस्तूयतेयुक्ता तपःकृच्छ्रोपवासादिनम
रेभ्योपियोगयसो । उत्कृष्टब्रह्मविद्यावीनिवृत्तिकनगायनः ज्योतिष्टोमा
दिकर्मानुष्ठायिभ्यश्चाधिकोमतः २ सोत्रानहृत्तयासत्वात्कर्मिणांत्व
तपस्विनां परोक्षज्ञानवद्भ्योप्यपरोक्षज्ञानिनोवराः ३ तेभ्योप्येवंमनो
वा नाशसनाक्षयसंयुतः जीवन्मुक्तोमुनिर्योगीश्रेष्ठःसर्वोत्तमोमतः ४ ४६

नीलकंठीटीका

एवंयोगिनंस्तौति तपस्विभ्यइति तपस्विनोःव्रतकृच्छ्रचांद्रायणमासो
पवासादिकर्त्तारः ज्ञानिनःशास्त्रीयपांडित्यवंतः कर्मिणोग्निहोत्रा
द्यनुष्ठातारः तेभ्यःसर्वेभ्योयोगीयतोधिकोमतस्तस्माद्योगीभव
र्जुन ४६॥

योगः फलस्पृहांविनाकर्मकरणत्र आनंदीटीका किः योगश्चित्तवृत्तिनिरोधश्चेत्युभयार्थयोगिनंसर्वोत्कर्षे
एणस्तौति- एतत्रियस्यापिकेवलस्यतपसोमुनीनांज्ञोपादिनात्तयश्रवणाद्योगी
ज्ञानकर्मसमुच्चयानुष्ठातासंयमीतपस्विभ्योधिकतरश्रेष्ठः ज्ञानिभ्यः
विहितकर्मसंयमंचत्यक्त्वाब्रह्मज्ञानपरेभ्योप्यधिकोयोगीकर्मिभ्यः ज्ञा
नंसंयमंचविनाकेवलंयज्ञादिकंकर्मस्वर्गादिकामनयाकुर्वद्भ्योप्यधिको
योगीतस्माद्योगीभवार्जुन सर्वेषामेषांफलस्यसाल्लायतमनत्ववत्वं

वयोगिनस्तुनिर्विघ्नमनंतफलमिच्छता कर्तः योगी भवेति वक्तुमाउ
क्तस्य वक्ष्यमाणस्य ज्ञानकर्मणोः समत्व यस्मात् ज्ञानपरो भव एतद
नुष्ठानसिद्ध्यर्थमष्टांगयोगाभ्यासी भवेति ज्ञानकर्मसमत्वयानुष्ठा
नोपदेशाद्युक्तो भवेत्यर्जुनं प्रति भगवद्गिरो योगः ४६ [illegible]
[illegible]
[illegible] ४६ ॥

एवंविधस्य कर्मयोगिनः प्रशंसार्थमाह ॥

रामकंठीटीका

स्वतीव्रस्यापि तपोमात्रस्यानंतफलत्वात्तपस्विभ्यो योगी नित्यनिर
तरानंदमयसमाधिमानधिकः प्रकृष्टः ज्ञानिभ्योपि केवलं ज्ञानमात्र
पारगेभ्यः तथा कर्मिभ्यो यज्ञादिकेवलकर्मवद्भ्योधिकः तस्मा
त्वं यथोपदिष्टं योगं स्वीकृत्य सर्वोत्कृष्टो योगी भव [illegible]
[illegible]
[illegible] ४६ ॥

अथ योगिनं प्रशंसति ॥

लासिकी [illegible]टीका

तपस्विभ्यः कृच्छ्रचांद्रायणादितपोनिष्ठेभ्यो ज्ञानिभ्यः परोक्षज्ञानस
हितेभ्यः शास्त्रज्ञानवद्भ्योपि कर्मिभ्यः इष्टापूर्तादिकारिभ्योपि परमात
मनात्ज्वरस्य योजनं योगः इति योगशास्त्रस्य मुख्यो व्यापारः तदुक्तं कु
लार्णवे ऐक्यं जीवात्मनोराहुर्योगं योगविशारदा इति अस्य तत्र ह्रियो
गादेर्गौणत्वात्तस्य प्रयोगः सविद्यते यस्येति योगी अनंतफलत्वादप
रोक्षज्ञानवत्त्वान्मोक्षलाभहेतुत्वाच्च श्रेष्ठो मतः तस्मात्त्वं योगी आत्मस्वप्रम
न्नो भवेत्यर्थः [illegible] ४६ ॥

पंचोलीटीका

यस्मादेवं तस्मात्तपस्विभ्य इति हेअर्जुन यस्मात्तपस्विभ्यस्तपः कृच्छ्र
चांद्रायणादि तदनुष्ठातृभ्यो योगी अधिकः ज्ञानिभ्योपि ज्ञानेन शास्त्रज
नितेन तत् युक्तेभ्योप्यधिकः कर्मिभ्यः कर्म अग्निहोत्रादिकं तेन तत् युक्ते
भ्योपि योगी आत्मवित् अधिकः तस्मात्कारणात् आत्मवित् भव ४६ ॥

रणवीरसमिद्धोधिनी ॥

अथैवमाहात्म्याय वर्णनेनार्ज्जुनाय तत्रैव प्रवृत्तिं रोचयति त
पस्विभ्य इति कृच्छ्रचान्द्रायणादिकं तपः शास्त्रार्थवेदनं ज्ञानं
इष्टापूर्तरूपं कर्म तत्त्रितयविशिष्टेभ्योपि कर्मयोगी अधिकः
श्रेष्ठो मतः हे अर्ज्जुन अवदातबुद्धे त्वं योगी कर्मनिष्ठो भव स्ववर्णा
श्रमोचितकर्मणि तत्परयापि ४६ ॥

मधुभाष्य

४६ ॥

भाषा अनुवाद

जिस कारण ऐसा है कि कृच्छ्रचान्द्रायण आदि तपमे निरत औ शास्त्र से जो ज्ञानी इनसे भी योगी अधिक है तथा यज्ञ कुंवा ताल बाग दान कर्म्मकारी जो कर्मी तिससेभी अधिक है हमारे मतमे योगी इससे हे अर्जुन योगी होउ ४६ ॥

दोहा

अधिकतपस्विसें योगीहै अधिक ज्ञानीसें मान अधिककर्मि
सें योगीजो तोहो पार्थ योगी प्रमान ४६ ॥

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावा
न्भजते यो मां स मे युक्ततमो मतः ४७ ॥

इति श्रीभगवद्गीतायोगशास्त्रे श्रीकृष्णार्जुनसंवादे
ध्यानयोगोनाम षष्ठोऽध्यायः ६ ॥

शांकरभाष्ये

योगिनामिति योगिनामपि सर्वेषां रुद्रादित्यादिध्यानपराणां मध्ये
मद्गतेन मयि वासुदेवे समाहितेनान्तरात्मनान्तःकरणेन श्रद्धावान्स
न्भजते सेवते यो मां स मे युक्ततमोऽतिशयेन युक्तो मतोऽभि
प्रेत इति ४७ ॥ इति श्रीमद्भगवद्गीताभाष्ये षष्ठोऽध्यायः ६ ॥

(margin: श्रद्दधानः)

आनन्दगिरिकृतटीका

तत्वादिभ्यो विराडन्ता सर्वे कारणमक्षरमिति तेषामुपासका भूयांसो
योगिनो गम्यन्ते तेषां कतमः श्रेयानित्याशङ्क्याह योगिनामिति यो भ
गवन्तं सगुणं निर्गुणं वा यथोक्तेन चेतसा श्रद्दधानः सन्भजत्यनुस
न्धत्ते स युक्तानां मध्येऽतिशयेन युक्तः श्रेयानीश्वरस्याभिप्रेतः नहि त
तो योगिश्रेयो मय्या भवितुमर्हतीत्यर्थः तदनेनाध्यायेन कर्मयोग
स्य संन्यासहेतोर्मर्यादां दर्शयता साङ्ख्ययोगं विवृण्वता मनोनिग्र
होपायोपदेशेन योगभ्रष्टस्य ऐहिकनाशशङ्कां च शिथिलयता
त्वंपदार्थाभिन्नस्य ज्ञाननिष्ठतोऽस्य वाक्यार्थज्ञानान्मुक्तिरिति साधितं ४७
इति श्री आनन्दगिरिकृतटीकायां षष्ठोऽध्यायः ६ ॥

स्वामिकृतटीका

योगिनामपि यमनियमादिपराणां मध्ये मद्भक्तः श्रेष्ठ इत्याह योगिना
मिति मद्गतेन मय्यासक्तेनान्तरात्मना मनसा यो मां वासुदेवं परमेश्वरं
श्रद्धायुक्तः सन् भजते स योगयुक्तेषु श्रेष्ठो मम संमतः अतो मद्भक्तो
भवेति भावः ४७ आत्मयोगमवोचद्यो भक्तियोगशिरोमणिं तं
वंदे परमानंदं माधवं भक्तशेवधिं ॥ इति श्रीभगवद्गीतायां सुबो
धिन्यां टीकायामात्मसंयमयोगो नाम षष्ठोऽध्यायः ६ ॥

पैशाचभाष्ये

गी. टी. श्री.

योगिनामपिसर्वेषां रुद्रादित्यादिदेवतानां मद्गतेनवासुदेवे मयि समागतेनान्तरेनान्तरात्मना अंतःकरणेनश्रद्धावान्भजतेमांसमेयुक्ततमः अति
शयेनयुक्तोमतोऽभिप्रेतइति ४७ ॥ इतिपैशाचभाष्येषष्ठोध्यायः ६

रामानुजभाष्यं

तदेवंपरविद्यांगभूतंप्रजापतिवाक्योदितंप्रत्यगात्मदर्शनमुक्तं अथा
परविद्यांप्रस्तौति योगिनामिति पंचम्यर्थेषष्ठी सर्वेभ्यस्तपस्विज्ञा
दिनांचसर्वेषांयोगिनःप्रतिपादिताः तेषुतेनमतत्वाहत्वमात्मयो
गिनोऽतनिर्धारणेषष्ठीभवति अपिसर्वेषामितिसर्वशब्दनिर्देशात्तपस्वि
प्रभृतयः तत्रापुरुषार्थापेनपंचम्यर्थोगृहीतव्यः योगिभ्योऽपिसर्वेभ्योवक्ष्य
माणोयोगीयुक्ततमत्वरूपेणतयावरत्वेनप्रतिपिपादयिषितोयोगिनांचतत्कि
वत्विशेषस्मरार्थः सोऽत्रम्येनयाविषयाणामिवव्यस्तविषयेषमोमस्तु
नाधिकभावोविद्यतेतथामेरुतापेक्षयावरत्वेनसर्वेषामपिवयपपि
सर्वेषांमोऽन्यूनाधिकभावोविद्यतेनयापिमेरुतापेक्षयावरत्वनिर्देशः
समानः मत्प्रियत्वातिरेकेणानन्यसाधारणस्वभावतयामद्गतेनान्त
रात्मनामनसावाञ्छाभावेनरसकलहसितविशेषाश्रयभूतेमनोऽस्मरना
न्नाश्रयार्थंमत्प्रियत्वेनमयाविनात्मधारणालाभान्मद्गतेनमनसाश्र
द्धावानत्यर्थंमत्प्रियत्वेनक्षणमात्रवियोगासहनतयाततामिमुखो
त्वरावान्योमांभजतेमांभजतेमांविविधचेतनाचेतनभोग्यवर्गभोगोपक
रणभोगस्थानपरिणतनिखिलजगदुदयविभवलयलीलमस्पृष्टाशे
षदोषमनवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजः प्र
भृत्यसंख्येयकल्याणगुणगणनिधिंस्वाभिमतानुरूपैकरूपाचिंत्य
दिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौगंध्यसौकुमार्यलावण्ययौवनाद्य
नंतगुणनिधिदिव्यरूपंवाङ्मनसापरिच्छेद्यस्वरूपस्वभावमपारकारुण्य
सौशील्यवात्सल्यौदार्यमहोदधिमनालोचितविशेषलोकशरण्य
प्रणतार्तिहरमाश्रितवात्सल्यजलधिमखिलजननयनविषयतांगतम
जहत्स्वभावंवसुदेवगृहेऽवतीर्णमनवधिकातिशयतेजसानिखिलज
गद्भासयंतमात्मकांत्याविश्वमाप्याययंतंभजतेसेवते उपास्तइत्यर्थः।
समेयुक्ततमोमतःसर्वेभ्यःश्रेष्ठतमइति सर्वंसर्वदायथावस्थितंस्व
तएवसाक्षात्कुर्वन्नहंमन्ये ४७ ॥ इतिश्रीमद्रामानुजाचार्यवि।

इति तेगीताभाष्ये षष्ठोध्यायः ६ ॥

नवनिनीश्वरं कृष्णयोगमार्वं संसि अभिनवगुप्तकृतटीका द्विसमिप्युच्यते

योगिनामपीति सर्वयोगिमध्ये यएवमंमंतःकरणेनिवेश्यभक्ति
श्रद्धान्मदीयगुरुचरणसेवालब्धसंप्रदायक्रमेणमामेवनान्यद्भजते
विमृश्यतेसएवकृतमहतिसेश्वरस्यसाक्षात्सर्वप्राधान्ययुक्तमिति
शिवम् ४७ संग्रहोत्र भगवन्नामसंप्राप्तिमात्रात्सर्वमवाप्यते फ
लिनाःफालयःसम्यग्ह्येमाडेवलोकिते इतिश्रीमहाज्ञानकाभि
नवगुप्तविरचितेषष्ठोध्यायः ६ ॥

परमार्थप्रपाटीका

तपयमनियमपरायणानांयोगिनामपिमद्भक्तःश्रेष्ठतरस्तद्योगि
नामिति मद्गतेनमय्यासक्तेनांतरात्मनामनसायोमांपरमेश्वरंश्रद्द
धायुक्तःसन्भजतेसयोगयुक्तेषुश्रेष्ठोममंमतःश्रेनोमद्भक्तोभवेति
भावः यतोमद्भक्तोमत्प्रसादेनसकलसाधनयोगपद्यवान्स्वतएव
भवनीत्यर्थः श्रुतिरपियोगेयोगेतवस्तरेवाजेवाजेहवामहे सखा
यइंद्रमूतयइति भाष्यंश्रुतःशेषः प्राणापानयोर्योगेमनःपवन
योर्वायोगेवःसाध्येसति यत्नस्तत्रविघ्नकर्तृभिःकामक्रोधादिभिः
सहयुद्धेवाजेसंग्रामेसमुपस्थितेसतिवयंत्वामिंद्रपरमात्मानं
हवामहे आह्वयामःकिमर्थं ऊतयेरक्षणार्थं निर्विघ्नार्थमित्य
र्थः किंभूतंत्वांतवस्तरं अतिशयेनरक्षितारं किंभूतावयं सखायःपर
मप्रेमास्पदत्वेनयासाः नइकं परोऽहिवृत्तेमवभीतिशंगयोगक्काम्रगो
विंदपदारविंदं ययेनरानांविषयानिहत्य ज्ञोशात्मभोरुहलोचने
ति ४७ इतिपरमार्थप्रपाटीकायांषष्ठोध्यायः ६ ॥

वनमालीटीका

इदानीमुक्तसर्वयोगिभ्यश्श्रेष्ठमसंप्रज्ञातसमाधिंशामंभाविर्भूत
स्वरूपत्वानंनश्रीहरिमत्रभवंतेतेलयाराववरविकिंद्रसेहसंततिन
चकृवैतयोगिनंसर्वोत्तमत्वेनवर्णयन्नुपसंहरतियोगिनामितिपंच
मष्ठीषष्ठी प्रागुक्तेभ्यःसर्वेभ्योयोगिभ्योमपिभगवति सदनेनगुणा
लयत्वप्रयानेतेलधाराववरविकिंद्रहनिप्रवासेजरान्मामनोयस्यताद

४७ योगिनामपि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावान्भजते यो मां स मे युक्ततमो मतः

प्यः सन् मां भजते मय्येवैतेन तथा रागवदविक्लिन्नस्नेहं संततिं कुरुते स मे युक्तत
मो मतोऽतिशयेन युक्तो मम संमतः श्रद्धावान् शुकदेवो नवाको विघास।
युक्तः भगवान्नारायणः सर्वान्तर्यामी परमानंदमूर्त्तिर्मम स्वामी प्राणा।
दिसद्गुणेभ्योऽपीष्टतम इति धीरागिणा विषयेष्विव स्वाभाविकानपायि
नीयस्वयुक्त्यानुकाले स्मं संयत्तान समाधौ स्वरूपतानेनैव मामनुभवति
समाहितचित्तैर्भक्तानां चिरमन् भक्तिमद्भ्यः श्रेष्ठो मे मम सर्वतस्स म
नो निश्चलोऽतो मद्भक्तस्यैव सर्वापेक्षया श्रेष्ठत्वात्तमपि मद्भक्तो भवेति भा।
वः कर्माधिकारमर्यादां सांगयोगे ध्ययं स्मृतः सभक्तो योगिषु श्रेष्ठ
इवदद्रमापतिः ४७ ॥ इति वनमालीटीकायां षष्ठोऽध्यायः ६ ॥

ॐ समवेजयन्तीटीका

तदित्थं परापररूपयोः प्रजापतिवाक्योदितयोर्विद्ययोर्मध्ये परविद्यारूपं
परविद्योपायभूतं जीवात्मस्वरूपदर्शनमभिधायेदानीं परविद्यास्वरूपं
पार्थसारथिर्भगवानाह योगिनामपीति योगिनामिति नीयपञ्चम्यर्थे ष
ष्ठी भवति न निर्द्धारणे यतस्सर्वभूतस्थमित्यादिषु यतद्विधेषु योगिषु वक्ष्य
माणस्य योगिनोऽन्तर्गतत्वाभावः तपस्विभ्य इति पूर्वोक्तोपक्रमसंबंधभं
गश्च न स्यात् यथा तपस्व्यादीनां परस्परं न्यूनाधिकभावोऽस्ति तथा वक्ष्यमा
णस्य योगिनोऽपि तत्त्रितयाणामध्ये यं पूर्वमइति वृ किंचिदपि कभावो
भवेदतो निर्द्धारणपक्षषष्ठी न तु पञ्चम्यर्थे इति चेन्न निर्द्धारणाधिकाया।
स्तथापि संभवात् तथाहि यथा सर्वगिरीणां गिरीणां मध्ये मेरुः
वर्वत्वेपि समेरोः सकाशाद्धरत्वमेव तथा च सर्वेषामिति सर्वशब्दनिर्दि
ष्टानां सर्वभूतस्थितमित्यादितपस्विप्रभृतीनां योगिनामस्मात् योगिनः
सकाशाद्धरत्वमेवातः पंचम्यर्थे केवषष्ठी संभवति न तु निर्द्धारणा
र्थिके सर्थः यः सर्वेषां सर्वेभ्यस्तपस्विप्रभृतिभ्यो योगिनां योगिभ्यो
मद्भक्तो वक्ष्यमाणो योगी श्रद्धावान् सन् मद्भक्तिप्रतिपादके श्रुतिस्मृ
त्याचार्यादिवाक्ये तु विश्वासस्य वकं श्रद्धावान् सन् मन्मात्मा वतिश्रय।
न्तरात्मना मद्गतेन मयि गतः प्राप्तो मद्गतस्तेन तथा निरतिशयमसि
लेनात्मनांचानुभवस्वभाववता प्रेमान्तरात्मनाविशिष्टवाय्यामर्थकरहति
विशेषाश्रयभूतं मनोऽन्तरात्मे त्युच्यते मस्मिपत्नातिरेकेण मद्वि

नात्क्षणमात्रमपि स्वधारणासहमानेन मनसा मां सकलवेदनाम्भ
कानन्तकोटिब्रह्माण्डोद्भवावनलयलीलेशस्य योनिमविज्ञानकला
प्राकृतस्वाभाविककारुण्यवात्सल्यसौशील्यार्जवमाधुर्यसौन्दर्यला
वण्यतेजोबलशान्तिकान्त्यादिमंगलगुणमहोदधिमनन्ताविमश
क्तिकं सकलक्लेशशेषसुरेशनरेशादिजीवनिकरभयाभयप्रदं विवि
धाध्यात्मादिसंसारतापतप्तनतानिरसनकैरवपोषणपूर्णकला
सारदशीतलकरं सजलजलदश्यामलातिसुभगसुन्दरनाभीरसरा
दरणीयदिविजमनुजमनोनयनानन्दकराननकं दर्पणद्युतिधरम
केकोपानन्ददंष्ट्रादामिनीद्युतिधरवरपीताम्बरधरं नूपुरकटिसूत्रहारके
यूरकटकांगुलीयककुण्डलकिरीटमुकुटाद्यलंकारालंकृतं गोपा
गनापांगपंकेरुहपूजितं नन्दनन्दनं स्वधर्मपालनायाधर्मविनाशाय
च प्रतियुगं नरहरिदाशरथ्याद्यनेककान्तिकमनीयशौर्यवीर्यकारु।
ण्याद्यनन्तगुणशक्तिविशिष्टाकृतिकं नयवेशोद्भवं वसुदेवसु
तं भजते सर्वस्माद्व्यावृत्तिश्रवणकीर्तनादिलक्षणाभिर्भक्तिभि
स्सेवते स मदेकशरणो मद्दर्शनकुतूहलवान् यो मदनन्यभक्तो युक्त
तमस्तपस्विप्रभृतयो युक्ता निष्कामकर्मिणो युक्ततराः मदेकभक्तास्तु
मे सर्वेभ्यः प्रतीकेभ्यो निरतिशयश्रेष्ठतमस्तस्मात्सर्वैः मे सकललोकादि
नावतारस्य सर्वेश्वरस्य सर्वनियन्तुः सर्वतस्पुरुषोत्तमस्य मम मतः
श्रुभिमतः सर्वेभ्यस्तपोयोगकर्मज्ञानादिसाधनवद्भ्यो मद्भक्तिमन्तो श्रे
ष्ठतमम मद्भक्तमेनाश्रमिन्त्यर्थः भक्तैः श्रेष्ठतमत्वं गुनयोप्यारुः भक्तिरस्य भज
नं तदिहामुत्रोपाधिनैरास्येनामुष्मिन्मनः कल्पनमेतदेव नैष्कर्म्यं श्रा
न्तानेमवलोकमुपासीत यात्मावाश्ररे दृष्टव्यः श्रोतव्यो मन्तव्यो निदि
ध्यासितव्यः यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्य
र्थाः प्रकाशन्ते महात्मनः इत्याद्याः ४७ कर्मयोगं कामसुसूक्ष्मं ज्ञान
गर्भं सविस्तरम् प्रावोचद्योऽजगद्योनिस्तं वन्दे पार्थसारथिम् १ ॥
इति श्रीकृष्णमवेजपत्नीगीताटीकायां षष्ठोऽध्यायः ६ ॥
ध्यानीसर्वयोगिश्रेष्ठं योगिनं मधुसूदनसरस्वतीटीका षट्कध्यायोपसंहार इति ॥
योगिनां वसुरुद्रादित्यादिक्षुद्रदेवताभक्तानां सर्वेषामपि मध्ये म

पि भगवति वासुदेवे पुण्यपरिपाकविशेषाज्जातेन प्रीतिवशान्निविष्टेन म
द्गतेनान्तरात्मनान्तःकरणेन प्राग्भवीयसंस्कारपाटवात्साधुसंगा
च्च मद्भजनपूर्व श्रद्धावानतिशयेन श्रद्दधानः सन्भजते सेवते सततं चि
न्तयति यो मां नारायणमीश्वरेश्वरं सगुणं निर्गुणं वा मनुष्योयमीश्वरो
न रसाधारणोयमित्यादिभ्रमं हित्वा स एवमद्भक्तो योगी युक्ततमः सर्
वेभ्यः समाहितचित्तेभ्यो युक्तेभ्यः श्रेष्ठो मम परमेश्वरस्य सर्वज्ञस्य मतो
निश्चितः समानेऽपि योगाभ्यासक्लेशे समानेऽपि भजनायासे मद्भक्तिशू
न्येभ्यो मद्भक्तस्यैव श्रेष्ठत्वान्मद्भक्तः परमो युक्ततमो नायासेन भवि
शङ्कास्ति इति भावः तदनेनाध्यायेन कर्मयोगस्य बुद्धिशुद्धिहेतोर्मर्या
दां दर्शयता तत्फलेन सर्वकर्मसंन्यासस्य सांगं योगविधिरेव मनो
निग्रहोपायं चासेयनिरासपूर्वकमुपदिशता योगभ्रष्टस्य पुरुषार्थ
भ्रंशनाशंकां च शिथिलयता कर्मकांडे त्वंपदार्थनिरूपणं च समा
पितं अतः परं श्रद्धावान्भजते यो मामिति सूचितं भक्तियोगं भजनीयं
भगवंतं वासुदेवं तत्पदार्थं निरूपयितुमग्रिममध्यायषट्कमारभ्य
त इति शिवं ४७ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवि
श्वेश्वरसरस्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीविरचितायां
श्रीभगवद्गीतागूढार्थदीपिकायां त्वंपदार्थनिरूपणं नाम षष्ठोऽध्यायः ६

सदानंदी टीका

सर्वयोगिवरिष्ठं श्रीशभक्तं श्रीशो वदन्हरिः उपसंहरतीदानीमध्यायं यो
गतत्परं १ योगिनां वसुरुद्रादिभक्तानां भेदवेन सा योगिनां वसुरुद्रा
दिभक्तानां भेदवेन सा सर्वेषामपि मध्ये यो वासुदेवमयीश्वरे २ पुण्य
पुंजोदयात्स्वमत्या विनिविष्टेनान्तरात्मना प्राग्भवार्जितसंस्कारपाटवा
त्साधुसंगमात् ३ श्रद्दधानः सदा भक्त्या चिंतयन्मादराख्यमां सगुणं नि
र्गुणं वापि नारायणमधीश्वरं ४ अनन्यभक्त्या परया स मद्भक्तो यतन्म
धीः सर्वेभ्यो युक्तचित्तेभ्यः श्रेष्ठोभिमतो मम हितः ५ सर्वज्ञस्य ममात्य
न्तनिश्चितो नात्र संशयः योगाभ्यासश्रमे तस्मिन्समाने भजनश्रमे ६
मद्भक्त्यैव मुख्यत्वं मम संरागमुक्तयोगिनः त्वे मद्भक्ततयानंतयुक्तो भवि
तमर्जेन ७ अनायासेन पीडेव शल्यसीमाशयोहरेः ८ योगीयोगव

लेनसेरतिमिमांसत्काल्मसोऽखेऽस्थितः कर्मीकर्मजलोकभोग
रसिकस्तस्मिंस्तुपापैरतः अस्माकंतुनवीननीरदरुचिर्मेदस्मि
न्नेताविनैगोगोपीजनवल्लभः स्वरनिधिः क्लमः पारणयोग
तिः ९४७॥ इतिसदानंदीटीकाषष्ठोध्यायः ६॥

नीलकंठीटीका

सकामः कर्मप्रधानत्वं पदार्थविवेकः अतः परंउपासनाशाध्या
येनतत्पदार्थनिरूपयितुकामस्तदुपासनांमहाफलत्वेनस्तोति
योगिनामिति दैवमेवापरेयज्ञमित्यादिनावक्ष्याध्यायश्लोका
द्वादशयोगास्तद्वतांयोगिनांसर्वेषांमध्येयोमद्गतेनमयिवास
देवेसमर्पितेनअंतरात्मनाचित्तेनश्रद्धावान्सन्मांभजतेसमेम
मयुक्ततमोऽतिशयेनयुक्तःश्रेष्ठोमतोऽभिप्रेतः तस्मान्मद्भक्तो
भवेतिभावः ४७॥ इतिश्रीनीलकंठीटीकासमाप्तः ॥

आनंदीटीका

सर्वेभ्योपियोगिभ्यः परमेश्वरैकप्रणिहितचित्तोयोगीश्रेष्ठतमइतिदर्शयन्नध्यायार्थमुपसंहरति॥

यः श्रद्धावान्नवश्यमीश्वरप्रणिधानेनपविता योगात्कृतार्थःस्या
दितिनिश्चयवान् मद्गतेनांतरात्मनाप्रतिपादितप्रमाणसंयमात्
मेदकनिष्ठेनमनसामांभजतेसमेसर्वेषामपियोगिनांममातिश
यितोयोगीसतः लब्धशीघ्रायायाश्रद्धायाउद्देश्यायमितिसिद्धं।
यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयो
ष्टावंगानियोगस्तेतियमादिपंचकंबहिरंगं ध्यानादित्रयमंतरं
गम् तथाहियमनियमैर्मनसोवाह्यगतीर्निरुद्ध्यआसनेनभौतिक
पिंडात्मनः समरसत्वमभिसंपाद्यप्रत्याहारेणेंद्रियाणिवशीकृत्य
ध्यानेनबुद्धिधाम्निमनोनिवेश्यधारणयातत्रस्थिरीकृत्ययुक्तस्यम
नःसमाधिनाचपुरुषप्रकाशसामीप्योपलब्धिस्थानेकैवल्यमाधि
देनुः संप्रज्ञातयोगोपलब्धिरितियोगानुशासनवाक्यार्थसंग्रहः संग्र
र्हमेतदुद्देशापर्वं ४७॥ इतिश्रीआनंदीटीकाषष्ठोध्यायः ६॥

षष्ठोध्यायः

येकेचनयोगिनोदर्शनभेदात्संभ मरंतिग्र निण दय रामकंठीटीका वंतितेषामध्ययमेवंविधोयोगीप्रक्र नध्यायश्रुपसंहरति ॥

समस्तयोगिनांमध्येसयोगीयुक्ततमोतिशयेनयुक्तःसमाहितोम ममतः कोसौयःश्रद्धावान् सर्वसिद्धिहेतभूतयाश्रद्धयायुक्तः म द्गतेनान्तःतरात्मनाध्यायप्रतिपादितज्ञानगम्यामांपरमात्मानमी। श्वरमेकंतत्त्वंपरमोपेतयोगेनप्रपन्नेनान्तःकरणेनभजन्तेवाद्भुतः तं कंथञ्चापारात्मनस्वरेणवज्रर्वस्मद्भक्तोभवति यथोक्तज्ञानविधिना यथोक्तमत्स्वरूपाश्रगमसर्वंमामेवयतउपास्ते सएवसमाहितत मः इत्येवम् यातायस्माद्भावंदयतियदिपरंयोगतामन्ययोगास्तं योगंज्ञानकर्मव्यतिकरस्तकराभ्यासवैराग्यगम्यम् तमपकसंप्रा प्तकामैः परमगुरुरितिश्रद्धयापर्यपास्यः षष्ठोध्यायोयमायैरव हितमतिभिस्त्वयुक्तसर्वार्थकार्यैः ४७ ॥ इतिश्रीरामकंठीटीका॰ यांषष्ठोध्यायः ६ ॥

लासिकी ~~रामकंठी~~टीका

योगिष्वपिमध्येविशेषोस्तीत्या ह॥ परमात्मनात्मेतनस्ययोजनंयोगःस्मृतं सचाधिकारिभूमिका भेदेनषोढा तत्रप्रथमोबहियोगःकर्मस्वध्यात्मबोधेसमाधानम् द्वितीयःकर्मयोगश्चारुरुक्षुविषयःकर्मस्वक्रियमाणेष्वध्यात्मनि समाहितत्वम् तृतीयोध्यानयोगःसर्वाश्रितहृत्तीनिरुध्यात्मन्येवैक तानतावचनर्थीमग्नाख्योयोगः आनन्दप्रादुर्भावपरःसरंपरमात्मस मापत्तिःसमाधिरूपापंचमोज्ञानयोगोयत्राहैतंप्रतिभासते सचाद्वि विपक्षेतनवर्गव्याप्तृत्वा चेतनाचेतनव्याप्तृत्वाच षष्ठोभक्तियोग ईश्वरंभक्त्याश्रित्यस्वात्मनिसमाहितत्वं कर्मसंन्यासयोगस्यविक ल्पनामभावेनशबलत्वयोरप्ककल्पविषयस्यकर्मयोगेंतर्भावः। संन्यासयोगस्यचविकल्पाभावेनज्ञानयोगेंतर्भावः एवंसर्वेषांयो गिनांयोगभूमिकानिष्ठानांमध्येयोगीश्रद्धावान् ईश्वरार्पितविश्व स्तःसन नतसाध्यरवेश्वरमपलयन्ततरूपमात्रपर्यवसितः मयि

श्रद्धागतात्मनिश्चितेनांतरात्मना मनसा मामीश्वरं भजते प्रेमातिशयादस्य
दंकरूते स योगिषु मध्ये परमः श्रेष्ठो मम मतो जीवन्मुक्तपदभाजनत्वात् तदु
क्तं समाधिसिद्धिरीश्वरप्रणिधानात् क्लेशकर्मविपाकाशयैरपरामृष्टः पुरु
षविशेष ईश्वर इति च तेश्वरस्य ज्ञानस्य सर्वप्राधान्यमुक्तम् यत्सर्वैर्गुरुभिः
स्तुतेव भवदुक्तमूनासवादाहोर्यस्य स्यात् परापिया दृश्यतामेतप्रतिरवा
मिज्ञामवसेवश्युक्तेनेति एवमेतावता ग्रन्थेनैतत्फलितं सांख्येन विनाबु
द्धियोगो न सिध्यति बुद्धियोगं विना कर्मयोगो न सिध्यति इत्येवं तेन विना
[illegible]ध्यानयोगस्तं विना भक्तियोगस्तं विना ज्ञानयोगः भक्तियोगस्तु सर्व
त्रभक्तानपद इति एवं सकारणात्मज्ञानस्य वनांतरीयकत्वं दृष्टव्यमिति अतएव
वयोगभूमिकाभेदेन शैवैः सप्त प्रमातारो व्यवस्थापिताः तदुक्तम् महा०
मंत्रेशमंत्रेशमंत्राश्शिवपुरोगमाः अकलौ सकलश्चेति शिवस्येता विभूतयः ४७
इति श्री[illegible]टीकायां षष्ठोध्यायः ६ ॥

पंचोलैटीका

उक्तराध्यायवीजं प्रतिपन्यमनियमपराणां मध्ये भगवद्भक्तस्य श्रेष्ठमा
ह भगवान् योगिनामपीति यः मद्गतेनांतरात्मना मयि वासुदेवे समा
हितेन मत्परेणांतःकरणेन श्रद्धावान् मां भजते स सर्वेषां रुद्रादित्यादि
पराणां योगिनां मध्ये मम युक्ततमः अतिशयेन युक्तो योगी स्तानीमे म
तः अभिप्रेतः ४७ इति श्रीपंचोले षष्ठोध्यायः ६

रसाचीरत्नमिहोधिनी ॥

योगिनामपीति सर्वेषां योगिनां कर्मयोगिनामपि मध्ये यः त्वति
यवीरः मद्गतेन परमेश्वरेणार्पितत्तद्वतारे स्वजात्युचितं कर्मानु
ष्ठितमिति स्ववर्णाश्रमोचित कर्माचरणे दृष्णांतीभूतं मां विषयी
कृतवतांतरात्मनांतः करणेन श्रद्धावान् पाणस्त्राचार्योपदेशोफ
लावमर्षभावनिश्चययुक्तः सन् मां सर्वेश्वरं भजते सिद्ध्यसिद्ध्ये

त्वांपरित्यज्यमत्स्वविंतोषणार्थंस्वधर्माचरणेनसेवते परमेश्वरो मेनेनप्रीयतामिति संकल्प्यस्वकर्मानुतिष्ठेदिति यावत् सचमा नू मे ममयुक्ततमः प्रशस्ततयोगारूढःसर्वेभ्यपाधीमो योग्यत मोवामतइतिभद्रं ४७॥ इतिश्रीरणवीरसमिद्धोधिन्यांश्री गीताव्याख्यायांषष्ठोध्यायः ६॥

मध्वभाष्य

४७॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्री मद्गीताभाष्येषष्ठोध्यायः ६॥

भाषा अनुवाद

योगियों के मध्य अर्थात् यम नियम परायण लोगोंके बीच
मे मेरा भक्त ही श्रेष्ठ है यह कहते हैं कि मै जो परमेश्वर सो म
ज्जन अर्थात् मेरे मे मन लगाय श्रद्धासे जो हम को भजे है मेरे म
न मे सोई श्रेष्ठ इस से अर्जुन तुम मेरे भक्त होउ श्रीधर स्वामी
प्रभु को प्रणाम करते हैं कि परमानन्द भक्त सेवित लक्ष्मीपति।
की मै वन्दना करता हूं जिसने भक्तियोग शिरोमणि रूप ध्यान
योग उपदेश किया है ४७ ॥

इति जगन्नाथ सुक्ल विरचितायां मनभावनीटीकायां षष्ठाध्यायः ६

दोहा

योगीके सम मध्यम हिं है मो मद जाको चित्त भजें जो श्रद्ध यु
त मोहि सो योग श्रेष्ठ मो मत ४७॥ इतिश्रीभगवद्गीताय